श्रीः

॥ शिवाभ्यां नमः ॥

इयं किल

श्रीमत्परमहंसपरिव्राजकाचार्यविश्वेश्वरसरस्वतीपूज्यपादशिष्य-

अद्वैतविद्याप्रतिष्ठापकनिरस्तविविधद्वैतवादिवितण्डसर्वज्ञ-

शिरोमणिश्रीमधुसूदनसरस्वतीकृतिः

श्रीमच्छङ्करभगवत्पादविरचित "दशश्लोकीव्याख्या"

॥ सिद्धान्तबिन्दुः ॥

श्रीब्रह्मानन्दसरस्वतीविरचितरत्नावल्याख्यटीकया

संवलितः

मुमुक्षूणां निखिलानर्थनिवृत्तिपूर्वकपरमानन्दाविर्भावलक्षणपरमपुरुषार्थानन्य-

साधनाद्वैतनिश्चयाय अद्वैतविद्वेषिणामुन्मूलनाय च विरचिता

श्रीमच्चम्पकारण्यवास्तव्यश्रीमहामहोपाध्यायबिरुदाङ्कित-

श्रीराजुशास्त्र्यपरनामकश्रीमत्त्यागराजमखिराज-

चरणांबुजसेवासमासादितब्रह्मविद्यावैशद्येन

श्रीगोष्ठीपुराभिजनेन

हरिहरशास्त्रिणा

संशोधिता च

कोनेरिराजपुरग्रामवास्तव्यसहृदयसमुदायदासेन

वि- साम्बशिवार्येण

कुम्भघोणस्थस्वकीय

श्रीविद्यामुद्राक्षरशालायाम्

मुद्राक्षरैरङ्कयित्वा प्राकाश्यं प्रापिता

समुल्लसतितराम्।

—:(*):—

मूल्यं रूप्यत्रयम् (प्रेषणव्ययः कलाचतुष्टयं च)

December 1893.

Price- ~~Rs~~, *Postage As. 4.*

विद्याशङ्करो
विजयते

श्रीमत्परमहंसपरिव्राजकाचार्यवर्यपदवाक्यप्रमाणपारावारपाराण
यमनियमासनप्राणायामप्रत्याहारध्यानधारणासमाध्यष्टाङ्गयोगा-
नुष्ठाननिष्ठतपश्चक्रवर्त्यनाद्यविच्छिन्नगुरुपरम्पराप्राप्तषड्दर्शन-
स्थापनाचार्यव्याख्यानसिंहासनाधीश्वरसकल निगमागमसारहृद
यसाङ्गचत्रयप्रतिपादकवैदिकमार्गप्रवर्तकसर्वतन्त्रस्वतन्त्रादिराज
धानीविद्यानगरमहाराजधानीकर्नाटकसिंहासनप्रतिष्ठापनाचार्य-
श्रीमद्राजाधिराजगुरुभूमण्डलाचार्यऋष्यशृङ्गपुरवराधीश्वरतुङ्ग-
भद्रातीरवासश्रीमद्विद्याशङ्करपादपद्माराधकश्रीमन्नृसिंहभारती
स्वामिगुरुकरकमलसञ्जातशृङ्गेरीश्रीसच्चिदानन्दशिवाभिनवनृसिं
हभारतीस्वामिभिः ॥

अत्यन्तप्रियशिष्यकुम्भघोणनगरवासिश्रीविद्यानिलयमुद्राक्षरशालाम्यानेजरइत्युप-
पदधारिसाम्बशिवशास्त्रिविषये श्रीनारायणस्मरणपूर्वकविरचिताशिषस्समुल्लसन्तुतराम्
आसेतुहिमाचलप्रसिद्धात्रभवच्छ्रीमच्छङ्करभगवत्पादपूज्यपीठाधिष्ठायिनी भक्तिरनवधि
कश्रेयोनिदानमिति सर्वजनविदितमेतत्साम्प्रतम् ॥ इह खलु कुपितफणिफणामण्ड-
लच्छायसच्छायेषु स्वक्चन्दनादिषु विषयेषु मोमुह्यमानतया जन्मजरानिधनाद्युप-
प्लवबहुले संसारचक्रे बंभ्रम्यमाणान् सकलानपि जनानुपलभ्य तदनुजिघृक्षया
श्रीमच्छङ्करदेशिकचरणैर्यमद्वैतविद्या ब्रह्मसूत्रभाष्यादिमुखेन प्रतिष्ठापिता शिष्यप्र-
शिष्यादिमुखेन सर्वतः प्रचारिता च, तदनु कालवशात् जरीजृम्भमाणैर्जान्तध्वान्ताद्य-
नेकमतप्रभेदैरसम्भावनाविपरीतभावनादिदोषकलुषिततया विरलप्रचारा समभवदिति
हेतोरसम्भावनादिदोषविधूननाय श्रीमद्विद्यारण्यमधुसूदनसरस्वतीब्रह्मानन्दसरस्वत्या-
दिभिर्विरचितैरनेकैः प्रबन्धैः सर्वतोव्याप्तैवासीत् सेयमिदानीं प्रबन्धानां बाहुल्येन
लिखितुं लेखयितुं च अशक्यतया कथञ्चिल्लेखनेऽपि लेखकप्रमादजनिताशुद्धिसंक्रा-
न्तिबहुलतया च शोधितानामपि तेषां सर्वत्र दौर्लभ्येन च विरलप्रचारा वरीवर्तीत्य-
स्यां दशायामद्वैतमहानिबन्धमालात्मिका विद्वद्भिस्सम्परिशोध्य मुद्रापयितुमारब्धा
एषा अद्वैतमञ्जरी शिरसि निदधाना श्रीमच्छङ्करदेशिकचरणानामाज्ञामाकलयन्ती
अद्वैतविद्यायास्स्वात्मनश्च सर्वत्र सुप्रचारं सफलयन्ती च प्रबन्धकृतां मुद्रापयितुश्च
प्रयासं अशेषानपि लोकानुपकुर्यादिति श्रीमच्छारदाचन्द्रमौलीश्वरादिदेवताः प्रार्थ-
यामहे. वि० आश्विनशुक्लअष्टम्यां सौम्यवासरे कडत्तूर्ग्रामे.

॥ श्रीः ॥

भू मि का

—:(*):—

आर्यमिश्राः!!

विज्ञातमेव खलु भवतां अतीतानेकभवपरम्परासमार्जितसुकृतसम्पदावार्जितभगवदनुग्रहासादितसत्त्वोत्कर्षाधीनाविवेकवैराग्यादिसाधनसम्पन्नैः प्राक्तनसुकृतसम्पत्त्यधीनविषयविशेषसम्पर्कप्रयुक्तसत्त्वोत्कर्षापकर्षरूपशुद्धितारतम्ययुक्तसुखरूपान्तःकरणवृत्तिप्रतिफलितस्वरूपानन्दरूपविषयानन्दमपि क्षणिकत्वेनानुमन्यमानैः श्रवणमननानिदिध्यासनाभ्यासनिर्धूतनिखिलप्रतिबन्धकानुबन्धैः पुरुषधौरेयैरेव प्राप्यमाणं वस्तुसच्चैतन्यमात्रत्वाविरोधिबद्धपुरुषाविद्याकल्पितनिरवग्रहैश्वर्यतदनुगुणगुणकलापविशिष्टनिरतिशयानन्दस्फुरणसमृद्धनिस्सन्धिबन्धपरमेश्वरभावापन्नं मात्रयापि दुःखदाविष्टं परमपुरुषार्थकाष्ठापन्नं नित्यनिरतिशयापरिच्छिन्नसुखमात्रस्वरूपमद्वितीयाखण्डचिन्मात्रप्रत्यगभिन्ननिर्विशेषात्मतत्त्वमजानन्तः इतरेतरभेदाग्रहेण आत्मानात्मनोरन्योन्यधर्म्यध्यासपुरस्सरमनात्मधर्मान् कर्तृत्वभोक्तृत्वादीन् आत्मनि आत्मधर्मांश्च चैतन्यादीननात्मनि चाध्यस्य नानाविधकुतर्ककुलचेतसः जननमरणप्रवाहपरम्परारूपे अनादिसंसारकूपे बम्भ्रम्यमाणाः मोमुह्यन्त एव प्रायेण जीवराशयइत्यतस्तानुद्दिधीषुर्भगवान् परमकारुणिकः परमेश्वरः 'यदा यदा हि धर्मस्य ग्लानिर्भवति भारत । अभ्युत्थानाय धर्मस्य तदात्मानं सृजाम्यह'मिति प्रतिज्ञातार्थपरिपालनाय 'चतुर्भिस्सह शिष्यैस्तु शङ्करोऽवतरिष्यति ।' इति सौरपुराणवचनानुसारेण बहोःकालात्पूर्वमेवास्मिन् कलियुगे श्रीमच्छङ्करभगवत्पादरूपेण गृहीतलीलामानुषविग्रहः अवतीर्य केरले कालटिग्रामे शिवगुरोरार्याम्बायामधीत्य चाद्य एव वयसि अखिलमप्यागमं अभ्यस्य च सर्वशास्त्राणि आश्रित्य चाद्याश्रमादेव पश्चिममाश्रमम् अनादृत्य च शारीरं प्रयासं अटित्वा चावनिमण्डलं अनुष्ठाप्य चाश्रमधर्मान् अनुबोध्य चाखिलागमतात्पर्यविषयमशनायाद्यतीतमपेतब्रह्मक्षत्रादिभेदमसंसार्यात्मभूतमखण्डपरिपूर्णसत्यज्ञानानन्दामलाद्वितीयस्वप्रकाशनिर्विशेषब्रह्मस्वरूपमेव परमार्थतत्त्वम्, आरचय्य च भगवद्वेदव्यासप्रणीतानेकन्यायोपबृंहितचतुरध्याय्यात्मकोत्तरमीमांसाभाष्यादिप्रबन्धजातम्, अवमत्य च नास्तिकादिदुर्मताभिमानिनः कुदृष्टीन्, अवस्थाप्य च वैदिकमद्वैतं मतमप्र-

तिबन्धम्, अध्याप्यचात्मीयमनुमतं भाष्यमन्तेवासिनः, अभिषिच्य चाद्वैतमतपरिपालनाधिपत्ये सच्छिष्यान्, आसाद्य चातुलां कीर्तिम्, आससाद च पुनरैश्वरं धामेति । अनन्तरं च तेषामेव मतमवलम्बमानाः विवरणकाराचार्यवाचस्पतिमिश्रादिश्रीमदप्पयदीक्षितवर्यपर्यन्ताः प्राञ्च आचार्याः अनवरतपरिचीयमानभाष्यार्थतत्त्वाः विवरणवाचस्पत्यपरिमलन्यायरक्षामण्यादिप्रबन्धजातैरुन्मूलितकुमतिकुतर्कमद्वैतमेव प्रत्यतिष्ठिपन्नित्यत्र नास्ति विशयः। अनन्तरं चार्वाचीनैः कैश्चिद्ध्वान्तजान्तमतप्रविष्टैरनिवार्याद्वैतेद्वेषगाढानलकलितहृदयैः स्वमनीषापरिकल्पितयुक्तिवाक्याभासविस्तृतैः न्यायामृतादिग्रन्थैराकुलीकृतमिव भवत्यद्वैतमतमित्यालोच्य सर्वतन्त्रस्वतन्त्राः अतिलोकोत्तरसत्तर्कोपेतप्रबन्धनिर्माणचातुरीधुरीणाः सर्वज्ञशिरोमणयः श्रीमधुसूदनसरस्वतीब्रह्मानन्दयतीन्द्रवराः निखिलानपि लोकाननुजिघृक्षवः द्वैतवादिपरिकल्पितकुयुक्तितूलवातूलान् निखिलानर्थव्रातनिदानभूताद्यविद्योन्मूलनानन्यसाधनाद्वितीयब्रह्मनिश्चयप्रत्यर्थिभूतासम्भावनादिदोषशङ्कापङ्कक्षालनस्वर्धुनीनिर्झरायमाणवाग्झरीगुम्फितान् अद्वैतसिद्धिब्रह्मानन्दीयादीन् प्रबन्धान् व्यरचयन् । यद्यप्यस्मिन्महति महीमण्डले श्रीमच्छङ्करभगवत्पादीयमतानुबन्धिप्रौढब्रह्मानन्दीयादिप्रबन्धपरिशीलनार्हमतयो विरलाः पण्डिताः, तथापि क्वचित् क्वचित् इहजन्मनि जन्मान्तरे वा सन्ततसन्तन्यमानसत्कर्मसन्तानानितान्तनिर्मलान्तःकरणाः आत्मतत्त्वं विविदिषन्त्येव । तेषां चाकलय्य ग्रन्थदौर्लभ्यं विषीदतां मुमुक्षूणामत्यन्तोपकाराय महात्मभिर्महता प्रयासेन विनिर्मितानामद्वैतप्रबन्धानां प्रचारणेनात्मीयं मानुषं जन्म चरितार्थयितुमध्यात्मविद्याविचारपरमानसानामनुग्रहपात्रतां चात्मानमुपनेतुमद्वैतमञ्जर्यभिधालंकृताद्वैतमतानुबन्धिप्रबन्धजातमुद्रणकार्ये महति प्रावर्तिष्ट सद्धृदयदासस्साम्बशिवार्यः । मुद्रणाय च सम्पादितेषु कोशेषु चम्पकारण्यवास्तव्यश्रीमन्महामहोपाध्यायबिरुदाङ्कितपदवाक्यप्रमाणपारावारपारीणश्रीमद्राजुशास्त्र्यपरनामकश्रीमत्त्यागराजमखिराजानुग्रहलब्धमेकं कोशं —श्रीमत्परमहंसपरिव्राजकाचार्यस्वयंप्रकाशयतीन्द्रपरिपालितारण्यपुराख्यग्रामस्थाद्वैतकोशशालायास्समानीतं द्वितीयं कोशं वटारण्यक्षेत्रस्थपुस्तकशालायास्समानीतं तृतीयं च एडयात्तुमङ्गलग्रामाभिजनचतुस्तन्त्रपारावारपारीणश्रीमदप्पुशास्त्रिणां कोशं अविच्छिन्नसत्सम्प्रदायसिद्धसमग्रपाठं प्रमाणीकृत्य सम्यक् परिशोध्य कुम्भघोणक्षेत्रस्थश्रीविद्यामुद्राक्षरशालायां मुद्राक्षरैरङ्कयित्वा सञ्चारितां

नन्दनशरत्तुलामासमारभ्य प्रतिमासं प्रचार्यमाणगुच्छशोभितामद्वैतमञ्जरीं प्रथममलंकुर्वाणा श्रीमधुसूदनसरस्वतीविरचिता अद्वैतसिद्धिः तव्याख्या ब्रह्मानन्दसरस्वतीविरचिता लघुचन्द्रिका च श्रीमच्छङ्करभगवत्पादविरचितदशश्लोकीव्याख्या सिद्धान्तबिन्दुश्च ब्रह्मानन्दयतीन्द्रविरचितरत्नावल्याख्यटीकासहितः सम्पूर्णा विजयन्तेतराम् । तदहमर्थये साञ्जलिबन्धनमस्मन्मताभिमानिनः समर्पयत सादरां कारुण्यदृष्टिं सफलयत अनवरताद्वैतग्रन्थविचारेण मुद्रणप्रयासम् । अनुभवत च निश्शङ्कमद्वैतसाम्राज्यसर्वस्वम् । अनुगृह्णीत च तथा, यथेयमद्वैतमञ्जरी प्राचीनास्माकग्रन्थगुच्छगुम्भिता इतःपरमप्यविच्छिन्नगुच्छप्रसरा समाह्लादयन्ती अध्यात्मविद्याविचारकुतूहलिनां मनांसि आसादयन्ती च सज्जनप्रेमभाजनतां चिरं जेजीयेतेति । सहन्तां च विद्वन्मणयः अनवधानप्रयुक्तां क्वाचित्कीमक्षरच्युतिम् । प्रसीदन्तु चानेन श्रीमच्छङ्करभगवत्पादचरणा इत्यशेषमतिरमणीयम् ॥

अद्वैतामृतमञ्जरीशकरुणापूरेण संवर्धिता
विद्वन्मानसचञ्चरीकनिवहैरास्वाद्यमाना भृशम् ।
श्रीविद्याकबरीभरेषु सततं भूषायमाणा चिरं
श्रीमत्साम्बशिवार्यसत्तरुशिखालम्बा विजेजीयताम् ॥

इति गोष्ठीपुराभिजनः
हरिहरशास्त्री.

॥ शिवाभ्यान्नमः ॥

चम्पकारण्यवास्तव्यश्रीमहामहोपाध्यायविरुदाङ्कित-
श्रीराजशास्त्र्यपरनामकश्रीमत्त्यागराज-
मखिराजकृताश्श्लोकाः ।

विख्याता ब्रह्मविद्या जयति भुवि नृणां दुःखमुन्मूलयन्ती
तत्सिद्ध्यर्थाः प्रबन्धा अपि खलु भगवत्पादमिश्रादिक्लृप्ताः ।
तत्रोक्तान् सम्यगर्थान् कुमतिकलुषितान्निर्मलीकृत्य याम्या-
मासीत्तस्याः प्रतिष्ठा प्रचरणसुकृतात् किं तयोरस्ति पुण्यम् ॥ १ ॥

सिद्धिश्च चान्द्रिका चेत्याभ्यां विदुषामुदेति सुखभूमा ।
मधुसूदनसद्ब्रह्मानन्दयतीन्द्रोपरचिताभ्याम् ॥ २ ॥

तत्तत्कोशविलेखनादियतनैस्तेषां हि सञ्चारणा
शक्या नेति तदर्थिमुद्रणपथान्नैवास्ति पथ्यन्तरम् ।
इत्यालोच्य तदर्थमर्थनिवहं सम्पाद्य यन्त्रादिकं
निर्मेयं यदि तद्विलम्ब इति यस्स्वार्थं तु मेने तृणम् ॥ ३ ॥

सम्प्राप्तद्वढिमन्यहो कलियुगेऽप्यस्मिन् नृणां मुक्तये
यत्तस्सत्तमपूर्वदेशिकवरानेषोऽतिशेते जनः ।
कारुण्यादिति तस्य पुण्यमधिकं गण्यं न पुण्यान्तरै-
स्सर्वज्ञः परमेश एव मुदितो दातुं क्षमस्तत्फलम् ॥४॥

अद्वैतग्रन्थदुग्धाम्बुधिमथनसमुद्भूतपीयूषधारा-
साराकारा विपश्चिद्वरहृदयसमुल्लासिनी मञ्जरीयम् ।
आलोक्यैनां स्तुवानः कलयति सशिरःकम्पमाशीर्वचांसि
श्रीमच्चाम्पेयवन्याद्दतनिजवसतिः त्यागराजाध्वरीन्द्रः ॥५॥

यदुपक्रममेषाभून्निर्मलाद्वैतमञ्जरी ।
तस्य श्रेयांसि भूयांसि सन्तु साम्बशिवप्रभोः ॥६॥

श्रीमच्छाङ्किकतार्किकवेदान्तरहस्ययुक्तिनिष्णातैः ।
हरिहरसुधीभिरेषा दोषास्पष्ट्या सुशोधिता जयति ॥७॥

॥ शिवाभ्यां नमः ॥

॥ अद्वैतमञ्जरी

अथ

॥ सिद्धान्तबिन्दुः ॥

श्रीशङ्कराचार्यनवावतारं विश्वेश्वरं विश्वगुरुं प्रणम्य ।
वेदान्तशास्त्रश्रवणालसनां बोधाय कुर्वे कमपि प्रयत्नम् ॥

अथ

॥ सिद्धान्तबिन्दुटीका ॥

॥ न्यायरत्नावली ॥

नमो नवघनश्यामकामकामितदेहिने ।
कमलाकामसौदामकणकामुकगेहिने ॥
अद्वैतसिद्धेष्टीकायास्तदीयायाश्च सङ्ग्रहात् ।
विचित्ररचना काचिद्ब्रह्मानन्देन रच्यते ॥
शङ्करोक्तिसुधाम्भोधेर्गुरूणामुपदेशतः ।
उद्धृतां प्रकटीकुर्वे न्यायरत्नावलीमिह ॥

तत्राद्वितीयस्वप्रकाशनिरतिशयानन्दरूपयोर्जीवब्रह्मस्वरूपयोरैक्यमुक्तानन्द-बोधयत् 'अहं ब्रह्मास्मी'त्यादिवेदान्तमहावाक्यं द्वितीयविषयकप्रत्यक्षादिसर्वप्रमा-धकम् । अतोऽनात्मभूतं सर्वं मिथ्येत्यार्थविवेचनवचनरोचमानं श्रीमद्वाद-

रायणशङ्करसुरेश्वराद्याचार्यवर्यैकृतमर्यादं वेदान्तदर्शनं दर्शनेषु सर्वेषु दर्शनीयतमं दर्शनीयम् । तस्य च विचारशास्त्रस्य विचार्यवेदान्तवाक्यद्वारा परमं तात्पर्यमुक्तैक्ये । अवान्तरं तु शुद्धजीवब्रह्मस्वरूपयोः तदैक्यसाक्षात्कारहेतुश्रवणादौ च । प्रत्यक्षादिप्रमाणसिद्धदृग्दृश्याद्यनेकभागभागिन्यां प्रक्रियायां त्वनुवादकत्वम् । तत्र चानुवाद्यप्रक्रियायां पदार्थो द्विविधः । दृक् दृश्यं च । दृगपि चिद्रूपा उपहितानुपहितरूपेण द्विविधा । अनुपहिता मोक्षदशायां केवलैव भाति । संसारदशायां तु भासमानसर्वानुस्यूतरूपेणापि । तथा च श्रुतिः—'तमेव भान्तमनुभाति सर्व'मिति । अनुमानमपि घटादयो भानविषयाः आनयनादिविशेषणतया प्रवृत्तिविषयत्वादिति । घटादिसर्वभासमानपक्षकानुमितौ लाघवादेकभानव्यक्तिर्विषयः । उपहिता तु ईश्वरजीवभेदेन द्विविधा । तत्रेश्वरोऽविद्योपाधौ बिम्बीभूतः । जीवस्तु तत्र प्रतिबिम्बीभूतः । तयोश्चानादिभेदसत्त्वादुपास्योपासकभावेन चित्तशुद्धा स्वरूपप्रबोधप्राप्त्या समूलबन्धाद्विमुच्यते जीवः । तदेवमादिसर्वं सकलविद्यापारावारपारीणैः श्रीमधुसूदनसरस्वतीभिः सिद्धान्तबिन्दौ सूत्रितमिति तदेवाश्रित्य प्रकटीक्रियते । तत्र गुरुपरम्परामूलीभूतश्रीशङ्कराचार्यरूपेश्वरप्रणामरूपं स्वाचरितग्रन्थसमाप्तिप्रतिबन्धकनाशकं मङ्गलं शिष्याणामनुषङ्गतो मङ्गलसम्पादनाय कथयन् मोक्षहेतुतत्त्वधीप्रयोजकं प्रकरणं कर्तव्यतया प्रतिजानीते—**श्रीशङ्करेत्यादि** । श्रीशङ्कराचार्यश्चासौ नवावतारश्चेति कर्मधारयः । तद्गुणसंविज्ञानबहुव्रीहिणा शङ्कराचार्यप्रणामलाभेऽपि गौरवान्न स आश्रितः । नवं यथा स्यात्तथावतरत्यस्मिन्निति नवावतारः । करणाधिकरणयोश्चेत्यधिकारस्थेन 'अवेतृस्त्रोर्धञि'त्यनेन तथानुशासनात् । अवतरणं च तादात्म्याभिमानः । तस्य विषयत्वं सप्तम्यर्थः । तथा च शङ्कराचार्यरूपे शरीरे विश्वेश्वरस्याभिनवतादात्म्यसत्त्वात्तयोरभेदान्वयः । न चावतारशब्दस्य पाचकादिशब्दवत् क्रियाशब्दत्वेन विशेष्यत्वानुपपत्तिः । विशेषणविशेष्यकर्मधारयविधायकसूत्रे द्रव्यशब्दस्यैव विशेष्यत्वमिति पदमञ्जर्यादावुक्तत्वादिति वाच्यम् । तथा सति पुण्डरीकं सिताम्भोजमित्यादावम्भोजपदस्यापि तदनुपपत्त्यापत्तेः । अथ तस्य योगरूढत्वेन पद्मरूपद्रव्यवाचकत्वस्यापि सत्त्वेन न विशेष्यत्वानुपपत्तिः । तर्ह्यवतारशब्दस्यापि रथादावप्रयोगेण नोक्तानुपपत्तिः । शङ्कराचार्येत्यस्यापि द्रव्यरूपव्यक्ति-

इह खलु साक्षात्परम्परया वा सर्वान् जीवान् समुद्धिधीर्षुर्भगवान्

विशेषरूढत्वस्यापि सत्त्वेनोपपत्तिः । अन्यथा आचार्यशब्दस्यापि 'आचिनोति च शास्त्रार्थमाचारे स्थापयत्यपि ।' इत्यादिना क्रियावाचकत्वस्योक्तत्वात् शङ्कर-शब्दस्य द्रव्यवाचकत्वाच्च कर्मधारयत्वानुपपत्तेः । अथवा शङ्कराचार्यरूपं रामकृष्णादिशरीरापेक्षया नवं शरीरमवतरति गच्छतीति नवावतारः । कर्मण्यणित्यनुशासनात् कुम्भकारादिवत् । तथा च शङ्कराचार्यरूपेण नवतयावतीर्णं विश्वेश्वरं प्रणम्येत्यर्थः । 'चतुर्भिः सह शिष्यैस्तु शङ्करोऽवतरिष्यती'ति वायुपुराणोक्तेः शङ्कराचार्यस्येश्वरावतारता । चतुर्भिः पद्मपादतोटकहस्तामलकसुरेश्वराचार्यैः । अनेन शुद्धचितोऽपि अविद्यकभेदेन ईशजीवादिनानारूपेण उपास्योपासकत्वादिसम्भव इति सूचितम् । **वेदान्तशास्त्रेति** । शारीरकमीमांसारूपचतुरध्यायीतद्भाष्यतदीयटीकावाचस्पत्यतदीयटीकाकल्पतरुतदीयटीकापरिमलरूपग्रन्थपञ्चकेत्यर्थः । श्रवणालसानां संक्षिप्तसाररूपेण तदर्थं श्रोतुकामानाम् । **बोधायेति** । उक्तशास्त्रप्रतिपाद्यार्थनिश्चयायेत्यर्थः । तथा च तच्छास्त्रे श्रुतेऽपि यत्सन्दिग्धं, तदनेन प्रकरणेन निश्चेतुं शक्यत इति भावः । तच्छास्त्रप्रतिपाद्यानि चोच्यन्तेऽध्यायभेदतः । आद्ये श्रुतीनां जीवेशाभेदे तात्पर्यनिश्चयः । द्वितीये तदभङ्गाय दुष्टशास्त्रोपमर्दनम् । तृतीये तत्त्वबोधस्य साधनानां निरूपणम् । चतुर्थे तत्फले जीवन्मुक्तिः कैवल्यमीरितेऽप्रसङ्गः सगुणस्यापि शास्त्रेऽस्त्यत्र तु नो तथा ॥ अत्र विश्वेश्वरमित्यनेन जगत्सृष्ट्यादिसामर्थ्यरूपैश्वर्योक्त्या तन्मूलीभूतसार्वज्ञ्यसूचनेन शास्त्रार्थेषु सुतरामनावरणमिति सूचितम् । विश्वगुरुमित्यनेन नास्तिकषड्दर्शनीकर्तृणामास्तिकपञ्चदर्शनीकर्तृणां च शिक्षक आचार्य इति सूचनात् वेदान्तदर्शनस्य सर्वदर्शनशिरोमणित्वं सूचितम् । कमपीत्यनेन लघुरपि बह्वर्थवहश्चिन्तामणिरिव निबन्धोऽयमिति वक्ष्यमाणं अस्य सर्वग्रन्थापेक्षयोपादेयत्वं प्रवर्तमानोत्साहाय सूचितम् । **सर्वानिति** । 'श्रावयेच्चतुरो वर्णान् कृत्वा ब्राह्मणमग्रत' इति स्मृतेः पुराणादिश्रवणे शूद्रस्याप्यधिकारसम्भवात् श्रावकस्य ब्राह्मणस्यैतत्प्रकरणाधीनशास्त्रार्थज्ञानेन व्याख्यानकौशलाच्छूद्रस्योद्धार्यता । कीटादीनामपि कदाचिद्ब्राह्मणादिभावं प्राप्स्यतामुद्धरिष्यमाणतेति भावः । **उद्धिधीर्षुः** दुःखेनात्यन्तं विमुमोचयिषुः । विवेकेन भेदेनोपल-

श्रीशङ्करोऽनात्मभ्यो विवेकेनात्मानं नित्यशुद्धबुद्धमुक्तस्वभावं संक्षेपेण बोधयितुं दशश्लोकीं प्रणिनाय । नन्विदङ्कारास्पदेभ्योऽनात्मभ्यो विवेकेनाहङ्कारास्पदमात्मानं सर्वो लोकोऽहमस्मीति प्रत्येति दुःखं चानुभवति । तेन ज्ञातज्ञापकत्वान्निष्प्रयोजनत्वाच्चात्मतत्त्वप्रतिपादनं व्यर्थमिति चेन्न । चिद्भास्यलेन लक्षणेन इदङ्कारास्पदानामपि देहेन्द्रियमनसां प्रतिभासतोऽहङ्कारास्प-

---

क्षितमात्मानं बोधयितुमित्यर्थः । तेन भेदविशिष्टात्मविषयकज्ञानस्योद्धारहेतुत्वेऽपि न दोषः । नित्यं कालापरिच्छिन्नम् । शुद्धं रागद्वेषाद्यशुद्धिरहितम् । बुद्धं स्वप्रकाशनिरतिशयानन्दम् । मुक्तम् अविद्यारूपबन्धशून्यम् । स्वभावं स्वमेव भावः सत्ता यस्य तम् अनन्याधीनसत्ताकम् । आत्मानम् अनात्मनामधिष्ठानस्वरूपभूतम् । तद्विज्ञानेन श्रुतिषु सर्वविज्ञानस्य प्रतिज्ञानात् । ननु, आत्मानात्मनोस्तादात्म्यारोपसम्भवे तयोर्विवेकज्ञानमुपयुज्यते । तयोस्तु तमःप्रकाशवदत्यन्तविरुद्धत्वेन प्रतीयमानत्वात्तदसम्भवः । आत्मा हि सच्चिदानन्दरूपः प्रतीयते । अनात्मा तु मिथ्याजडदुःखरूपः । तथा चानात्मनां सर्वेषामात्मनि तादात्म्येन कल्पितत्वमित्यौपनिषदमतस्यासम्भवेन आत्मवदनात्मनां सत्यत्वमेव । एवं च 'अहं गौर' इत्यादिप्रत्ययो गौरादिदेहस्वामित्वविषयकः। 'अहं कर्ता दुःखी'त्यादिधीस्तु भ्रमैव। 'असङ्गो ह्ययं पुरुष'इत्यादिश्रुतयस्तु स्तुतिपरा इत्याशयेन शङ्कते—**नन्वित्यादि** । इदङ्कारास्पदेभ्यः इदमित्याकारकधीविषयेभ्यः।अहङ्कारास्पदम् अहमित्याकारकधीविषयम् । अनात्मभ्य आत्मानमिति तु फलितार्थोक्तिः । **सर्वो लोक इति** । गौरोऽहमित्यादिज्ञानस्य देहस्वामित्वेनात्मानं गृह्णतो देहादिभिन्नत्वेनात्मज्ञानं विनोत्पत्त्यसम्भवात्सर्वेषां तदस्तीति भावः । ननु पूर्वं ज्ञातस्यापि विवेकस्य शास्त्रीयज्ञानमदृष्टद्वारा मुक्तिहेतुरिति कल्प्यताम् । अत आह—**निष्प्रयोजनत्वादिति** । भाष्यादौ समन्वयसूत्रादिषु दूषितत्वान्नोक्तकल्पना युक्तेति भावः । चिद्भास्यत्वेन श्रवणादिपरिपाकसहकृतशास्त्रजन्याखण्डाकारमनोवृत्त्यभिव्यक्तचिद्भास्यत्वेन । लक्षणेन ज्ञापकेन । इदङ्कारास्पदानामात्मभिन्नतया दृढतया ज्ञातानाम् । प्रतिभासतोऽहङ्कारास्पदत्वेन उक्तमनोवृत्तेः पूर्वं प्रतीयमानात्मतादात्म्यवत्त्वेन । अविवेकात् उक्तमनोवृत्तिरूपविवेकज्ञानसमुच्छेद्यसकलभ्रमनिदानानाद्यज्ञानकल्पनात् । तथा च आत्मानात्मनोरत्यन्तविरुद्धस्वभा-

दत्वेन तदविवेकात् तेन च शुद्धेऽप्यात्मनि दुःखित्वाद्यभिमानात् शास्त्री-

वत्वेऽपि तादात्म्यप्रतीतेरनुभूयमानत्वात्तदन्यथानुपपत्त्या तदुपपादकमनाद्यज्ञानं कल्प्यते । यदा तूक्तमनोवृत्त्युत्पत्तिस्तदुत्तरं सकलदृश्यानामाभासीकृतानां प्रारब्धभोगशेषं क्षपयता जीवन्मुक्तेन मिथ्यात्वदृश्यत्वादिहेतुनाऽऽत्माभिन्नत्वेन ज्ञायमानत्वेऽपि न शास्त्रवैयर्थ्यशङ्का । शास्त्रस्याप्याभासीकृतत्वेन वैयर्थ्यस्येष्टत्वादिति भावः । आत्मानात्मनोस्तादात्म्याध्यासे स्थिरीभूते तद्धर्माणामपि मिथः संसर्गाध्यासः प्रतीयते । तस्य तन्नियतत्वादित्याशयेनाह—**तेन चेति** । अनात्मतादात्म्याध्यासेन चेत्यर्थः । तृतीयार्थो ज्ञापकहेतुता दुःखित्वाद्यभिमानं प्रति बोध्या । युगपदेव धर्मितादात्म्यधर्मसंसर्गयोरध्यासेन कारकहेतुत्वासम्भवात् । शुद्ध अनात्मधर्मदुःखादिना परमार्थतो हीने । समूलस्य मूलीभूताज्ञानसहितस्य । तस्य उक्ताध्यासस्य । निवृत्तेः उच्छेदात् । ननु, कोऽयमुच्छेदः । न ध्वंसः । तस्य हि सत्यत्वे अद्वैतश्रुतिविरोधः । मिथ्यात्वे चरममनोवृत्त्युत्पत्त्युत्तरमुत्पन्नस्य तस्य समुच्छेदकाभावेन उच्छेदाभावात् 'विद्वान्नामरूपाद्विमुक्त' इत्यादिश्रुतिविरोधः । अथोक्तध्वंसस्य सत्यत्वेऽपि श्रुतेर्न विरोधः । तया भावाद्वैतबोधनादिति चेन्न । असंकुचिताद्वैतस्य श्रुत्यर्थतया प्रतीयमानत्वात् । अत्रोच्यते । दृश्याधिकरणक्षणे दृश्याधिकरणक्षणपूर्वत्वानधिकरणत्वं दृश्योच्छेदः । शास्त्रीयचरमतत्त्वज्ञानोत्पत्तिक्षणे च दृश्याधिकरणक्षणपूर्वत्वं नास्ति । तदुत्तरतादृशक्षणस्याप्रसिद्धत्वात् । तत्पूर्वत्वस्य क्षणान्तरे प्रसिद्धस्यापि तत्रासम्भवात् । नानाजीवपक्षे तज्जीवीयचरमतत्त्वज्ञानक्षणे तज्जीवीयदृश्याधिकरणकालपूर्वत्वाभावो वाच्यः । जीवान्तरीयदृश्याधिकरणकालपूर्वत्वसत्त्वात् । ननु, दृश्यपूर्वत्वाभाव एव निवेश्यतां किं दृश्याधिकरणकालनिवेशेनेति चेन्न । दृश्यपूर्वत्वं दृश्यप्रागभावकालवृत्तित्वम् । तथा च तदभावो न दृश्योच्छेदशब्दार्थः । चरमतत्त्वज्ञानक्षणवृत्तिदृश्यानामग्रिमकालानुवृत्तिवादिनां तार्किकादीनां मतेऽपि तादृशोच्छेदव्यवहारसम्भवात् अविद्याद्यनादिदृश्यानां तादृशोच्छेदव्यवहारासम्भवाच्च । तेषां प्रागभावाप्रसिद्धेः । ननु, क्षणप्रवेशो व्यर्थः । व्याप्तिविशेषबलेन क्षणस्यैव तादृशपूर्वत्वाभावस्वीक्रियते । तत्त्वप्रमाक्षणो यो यो भवति, स तत्त्वाज्ञानतत्प्रयुक्तदृश्यकालपूर्वत्वाभाववान् तत्त्वप्रमोत्पत्तिद्वितीयक्षणः तादृशाभाववानिति वा व्याप्तेः ।

तत्त्वज्ञानस्य क्षणिकत्वस्वीकारे आद्यः । कस्यापि न क्षणिकत्वमिति पक्षे द्वितीय इति चेत् सत्यं, तथापि तादृशव्याप्तिसूचनाय क्षणपदमिति बोध्यम् । अथैवमुच्छेदस्य निर्वचनेऽपि तत्र ज्ञानस्याजनकत्वेन ज्ञानेनेति तृतीयानुपपत्तिरिति चेन्न । तृतीयायाः प्रकृते ज्ञापकहेतुबोधकत्वात् एतत्समानार्थकश्रुतयोऽप्येवं व्याख्येयाः । अथैवमपि ज्ञाने इच्छानुपपत्तिः । मनोवृत्तिरूपस्य ज्ञानस्य सुखदुःखाभावान्यत्वात्तत्साधनान्यत्वाच्चेति चेन्न । नितरां निरुध्य मनो-निदिध्यासनादिना यतमानतया मुमुक्षुपुरुषे जायमानाया दुःखधारायाः निरतिशयात्मसुखाभिव्यक्तिनिदानत्वेन दुःखत्वेनागणनीयायाश्चरममनोवृत्तिसमुदयक्षणमारभ्य विच्छिन्नाया ध्वंसरूपत्वस्य चरमवृत्तौ सम्भवात् । यस्योत्पत्तिक्षणे हि यद्विच्छिद्यते, तत्पूर्वं च वर्तते, स एव मनःपरिणामस्तस्य ध्वंसः । यथा एकक्षणान्तरितोत्पत्तिकसमानविषयकज्ञानेच्छादिस्थले तादृशोत्तरपरिणामस्य पूर्वपरिणामध्वंसरूपत्वौचित्यात् । तदन्यस्य ध्वंसस्य स्वीकरे तत्स्वरूपतद्धेतुत्वादिकल्पने गौरवात् । अभिव्यज्यमानात्मसुखव्याप्यत्वाच्च चरमवृत्ताविच्छा । यो हि यदा यदिच्छति, स कदाचित्तद्व्याप्यमपीच्छतीति सर्वानुभवसिद्धम् । युक्तं चैतत् । यस्मिन् सत्यवश्यमिष्टाभावस्तत्र द्वेषस्येव यस्मिन् सत्यवश्यमिष्टं तत्रेच्छाया अनुभवात् चरमतत्त्वज्ञाने इच्छा । इष्टव्याप्यमपि हि लोकैरिष्यत इति सर्वानुभवसिद्धम् । अत एव विपदोऽपि स्वकीया श्रीकृष्णभगवद्दर्शनव्याप्यतया कामिताः कुन्त्या । तदुक्तं श्रीभागवते—'विपदस्सन्तु नश्शश्वत्तत्र तत्र जगद्गुरो । भवतो दर्शनं यत्स्यादपुनर्भवदर्शनम् ॥' इति । युक्तं चैतत् । यस्मिन् सत्यवश्यमिष्टसम्बन्धस्तस्यापीष्टत्वौचित्यात् । अत एव मोक्षः पुनरात्यन्तिकी दुःखनिवृत्तिरित्युक्त्वा काम्यश्च दुःखाभावः दुःखस्य स्वभावतो हेयत्वात् सुखार्थं तथायमिति चेन्न । दुःखाभावस्य सुखाहेतुत्वात् । अथ सुखव्याप्यत्वात्स तथेति चेन्न । तस्य तदव्याप्यत्वादित्युक्तमुदयनाचार्यैर्बौद्धाधिकारे । सुखव्याप्यत्वस्य काम्यत्वाप्रयोजकत्वे अथेत्यादिशङ्कानुपपत्तेः । तस्मात्सुखत्वादिवत्सुखादिव्याप्यत्वमपीच्छाप्रयोजकम् । वस्तुतस्तु अस्मद्दर्शने सुखमात्मैव चन्दनादियोगजन्यमनोवृत्तेस्तत्र व्यञ्जकत्वमात्रम् । तस्य च न केवलरूपेण काम्यता । सिद्धत्वात् । नापि भानविषयत्वेन । तस्य स्वप्रकाशत्वेन भानाविषयत्वात् । नाप्यावरणाभावविशिष्टतया । आव-

रणस्य तत्र कल्पितत्वेन तदभावस्यावरणकालेऽपि सत्त्वेन सिद्धत्वात् । किं तु स्वावरणविरोधिमनोवृत्तिविशिष्टतया । यद्यप्यनवच्छिन्नानन्दरूपेण आत्मा मूलाज्ञानेन संसारकाले सदैवावृतः, तथाप्यवच्छिन्नसाक्ष्यानन्दाद्यावरणावस्थाविशेषस्य चन्दनादियोगजन्यमनोवृत्त्या समुच्छेदात्तस्याः स्वपूर्वकालीनसाक्ष्यानन्दाद्यावरणं प्रति विरोधित्वेन तद्विशिष्टतया काम्यत्वम् । एवं चरममनोवृत्तेरनवच्छिन्नात्मानन्दावारकमूलाज्ञानविरोधित्वात्तद्विशिष्टतया काम्यता । आवारकाज्ञानविरोधित्वं तु आवारकाज्ञानतत्प्रयुक्तदृश्ययोरुक्तोच्छेदवान् यः क्षणः, तत्र वर्तमानत्वम् । यद्यपि साक्ष्यानन्दे कालान्तरावच्छेदेनावारकाज्ञानस्य एतत्कालीनमनोवृत्त्युत्पत्त्यव्यवहितपूर्वं आवारकत्वाभावात् अज्ञानानामनादित्वेऽपि कदाचिदेव कस्यचिदज्ञानस्यावारकत्वमिति सिद्धान्ते स्वीकारात् कालान्तरावच्छेदेनावारकाज्ञाने एतत्कालीनमनोवृत्तिर्न विरोधिनी, तथापि या मनोवृत्तिः स्वोत्पत्त्यव्यवहितपूर्वकाले यादृशानन्दावारकाज्ञानस्य विरोधिनी तद्विशिष्टतया तादृशानन्दस्य काम्यतेत्युक्तौ न दोषः । तथा च तत्त्वज्ञाने इच्छानुत्पादेऽपि तद्विशिष्टरूपेण अनवच्छिन्नानन्दे इच्छासम्भवात् तादृशानन्दरूपेष्टप्रयोजकत्वज्ञानात् श्रवणादौ प्रवृत्तिः । वस्तुतस्तु मन्मतेऽपि तार्किकादिमत इव सुखत्वजातिमत्त्वेनैव काम्यता । न तु तादृशवृत्तिमत्त्वेन । गौरवात् । उक्तजातिस्तु तादृशवृत्त्युपहितात्मनि स्वीक्रियते । असत्त्वापादकाज्ञानाविषयत्वप्रयोजकविशिष्टाचिति ज्ञानत्वजातिरिव । कैवल्यदशायामात्मनि ज्ञानत्वस्येव सुखत्वस्यासत्त्वेऽपि तदुपलक्षितप्रकाशसत्त्वान्न दोषः । पदवाच्यतावच्छेदकमात्रस्य तदानीमस्वीकारात् सर्वथापि मुमुक्षोस्तत्र प्रवृत्तिरुपपद्यते । अथैवमपि तत्त्वधीकालपर्यन्तमनुवर्तमानः संसारबन्धस्तत्त्वज्ञानोत्पत्त्युत्तरकाले क्व गत इति प्रश्ने किमुत्तरं भवद्दर्शन इति चेत्, दर्शनान्तरे यदुत्तरम् । अथ दर्शनान्तरे आत्यन्तिको दुःखध्वंसः तत्त्वज्ञानेन जायत इति चेत्, किं तावता । दुःखं तु क्व गतम् । अथ न कुत्रापि गतम् । तत्त्वज्ञानोत्तरं तु कुतो न प्रमीयते इति चेत्, ध्वंसाधिकरणकालस्य प्रतियोग्यधिकरणत्वाभावनियमस्वीकारादिति चेत्, सत्यम् । सखे न खेदं तदा याहि । तत्त्वज्ञानोत्पत्तिक्षणस्य दुःखाधिकरणकालपूर्वत्वाभावनियमोऽपि नापलपितुं शक्यते । तद्वत् अस्मदीयदर्शनेऽपि प्रमायाः स्वसमानविषयकाज्ञानतत्प्रयुक्तदृश्यविरोधित्वनियमः । शु-

येण च ब्रह्मात्मैक्यज्ञानेन समूलस्य तस्य निवृत्तेः । तस्माद्ज्ञातज्ञापकत्वा-

क्त्यादिप्रमायां तथा दर्शनात् । अथ तत्त्वज्ञानस्य संसारनाशहेतुत्वे सत्येवेद-मुपपद्यते । नाशजनकस्य प्रतियोगिविरोधित्वनियमात् ! अन्यथा व्याप्तिग्राहक-तर्कानवतारादिति चेन्न । घटदुःखादीनां तत्तत्कालविशिष्टं कपालात्मादिकमेव नाश इति प्राभाकरादिमतेऽपि मुद्गरपाततत्त्वज्ञानादीनां घटदुःखादिविरोधित्वस्वी-कारात् । यदि तेषां तत्र स्यात्, तदाऽग्रेऽपि घटाद्यनुवृत्तिस्स्यात् इत्यादितर्कावताराच्च । एकाज्ञानपक्षे शुक्त्यादिप्रमाया उक्तविरोधित्वाभावात् अदृष्टान्तत्वेऽपि व्यतिरे-कव्याप्तिग्रहसम्भवात् सम्भवत्येव प्रमाया उक्तविरोधित्वानुमानम् । 'विद्वान्ना-मरूपाद्विमुक्त' इत्यादिश्रुतिप्रामाण्याच्चोक्तविरोधित्वमिति दिक् । ननु , जीवन्मु-क्तिस्वीकारपक्षे तत्त्वज्ञानस्य नोक्तविरोधित्वमिति चेन्न । अप्रामाण्यज्ञानाद्यना-स्कन्दितत्वेनेव भ्रमव्याप्यभुज्यमानादृष्टाद्यभावेनापि तत्त्वज्ञानस्य विशेषणीयत्वा-त् तादृशस्य दर्पणादिसन्निधानस्य समकालीने तत्त्वज्ञाने प्रतिबिंबादिभ्रमविरो-धित्वादर्शनादज्ञानतज्जन्यभ्रमयोरुच्छेदेऽपि भ्रमसंस्काराधीनभयकम्पादिकार्यदर्शनेन तत्त्वज्ञानाधीनदृढसंस्कारसहिततत्त्वधीविशेषस्यैव उक्तविरोधित्वनियमाच्च । स्व-समानविषयकाज्ञानतत्सम्बन्धतदधीनदृश्यसत्यत्वधीविरोधित्वनियमस्तु तत्त्वधीमा-त्रस्य न व्याहत इति दिक् । उपसंहरति—**तस्मादिति** । नन्वात्मभिन्नवस्तु-मात्ररूपस्य समूलबन्धस्य तदुपहितात्मज्ञानेन नोच्छेदः । ज्ञानस्य स्वविषयानि-वर्तकत्वात् । 'तमेव विदित्वातिमृत्युमेती' त्यादिश्रुत्याऽऽत्ममात्रविषयकज्ञानस्यैव बन्धनिवर्तकत्वोक्तेश्च । तादृशज्ञानं च न प्रत्यक्षम् । आत्मनो बहिरिन्द्रिया-योग्यत्वात् । तस्य स्वप्रकाशत्वेन सुखादीनां स्वप्रकाशसाक्षिमात्रभास्यत्वेन च मनसो बहिरिन्द्रियाद्यसहकृतस्य ज्ञानाकरणत्वाच्च 'औपनिषदं पुरुषं पृच्छामी'-त्यादिश्रुत्या उपनिषद्वाक्यमात्रबोध्यत्वोक्तेश्च । नापि शाब्दम् । परोक्षज्ञानस्य प्रत्यक्षाध्यासानिवर्तकत्वात् । अत एव नानुमितिः । तत्र हि अनात्मरूपे पक्षे आत्म-नः संसर्गो विषयः । अथवाऽऽत्मरूपे । नाद्यः । तादृशज्ञानस्य बन्धानिवर्तकत्वात् । नान्त्यः । अत्यन्ताभेदे संसर्गासम्भवात् । तद्घटस्तद्घट इत्यादिज्ञानस्याप्रमात्वेन तद्घटा-दिव्यक्तिभिन्नवस्त्वनुयोगिकसंसर्गेण तद्घटादिव्यक्तिविशिष्टज्ञानत्वं तद्घटादिव्यक्तिप्र-मात्वमित्यस्याव्ययवाच्यत्वात् तद्व्यक्तौ तादात्म्यसम्बन्धेन तद्व्यक्तिविशिष्टज्ञानस्यानु-

त्सप्रयोजनकत्वाच्चात्मतत्त्वप्रतिपादनं न व्यर्थम् । तस्य चात्मतत्त्वस्य 'त-

---

वादरूपत्वेनाप्रमात्वाच्च । स्वकारणीभूतघट इति ज्ञानविषयादधिकं घटे द्रव्यत्वसंसृष्टाभेदं विषयीकुर्वतो हि ज्ञानस्य प्रमात्वं युक्तम् । तद्यक्तौ तद्व्यक्तिस्वरूपं तद्व्यक्तितादात्म्यं विषयीकुर्वता तु ज्ञानेन स्वकारणीभूततद्व्यक्तिरितिज्ञानविषयादधिकं किं विषयीकृतं, येन धारामध्यगज्ञानवदप्रमा न स्यात् । ननु, विशेषणतावच्छेदकप्रकारकज्ञानादेः विशिष्टवैशिष्ट्यबुद्धौ हेतुत्वस्य मीमांसकैरस्वीकारात् स्वीकारेऽपि कार्यभूतज्ञानस्य विषयतायाः कारणीभूतज्ञानविषयतातः विलक्षणत्वेन च नानुवादकत्वमिति चेन्न । विलक्षणाया अपि विषयतायाः नैष्फल्येन ज्ञानेऽनुवादतुल्यत्वस्य दुर्वारत्वात् । न हि 'घटो घट' इति ज्ञानस्य स्वीकारे तस्य संशयादिनिवृत्तिरूपं फलमस्ति । 'घटो घटो' नवेत्यादिज्ञानस्याहार्यत्वेन तन्निवृत्तेरफलत्वात् । जीवत्वेश्वरत्वोपलक्षितयोः ऐक्याज्ञाननिवृत्तिस्तु तादृशैक्यस्य निर्विकल्पकादेव । तच्च नानुमितिः । तस्याः किञ्चिद्धर्मविशिष्टपक्षसाध्यावगाहित्वनियमात् । तस्मादभेदे सत्यपि उपाधिभेदप्रयुक्तो वा, विशिष्टकेवलभावप्रयुक्तो वा यत्र विशेषणविशेष्यव्यक्त्योर्भेदः, तत्रैवाभेदसंसर्गस्य प्रमा । यथा घटो द्रव्यं विशिष्टसत्ता शुद्धसत्तेत्यादौ । अत एव घटाभावो घटाभाववानित्यादौ एकत्वादिविशिष्टघटाभावत्वादिरूपेणैवं घटाभावादेर्विशेष्यता । नाप्युपमितिः । 'स गौरनेन गवयेन सदृश' इत्याद्युपमितिस्थल इव प्रकृते सदृशवस्तुद्वयावगाहने मतान्तरे पदवाच्यत्वावगाहने च अनात्मविषयकत्वापत्तेः । नाप्यर्थापत्तिः । आत्मनि तत्संसर्गं विना कस्यचिदर्थस्यानुपपन्नत्वाभावात् । संसर्गस्यात्मरूपत्वे अनात्मरूपत्वे वा पूर्वोक्तदोषापत्तेश्च । नाप्यनुपलब्धिकरणकम् । तस्याभावमात्रे प्रमात्वात् स्वाभावाभावत्वेन भावग्राहकत्वेऽपि अनात्मविषयकत्वतादवस्थ्यात् प्रमेयस्यात्मत्वे अनात्मत्वे वा पूर्वोक्तदोषापत्तेश्च । तस्मान्नोक्तज्ञानोत्पत्तिसम्भव इत्यत आह—**तस्य चेति** । ब्रह्मात्मैक्यस्य चेत्यर्थः । आत्मतत्त्वस्य साक्षिस्वरूपस्य । प्रमापकं प्रत्यक्षप्रमाकरणम् । शब्दकरणकमपि आत्मज्ञानं प्रत्यक्षमेव । साक्ष्यभिन्नविषयकत्वात् । घटचाक्षुषादीनामपि प्रत्यक्षत्वं नेन्द्रियकरणकत्वादिरूपम् । सुखादिप्रत्यक्षे आत्मसाक्षिमात्ररूपे अव्याप्तेः । किं त्वज्ञानविषयतासामान्यशून्यविषयकत्वम् । घटादिकं च यद्यपि जडत्वात् सर्वदैवाज्ञानाविषयः, त-

थापि तत्र चाक्षुषादिवृत्त्यभावकाले तदवच्छिन्नचितोऽज्ञानविषयत्वात्तत्तादात्म्यापन्ने घटादावप्यज्ञानविषयत्वव्यवहारः । अत एव चाक्षुषादिवृत्त्यभावकालीने घटादिपरोक्षज्ञाने न प्रत्यक्षत्वव्यवहारः । चाक्षुषादिवृत्तिकालीने तु घटादेरपरोक्षज्ञाने प्रत्यक्षत्वव्यवहारो निष्प्रत्यूहः । विद्यमानसुखादौ तु साक्षी सर्वदैव प्रत्यक्षः । सुखादितादात्म्यापन्नस्य साक्षिणः सर्वदैवाज्ञानाविषयत्वात् ब्रह्मात्मैक्याकारमनोवृत्तिकाले च ब्रह्मात्मैक्यस्याज्ञानाविषयत्वात्तद्विषयकत्वेनोक्तवृत्तेः प्रत्यक्षतेति न कोऽपि दोष इति भावः । ननु, वृत्तिः प्रत्यक्षरूपा सती अज्ञाननाशिका । प्रत्यक्षत्वं च तस्या अज्ञानाविषयविषयकत्वम् । तथा चाज्ञाननाशात् पूर्वमज्ञानाविषयत्वस्य विषयेष्वभावात् वृत्तेरज्ञाननाशकत्वानुपपत्तिरिति चेन्न । न हि वृत्तिरज्ञाननाशिका । किं त्वज्ञानाधिकरणक्षणावृत्तिः । वृत्तेरेवाज्ञाननाशत्वात् । तत्रापि इन्द्रियजन्या वृत्तिः स्वसमानविषयकाज्ञाननाशः । आत्मविषयका तु शब्दजन्यापि । तथा च यादृशाज्ञानाभावो यद्वृत्तेरुत्पत्तिक्षणावधि प्रतीयते, सा वृत्तिः तदज्ञाननाश इति तु निष्कर्षः । वृत्तिविशेषस्याज्ञानविशेषनाशकत्वे तु तदुत्पत्तिक्षणे तद्वृत्तितदज्ञानयोः प्रत्ययस्यानुभवविरुद्धस्यापत्तेः । न हि युगपदेकस्मिन्विषये ज्ञातत्वाज्ञातत्वे केनाप्यनुभूयेते । यदि तु घटाद्यवच्छिन्ना चिच्छुद्धाचितो न भिन्ना । तथा च घटाद्याकारवृत्त्यभावकाले अज्ञानाविषयशुद्धचित्तादात्म्यस्य घटादौ सत्त्वात् ब्रह्मसाक्षात्कारोत्तरं अपरोक्षव्यवहारापत्तिरित्युच्यते, तदा चितः अपरोक्षत्वमज्ञानाविषयचिद्रूपत्वं विशेष्यमात्रस्योक्तौ तत्त्वज्ञानात् पूर्वमपि आत्मब्रह्मणोरैक्यं साक्षात्करोमीति धीस्स्यात् । विशेषणमात्रस्योक्तौ घटादौ सर्वदा अपरोक्षव्यवहारस्स्यात् । दृश्यानामपरोक्षत्वं त्वज्ञानविषयतानवच्छेदकत्वविशिष्टदृश्यत्वं, तादृशापरोक्षत्वयोरन्यतराश्रयविषयकत्वं ज्ञानस्यापरोक्षत्वम् । ननु. उक्तवाक्यादपि नोक्तज्ञानस्योत्पत्तिसम्भवः । उक्तवाक्यान्तर्गततत्त्वमादिपदार्थापरिचयात् । मानान्तरप्रमिते हि पदार्थे गृहीतसङ्केतसम्बन्धस्य पदस्य ज्ञानेन उपस्थापिते सति वाक्यार्थः प्रमीयते । तत्त्वमादिपदानां चार्था न मानान्तरेण प्रमिताः । जगत्कारणत्वादिविशिष्टचिद्रूपस्य तत्पदवाच्यस्य हि नानुमानेन ज्ञानम् । 'आद्यकार्यं सकर्तृकम् । कार्यत्वात् । यद्यत्कार्यं, तत् सकर्तृकम् । यथा घट' इत्याद्यनुमानस्याप्रयोजकत्वात् । यदि हि कार्यसामान्ये कर्ता कारणं स्यात्

त्त्वमस्यहं ब्रह्मास्मी'त्यादिवेदान्तमहावाक्यमेव प्रमापकम् । वाक्यं च पदार्थज्ञानद्वारैव ज्ञापकमिति तत्त्वंपदार्थयोः प्रकृतवाक्यार्थानुकूलयोरन्यतोऽसिद्धत्वात्तावपि शास्त्रेणैव प्रमातव्यौ, यूपाहवनीयादिपदार्थवत् । तत-

---

तदा कार्यत्वं कर्तृजन्यत्वरूपसकर्तृकत्वव्याप्यं स्यात् । यदा तु घटादिकार्येऽपि न कुलालादिः कारणम् । कुलालादिक्रियादेरवश्यं कारणत्वस्य वाच्यत्वेन कुलालादेः तत्पितृवदन्यथासिद्धत्वात्, तदा आद्यकार्ये कर्तुः कारणत्वस्य का कथा । आरम्भवादस्वीकारेण आद्यकार्यस्य क्रियासंयोगादिप्रयोज्यत्वासम्भवात् । 'आत्मन आकाशस्सम्भूत' इत्यादिश्रुत्यनुसारेण महत आकाशादेरेव प्रथममुत्पत्तेः उक्तश्रुतेस्तावकत्वेन न स्वार्थे प्रामाण्यम् । तत्प्रामाण्यवादिनो देवताधिकरणस्य अस्वीकारिणि 'न कदाचिदनीदृशं जग'दिति मीमांसकसिद्धान्ते सृष्टिप्रलयाभावेन आद्यकार्यस्यैवालीकत्वात् उक्तान्यथासिद्धिमस्वीकृत्य कुलालादिहेतुत्वं च स्वीकृत्य तदृष्टान्तमात्रेणाद्यकार्ये कर्तृजन्यत्वस्वीकारेऽपि बहुजनाश्रयप्रासादादिदृष्टान्तेन पृथिव्यादेर्नानाकर्तृकत्वानुमानापत्तेश्च । अत एव कार्योत्पत्त्यन्यथानुपपत्तिरपि नेशस्य जगत्कारणत्वे मानम् । तथा च तत्पदवाच्यस्याननुभूतत्वेन तत्सम्बन्धित्वेन शुद्धब्रह्मणस्तत्पदलक्ष्यस्य सुतरामननुभूतत्वान्न तत्पदेनोपस्थितिसम्भवः।त्वम्पदवाच्यस्य तु जाग्रदाद्येकैकावस्थाविशिष्टत्वरूपेण साक्षिणा गृहीतत्वेऽपि अवस्थात्रयविशिष्टस्य त्वम्पदमुख्यार्थस्य त्वम्पदलक्ष्यस्य शुद्धजीवस्वरूपस्य चाननुभूतत्वेन न त्वम्पदेनोपस्थितिसम्भव इति तत्त्वम्पदलक्ष्यार्थयोरैक्यं कथं बोध्यमित्यत आह—**वाक्यं चेति** । ज्ञापकं पदार्थयोरैक्यादिज्ञामकम् । तत्त्वंपदार्थयोः पदाभ्यां वाच्ययोर्लक्ष्ययोश्च । प्रकृतवाक्यार्थानुकूलयोः तत्त्वमसीति वाक्यार्थबुद्धौ प्रयोजकीभूतोपस्थितिविषययोः । वाच्योपस्थितिद्वारकलक्ष्योपस्थितेरेव लक्ष्यघटितवाक्यार्थबोधे हेतुत्वात् । अन्यतः श्रुतिभिन्नप्रमाणात् । शास्त्रेणैव श्रुत्यैव । **यूपेत्यादि** । यथा यूपपदार्थोद्देशेन तक्षणादिसंस्कारकर्मविधायकस्य 'यूपं तक्षती' त्यादिवाक्यस्य पर्यालोचनात्तक्षणादिजन्यसंस्कारविशिष्टकाष्ठं यूपपदवाच्यमिति निर्णीय यूपे 'पशुं बध्नाती' त्यादिवाक्याद्युपसंसर्गो बुध्यते । यथा वा 'वसन्ते ब्राह्मणोऽग्नीनादधीत' 'नक्तं गार्हपत्यमादधाति दिवाहवनीय' मित्यादिवाक्यपर्यालोचनेन दिवाधानादिसाध्याग्न्यादिराहवनीयादिपदवाच्य इति निर्णीय 'आहवनीये जुहोतीति

श्च 'यतो वा इमानि भूतानि जायन्ते । येन जातानि जीवन्ती'त्याद्याः सृष्ट्यादिश्रुतयस्तत्पदवाच्यार्थस्य समर्पिकाः । 'सत्यं ज्ञानमनन्त'मित्यादय स्तु लक्ष्यार्थस्य । एवं जाग्रत्स्वप्नसुषुप्त्यादिश्रुतयः 'तद्यथा महामत्स्य

'गार्हपत्ये पत्नीस्संयाजयन्ती' त्यादिवाक्यादाहवनीयादिसंसर्गो बुध्यत इत्यर्थः । **भूतानीति** । उत्पन्नानीत्यर्थः । तेन पञ्चभूतान्यस्य गुणक्रियादेर्दृग्दृश्यतादात्म्येक्षणादेश्च ब्रह्महेतुकत्वलाभः । जायन्ते उत्पद्यन्ते । जातानि दृश्यतया प्रादुर्भूतानि दृश्यानीति यावत् । जीवन्ति सत्तास्फूर्तिमर्यादादिकं प्राप्तानि । प्रयन्तीति शातृप्रत्ययान्तं लयं लभमानानीत्यर्थः । तथा च यतो ब्रह्मणो हेतोः कार्यं सर्वमुत्पद्यते, दृश्यानि सर्वाणि यतः सत्तास्फुरणादि लभन्ते, लीयमानानि च सर्वाणि प्रलयकाले यत्प्रविशन्ति, तद्ब्रह्मेत्यर्थः । पञ्चमीतृतीययोर्हेतुसामान्यार्थकत्वेऽपि लीयमानकार्याधारत्वोक्त्योपादानत्वं लभ्यते । 'तदैक्षत बहु स्यां प्रजायेये' ति 'सोऽकामयत तदात्मानं स्वयमकुरुते' ति ईक्षणकामनाकृतीनां जगत्कारणनिष्ठतया निर्देशाद्ब्रह्मणो जगत्कर्तृतालाभः । येनेत्याद्येकवचननिर्देशात् 'य एको जालवानीशत ईशनीभि' रित्यादिश्रुतेश्च जगज्जन्मादिहेतोरेकत्वमिति बोध्यम् । **तत्पदवाच्यार्थस्येति** । तत्त्वमसीति वाक्यप्रवृत्तेः पूर्वं सृष्ट्यादिवाक्यस्य प्रकृतत्वात् प्रक्रान्तवाचितत्पदस्य सृष्ट्यादिकारणं वाच्यमिति भावः । **इत्यादयस्तु लक्ष्यार्थस्येति** । 'ब्रह्मविदाप्नोति पर'मित्यनेन शुद्धब्रह्मज्ञानस्य मोक्षहेतुत्वे उक्ते किं तद्ब्रह्मेत्याकांक्षायां सत्यमित्यादिवाक्यस्य प्रवृत्तत्वेन तत्पदलक्ष्यशुद्धब्रह्मपरत्वमिति भावः । बुद्धान्तं चेत्याद्या इत्यत्राद्यशब्देन 'तद्यथास्मिन्नाकाशे श्येनो वा सुपर्णो वा विपरिपत्य श्रान्तः संहत्य पक्षौ सञ्छयायैव ध्रियते एवमेवायं पुरुष एतस्मा अन्ताय धावति यत्र सुप्तो न कञ्चन कामं कामयते न कञ्चन स्वप्नं पश्यती'ति श्रुतिसङ्ग्रहः । कूले नद्यास्तीरे अन्तौ कर्मफलपरिपाकरूपौ अनुसञ्चरति अनुगच्छति स्वप्नान्तं स्वप्नभोगरूपमन्तं बुद्धान्तं जाग्रद्भोगरूपमन्तं सुपर्णः शीघ्रगतिः श्येनः विपरिपत्य विशेषेण नानादेशेषु पतित्वा श्रान्तो भूत्वा पक्षौ संहत्य संयुक्तीकृत्य सञ्छयाय नीडाय ध्रियते नीडप्राप्त्यर्थं यतते । अन्ताय उपरतावस्थारूपांतप्राप्त्यर्थं धावति यतते । ननु, जाग्रदाद्येकैकावस्थाविशिष्टस्यापि त्वम्पदवाच्यतासम्भवेनावस्थात्रयविशिष्टस्य सा कथमुक्ता ।

एवं जन्माद्येकैकहेतुत्वविशिष्टस्यापि तत्पदवाच्यतासम्भवेन जन्मस्थितिसंहाररूपत्रयहेतोरेव सा कथमुक्ता । न च 'स वा अयमात्मा ब्रह्मे'त्यादि वाक्यस्य 'तद्यथा महामत्स्य' इत्याद्यवस्थात्रयविशिष्टजीवबोधकवाक्योत्तरं विद्यमानत्वाज्जीवबोधकपदानां महावाक्यस्थानामवस्थात्रयविशिष्टाचिदेव मुख्योऽर्थः । एवं तत्त्वमस्यादिवाक्यस्य जन्मादिहेतुब्रह्मबोधकवाक्योत्तरं सत्त्वात् तादृशं ब्रह्मैव ब्रह्मबोधकपदमुख्यार्थ इति वाच्यम् । श्रुतिष्वप्यवस्थात्रयस्य जन्मादित्रयस्य च कथं निर्देश इति पर्यनुयोगात् एकैकघटितस्यैव वाच्यतेत्यभिप्रायेणापि उक्तश्रुतिसङ्गतेश्च । न च जन्मलयहेतुत्वस्याविद्यायामपि सम्भवेनातिप्रसक्त्या स्थितिहेतुत्वमावश्यकम् । एवं विशेषविज्ञानाभावरूपसुषुप्तेरपि घटादावतिप्रसक्तत्वेन न मुख्यार्थतावच्छेदकत्वम् । ये एव हि तत्त्वम्पदयोर्मुख्यार्थोपलक्षिते स्वरूपे, तयोरैक्यं महावाक्येन बोधनीयमिति वाच्यम् । स्थितिहेतुत्वस्य ब्रह्मण्येव सत्त्वात्तदन्यवैयर्थ्यात् घटादौ सुषुप्तिव्यवहाराभावेन उपरतमनस्कत्वस्य तद्विशिष्टानन्दसामान्यानुभवितृत्वस्य वा सुषुप्तित्वात् 'आनन्दभुक् चेतोमुखः प्राज्ञ' इति श्रुत्या तथा बोधात् जाग्रदाद्यन्यतरमात्रस्थानतिप्रसक्तत्वाच्च । न च जन्मादित्रयहेतूनां ब्रह्मविष्णुरुद्राणां जाग्रदाद्यवस्थावतां विश्वतैजसप्राज्ञानां चैकं स्वरूपमिति लाभाय श्रुतिषु त्रयमुक्तम् । अन्यथा हि जन्ममात्रहेतुत्वस्य एकवाक्येनोक्तौ प्रदेशान्तरयोर्वाक्याभ्यां स्थितिसंहारयोरेकैकहेतुत्वोक्तौ जन्मादित्रयहेतूनां त्रयाणामैक्यं न लभ्येत । एवं विश्वतैजसप्राज्ञानामप्येकप्रदेशानुक्तौ नैक्यं लभ्येत । तथा च त्रयाणां त्रिभिरैक्यस्य महावाक्याल्लाभेऽपि स्वरूपत्रयस्य सत्यत्वापत्त्या अद्वैतश्रुतिविरोध इति कल्पतरूक्तं युक्तमिति वाच्यम् । 'एकमेवाद्वितीय'मित्यादिना ब्रह्मणः 'असङ्गोह्ययं पुरुषः सलिल एको द्रष्टा अद्वैतो भवती'त्यादिना च जीवस्य निरंकुशाद्वैतस्वरूपबोधनात् तदर्थमुक्तप्रयासस्यानौचित्यादिति चेत्, अत्रोच्यते । जन्मादिहेतुत्वानां जाग्रदाद्यवस्थानां च एकैकमात्रस्योक्तौ महावाक्यस्थतत्त्वम्पदाभ्यामेकैकमात्रोपलक्षितस्वरूपयोरैक्यं बोध्येत । तथा च तयोरेव भेदभ्रमो निवर्तेत । न तु हेतुतात्रयोपलक्षितेशस्वरूपादवस्थात्रयोपलक्षितजीवस्वरूपस्य भेदभ्रमो निवर्तेत । न हि 'छत्री कुण्डली वास्त्री यः स श्यामः स्थूलश्चैत्रो ने'ति भ्रमः, 'छत्री श्याम इति वाक्यजन्य-

उभे कुले अनुसञ्चरति पूर्वं चापरं चैवमेवायं पुरुष एतावुभावन्तावनुसञ्चरति स्वप्नान्तं च बुद्धान्तं चे'त्याद्यास्त्वंपदवाच्यार्थस्य समर्पिकाः । 'योऽयं विज्ञानमयः प्राणेषु हृद्यन्तर्ज्योतिः पुरुषः' 'न दृष्टेर्द्रष्टारं पश्ये' रित्यादयस्तु लक्ष्यार्थस्य । तेन प्रथममवान्तरवाक्येभ्योऽनुभूतयोः शुद्धयोर्जीवब्रह्मणोस्तत्त्वमस्यादिवाक्ये मुख्यार्थान्वयानुपपत्त्या लक्षणया स्म-

---

ज्ञानेन निवर्तते । निवर्तते तु चैत्र इत्यन्तोक्तवाक्यजन्यज्ञानेन तादृशज्ञानयोस्तद्व्यक्तिमात्रविषयत्वात् अविशेषेऽपि सामग्रीविशेषजन्यज्ञानस्यैवोक्तभ्रमनिवर्तकत्वेन सर्वानुभाविकत्वात् । तस्मात् त्रितयोपलक्षितस्वरूपयोरैक्यविषयकस्य मूलाज्ञानस्य तादृशैक्यज्ञानं विनोच्छेदासम्भवात्तं विना च तादृशाज्ञानमूलकभेदभ्रमोच्छेदासम्भवात्तादृशज्ञानमावश्यकम् । तच्च त्रितयविशिष्टोपस्थितिपूर्वकशुद्धोपस्थितिजन्यमेवेति तादृशोपस्थित्यर्थकमेकस्मिन्नेव वाक्ये त्रितयोक्तिरावश्यकीति बोध्यम् । **योऽयमित्यादि**। बृहदारण्यके षष्ठाध्याये तृतीयब्राह्मणे 'एष ब्रह्मलोक' इत्यादिवाक्येन शुद्धजीवब्रह्मणोरैक्यस्य वक्ष्यमाणत्वेन तदुपयुक्तस्वप्रकाशजीवस्वरूपमादित्यचन्द्राग्निवाचामभावे जीवस्य व्यवहारप्रयोजकं ज्योतिः किमिति प्रश्नपूर्वकेणैवात्मैवास्य ज्योतिर्भवतीत्यन्तेन उक्त्वा कतम आत्मेत्यनेन शुद्धात्मस्वरूपमात्रज्ञाने आकांक्षामुत्थाप्य योऽयमित्यादिवाक्यस्य उक्तत्वेन शुद्धात्मपरत्वम् । तत्र च वाक्येऽन्वर्थः विज्ञानमयः बुद्धिविकाराभिमानी प्राणेषु अभिमानसम्बन्धेन प्राणसम्बन्धी हृदि हृदयस्थमनोऽभिमानी अन्तर्ज्योतिर्मनोवृत्तिरूपः बहिर्ज्योतिरन्यस्वभावः पुरुषः पूर्णः । तथा च ज्योतिरात्मेत्यनेनाहमाकारधीविषयत्वे पूर्ववाक्येन ज्योतिषो ज्ञानेऽपि बुद्ध्यादीनां सर्वेषामेव तत्सम्भवाद्विज्ञानमयादिपदैर्बुद्ध्यादिविलक्षणं स्वप्रकाशरूपं प्रदर्शितम् । **तेनेति**। उक्तश्रुतिभिर्वाच्यलक्ष्योभयसमर्पणेनेत्यर्थः । वाच्यसमर्पणस्य फलमाह—**मुख्यार्थान्वयानुपपत्त्येति** । मुख्यवृत्त्युपस्थापितयोर्विशिष्टजीवब्रह्मणोरैक्यबोधस्य भ्रमत्वानुपपत्तिज्ञानेनेत्यर्थः । वाच्यलक्ष्योभयसमर्पणस्य फलमाह—**अवान्तरवाक्येत्यादिना** । अवान्तरवाक्येभ्योऽनुभूतयोः शुद्धयोर्लक्षणया स्मरणोपपत्तिरिति योजना । वाच्यसमर्पणे सति वाच्ययोरन्वयानुपपत्तिज्ञानम् । ततश्च वाच्यज्ञानात्तत्सम्बन्धिनो लक्ष्यस्य अवान्तरवाक्याधीनपूर्वानुभवाधीनसंस्कारजन्यस्मृत्या तदैक्यरूपवाक्यार्थप्रमेति भावः । ननु, वा-

च्ययोश्शुद्धयोश्च अवान्तरवाक्यानुभूतत्वं वक्तव्यम् । शुद्धयोरपि वा, तच्च वक्तव्यम् । तेनेत्यनेनैव तच्छाभात् । किमिति शुद्धयोरेव तदुक्तमिति चेत्, अत्रोच्यते । यद्यपि वाच्ययोरपि यतो वेत्यादिना तद्यथेत्यादिना च वाक्येनानुभवोऽस्ति तथापि तत्र तयोर्नावान्तरवाक्यत्वम् । तत्रैव तात्पर्यापर्यवसानात् तयोर्ब्रह्मजीवलक्षणबोधकत्वेन लक्षणविशिष्टब्रह्मजीवबोधनद्वारा शुद्धब्रह्मजीवस्वरूपपरत्वात् लक्षणबोधकवाक्यमात्रस्य लक्षणविशिष्टबोधनद्वारा लक्षणोपलक्षिताखण्डव्याक्तिपरत्वमित्यस्यार्थस्याद्वैतसिद्धिद्वितीयपरिच्छेदे जन्मादिसूत्रकल्पतरौ च व्यवस्थापितत्वात् । तथा च यतो वेत्यादिवाक्ययोरपि शुद्धबोधपर्यवसितत्वेन शुद्धयोरेवावान्तरवाक्यानुभूतत्वोक्तिर्युक्तैवेति भावः । अत्रेदं बोध्यम् । वाच्यसमर्पकत्वं तत्पदवाच्यबोधद्वारकशुद्धचिद्बोधपरत्वम् । तेन सत्यादिवाक्यस्यापि सत्यादिपदवाच्यबोधद्वारकशुद्धचिद्बोधपरत्वेऽपि न वाच्यसमर्पकत्वम् । शुद्धबोधपरत्वेऽपि यतो वेत्यादिवाक्यं न स्वरूपलक्षणपरम् । ब्रह्मस्वरूपं सत्यत्वाद्युपलक्षितात्यन्ताभिन्नं न वेत्यादिसंशयानिवर्तकत्वात् स्वरूपे भ्रमसंशयनिवर्तकधीपरस्यैव स्वरूपलक्षणपरत्वात् । एवं तत्पदवाच्यत्वं न सृष्ट्यादित्रितयजनकत्वम् । प्रलये तदभावात् । न हि तदा सृष्ट्याद्यन्यतमस्यापि उपधायकत्वमस्ति । न चोपलक्षणविधया तादृशत्रयोपधायकत्वं वाच्यतावच्छेदकमिति वाच्यम् । काकवन्तो देवदत्तस्य गृहा इत्यादावुत्तृणत्वादेरिवोपलक्ष्यतावच्छेदकस्यावश्यमुपलक्षणबोध्यतया तस्यैव वाच्यतावच्छेदकत्वस्य युक्तत्वात् । किं तु सृष्ट्यादिजननस्वरूपयोग्यतावच्छेदकीभूताविद्याबिम्बत्वरूपमीश्वरत्वम् । एवं त्वम्पदवाच्यत्वमपि नावस्थात्रयवत्त्वम् । मूर्च्छासमाध्योस्तदभावात् । किं तु अवस्थात्रयसम्बन्धयोग्यतावच्छेदकीभूताविद्याप्रतिबिम्बत्वरूपं जीवत्वम् । न च मूर्छायां कर्मेन्द्रियव्यापारसत्त्वात् जाग्रद्रूपत्वम् । समाधिकाले तु न जीवस्य त्वम्पदवाच्यतेति जाग्रदाद्यन्यतमवत्त्वस्य त्वम्पदवाच्यत्वेऽपि न दोष इति वाच्यम् । मूर्छायां कायक्रियामात्रेण गात्रकम्पादेस्सत्त्वेऽपि कर्मेन्द्रियव्यापारसत्त्वे मानाभावात् । समाधेस्तु असंप्रज्ञातरूपस्याप्यविद्यानिवृत्तेः पूर्वमपि त्वम्पदार्थसाक्षात्कारहेतुतयानुष्ठेयत्वेन तदानीं जीवत्वसत्त्वेन त्वम्पदवाच्यतानपायात् । नन्ववान्तरवाक्यैश्शुद्धेऽनुभूते सति महावाक्यस्थपदैः शुद्धस्मृतिसम्भवः । अवान्तरवाक्यस्थपदैस्तु कथं शुद्धस्य स्मृतिः ।

रणोपपत्तिः । सुषुप्तौ निर्विकल्पकसाक्षिचैतन्यानुभवाङ्गीकाराच्च, अद्वितीय-ब्रह्मविजिज्ञापयिषया प्रवृत्तानां सत्यज्ञानादिपदानामुपाधिविशिष्टचैतन्ये श-

तत्पूर्वं शुद्धस्याननुभवादित्यत आह—सुषुप्ताविति । निर्विकल्पकेति । साक्षिस्वरूपसुखस्वरूपाज्ञानस्वरूपाकाराः निर्विकल्पास्तिस्रोऽविद्यावृत्तयः सुषुप्तौ जायन्त इति विवरणेऽङ्गीकृतम् । साक्षिणश्चाविद्योपहितचिद्रूपत्वपक्षेऽप्यविद्यायाः साक्षिस्वरूपावटकत्वात् शुद्धचिद्रूपत्वमेव । पक्षान्तरे तु वक्ष्यन्त्याचार्या एव—'साक्षी तु सर्वानुगतस्तुरीयः तथा एकः कूटस्थः साक्षी'त्यादि । तथा च सौषुप्तिकनिर्विकल्पकानुभवमूलिकैवावान्तरवाक्यस्थपदजन्या शुद्धस्मृतिरिति भावः । ननु, वार्तिककारमते सुषुप्तौ नोक्तनिर्विकल्पकवृत्तिः स्वीक्रियते । तत्कथमवान्तरवाक्यस्थपदैः स्मरणम् । न चैवं तन्मते 'सुखमहमस्वाप्सं न किञ्चिदवेदिष'मित्याकारकज्ञानस्य जाग्रत्कालीनस्य स्मृतित्वं न स्यादिति वाच्यम् । तस्य तन्मतेऽनुभवत्वस्वीकारात् । उक्तं हि अव्याकृतप्रक्रियायां वार्तिके—'न सुषुप्तिगविज्ञानं नाज्ञासिषमिति स्मृतिः । कालाद्यव्यवधानत्वान्न ह्यात्मस्थमतीतभाक् ॥' कालाद्यव्यवधानत्वादिति यदा स्मृतिः परेण वाच्या, तदापि साक्षिरूपानुभवोऽस्तीत्यर्थः । अत्र हेतुः— न हीति । आत्मस्थं सुषुप्तिजीवस्थं साक्षिचैतन्यं अतीतभाक् अतीततामाक् । न चाज्ञानाकारवृत्तिं विना नाज्ञासिषमित्याकारो नोपपद्यत इति वाच्यम् । न किञ्चिदवेदिषमित्यनेन अनेकविषयकाज्ञानस्यैवोल्लेखात् । तन्नाशादेव तदवच्छिन्नाचिन्नाशरूपसंस्कारोत्पादेन स्मृतिसम्भवात् नाज्ञासिषमिति स्मृतिरिति मूलाज्ञानस्मृतिनिषेधः । न च तथापि वार्तिकमते साक्षिणः स्वप्रकाशतया सर्वदा भानस्यानपलापात् तद्बलाच्छुद्धस्मृतिरवान्तरवाक्यस्थपदैः स्यादेवेति वाच्यम् । जन्यनिर्विकल्पकं विना तत्सूक्ष्मावस्थारूपसंस्कारजस्मृत्यसम्भवादित्यत आह—अद्वितीयेति । शुद्धेत्यर्थः । विजिज्ञापयिषया प्रमार्थम् । उपाधीति । सत्यत्वादीत्यर्थः । शक्तत्वेऽपि शक्ततया ज्ञातत्वेऽपि । चैतन्यमात्रे शुद्धचैतन्ये । तात्पर्येण तात्पर्यनिश्चयेन । तदंशे शुद्धचिद्रूपे । विशिष्टस्यांशे संस्कारोद्बोधात् स्मृतिरूपकार्यजनने संस्कारस्य सहकारित्वकल्पनात् । सत्यज्ञानादिपदानामित्यनुषज्यते । तथा च विशिष्टस्यैव पूर्वमनुभूतत्वेन संस्कारसत्त्वेऽपि सत्यादिवाक्ये शुद्धब्रह्मतात्पर्यानुरोधेन तस्य संस्कारस्य सत्यादिपदज्ञानसहकृतस्य

क्तत्वेऽपि चैतन्यमात्रे तात्पर्येण (तत्रैव) तदंशे एव संस्कारोद्बोधाच्च । इच्छन्ति ह्याकाशादिपदादपि निर्विकल्पकं स्मरणम् । तात्पर्याधीनत्वाच्छब्दवृत्तेः । ए-

शुद्धस्मृतिहेतुत्वं कल्प्यत इति भावः । ननु, पदपदार्थयोः वृत्तिज्ञानजन्या पदार्थोपस्थितिरेवान्वयबोधे हेतुः । सत्यादिपदस्य शुद्धे लक्षणारूपवृत्तिज्ञानं न सम्भवति। शुद्धस्य पूर्वमज्ञानात् । अत आह—इच्छन्तीति । मणिकारादय इति शेषः । शक्तिवादे हि मणावुक्तम्—'आकाशादिपदस्य शब्दाश्रयत्वादिविशिष्टे न शक्तिः । कदाचिदृष्टद्रव्यान्यद्रव्यत्वरूपेणाप्याकाशादिपदाच्छाब्दबोधोत्पत्तेः तद्विशिष्टेऽपि शक्त्यापत्तेरेकस्यामाकाशादिव्यक्तौ केवलायामेव शक्तिसम्भवाच्च शक्त्यनुगमार्थमेव किञ्चिद्धर्मविशिष्टे शक्तिस्वीकारात् । न च शुद्धे शक्तिज्ञानात्स्मृतौ सत्यां शुद्धस्यैव शाब्दबोधः स्यात् । न तु शब्दाश्रयत्वादिविशिष्टस्येति वाच्यम् । यद्यपि शब्दाश्रयत्वाद्यंशे न शक्तिर्गृह्यते, तथापि शब्दाश्रयत्वेनोपस्थिताकाशव्यक्तौ शक्तिग्रहस्यैव शब्दाश्रयत्वादिविशिष्टविषयकस्मृतिहेतुत्वसम्भवेन विशिष्टविषयकस्मृतिहेतुकशाब्दबोधसम्भवात्। अथवा आकाशादिपदान्निर्विकल्पकमेव स्मरणमास्ताम् । ततः शुद्धाकाशस्यैव सुबर्थोपरागेण शाब्दबोधे भानसम्भवात् निर्धर्मितावच्छेदकशाब्दबोधास्वीकारेऽपि आकाशमस्तीत्यादिवाक्यादेकमस्तीत्याकारके अस्तित्वाश्रयत्वम् एकवृत्तीत्याकारके वा शाब्दबोधे बाधकाभावा'दिति । तदत्र कल्पद्वये मणिकारोक्तेऽपि आद्ये शब्दाश्रयत्वाद्यंशे शक्त्यग्रहात्तद्विशिष्टस्य स्मृत्या शाब्दबोधासम्भवः । यदंशे वृत्तिः पूर्वं ज्ञायते, तत्स्मृतेरेव शाब्दबोधजनकत्वात् । द्वितीये शुद्धस्य पूर्वाननुभूतत्वेन स्मृत्यसम्भवः । तथापि तत्कल्पनेव मन्मतेऽपि युक्तं पूर्वोक्तकल्पनमिति भावः । अत्रापि—शब्दस्य स्मरणमित्यस्योत्तरं योजनया उक्ताद्यकल्पमिच्छन्तीत्यपि लभ्यते । ननु, तदप्यनुपपन्नमेवेत्यत आह—तात्पर्याधीनत्वादिति । तात्पर्यविषयवाक्यार्थप्रमानिर्वाहकयथासम्भवकल्पनाविषयत्वात् । शब्दवृत्तेः शब्दार्थसम्बन्धरूपशक्त्यादिज्ञानस्य । तथा च तात्पर्यनिर्वाहाय प्रथमकल्पो लाघवेन युक्त एव । अत एव सर्वेषां पदानां नवीनैस्तथा कल्प्यते । लक्ष्यतावच्छेदके लक्षणाया इव शक्यतावच्छेदके शक्तेर्ग्रहानुपयोगात् । न च लक्ष्यतावच्छेदकेऽपि लक्षणा गृह्यत एव। तीरसम्बन्धिप्रवाहशक्तं गङ्गापदमिति ज्ञानस्यैव तत्त्वात् । तीरसम्बन्धित्वस्यैव तीरत्वल-

तेन प्रमितिप्रमात्रोर्महावाक्यार्थबोधे भानमपास्तम् । असम्प्रज्ञातसमाधेः

क्षणात्वात् । लक्षणासम्बन्धेन लक्ष्यप्रकारकस्यैव हेतुत्वस्वीकारेऽपि उक्तज्ञानस्य समानविषयतया स्वाश्रयसम्बन्धिप्रवाहशक्तत्वसम्बन्धेन गङ्गापदे तीरत्वप्रकारकत्वसम्भवाच्च । तथा च लक्ष्यतावच्छेदक इत्यादिदृष्टान्तशिरोमण्युक्तोऽसिद्ध इति वाच्यम् । उक्तशक्तत्वसम्बन्धेन तीरत्वविशिष्टमित्याकारकत्वस्यानुमित्यादिरूपे तीरलक्षणाज्ञानेऽसम्भवात् । जातिशक्तिज्ञानात् व्यक्तिशाब्दधीस्वीकारात् यदंशे वृत्तिरित्याद्युक्तानियमस्य गौरवपराहतत्वाच्च । द्वितीयकल्पोऽपि युक्तः । विशिष्टविषयकशक्त्यनुभवजन्यसंस्कारस्य पदज्ञानसहकृतस्य तात्पर्यानुरोधेन शुद्धविषयकस्मृतिहेतुत्वसम्भवात् । अत एव प्रमेयवदनुभवजन्यसंस्कारस्य शुद्धदशरथत्वादिजातिविशिष्टांशएवोद्बोधकं प्रकल्प्य स्मृते तस्मिन् दशरथादिपदशक्तिग्रहः । अन्यथा शुद्धदशरथत्वादिजातेर्दशरथादिपदेनानुपस्थित्या तात्पर्यविषयशाब्दबोधे तद्विशिष्टस्य भानासम्भवादिति वदन्ति । एवं मन्मतेऽपि विशिष्टशक्तिविषयकस्य सत्यादिपदज्ञानसहकृतविशिष्टसंस्कारस्य तात्पर्यानुरोधेन शुद्धस्मृतिहेतुत्वं कल्प्यते । न चैवं लक्षणया शुद्धबोध इति सिद्धान्तविरोध इति वाच्यम् । विशिष्टशक्तेर्विशिष्टशाब्दबोधप्रयोजकत्वस्य औत्सर्गिकस्य त्यागेन विशेष्यमात्रशाब्दबोधप्रयोजकताया लक्षणाशब्देन गौण्या वृत्त्या शास्त्रे व्यवहारात् । प्राचीनतार्किकमीमांसकमतयोरिव मन्मते शक्यसम्बन्धरूपलक्षणाज्ञानस्य शाब्दबोधाहेतुत्वेन शक्तिज्ञानप्रयोज्यत्वेन शक्यसम्बन्ध्युपस्थितेर्लक्षणात्वेन तत्स्वरूपस्यैव शाब्दबोधहेतुत्वेनोक्तसिद्धान्ताविरोधाच्च । एतेन तात्पर्यानुरोधतो महावाक्यजन्यज्ञानस्य शुद्धं ब्रह्मैव विषयो नान्यदिति स्वीकारेण । भानं प्राभाकरसम्मतं विषयत्वम् । मणिकारोक्तप्राभाकरनव्यमते हि सर्वज्ञानेषु स्वं स्वाश्रयश्च विषय इति स्वीक्रियते । प्राचीनप्राभाकरमते तु प्रमाया विषयत्वं न प्रमितिप्रमात्रोः स्वीक्रियते । प्रमायास्तादात्म्यसमवायाभ्यामेव तयोर्व्यवहारसम्भवात् । ननु, 'तमेव विदित्वातिमृत्युमेती'त्यादिश्रुत्याद्यालोचनेन शुद्धब्रह्मान्यो महावाक्यजन्यज्ञाने विषयो नेति निर्णीयते, तथापि प्रमितिप्रमात्रोर्विषयत्वमेवातदन्यस्यासाधारणस्य विषयस्यैव तथा निर्णयात् । भवत्सिद्धान्तेऽपि हि प्रमितिप्रमात्रोर्महावाक्यार्थबोधकाले साक्षिणा भाने बाधकाभावः । तथा च प्राभाकरमते नित्यसाक्ष्यसम्भवात् सर्वज्ञानानां मितिमातृविषयकत्वं युक्तमेव । सुषुप्त्यन्यकाले हि सदा मितिमातृमेयरूपा त्रिपुटी मतद्वयेऽपि भासते । तत्राह—**असम्प्रज्ञातेति** । सर्ववृत्तिशून्यनिरुद्धमनो-

श्रुतिस्मृतिसिद्धत्वाच्चेति । पारोक्ष्यसद्वितीयत्वाभ्यां च न तत्त्वम्पदार्थमा-

रूपेत्यर्थः । **श्रुतिस्मृतिसिद्धत्वादिति** । मैत्रायणीयशाखादौ हि श्रूयते—'लयविक्षेपरहितं मनः कृत्वा सुनिश्चलम् । यदा यात्यमनीभावं तदा तत्परमं पदम् ॥ तावन्मनो निरोद्धव्यं हृदि यावद्गतक्षयम् । एतज्ज्ञानं च मोक्षश्च शेषास्तु ग्रन्थविस्तराः ॥ समाधिनिर्धूतमलस्य चेतसो निवेशितस्यात्मनि यत्सुखं भवेत् । न शक्यते वर्णयितुं गिरा तदा स्वयं तदन्तःकरणेन गृह्यते ॥ अपामापोऽग्निरग्नौ च व्योम्नि व्योम न लक्ष्येत् । एवमन्तर्गतं यस्य मनस्स परिमुच्यते ॥ मन एव मनुष्याणां कारणं बन्धमोक्षयोः । बन्धाय विषयासक्तं मोक्षे निर्विषयं स्मृतम् ॥' इति । अत्र भाष्यं—'लयो निद्रा विक्षेपो विषयस्मृत्यादिः । अमनीभावः मनः प्रवेशकृतविशेषस्यात्मनि त्यागः तम् । यदा याति, तदा परमं पदं याति । न पुनरावृत्तिप्राप्तिरस्येत्यर्थः । हृदि हृदयसाक्षिणि गतः प्राप्तः क्षयो विनाशो येन तत्तथा । तथा च सूक्ष्मावस्थारूपस्य मनस आवृतत्वात् अमनीभावे केवलसाक्षिभानं समाधाविति भावः । तस्य परमसुखव्यञ्जकत्वमाह — समाधीति । अन्तःकरणेन शुद्धसत्त्वेन निरुद्धेन गृह्यते व्यज्यते । यद्वा अन्तःकरणावस्थाविशेषवशात् साक्षिणा स्वयं गृह्यते स्वप्रकाशतया तद्भातीति वा । अपां अप्सु । आपः निक्षिप्ता इत्यध्याहारः अग्निरग्नौ निक्षिप्त इत्यनुषङ्गः । व्योम घटाद्याकाशम् । एवमिति । तथा च निरुद्धं सत् न्यग्भूतं भवती'ति । असम्प्रज्ञातसमाधिकाले साक्षिस्वरूपं ब्रह्मैव भातीत्यर्थः । एवं कठवल्लीषु श्रूयते—'यदा पञ्चावतिष्ठन्ते ज्ञानानि मनसा सह । बुद्धिश्च न विचेष्टति तामाहुः परमां गतिम् ॥ अप्रमत्तस्तदा भवति योगो हि प्रभवाप्ययौ ।' ज्ञानानि ज्ञानेन्द्रियाणि मनोबुद्धिश्च न विचेष्टति वृत्तिरूपेण न परिणमते । अप्रमत्तः द्वैतभानरूपप्रमादशून्यः । पुण्यहेतुः पापनाशकश्च । निरुद्धस्य मनसोऽपि न्यग्भावेन साक्षिभास्यत्वाभावात् । सौषुप्तलयावस्थाया इव निरुद्धावस्थाया अप्यावृतत्वेन न्यग्भाव इति भावः । तथा च व्याख्यातं 'यदा विनियतं चित्तमात्मन्येवावतिष्ठते' । इत्यादिगीताश्लोके सरस्वतीभिः । विनियतं सर्ववृत्तिशून्यतया निरुद्धम् । आत्मन्येवावतिष्ठते चितेरेव प्राधान्यात् न्यग्भूतं भवती ' ति । स्मर्यते च गीतायाम् — ' यत्रोपरमते चित्तं निरुद्धं योगसेवया । यत्र चैवात्मनात्मानं पश्यन्नात्मनि तुष्यति ॥ सुखमात्यन्ति

कं यत्र बुद्धिग्राह्यमतीन्द्रियम् । वेत्ति यत्र न चैवायं स्थितश्चलति तत्त्वतः ॥ यं लब्ध्वा चापरं लाभं मन्यते नाधिकं ततः । यस्मिन् स्थितो न दुःखेन गुरुणापि विचाल्यते ॥ तं विद्याद्दुःखसंयोगवियोगं योगसंज्ञितम् । स निश्चयेन योक्तव्यः योगो निर्विण्णचेतसा ॥' योगसेवया असम्प्रज्ञातसमाधिरूपयोगाभ्यासेन । यत्र यस्मिन् मनःपरिणामे जाते सति चित्तं निरुद्धं सर्ववृत्तिशून्यं सदुपरमते कमपि विषयं न गृह्णाति विषयाकारपरिणामाभावे च सुषुप्तिवत् सूक्ष्मावस्थं मन इति भावः । यत्र च मनःपरिणामे सति आत्मना शुद्धसत्त्वेन मनसैव व्यञ्जकेन आत्मानं ब्रह्माभिन्नसाक्षिणमेव पश्यन् पुरुषः आत्मन्येव तुष्यति । द्वैतभानप्रयुक्तानन्दालपतारहितः तं परिणामं योगसंज्ञितं विद्यात् । निरुद्धेन मनसा ब्रह्मैव भाति । न तदन्यत् । मनसोऽपि न्यग्भावेनावृतत्वादिति भावः । आत्मन्येव तोषमुपपादयति —यत्र मनःपरिणामे सति आत्यन्तिकं सर्वसुखेभ्य उत्कृष्टं सुखं वेत्ति विषयसुखाद्विनत्ति अतीन्द्रियं विषयेन्द्रियसंयोगाजन्यं सौषुप्तसुखाद्विनत्ति । बुद्धिग्राह्यं निरुद्धमनोऽभिव्यक्तम् । सुषुप्तौ तु मनो न व्यञ्जकम् । लीनत्वात् । तदुक्तं गौडपादैः—'लीयते तु सुषुप्तौ तन्निरुद्धं नैव लीयते ।' इति । आत्यन्तिकत्वे हेतुमाह—यस्मिन् परिणामे स्थितो योगी तत्त्वतो ब्रह्माभिन्नस्वरूपात्परमार्थान्न चलति । द्वैतभानाभावात् । तथा च पातञ्जलसूत्राणि—'योगश्चित्तवृत्तिनिरोधः । तदा द्रष्टुःस्वरूपेऽवस्थानम् । वृत्तिसारूप्यमितरत्र ।' इति । तदा सकलचित्तवृत्तिनिरोधकाले । द्रष्टुःदृग्रूपस्य पुरुषस्य स्वरूप एव अवस्थानम् । न तु बुद्धिवृत्तौ प्रतिबिम्बितत्वम् । इतरत्र कालान्तरे तु वृत्तिसारूप्यं बुद्धिवृत्तिप्रतिबिम्बितत्वं द्वैतभानं विषयवासना च आत्यन्तिकसुखानभिव्यक्तौ प्रयोजकम् । तत्राद्यं तत्त्वतो न चलतीत्यनेन द्वितीयम् अयमित्यनेन निर्वासनबोधकेन निरस्तम् । एतस्यासम्प्रज्ञातसमाधेरावश्यकतायामाह—यं परिणामं लब्ध्वा अवस्थितः अपरं श्रवणादिभिन्नं लाभं महावाक्यार्थधीप्रयोजकं शास्त्रेण नाधिकं मन्यते । तस्यैव शुद्धत्वम्पदार्थसाक्षात्कारद्वारा महावाक्यार्थधीप्रयोजकत्वात् । अधिकमित्यनेन देहाद्यधिष्ठानतया आत्मज्ञानस्य निरोधसमाधिकार्यकारितया तत्तुल्यत्वं ज्ञापितम् । उक्तं च तयोस्तुल्यत्वं वासिष्ठे गीताटीकायां च । तत्र वासिष्ठम्—द्वौ क्रमौ चित्तनाशस्य योगो ज्ञानं च राघव ।

योगस्तद्वृत्तिरोधश्च ज्ञानं सम्यगवेक्षणम् ॥ आसाध्यः कस्यचिद्योगः कस्यचित्तत्त्वनिश्चयः ॥' इति । चित्तनाशस्य चित्तादर्शनप्रयुक्तस्य शुद्धात्मदर्शनस्य । क्रमौ साधनानुष्ठानक्रमेण क्रियमाणावुपायौ । गीताटीकायां तु 'सर्वभूतस्थमात्मानं सर्वभूतानि चात्मनी'ति पद्ये तथोक्तम् । ननु, देहाद्यधिष्ठानतयाऽऽत्मज्ञानं कथं शुद्धात्मसाक्षात्कारं प्रति हेतुः । तस्याप्रमाणत्वादिति चेत्, उच्यते । तादृशविवेकज्ञानोत्तरं देहादीनां हेयतया केवलात्मन एव जिज्ञास्यत्वात् तेनैव प्रतिबन्धादहङ्काराद्यभाने साक्षिमात्रविषयकसौषुप्तवृत्तिरिवाविद्यावृत्तिविशेषरूपः तादृशविवेकज्ञानोत्तरं त्वम्पदार्थशोधकवाक्यस्मृत्या मनोवृत्तिरूपो वा शुद्धात्मसाक्षात्कारः । एवं निरोधस्थलेऽपि तत्साक्षात्कारः । महावाक्यार्थसाक्षात्कारोत्तरमपि तदावश्यकतायामाह—यस्मिन् स्थित इत्यादि । गुरुणा तत्त्वदर्शनानाश्यभुज्यमानकर्मजन्येन । प्रारब्धकर्मापेक्षयाऽपि समाधेर्बलवत्त्वेन तन्नाशकतया दुःखं नोत्पद्यत एव । अत एवाणिमाण्डव्यादिनां समाधिस्थानां चोरबुद्ध्या शूलाग्रपातितानामपि न दुःखमुत्पन्नम् । प्रत्युत समाधिमाहात्म्येन तदपेक्षयाप्युत्कृष्टतेति महाभारतादावुक्तमिति भावः । तथा च सम्प्रज्ञातसमाधिपाटवेनासम्प्रज्ञातसमाधिलाभः । सम्प्रज्ञातसमाधिस्तु मनोदेहादिभिन्नतया साक्षिणो ज्ञानप्रवाहरूपः । 'ब्रह्मास्मी'ति शाब्दज्ञानोत्तरं तु तादृशधीप्रवाहरूप एव । असम्प्रज्ञातसमाधिस्तु सकलवृत्तिशून्यनिरोधरूपेण परिणतमावृतं मन एव । वेदान्तसारादौ तु निरोधरूपेण परिणामोऽपि असम्प्रज्ञातः सः केवलात्माकारवृत्तिरूपः । मनोवृत्तिभानाभावे समानेऽपि मनोवृत्तिसत्त्वासत्त्वाभ्यामसम्प्रज्ञातसमाधिसुषुप्त्योर्भेदादित्युक्तमतत्त्व । 'मोक्षे निर्विषयं स्मृतं' 'यदा पञ्चावतिष्ठन्ते ज्ञानानि मनसा सह' 'तद्यच्छेच्छान्त आत्मनी'ति श्रुतीनामुक्तसूत्राणां च विरोधात् । सर्वथा प्रमात्रादिभानशून्यस्यासम्प्रज्ञातसमाधेरावश्यकत्वात् सुषुप्तिभिन्नसर्वकाले प्रमात्रादिभानमिति स्वीकारासम्भवात् भिन्नविषयकमनुमित्यादिसामग्रीरूपप्रतिबन्धककालीनघटादिमात्रप्रत्यक्षेच्छाजन्यतत्प्रत्यक्षे व्यभिचारेण सुषुप्तिसमाधिभिन्नसर्वकाले प्रमात्रादिभानमित्यस्यासम्भवात् प्रमात्राद्यविषयके महावाक्यार्थबोधे बाधकाभाव इति भावः । अथवा अवान्तरवाक्यार्थानुभवकारणपदार्थस्मृतौ सौषुप्तानुभवः कारणमिति सुषुप्ताविति आदिनोक्तम् । वार्तिककृते सौषुप्तजन्यानुभवास्वीकारात् तन्मतेऽद्वितीयब्रह्मविजिज्ञापयिषयेत्यादिना शुद्धता-

त्पर्यज्ञानसहकृतस्य विशिष्टविषयकसंस्कारस्यैव शुद्धविषयकस्मृतिहेतुत्वमुक्तम् । इदानीं असम्प्रज्ञातसमाधेरपि तादृशस्मृतिहेतुत्वं सम्भवतीत्याशयेनाह—**असंप्रज्ञातेति**। न च नियामकाभावेन न तस्य शुद्धचिद्विषयकत्वसम्भव इति वाच्यम् । सम्प्रज्ञातसमाधिपाटवस्यैव अनात्माकारसर्ववृत्तिनिरोधेच्छासहितस्य तादृशनिरोधहेतुत्वात् 'समाधिनिर्धूतसलस्य चेतस' इत्यादिश्रुत्या 'आत्मसंस्थं मनः कृत्वे'त्यादिस्मृत्या च तथा प्रत्ययात् निरोधविवेकज्ञानयोः पश्चात्केवलात्मसाक्षात्कारस्य पूर्वोक्तकल्पनापेक्षया तयोरेव तत्साक्षात्करत्वकल्पनस्य युक्तत्वात् केवलात्मजिज्ञासासहितस्य विवेकज्ञानहेतोरेव विवेकोपलक्षितशुद्धात्मसाक्षात्कारहेतुत्वसंभवात् । 'मोक्षे निर्विषयं स्मृतम् ।' इत्यादि स्मृतिस्तु असंप्रज्ञातसमाधेः आत्मान्यविषयकत्वबोधिका । एवं योगसूत्राण्यपि बोध्यानि । संक्षेपशारिरके अत एवोक्तम्—'आत्मानात्माकारं स्वभावतोऽवस्थितं चित्तम् । आत्मैकाकारतया तिरस्कृतानात्मदृष्टि विदधीत ॥' इति । न चैवं निरोधस्य संप्रज्ञातसमाधितो विशेषानुपपत्तिरिति वाच्यम् । निरोधरूपपरिणामविशेषत्वप्रमाणजन्यत्वाभ्यां ततो विशेषात् । अस्मिन् पक्षे निनिरोधस्यैव वाक्यगतपदार्थस्मृतिहेत्वनुभवत्वेन निरोधस्य वाक्यजन्यत्वेन प्रमाणजन्यता । तस्मादात्मविषयकनिरोधपरिणामस्य सूक्ष्मावस्थारूपसंस्कारद्वारा शुद्धस्मृतिहेतुत्वं निर्दोषम् । गीताटीकायान्तु निरोधसमाधिरूपस्य योगस्य पुण्यविशेषद्वारा यथार्थप्रत्यक्षहेतुत्वात् परमार्थभूतात्ममात्रप्रत्यक्षहेतुता । उक्तं हि पतञ्जलिना—'निर्विचारवैशारद्येऽध्यात्मप्रसादः । ऋतम्भरा तत्र प्रज्ञा । श्रुतानुमानाभ्यामन्यविषया विशेषार्थत्वा'दिति । निर्विचारः सूक्ष्मवस्तुविषयकनिर्विकल्पकसमाधिः । तस्य वैशारद्ये पाटवे सति अध्यात्मप्रसादः अत्यन्तसत्त्वोद्रेको भवति । ततः ऋतम्भरा सत्यमेव गृह्णती प्रज्ञा जायते । सा च शब्दानुमानविषयाभ्यां अन्यविषया । शब्दानुमानग्रहणायोग्यविशेषविषयत्वात् । अत्र शब्दस्य विषयः तच्छक्त्या ग्राह्यः । तेन ब्रह्मणः शब्दलक्ष्यत्वेऽपि न क्षतिरिति तदर्थः । तथा च योगजधर्मजन्यप्रत्यक्षमेवावान्तरवाक्यस्थपदजन्यस्मृतिमूलमित्युक्तम् । ननु, महावाक्यार्थबोधे शुद्धब्रह्मैव विषय इत्युक्तम् । तदयुक्तम् । अवान्तरवाक्यार्थस्यापि शुद्धचिद्रूपत्वेन महावाक्यस्यानुवादकत्वापत्तेः । तत्राह—**पारोक्ष्यसद्वितीयत्वाभ्यामिति** । ब्रह्मणि परोक्ष-

त्रानुभवादेव कृतकृत्यता । वाच्यार्थभेदावभासान्न पौनरुक्त्यम् । लक्ष्य-ताभ्रमस्य जीवस्वरूपे दुःखित्वादिभ्रमस्य च सत्त्वादित्यर्थः । (पदार्थानुभवात्) तत्त्वम्पदार्थानुभवात् । अवान्तरवाक्यजन्यतत्त्वम्पदार्थानुभवात् कृतकृत्यता । महावाक्यजानुभवकार्योक्तभ्रमनिवृत्तिलाभः । तथा चावान्तरवाक्यजन्यानुभवादुक्तभ्रमनिवृत्त्यभावेन उक्तभ्रममूलीभूतमूलाज्ञानस्यापि न निवृत्तिरिति। अवान्तरवाक्यजन्यबोधोत्तरमज्ञातमैक्यं बोधयन्महावाक्यमननुवादकम् । तज्जन्यबोधे च मूलाज्ञाननिवृत्त्या सर्वभ्रमोच्छेदेन कृतकृत्यतेति भावः । अथ शुद्धब्रह्मप्रमायाः भ्रमनिवर्तकत्वेनावान्तरवाक्यात् शुद्धभ्रमोत्पत्तौ न कुतो भ्रमनिवृत्तिरिति चेन्न । उक्तरूपपरोक्षदुःखोपलक्षितत्वस्वरूपस्यापरोक्षाभावात् । ननु, तथापि सत्यज्ञानादिपदानां सर्वेषां लक्षणया शुद्धब्रह्मबोधकत्वात् पौनरुक्त्यम् । तत्राह — **वाच्यार्थभेदावभासादिति** । वाच्यार्थानां तादात्म्यज्ञाननजननरूपप्रयोजनसत्त्वादित्यर्थः । सत्यमित्यादिनानापदानामिति शेषः । सत्यत्वज्ञानत्वादिविशिष्टानां सत्यादिपदवाच्यानां तादात्म्यबोधनद्वारा शुद्धयोरैक्यं वाक्येन बोध्यते । ननु, वाच्ययोस्तादात्म्यधीश्शक्त्यैव वक्तव्या । न तु लक्षणया । वक्ष्यमाणरीत्या वाच्यार्थबोधोत्तरं विरोधप्रतिसन्धाने सत्येव लक्षणावतारात् । शक्तिज्ञानजन्योक्तधीस्तु एकवाच्यतावच्छेदकविशिष्टे वाच्यतावच्छेदकान्तरविशिष्टस्य तादात्म्यविषयिका । अन्यथा विशिष्टे विशिष्टान्वयबोधस्य लाक्षणिकादुपहितान्वयादुपलक्षितान्वयाच्च मुख्यत्वस्य 'लोहितोष्णीषा ऋत्विजः प्रचरन्ती'त्यादौ महाभाष्याद्युक्तस्यासाङ्गत्यापत्तेः । विशिष्टे विशिष्टस्य तादात्म्यधीस्तु विशेषणीभूतयोर्वाच्यतावच्छेदकयोस्तादात्म्यमेकवाच्यतावच्छेदकोपहितेऽपरवाच्यतावच्छेदकतादात्म्यं चावगाहते । तथा च तादृशबुद्ध्यनुपपत्तिः । बाधबुद्धेर्विरोधित्वादिति चेन्न । बाधबुद्धेस्तत्राविरोधित्वात् । तदुक्तं खण्डने—'अत्यन्तासत्यपि ज्ञानं त्वर्थे शब्दः करोति ही'ति । अत्यन्तासति बाधिते सति। हिशब्देन तादृशज्ञानस्य कलहादिस्थले प्रसिद्धिलाभः । तथा चोक्ततादात्म्यज्ञानस्य सम्भवात्तद्विना विरोधाप्रतिसन्धानेन लक्षणानवतारात् । तदवतारार्थं सत्यादिपदानां विशिष्टतादात्म्यबोधकत्वेनावश्यकत्वम् । न चैवमपि पदद्वयादेव लक्षणावतारसिद्धेस्तृतीयादिपदवैयर्थ्यमिति वाच्यम् । वाच्यार्थानां मिथो भेदज्ञानस्यान्योन्यमभेदज्ञानं विना निवर्त्तयितुमशक्यत्वात् । ननु, सत्यत्वाद्युपलक्षितस्य भेदधीर्ब्र-

ह्मणि निवर्तनीया । तन्निवृत्तेरेव वक्ष्यमाणरीत्या प्रकृतोपयोगात् । तन्निवृत्तिस्तु ब्रह्मणि तत्तादात्म्यबुद्ध्येव । न तु सत्यादिपदवाच्यतादात्म्यबुद्ध्येति वाच्यार्थाभेदावभासादिति मूलमयुक्तमिति चेन्न । ब्रह्मणि सत्यत्वाद्युपलक्षितभेदबुद्धौ सत्यत्वाद्युपहिततादात्म्यबुद्धेरपि विरोधित्वात् । तदुपहिततादात्म्यावगाहितया तद्विशिष्टवाच्याभेदबुद्धेरपि तद्विरोधित्वात् । यथाहि 'भूतलं न द्रव्य' मिति ज्ञाने भूतलं द्रव्यमित्यस्य भूतलं नीलद्रव्यमित्यस्य च विरोधित्वम् । तादात्म्येन द्रव्यप्रकारत्वनिरूपितभूतलविशेष्यताकत्वस्य विरोधितायोजकस्योभयत्र सत्त्वात्, तथा ब्रह्मत्वोपलक्षिते सत्यत्वाद्युपलक्षितस्य भेदबुद्धौ ताभ्यामुपलक्षितयोरुपहितयोश्च तादात्म्यबुद्धेर्विरोधित्वम् । उपहितप्रकारकबुद्धौ शुद्धयोरुपलक्षितयोस्तादात्म्यस्य विषयत्वात् । तस्याविषयत्वेऽपि तयोः प्रकारत्वात् तस्यां तयोरप्रकारत्वेऽपि तयोर्भेदबुद्धौ उपहितयोरेव तादात्म्यबुद्धेर्विरोधित्वात् । अन्यथा इयं सत्ता नेति शुद्धसत्ताभेदबुद्धौ इयं विशिष्टसत्तेति तादात्म्यबुद्धेरशुद्धघटभेदबुद्धौ च नीलत्वाद्युपहितघटतादात्म्यबुद्धेर्विरोधित्वस्य सर्वानुभाविकस्यापलापापत्तेः । न चोपलक्षितयोरशुद्धयोर्भेदज्ञानस्य घटो न घट इति ज्ञानवदाहार्यत्वेन न तत्र किमपि ज्ञानं विरोधीति वाच्यम् । भिन्नधर्मोपहितयोरिव भिन्नधर्मोपलक्षितयोरपि भेदज्ञानस्याहार्यत्वाभावात् । न हि यत्र तत्ता, यत्र चेदन्ता, तयोरेकत्रापरस्य भेद इति ज्ञानमाहार्यत्वेन व्यवह्रियते । तदिदं न द्रव्यं न घट इति ज्ञानवत् । एवं च यत्र ब्रह्मत्वं, यत्र च सत्यत्वं, तयोरेकत्रापरस्य न भेद इत्याकारकज्ञानस्य विरोधित्वं युक्तमेव । किञ्च तयोः तादात्म्यज्ञानं एकवाच्यतावच्छेदकरूपविशेषणे अपरवाच्यतावच्छेदकरूपस्य विशेषणस्यापि तादात्म्यमवगाहत एवेति तद्वदेव एकवाच्यतावच्छेदकोपलक्षितेऽपि विशेष्ये अपरवाच्यतावच्छेदकोपलक्षितस्य विशेष्यस्यापि तादात्म्यमवगाहते । एवं च ब्रह्मत्वोपलक्षिते सत्यत्वाद्युपलक्षिततादात्म्यावगाहनात् वाच्यतादात्म्यज्ञानस्य सुतरामुपलक्षितयोर्भेदबुद्धौ विरोधित्वम् । शुद्धयोः उपलक्षितयोः अत्यन्ताभेदात् । यद्यप्युपलक्षितयोः न तादात्म्यं सम्बन्धः, तथापि निरूढलक्षणया विशेषणविभक्त्युपस्थापितस्य भेदाभावस्यैव विशेष्यतया भानं सम्भवति । तयोरेकत्रापरभेदो नेत्याकारकस्य सम्भवात् भेदाभावत्वस्यैव धर्मितावच्छेदकत्वसम्भवात् न निर्धर्मितावच्छेदकत्वं शाब्दबोधे दोषः ।

नीलो घट इत्यादौ तु तादात्म्यस्य सम्बन्धतासम्भवात् विशेषणविभक्तिः पदसाधुत्वार्था । अत एव मणिकारादिभिरुक्तम् — 'विशेषणविभक्तिस्साधुत्वार्था अभेदार्थिकावे'ति । न हि तार्किकादीनाम्मतेऽपि अत्यन्ताभेदे तादात्म्यस्य क्वापि सम्बन्धत्वमुक्तम् । प्रत्युत जातिशक्तिवादादौ शब्दमण्यादिषु तस्यासंबन्धत्वमेव प्रकटितम् । तच्च पूर्वमेव उक्तम् । न च घटो घट इत्यादौ अत्यन्ताभेदे सम्बन्धाभावादेव शाब्दधीवारणसम्भवेन निराकांक्षत्वोक्त्यैव तद्वारणमसङ्गतमिति वाच्यम् । योग्यताभ्रमेण शाब्दबोधे आपादिते निराकांक्षत्वेन तद्वारणस्य युक्तत्वात् । न च विशेषणविभक्त्यर्थे तत्प्रकृत्यर्थस्य विशेषणतयान्वयसम्भवेऽपि विशेष्यपदार्थस्य तत्र विशेषणत्वेनान्वयः अव्युत्पन्न इति वाच्यम् । प्रकृतवाक्यस्थले विशेषणविशेष्यपदार्थयोर्भेदबुद्धिविरोधिशाब्दबोधो हि सर्वानुभवसिद्धः । तत्र शुद्धयोः तादात्म्याभावात् तादात्म्यसंसर्गकतदात्मप्रकारकबोधासम्भवे भेदाभावत्वावच्छिन्नविषयताकबोधस्यावश्यकत्वे विशेष्यपदार्थस्य शुद्धत्वेन विशेष्यत्वासम्भवे चागत्या व्युत्पत्तिवैचित्र्यकल्पनेनोक्तबोधस्वीकारात् । प्रथमाया विशेष्यपदोत्तराया आधेयत्वार्थकतया विशेष्यवृत्तित्वस्य विशेषणभेदाभावे बोधो वा निपातसाधारणनामार्थयोरभेदेनैवान्वय इति पक्षे घटो न पट इत्यादौ घटवृत्तिपटप्रतियोगिकभेदबोधस्य तस्य आधेयत्वार्थकत्वेनैव निर्वाहात् । गगनं द्रव्यं भवतीत्यादौ भवत्यर्थे तादात्म्यादौ द्रव्यवृत्तित्वबोधाच्च । व्युत्पन्नश्च विभक्त्यर्थे विभक्त्यर्थस्यान्वयः । क्रयाच्चैत्रस्य धनमित्यादौ स्वत्वे क्रयजन्यत्वस्यान्वयात् । न च शुद्धरूपेणोपस्थितिं पदजन्यां विना शुद्धयोर्भेदाभावः शाब्दबोधे न भातुमर्हतीति वाच्यम् । इतराविशेषणत्वेनोपस्थितिं विनाऽपि प्रकृते विशेषणयोः तादात्म्यभानवत् घटः प्रमेयवानित्यादौ सर्वमतेऽपि विशेषणयोः तादात्म्यभानवच्चेतराविशेषितेन रूपेणोपस्थितिं पदजन्यां विनाऽपि शुद्धयोः भेदाभावभानसम्भवात् विशिष्टविषयकशक्तिज्ञानाद्विशेषणान्वययोग्यतातात्पर्यज्ञानादिरूपकारणान्तरसहितात् तादृशविषयताशालिशाब्दधीसम्भवात् । यत्र तु तात्पर्याभावनिर्णयादिना विशिष्टयोर्नान्वयबोधः, तत्र विशेषणविशेष्ययोः तादात्म्यस्य शुद्धयोः भेदाभावस्य चाभानात् शाब्दबोधस्य नोक्तशक्तिज्ञानजन्यत्वम् । किं तु लक्षणयोपहितयोः तादात्म्यस्य शुद्धयोर्भेदाभावस्याखण्डैक्यस्य

वा भानम् । ननु, सत्यत्वाद्युपहितस्य सत्यादिपदवाच्यसत्यादिसम्बन्धाऽसम्भवात् सत्यादिपदलक्ष्यत्वासम्भव इति चेन्न । विशिष्टस्य सत्यादिपदवाच्यत्वेन सत्यत्वाद्युपहितस्य तत्र तादात्म्यसत्त्वात् । विशिष्टं हि विशेष्यं विशेषणं चेति द्विविधम् । तत्र च उपहितान्यत्वसत्त्वेनोपहिततादात्म्यमस्त्येव । तथा च उपहिततादात्म्यवद्यद्विशेष्यविशेषणोभयं तत्पर्याप्तशक्यतावं सत्यादिपदमित्याकारकलक्षणाज्ञानं सम्भवत्येव । वस्तुतस्तु, नोपहितान्वयबोधे लक्षणायाः धीः कारणम् । किं तु शक्तेः । विशिष्टनिरूपितशक्तेरुपहितेनापि निरूप्यत्वात् उपहितनिरूपितत्वेनैव तत्स्थले शक्तिग्रहो हेतुः । लक्षणास्थल इव तादृशत्वेन शक्तेस्स्मृतिकल्पनात् । तात्पर्याद्धि वृत्तिरिति मण्युक्तेः । अत एव एकदेशशक्तेरपि लक्षणावदमुख्यवृत्तित्वम् । शक्यतापर्याप्त्यधिकरणे गृह्यमाणशक्तेरेव मुख्यवृत्तित्वात् । न तु विशिष्टनिरूपितत्वेन । विशेषणानिरूपितत्वाप्रतीतेः । तथा चोपहितान्वयस्थले विशिष्टान्वयाभावात् लक्षणेत्युपचारः शुद्धविशेष्यकनिर्विकल्पकशाब्दस्थलवत् । यदि तूपाधौ शक्तेरग्रहे तस्योपहितान्वयबोधे भानासम्भवः । वृत्तिज्ञानविषयस्यैव शाब्दधीविषयत्वात् । अन्यथा उपाधौ शक्तिस्वीकारवैयर्थ्यादित्यालोच्यते, तदा उपहितान्वयबोधेऽपि विशिष्टे शक्तिज्ञानं हेतुः । परं तु विशिष्टान्वयबोधे तेन जननीये यत् कारणं विशेष्यान्वयिनि विशेषणस्य योग्यताज्ञानं तात्पर्यज्ञानं वा, तस्योपहितान्वयबोधे तेन जननीये प्रतिबन्धकत्वं, तदभावस्सहकारी । शुद्धविशेष्यान्वयबोधे तु शुद्धविशेष्ये शक्तिज्ञानं हेतुः । एवं च उपहितमात्रान्वयबोधाद्विशिष्टान्वयबोधस्य मुख्यत्वमुपपद्यते । विशिष्टान्वयधीसामग्रीसत्त्वे तदनुत्पत्तेः । शुद्धविशेष्यशाब्दबोधापेक्षया तु उपहितमात्रान्वयधीः विशिष्टान्वयधीश्च मुख्या । तादृशधीद्वयं लक्षणेति पक्षस्तु युक्तः । उक्ताभावस्य हेतुत्वाकल्पनेन लाघवात् । एवं च शुद्धयोर्भेदस्य महावाक्यार्थधीपूर्वं बाध्यत्वेन प्रातीतिकत्वात् तज्जनकाज्ञानस्योक्तभेदाभावधीबाध्यत्वसम्भवात् तादृशाभेदधीस्साक्षादेवोक्तधीविरोधिनी । न तु स्वनन्यसंस्कारविशिष्टनिर्विकल्पकप्रमाद्वारा । यदि च शुद्धयोर्भेदो व्यवहारिक एव। महावाक्यार्थधीप्रयोजकादवान्तरवाक्यार्थज्ञानात् पूर्वं बाध्यत्वस्यैव प्रातीतिकरूपत्वात् । व्यावहारिकभेदस्य च न व्यावहारिकाभेदधीबाध्यत्वम् । बाध्यसत्ताधिकस-

त्वाकविषयज्ञानस्यैव बाधकत्वात् । न च उक्ताभेदधीजन्यसंस्कारविशिष्टोक्तनिर्विकल्पकज्ञानस्य उक्तभेदबाधकत्वं सर्वसम्मतम् । तार्किकैस्तस्याकल्पनात् अभेदव्यापकतासंस्कारविशिष्टज्ञानस्यैव तैः तत्कल्पनादित्यालोच्यते, तथाऽपि विशेषणविभक्त्या विशेषणभेदाभावस्य यथा बोधः, तथा तया विशेष्यविभक्त्या वा विशेष्यव्यापकत्वस्य विशेष्यनिष्ठभेदाप्रतियोगित्वरूपस्य विशेषणनिष्ठतया शाब्दधीसम्भवात् । अत्यन्ताभिन्नविशेष्यविशेषणस्थले विशेष्यव्यापकत्वविशिष्टतादात्म्यस्य सम्बन्धविषया भानसम्भवात् विशेष्यव्यापकत्वबोधस्यानुभाविकत्वाच्च । पूर्ववद्व्यापकत्वस्य नामार्थद्वयविशेषितरूपेण भानसम्भवाच्च । शुद्धब्रह्मनिष्ठभेदाप्रतियोगित्वस्य सत्यत्वाद्युपलक्षितनिष्ठतया बोधसम्भवेन तादृशव्यापकत्वधीजन्यसंस्कारविशिष्टनिर्विकल्पकप्रमायास्सत्यत्वाद्युपलक्षितस्य भेदः शुद्धब्रह्मनिष्ठ इत्याकारकभेददधीविरोधित्वं सर्वसम्मतं सम्भवत्येव । व्याप्यत्वाव्यापकत्वाभ्यां तादात्म्यसम्बन्धावच्छिन्नाभ्यां गृहीतयोरनाहार्यभेदबुद्धेः केनाप्यस्वीकारात् द्रव्यव्याप्या पृथिवीति ज्ञानजन्यसंस्कारे उद्बुद्धे सति पृथिवी द्रव्यं नेति ज्ञानस्यानाहार्यस्यानुत्पत्तेः । ननु, व्यापकत्वं विशेषणविभक्तेर्विशेष्यविभक्तेर्वार्थ इति कैरपि तान्त्रिकैर्नोक्तमिति स्वकपोलकल्पितमिति चेन्न । यथा ह्यत्यन्ताभेदे तादात्म्यस्यासम्भवात् भेदाभावस्यापि सम्बन्धत्वासम्भवात् असम्बन्धतया भेदाभावस्य भानाय विशेषणविभक्त्यर्थत्वं शाब्दमणावुक्तं, तथापि विशेषणे विशेष्यव्यापकत्वस्य बाधकाभावे सति सम्बन्धतया भानस्य तान्त्रिकैरुक्तत्वात् विशेष्यविशेषणयोः अत्यन्ताभेदे तादृशभानस्य असम्भवात् असम्बन्धतया भानाय विशेषणविभक्त्यर्थत्वस्य तत्र तान्त्रिकाभिप्रेतत्वमुन्नीयते । तथा च विशेषणविभक्तिरभेदार्थिकेत्यत्र मण्यादिवाक्ये अभेदेत्युपलक्षणम्। व्यापकत्वाद्यर्थिकेत्यपि बोध्यम् । अत एव विशेषणभिन्नभिन्नत्वरूपं विशेषणव्याप्यत्वमपि विशेषणविभक्त्यर्थः सम्भवतीति तत्र विशेष्यवृत्तित्वभानमपि प्रकृते वक्तुं शक्यम् । न चैवमपि व्यापकत्वादिसंस्कारस्यैव उक्तभेदधीविरोधित्वेन तद्विशिष्टाया निर्विकल्पकप्रमायास्तद्विरोधित्वोक्तिरयुक्तेति वाच्यम् । उद्बुद्धसंस्कारस्यैव विरोधित्वेनोक्तप्रमाया एव प्रकृते उद्बोधकत्वेन विनिगमकाभावात् उक्तसंस्कारविशिष्टोक्तप्रमाया उक्तसंस्कारोक्तप्रमयोर्वा विरोधित्वेन तदुक्तेर्युक्तत्वात्। अन्यथा व्यावहारिकव्यापकत्वादिविषयकत्वेन संस्कारमात्रस्य बाधकत्वासम्भवात् । न च भेदाभावज्ञा-

नस्य भेदभ्रमविरोधित्वपक्षे निर्विकल्पकप्रमा व्यर्थेति वाच्यम् । पदार्थज्ञाने तात्त्विकप्रमात्वज्ञानं विना महावाक्यार्थज्ञाने तदसम्भवात् शुद्धपदार्थज्ञानं विना तद्घटितस्य निर्विकल्पकस्यासम्भवात् 'ब्रह्मविदाप्नोति पर'मिति श्रुतेः 'तमेव विदित्वे'त्यादिश्रुत्यानुसारेण शुद्धब्रह्मणो ज्ञानस्य मोक्षहेतुत्वे सिद्धे कैर्विशेषणैरुपलक्षितं तत् ब्रह्मेति जिज्ञासायास्तत्त्वादिवाक्यजन्यनिर्विकल्पकं विना निवृत्त्ययोगात् । भेदाभावज्ञाने शुद्धस्य भानेऽपि सत्यत्वाद्युपलक्षितत्वस्य तत्प्रकारकधीद्वारकनिर्विकल्पकविषयत्वरूपस्याभानात् । न च सिद्धान्ते ऐक्यज्ञानेनैव तदज्ञानस्य भेदभ्रमसहितस्य निवृत्तिसम्भवात् द्वारीभूतसप्रकारकधीः व्यर्थेति वाच्यम् । व्यावर्तकाकारत्वस्य तत्प्रयोजकत्वेन विशेषणतया तस्य प्रमात्वप्रयोजकत्वेन चोपलक्षणतया तस्यावश्यकत्वे सप्रकारकधीद्वारकत्वस्यावश्यकत्वात् । उक्तं चाद्वैतसिद्ध्यादौ । ननु, शुद्धयोर्भेदज्ञाने भेदाभावधीः विरोधिनीत्युक्तम् । शुद्धयोर्भेदज्ञानमेव न सम्भवति । अभावबुद्धौ प्रतियोग्यनुयोगिविशेषणभाननियमात् । तदुक्तं शिरोमण्यादौ 'प्रतियोगिविशेषिततद्ज्ञानं विशिष्टवैशिष्ट्यमर्यादां नातिशेते' इति । प्रतियोगिविशेषिताभावज्ञानं प्रतियोगितावच्छेदकतया ज्ञायमानधर्मेण विशिष्टस्य प्रतियोगिनः वैशिष्ट्यमवश्यमभावेऽवगाहते । तथानुयोगितावच्छेदकविशिष्टे अवश्यमभावस्य वैशिष्ट्यम् । तुल्यन्यायत्वादिति तदर्थादिति चेन्न । ऊक्तवाक्ये भानमित्यस्य लौकिकप्रत्यक्षार्थकत्वेन प्रतियोगिविशेषिताभावलौकिकप्रत्यक्षस्यैव तथा नियमात् । सत्यसम्बन्धिविषयकलौकिकप्रत्यक्षे सम्बन्धितावच्छेदकविशिष्टसम्बन्धिविषयकत्वनियमस्य संयोगादिलौकिकप्रत्यक्षे दृष्टत्वात् । न ह्यभावत्वमात्ररूपेण गोत्वादिशुद्धप्रतियोगिकाभावत्वमात्ररूपेण वा शुद्धधीर्न जायते । न चोक्तनियमोऽपि अयं गौरिति ज्ञानोत्तरं शुद्धगोत्वप्रकारकज्ञानवानहमिति ससम्बन्धिकज्ञानस्य प्रत्यक्षे तत्सम्बन्धिनो गोत्वस्य स्वरूपेणैव भानेन सम्बन्धितावच्छेदकाभानादिति वाच्यम् । तत्र शुद्धगोत्वस्यैव सम्बन्धित्वेन सम्बन्धितावच्छेदकविशिष्टसम्बन्धिविशेषितविषयकलौकिकप्रत्यक्षस्योक्तनियमानपायात् । यद्धर्मावच्छिन्नसम्बन्धिताकं यत्, तद्विषयकलौकिकप्रत्यक्षस्य तद्धर्मावच्छिन्नविषयतानिरूपिततन्निष्ठलौकिकविषयताकत्वनियमात् । अयं गारिति ज्ञानस्य गोत्वविशिष्टविषयतारूपसम्बन्धितायाः केनाप्यनवच्छिन्नत्वात् । शुद्धगोत्वस्य तत्प्रत्यक्षे भानेऽपि यादृशी सम्बन्धिता अवच्छि

न्ना अनवच्छिन्ना वा, तादृशरूपेण तन्निरूपकज्ञानादिलौकिकप्रत्यक्षे तस्याः भाननियमस्य पर्यवसितत्वात् । अत एव जातिमानिति ज्ञानस्य जातिमत्त्वावच्छिन्नविषयतारूपा सम्बन्धिता, तद्रूपेणैव तत्प्रत्यक्षे भाति । तथा च शुद्धप्रतियोगिविशेषितभेदत्वेन भेदस्य परोक्षज्ञाने बाधकाभावः । तादृशभेदस्य तादृशरूपेण लौकिकप्रत्यक्षस्यापि शुद्धगोत्वप्रकारकप्रत्यक्षस्येव स्वीकारात् । न च प्रतियोगितावच्छेदकविशिष्टविशेषिताभावबुद्धेरेव प्रतियोगिमत्ताधीप्रतिबध्यत्वात् तादृशबुद्धेरेव प्रतियोगिमत्ताधीविरोधित्वमिति यदा स्वीक्रियते, तदा तादृशबुद्धेरेव भेदाभावधीविरोधित्वात् तादृशभेदबुद्धि प्रत्येव तादृशभेदाभावबुद्धेर्विरोधित्वमिति वाच्यम् । शुद्धप्रतियोगिविशेषिताभावबुद्धेरपि शुद्धप्रतियोगिमत्ताधीविरोधित्वस्यावश्यकत्वात् । अन्यथाऽयं घट इत्यादिबुद्धेर्बाधप्रतिबद्ध्यत्वानुपपत्तेः । न च नायं घट इति भेदधीरेव तत्र प्रतिबन्धिका । तस्याः घटतादात्म्यविषयकत्वादिति वाच्यम् । विरोधिन्याऽनुमित्यादिसामग्न्याः सत्त्वे अत्र शुद्धघटत्वप्रकारकप्रत्यक्षं भवत्विति इच्छया जातस्योक्तप्रत्यक्षस्य घटतादात्म्याविषयकत्वात् । न च शुद्धघटत्वप्रकारकेदंविशेष्यकज्ञानेऽपि घटभेदबुद्धेर्विरोधित्वमिति वाच्यम् । तत्कल्पनापेक्षया लाघवेन शुद्धघटत्वविशेषितात्यन्ताभावबुद्धेरेव तत्कल्पनात् । एवं च शुद्धप्रतियोगिकभेदबुद्धौ तदभावबुद्धेर्विरोधित्वं युक्तमेव । न च यादृशयोः भावाभावयोः सहानवस्थाननियमः, तादृशयोरेव तयोर्ज्ञाने मिथो विरोधिनी । शुद्धघटत्वतदभावयोस्तु न सः । शुद्धघटत्ववति शुद्धघटत्वपटत्वोभयाभावादिसत्त्वादिति वाच्यम् । यथा जातिमानिति ज्ञाने जातित्वमात्रावच्छिन्नप्रतियोगिताकाभावत्वावच्छिन्नप्रकारताकज्ञानस्य विरोधित्वकल्पनात् घटवृत्तिजातिरत्र नास्तीति धीर्न विरोधिनी, तथा शुद्धघटत्वप्रकारकज्ञाने घटत्वनिष्ठानवच्छिन्नप्रतियोगिताकात्यन्ताभावज्ञानत्वेन विरोधित्वकल्पनादुक्तोभयाभावादिमत्त्वज्ञानस्याविरोधित्वात् । तथा च तादृशयोर्भावाभावयोः सहानवस्थानस्यापि सत्त्वान्नोक्तदोषः । प्रागभावस्यानवच्छिन्नप्रतियोगिताकत्वेऽपि तद्वत्ताधीर्न विरोधिनी । अत्यन्ताभावत्वस्य विशेषणात् । किञ्चोभयत्वविशिष्टं शुद्धघटत्वादतिरिक्तमिति तदभावात्तदभावस्याप्यतिरिक्तत्वाच्छुद्धघटत्वघटत्वपटत्वोभयाभावयोस्सहानवस्थाननियमाभावेऽपि न क्षतिः । तस्माच्छुद्धघटत्वतदभावधियोरिव शुद्धब्रह्मभेदतदत्यन्ताभावधियोर्विरो-

भित्वे न किञ्चित् बाधकम् । न च सत्यादिवाक्यात् प्रथमत एव निर्विकल्पकधीर्जायत इति सिद्धान्तेऽपि स्वीकारात् भेदाभावादिविशेष्यकज्ञानस्य द्वारता न युक्तेति वाच्यम् । तस्यापि सिद्धान्ते स्वीकारात् । तदुक्तं संक्षेपशारीरके—'सामानाधिकरण्यमत्र भवति प्राथम्यभागन्वयः पश्चादेव विशेषणेतरतया पश्चाद्विरोधोद्भवः । उत्पन्ने च विरोध एकरसके वस्तुन्यखण्डार्थधीः सैवैरेव ततः पदैरयमिह ज्ञेयः क्रमः सूरिभिः ॥' इति । सामानाधिकरण्यं पदयोस्समभिव्याहारज्ञानम् । अन्वयः वाक्यतात्पर्यविषयवाक्यार्थधीप्रयोजकः । विशेषणेतरतया विशेषणविशेष्यभावेन वाच्यार्थाभेदज्ञानमन्वय इत्यनुषज्यते । विरोधः विरोधज्ञानं वाच्यार्थाभेदज्ञाने प्रमात्वासम्भवेन तात्पर्याविषयत्वज्ञानान्निर्विकल्पकशाब्दबोधे तात्पर्यज्ञानमिति यावत् । अन्वय इत्यनुषज्यते । यदि तु सत्यादिवाक्यजन्यनिर्विकल्पकप्रमोत्तरमर्थापत्त्या सत्यत्वाद्युपलक्षितानामभेदनिश्चयः सत्यत्वाद्युपलक्षितानामभेदः परस्परवृत्तिरित्याकारको जायते । समानविभक्तिकसत्यज्ञानादिपदजन्यनिर्विकल्पकविषयत्वस्य तादृशभेदं विनाऽनुपपत्तेः । तदुक्तं कल्पतरौ—'इतरव्यावृत्त्यादिकमर्थात् । न तु शब्दादिती'ति पक्षोऽद्वैतसिद्ध्यादावाश्रितः आश्रियते, तदा नोक्तक्लेशः । वाच्यार्थभेदावभासादिति पाठे तु वाच्यानां मिथो भेदज्ञानस्य सत्त्वात्तन्निवर्तकनिर्विकल्पकज्ञानस्य वाच्याभेदज्ञानद्वारकवाक्यार्थज्ञानस्योत्पत्तये सत्यादिनानापदानां आवश्यकत्वात् न पौनरूक्त्यमित्यर्थः । ननु, तादृशभ्रमनिवृत्तिं विनापि शुद्धपदार्थद्वयप्रमापूर्वकमहावाक्यार्थप्रमासम्भवात् तादृशभ्रमनिवर्तकज्ञानार्थकतया कथं पदसार्थक्यमिति चेन्न । उक्तज्ञानं विना हि ब्रह्मणोऽसत्यत्वशङ्कया वाक्यार्थज्ञानेऽप्यसत्यविषयकत्वरूपाप्रामाण्यशङ्का स्यात् । एवं ब्रह्मणः स्वप्रकाशकज्ञानानन्दानन्तादिभिन्नत्वशङ्कयाऽप्यपुरुषार्थविनाशित्वादिशङ्कासम्भवात् मोक्षे परमपुरुषार्थान्यत्वशङ्कया स्वर्गादित्यागपूर्वकमोक्षेच्छादिना श्रवणादौ प्रवृत्तिर्न स्यात्। निष्प्रयोजनत्वशङ्कया ब्रह्मणः श्रुतितात्पर्याभावशङ्कापि स्यात् । तस्मात् तत्तच्छङ्कानिवृत्तकज्ञानार्थं सत्यज्ञानानन्दानन्तादिपदानामावश्यकता । किञ्च सत्यत्वाद्युपलक्षितब्रह्मैक्यापन्नजीवस्वरूपाज्ञानस्य तादृशैक्यज्ञानं विना निवृत्त्यसम्भवात् तादृशज्ञानस्य च तादृशब्रह्मविषयकावान्तरवाक्यार्थज्ञान-

स्य चार्थस्यैकत्वादखण्डार्थता । पदजन्यस्मरणस्य निर्विकल्पकवाक्यार्थानुकूलस्य निर्विकल्पकत्वं अनुभववदेवाविरुद्धम् । सविकल्पकवाक्यार्थबोधे

मन्तरेणासम्भवात् तदर्थकतया सत्यादिपदान्यावश्यकानि । अत एवास्थूलमनण्वह्रस्वमदीर्घमित्यादिवाक्यगतानि अस्थूलादिपदान्यपि आवश्यकानि । अस्थूलत्वाद्युपलक्षितब्रह्मैक्यज्ञानार्थकत्वात् । अज्ञानस्य तादृशजीवस्वरूपविषयकत्वन्तु सत्यत्वादिविशिष्टब्रह्मधीपूर्वकसत्यत्वाद्युपलक्षितं ब्रह्म न जानामिति व्यवहारविषयत्वम् । एतेन ज्ञानस्य सत्यत्वादिविशिष्टप्रकारकधीद्वारा सत्यादिवाक्यजन्यत्वमेव सत्यत्वाद्युपलक्षितब्रह्मविषयकत्वम् । अज्ञानस्य त्वजन्यत्वात् कथं तादृशब्रह्मविषयकत्वमित्यपास्तम् । ननु, वाच्याभेदज्ञापकत्वे सत्यादिवाक्यस्य शुद्धब्रह्ममात्रबोधकत्वरूपमखण्डार्थत्वं न स्यात् । तत्राह—**लक्ष्यस्य चेति** । एकत्वाच्छुद्धत्वात् । ननु, किञ्चिद्धर्मविशिष्टस्यैव स्मृतिः पदज्ञानाधीना वाक्यार्थज्ञानहेतुः । लोके तथा दृष्टत्वात् । तथा च कथं निर्विकल्पकस्मृतिः तथा । तत्राह—**पदजन्यस्मरणस्येति** । वाक्यार्थानुकूलस्य वाक्यार्थबोधहेतोः । **अनुभववदिति** । वाक्यार्थानुभवस्येवेत्यर्थः । यथा चन्द्रस्वरूपमात्रजिज्ञासोत्तरं प्रवृत्तस्य प्रकृष्टप्रकाशश्चन्द्र इत्यादिवाक्यस्याज्ञातचन्द्ररूपमात्रपरत्वम् । विशेषणसंसर्गपरत्वे मानाभावात् । तथा ब्रह्मस्वरूपमात्रजिज्ञासायां प्रवृत्तस्य सत्यादिवाक्यस्य तन्मात्रपरत्वम् । यथा तत्र जिज्ञासाप्रयोजकस्य प्रकृष्टप्रकाशकत्वचन्द्रत्वाद्युपलक्षितयोः भेदसंशयस्य निवृत्तिः, तथा तादृशस्य सत्यत्वज्ञानत्वाद्युपलक्षितयोः भेदसंशयस्य निवृत्तिः । यथा च तत्त्वेदन्तोपलक्षितयोः भेदसंशयभ्रमनिवृत्त्यर्थं प्रयुक्तस्य सोऽयमिति वाक्यस्य तयोरैक्यमात्रपरत्वेन व्यक्तिमात्रनिर्विकल्पकजनकत्वम् । तद्व्यक्तौ तद्व्यक्तेः संसर्गाभावात् । तथा जीवत्वेश्वरत्वोपलक्षितयोः भेदसंशयभ्रमनिवृत्यर्थं प्रयुक्तस्य महावाक्यस्य तयोरैक्यमात्रपरत्वेन व्यक्तिमात्रनिर्विकल्पकहेतुत्वम् । तद्व्यक्तौ तद्व्यक्तेः संसर्गाभावात् । न चोपलक्षितव्यक्त्योर्भेदधीरेव न सम्भवति । अभावप्रत्ययस्य प्रतियोग्यनुयोग्यंशे किञ्चित्संसर्गविषयकत्वनियमादिति वाच्यम् । अभावलौकिकप्रत्यक्षस्यैव तथा नियमात् । प्रकृते च जीवस्वरूपस्य प्रत्यक्षत्वेन भेदप्रत्यक्षसम्भवेऽपि ईश्वरस्वरूपस्य परोक्षतया तत्र भेदप्रत्यक्षस्यासम्भवेन तत्र भेदज्ञाने शुद्धयोः प्रतियोग्यनुयोगितासम्भवात् । न

च सविकल्पकपदार्थोपस्थितिरङ्गम्। प्रकृते च निर्विकल्पको वाक्यार्थबोधः ।

च तथापि तादृशभेदज्ञानस्यैक्यप्रमानिवर्त्यत्वानुपपत्तिः । प्रतियोग्यनुयोग्यंशे निर्विशेषणकस्य विरोधिधीनिवर्त्यत्वानभ्युपगमादिति वाच्यम् । प्रतिबध्यत्वरूपनिवर्त्यत्वस्यानभ्युपगमेऽपि ऐक्याज्ञाननिवृत्तिद्वारा नाश्यत्वरूपस्य निवर्त्यत्वस्य तत्रानुभूयमानत्वेन तत्र निर्युक्तिकानभ्युपगमोक्त्या निरासासम्भवात् । न च उक्तज्ञानं प्रति अप्रतिबन्धकस्य निर्विकल्पकस्य जनकत्वे सोऽयमित्यादिकं वाक्यमेव न स्यात् । विपरीतज्ञानप्रतिबन्धकधीजनकत्वस्यैव वाक्यत्वादिति वाच्यम् । विपरीतज्ञानाभावप्रयोजकधीजनकस्यैव वाक्यत्वं त्वयाप्युच्येत । तादृशप्रयोजकत्वं निर्विकल्पकस्य त्वन्मते न सम्भवति। प्रतिबन्धकत्वाभावात् । मन्मते त्वज्ञाननिवृत्तिद्वारा सम्भवत्येव । यदि चोक्तवाक्यस्य द्वारीभूतं तत्त्वोपलक्षितस्य भेदाभाव इदंत्वोपलक्षितवृत्तिरित्याकारकज्ञानं तद्द्वारा तेन निर्विकल्पकजननात्, तदा तादृशज्ञानस्य तज्जन्यसंस्कारस्य वा निर्विकल्पकोत्पत्तिकाले सत्त्वात् तादृशनिर्विकल्पकस्य तादृशसंस्कारोद्बोधकत्वात् तादृशसंस्कारोद्बोधकयोर्भेदधीप्रतिबन्धकत्वं तार्किकरीत्यैव सम्भवति । परे तु औपनिषदानां कर्ममीमांसकवत् स्वशास्त्रे व्यवहारात् तद्वदेव विपरीतज्ञानविरोधित्वं तैश्च विपरीतज्ञानानुकूलशक्तिनाशद्वारा विपरीतज्ञानाभावे प्रयोजकत्वमेव प्रतिबन्धकत्वं विपरीतज्ञानं प्रति विशेषदर्शने स्वीक्रियते । औपनिषदानां तदनुकूलशक्तिरज्ञानमेव । तन्नाशद्वारा तदभावप्रयोजकत्वं निर्विकल्पस्येति तेषामाशयः । तथा च वाक्यार्थानुभवस्य निर्विकल्पकत्वे सिद्धे तन्निर्वाहाय स्मरणमपि तथा कल्प्यमेवेति भावः । एवमपि घटमानयेतिवाक्यार्थबोधस्य सविकल्पकत्वात् तत्र सविकल्पकस्मरणमावश्यकमिति नाव्यवस्थेत्याह—**सविकल्पकेत्यादि। निर्विकल्पक इति** । कुत्रचिद्विशेष्यतया विशेषणतयैव वा यत्रात्मा भाति, तदन्येत्यर्थः। अहं ब्रह्म घटादिकं मिथ्येति ज्ञाने घटादेरेव विशेष्यत्वविशेषणत्वाभ्यां भानम् । न त्वात्मन इति तत्सङ्ग्रहः । अहं ब्रह्म घटादिकमात्मनि कल्पितमिति ज्ञाने आत्मा विशेषणतयैव न भाति। किंत्वसंसृष्टरूपेणाविशेषणतयापि भातीतितत्सङ्ग्रहः।प्रमात्वेनाबाधितविषयकत्वेन।विशेष्यतयाहि भासमानआत्मा संसर्गानुयोगी। विशेषणतया च भासमानसंसर्गप्रतियोगी।तयोश्च मिथ्यात्वात्तदन्यताविषयकं

ज्ञानं न प्रमेति नाविद्यातत्प्रयुक्तदृश्योच्छेदकम् । अधिष्ठानाविषयकत्वादिति भावः । ननु, 'अहं ब्रह्म घटो विनाशी'त्यादिसमूहालम्बनं दैववशसम्पन्नकारणबलात् घटादिविषयकमविद्योच्छेदकमास्ताम । इष्टापत्तौ च प्रमात्रादेः माहावाक्यार्थबोधे भानानिराकरणस्य पूर्वकृतस्यानुपपत्तिरिति चेन्न । शुद्धस्वरूपान्यस्य तात्पर्यविषयत्वेन वाक्यार्थबोधे नियमतो न भानम् । दैववशसम्पन्नकारणबलात् प्रमात्रादेर्भानं तु स्यादेवेत्याशयबलेन नियमतः प्रमात्रादिभानस्यैव पूर्वं निराकृतत्वात् । न च 'तमेव विदित्वे'त्यादिश्रुत्यात्मान्याविषयकज्ञानस्याविद्यानिवर्तकत्वोक्त्या प्रमात्रादिविषयकं शुद्धज्ञानं नाविद्यानिवर्तकमिति वाच्यम् । 'अन्नमेव भुक्त्वा तृप्तिविशेषमाप्नोति' इत्यादेरन्नेतरभोजनत्वविशिष्टाजन्यतृप्तिविशेषाद्यर्थकत्ववत् 'व्याप्त्यादिकमेव विदित्वानुमिनोति' 'ब्राह्मणानेव दृष्ट्वा अयमतितुष्यती'त्यादौ व्याप्त्याद्यविषयकज्ञानाजन्यानुमित्याद्यर्थकत्ववच्च तमेव विदित्वेत्यादावात्मान्यविषयकत्वविशिष्टज्ञानाजन्यमुक्त्यर्थकत्वादात्माविषयकज्ञानाजन्यमुक्त्यर्थकत्वाद्वा तं विदित्वैवेति योजना न युक्ता । श्रुतौ श्रुतसमभिव्याहारभङ्गायोगात् । उक्तं च विद्यारण्यश्रीचरणैः—न बुद्धिं मर्दयन् दृष्टो घटतत्त्वस्य वेदिता । उपमृद्नाति चेत् बुद्धिं ध्यातासौ नतु तत्त्ववित् ॥ इति । तत्त्वज्ञानस्य इतरविषयकत्वराहित्याय बुद्धिमर्दनं नापेक्ष्यते । इतरविषयकस्यापि तत्त्वविषयकत्वसम्भवात् । ध्याने तु विजातीयधीरहितसजातीयधीप्रवाहरूपे तदपेक्ष्यत इति ध्यानदीपिकास्थोक्तवाक्यार्थः । यत्तु 'जीवन्मुक्तस्य कदाचिदद्वैतात्मदर्शनं, कदाचित् द्वैतदर्शनं, न युगपत्सन्तमसबहुलालोकाविवे'ति विवरणे उक्तम्, तदद्वैतात्मजिज्ञासाकाले तदन्याविषयकज्ञानपरम् । अन्यथा प्रारब्धभोगसामग्रीबलाज्जायमानस्य द्वैतविषयकस्य शुद्धात्मज्ञानस्य वारणासम्भवात् । अथवा यथा घटो न घट इति ज्ञानमाहार्यमेव, तथा शुद्धात्मस्वरूपाधिष्ठानतदारोपितद्वैतरूपविरुद्धद्वयविषयिका अहं ब्रह्म घटो विनाशीत्यादिवृत्तिराहार्यैव वाच्या । सा च न ज्ञानम् । अस्मन्मते हि आहार्यवृत्तिरिच्छादिवत् वृत्त्यन्तरमेव । न तु धीः । अतस्सा नात्मदर्शनमित्यद्वैतात्मदर्शनद्वैतदर्शनयोर्न यौगपद्यम् । न च तार्किकादिमते घटो न घट इति ज्ञानस्य एकधर्मिणि विरुद्धयोरेकविशिष्टे अपरसंसर्गविषयकत्वेनाहार्यत्वेऽप्यतथाभूतमुक्तज्ञानं कथमाहार्यमिति वाच्यम् । 'नेह नानास्ति किञ्चने'त्यादिवाक्यैः प्रपञ्चस्य ब्रह्मणि निषेधा-

त्तदभावस्य शुद्धब्रह्मव्यापकत्वेन ग्रहात् शुद्धब्रह्मस्वरूपस्य तादात्म्येन घटाद्यभावव्याप्यतया गृहीतत्वात् तादृशसद्रूपतादात्म्यस्य च दृश्याकारवृत्तौ दृश्यांशे भाननियमस्य सिद्धान्ते स्वीकारात्,अहं ब्रह्म सत् घटादिकं विनाशीत्याकारकवृत्तेः घटाद्यभावव्याप्यतया गृहीतत्वेन घटविरुद्धे सद्रूपे घटादितादात्म्यविषयकत्वेनाहार्यत्वानपायात् गन्धाभावव्याप्यतया गृहीते जलादौ गन्धसंसर्गविषयकवृत्तिवत्। अस्मिन् पक्षे च उक्तवृत्तिर्नाविद्यानाशिकाज्ञानत्वाभावात्। वस्तुतस्तूक्तवृत्तेः द्वैताद्वैतविषयकत्वेऽपि द्वैतांशेप्रमात्वानिश्चयेन प्रमात्वेननिश्चीयमानयोरेवद्वैताद्वैतधियोर्नियोगपद्यमित्यर्थकत्वेनोक्तविवरणवाक्यमविरुद्धम्।परमार्थतस्तु विशेषदर्शनस्यभ्रमविरोधित्वं सर्वानुभवसिद्धम्।तच्च तार्किकादिमते भ्रमप्रतिबन्धकत्वम् । वेदान्तदर्शने तु विशेषदर्शनस्याधिष्ठानज्ञानरूपस्य भ्रमं प्रति नाशरूपत्वं नाशजनकत्वं वा। । तथा च तत्त्वज्ञाने तदुत्पत्तिक्षणोत्तरक्षणवृत्तिदृश्येतरदृश्यप्रतियोगिकनाशत्वस्वीकारात् । तत्त्वज्ञानं च भ्रमात्मकम्। स्वस्य स्वनाशत्वासम्भवात् । तादृशक्षणवृत्तिदृश्यन्तु तत्त्वज्ञानमज्ञानसंस्कारः तत्कार्यं प्रारब्धकर्मभोगोपयुक्तं अज्ञानोपादानककार्यं चेति तेषां तादृशक्षणवृत्तित्वादेव तन्नाशत्वं न तत्त्वज्ञानस्य सम्भवति । न हि नाशः प्रतियोगिक्षणपूर्वक्षणवृत्तिः । तादृशदृश्येतरदृश्यं त्वज्ञानतत्प्रयुक्तानादिदृश्यं प्रारब्धभोगानुपयुक्तं अज्ञानोपादानककार्यं भ्रमतद्विषयरूपं यत् तस्य सर्वस्य नाशः तत्त्वज्ञानम् । तत्पूर्वनष्टस्यापि सूक्ष्मावस्थारूपनाशं प्रति नाशत्वस्य तत्त्वज्ञाने सत्त्वेन तादृशनष्टप्रतियोगिकनाशत्वस्यापि सत्त्वात् । प्रागभावादिनाशात्मकघटादिनाशे प्रागभावनाशत्ववत् । न चाज्ञानसंस्कारस्य सविषयकभ्रमविशेषोपादानत्वेनावश्यकत्वेन तन्नाशस्यैवाज्ञानादिनाशत्वमास्ताम् । तथा च तत्त्वज्ञानस्य घटादिविषयकत्वे बाधकाभाव इति वाच्यम् । पूर्वोक्तश्रुतिसिद्धेन दृश्याविषयकत्वेन तत्त्वज्ञानस्यापि तादृशदृश्यनाशत्वसम्भवात् तादृशदृश्यनाशरूपसंस्कारोत्पत्तिक्षणोत्पन्नत्वेनैव तत्त्वज्ञानस्य भ्रमरूपत्वासम्भवाच्च । न हि नाशोत्पत्तिक्षणे प्रतियोगी विद्यते। किं च तत्त्वज्ञानस्योत्पत्तिक्षणमारभ्य क्षणत्रयं भ्रमात्यन्ताभावनियमस्तार्किकादिमते सिद्धः। मन्मते तु दृश्यात्यन्ताभावनियमः । तथा च तादृशदृश्यवत्क्षणोत्तरक्षणेषु तादृशदृश्यनाशं विना तादृशदृश्यात्यन्ताभावासम्भवात् तत्राद्यक्षणे तादृशनाशस्योत्पत्तिर्वाच्या। स च तत्त्वज्ञानरूपः । ज्ञानसामग्र्याः तद्धेतुत्वस्य कल्पत्वेन कल्पतहेतुनैव तदु-

तस्यैव प्रमात्वेनाज्ञाननिवर्तनसामर्थ्यात्।अतो नलक्ष्यतावच्छेदकमन्तरेण लक्षणानुपपत्तिः।प्रकृतवाक्यार्थानुकूलपदार्थोपस्थितेरेव शक्तिलक्षणासाध्यत्वात्

त्पत्तिनिर्वाहे तद्भिन्ने तस्याहेतुत्वस्य कल्प्यत्वे गौरवात् । अज्ञानतन्नाशयोरेव तत्त्वज्ञानसंस्कारशब्देन शास्त्रे व्यवहारसम्भवात् तदन्यतत्संस्कारे मानाभावात् तत्त्वज्ञानमेव तादृशादृश्यनाशः । एवं तत्त्वज्ञानस्य भ्रमनाशकत्वपक्षेऽपि न भ्रमत्वम् । स्वस्य स्वनाशकत्वासम्भवात् स्वोत्तरवृत्तिज्ञानादीनामेव ज्ञानादिनाशकत्वाङ्गीकारात्। अन्यथा क्षणिकत्वापत्तेः।अथवा सन्तमससामान्यात्यन्ताभावः यथा बहुलालोकः तथा तादृशादृश्यसामान्यात्यन्ताभावः तत्त्वधीतन्नाशयोरन्यतरत्। सन्तमसबहुलालोकाविव न युगपत् द्वैताद्वैतदर्शने इति विवरणदृष्टान्तस्वारस्यात् । एतेन नाशजनकत्वे नाभिमता सामग्री अत्यन्ताभावस्य व्याप्या । स च प्रतियोगिमत्क्षणोत्तरक्षणे नाशोत्पत्ति विनापि सम्भवतीत्युक्तावपि न क्षतिः। **अतो न लक्ष्यतावच्छेदकमिति।** निर्विकल्पकस्मरणस्य प्रकृतोपयुक्तत्वात् तद्धेतुतया शुद्धे लक्षणाज्ञानस्य कल्पनाया अन्यत्रादृष्टत्वेन प्रकृतेऽनुपपत्तिर्नेत्यर्थः । उक्तकल्पनोपपत्तौ हेतुमाह—**प्रकृतेति । वाक्यार्थानुकूलेति** । वाक्यार्थानुभवजनकेत्यर्थः । **साध्यत्वादिति** । ज्ञानसाध्यत्वादित्यर्थः । शक्तिज्ञानप्रयोज्यसम्बन्ध्युपस्थितेः लक्षणात्वमते वाक्यार्थानुभवस्य लक्षणासाध्यत्वात् तज्जनकोपस्थितेरपि तदुक्तिसम्भवः । ननु, तत्त्वमसीत्यादिवाक्यानां शाब्दधीजनकत्वं नोपपद्यते। तदादिपदानां कार्यत्वान्वितार्थशाब्दानुभवं प्रत्येव हेतुत्वस्य क्लृप्तत्वात्। तथा हि—तमानयेत्यादिवाक्यात् पित्राद्युच्चरितात् तदानयनं कार्यमित्यादिकं अर्थं बुध्वा तदानयने प्रवृत्तस्य बालकस्य तदानयनरूपाश्चेष्टामुपलभ्य तत्स्वरूपेण कार्येण तदनुकूलप्रवृत्तिमुक्तबाले अनुमाय तादृशप्रवृत्तिरूपकार्येण तत् कारणभूतां तदानयनं कार्यमित्यादिबुद्धिमुक्तबालेऽनुमिनोति । ततस्तस्या बुद्धेरुपस्थितोक्तवाक्यजन्यतामनुमाय तदाद्यैकैकपदस्यानयेत्यादिपदान्तरार्थाघटितकार्यत्वघटितार्थशाब्दानुभवहेतुत्वं कल्प्यते । तमपसारयेत्यादावानयनादिकमविषयीकृत्य कार्यत्वं विषयीकृत्यैव तदादिपदार्थबुद्ध्युदयात् । लिङादिपदस्यापि कार्यरूपोऽर्थः 'स्वर्गकामो यजेत' त्यादौ वेदे शक्त्या प्रतीयमानः कार्यत्वघटित एव। 'ओदनकामः पचेत' त्यादिलौकिकवाक्यस्थलिङादिना लक्षणया बोध्यमानं कार्यत्वघटितमेवताद्विषयकधीविषयस्य तद्घटितपदार्थत्वात् कार्यत्वविषयको यस्तदा-

दिपदार्थस्य शाब्दबोधस्तत्त्वेनैव तदादिपदज्ञानकार्यता । यदि च 'फलिनो वृक्षास्तानानये'त्यादिवाक्यजन्यशाब्दबोधे स्वातन्त्र्येण फलिवृक्षादेः विषयतेत्यानुभाविकं, तदा तादृशकार्यकारणभावो न स्वीक्रियते । परं तु घटकर्मत्वादिनिष्ठं यत् कार्यत्वविधेयतानिरूपितोद्देश्यतावच्छेदकत्वं, तेन सम्बन्धेन शाब्दबोधं प्रति घटः कर्मत्वमित्यादिनिराकांक्षपदाजन्यघटकर्मत्वाद्युपस्थितिविशिष्टकार्यत्वाद्युपस्थितिः हेतुः । आनयेत्यादिपदे श्रूयमाणे घटमित्यादिपदज्ञानं विनापि तादृशोपस्थितिमात्रेणोक्तसम्बन्धेन शाब्दबोधोत्पत्तेः घटमित्यादिपदज्ञानस्य नोक्तधीहेतुत्वम् । कार्यत्वविधेयतानिरूपितोद्देश्यतासम्बन्धेनानयनादिनिष्ठेन शाब्दबोधे आनयनं कार्यमित्यादिनिराकांक्षपदाजन्यकार्यत्वोपस्थितिविशिष्टानयनोपस्थितिर्हेतुः । एवं नीलघटकर्मत्वाद्युपस्थितेरपि हेतुत्वम् । पदजन्या तदन्या वा या या उपस्थितिः यादृशयादृशशाब्दबोधोपधायिका, तत्तदुपस्थितिपर्याप्तानां शक्तिविशेषाणामेव तादृशतादृशशाब्दहेतुतावच्छेदकत्वम् । न तु तादृशतादृशोपस्थितित्वानाम् । अतो नाननुगमगौरवे । तच्च हेतुत्वं व्यापारविषया । करणत्वं तु तादृशोपस्थितिजनकानां घटमित्यादिपदानां तत्समानविषयकानां अध्याहृतनामान्तरणां च विभिन्नशक्तिविशेषवत्त्वेनैव । पदज्ञानेऽध्याहृतनामान्तरे च एकस्याश्शक्तेस्स्वीकारे क्रियापदकारकपदयोरेकस्याप्यज्ञाने शाब्दबोधापत्तेः । कारकपदज्ञानकारकाध्याहारयोरन्यतरस्य क्रियापदज्ञानक्रियाध्याहारयोरन्यतरस्य च फलोपधायकत्वात् । विभिन्नपदे शक्तिस्वीकारे च कारकपदक्रियापदयोः कारकपदक्रियाध्याहारयोः क्रियापदकारकाध्याहारयोर्वा मिलितयोरेव दण्डचक्रवत् फलोपधायकत्वान्नोक्तापत्तिः । वस्तुतस्तु कारकपदक्रियापदकारकाध्याहाराक्रियाध्याहारेषु न शक्तिचतुष्टयं वाच्यम् । तथा चैकैव लाघवाच्छक्तिरस्तु । तस्या एकस्यैव घटत्वादेस्तद्घटव्यक्तिष्विव क्रियाकारकपदयोः क्रियापदकारकाध्याहारयोः कारकपदक्रियाध्याहारयोश्च पर्याप्तिस्वीकारात् तत्तदुभयसत्त्वे तादृशशाब्दधीरिति । अथवा पर्याप्तिर्न प्रकृते निवेश्यते । तृणफूत्कारसंयोगादाविव क्रियाकारकपदमेलनादिषु त्रिषु एकस्या एव शक्तेः स्वीकारसम्भवात् क्रियाकारकाध्याहारमेलनादिषु तदस्वीकारसम्भवाच्च । एवं च फलिनो वृक्षा इत्युक्तवाक्ये वृक्षादेर्नान्वयधीः । प्रथमान्तपदस्य विधेयीभूतकृतिसाध्यत्वै-

कदेशकृतौ विशेषणतया संबोध्यतया वा स्वार्थबोधकत्वात् 'स्वर्गकामो यजेते'त्यादौ स्वर्गकामस्य कृत्या साध्यो याग इत्यादिशाब्दबोधात् । संबोध्यत्वं च प्रकृतवाक्यजन्यशाब्दधीमत्त्वेन तद्वाक्यवक्तुरिच्छाविषयत्वम् । प्रथमाविभक्त्यन्तचैत्रादिनामार्थे तस्यान्वयः । प्रकृते तदन्वये निराकांक्षत्वबाधौ । एवं चार्थान्तरशाब्दबोधस्य कार्यत्वोपस्थितिं विनानुपपत्तेः तदुपस्थापकपदासमभिव्याहृतवाक्ये पदाजन्ययापि तदुपस्थित्यैव वाक्यार्थबुद्ध्युत्पादकत्वं न तां विनापि । शाब्दधीमात्रस्य कार्यत्वविषयत्वनियमात् तत्त्वमसीत्यादेः न ब्रह्ममात्रप्रमापकत्वसम्भव इति प्राभाकरानुयायिनो वदन्ति, तदसारम् । तदादिपदस्य हि न कार्यत्वघटितार्थशाब्दबोध एव हेतुत्वं कल्प्यते । 'स आगतः स जीवती'त्यादौ कार्यत्वाविषयकशाब्दबोधस्यानुभाविकत्वेन कार्यत्वं विषयीकृत्यैव तदादिबुद्ध्युदयादित्युक्तहेतोरसिद्धेः । किं तु इतरान्वितार्थशाब्दबोधं प्रत्येव । तथा च शाब्दधीजननसामर्थ्यरूपा शक्तिः पदानां इतरान्वितघटत्वादावेव । न तु, कार्यत्वघटितघटत्वादौ । ननु, 'स आगत' इत्यादिवाक्यजन्यबोधात् न प्रवृत्तिः । कार्यताज्ञानस्यैव प्रवर्तकत्वात् । तथा चोक्तरीत्या शाब्दानुभवहेतुत्वस्यान्वितार्थे ग्रहीतुमशक्यतया कथमुक्तहेतुतारूपशक्तिग्रह इति चेत्, शृणु । उक्तवाक्ये तदादिपदस्य भ्रातृपुत्रादिप्रियपरत्वस्यापि सम्भवात् । तदागमनज्ञानस्य सुखहेतुतया उक्तवाक्यार्थबोधादुत्पन्नमुखपुरुषस्य मुखस्मेरत्वेन कार्येण तत्कारणं सुखमनुमीयते । तेन तद्धेतुमुक्तवाक्यार्थज्ञानमनुमिनोतीति हेत्वन्तराभावस्य निश्चयात् । उक्तवाक्यस्य प्रियागमनधीपरत्वनिश्चयाच्च । ततोऽन्वयव्यतिरेकाभ्यां तदादिपदस्य बुद्धिस्थपुत्रादिरूपेतरान्वितं प्रति तादृशशक्तिर्निर्णीयते । एवं 'नायं सर्पः' इति वाक्यस्थलेऽपि भयनिवृत्तिकार्यनिष्कम्पगात्रत्वादिलिङ्गकनिर्भयत्वाद्यनुमित्यादिप्रकारेण सर्पादिपदस्यान्वितसर्पत्वादौ शक्तिनिर्णयः । ननु, तथापि तत्त्वमसीत्यादावनुपपत्तिः । अन्वितानुभावकत्वेन कल्प्तस्य तदादिपदस्याननन्वितब्रह्मानुभावकत्वासम्भवादिति चेन्न । अन्वितेत्यस्य स्वघटितवाक्यतात्पर्यविषयार्थकत्वात् । तथा च यस्य पदस्य स्वघटितवाक्य तात्पर्यविषयो योऽर्थोऽन्वितोऽनन्वितो वा, तत्रैव तस्यानुभावकत्वम् । ननु, 'तत्त्वमसी'त्यादौ सर्वपदानां लाक्षणिकत्वेनानुभावकत्वमनुपपन्नम् । अनुभावकत्वमेव हि अभिहितान्वयवादे अन्विताभिधानवादे च पदानां शक्तिः । तस्याश्च लक्ष-

णिकपदे स्वीकारे मुख्यामुख्यपदविभागानुपपत्तिः । अथाभिहितान्वयवादे तादृश दोषाभावः पदाभिहितपदार्थज्ञानस्यैवानुभावकत्वेन पदस्याननुभावकत्वात् । न चोक्तवादे पदानां संसर्गरूपवाक्यार्थलक्षकत्वस्वीकारात् लक्षणाज्ञानविधया पदज्ञानानामेवानुभावकत्वमिति वाच्यम् । वाक्यार्थे हि स्वरूपसती पदवाच्यसम्बन्धरूपा लक्षणोपयुज्यते । घटमित्यादिपदशक्यस्य घटत्वीयकर्मत्वादेः तत्प्रतियोगित्वरूपो यस्सम्बन्धः, तदाश्रयस्यैव दर्शनादिक्रियानिष्ठस्य निरूपकत्वादिसंसर्गस्योक्तकर्मत्वादिज्ञानानुभाव्यत्वात् । उक्तकर्मत्वाद्यप्रतियोगिकस्य निरूपकत्वस्य क्रियायामुक्तकर्मत्वादेस्संसर्गतया भाने औत्सर्गिकस्य स्वतः प्रमात्वस्य बाधापत्तेः । औत्सर्गिकस्वतःप्रमात्वं च दोषासहिताया ज्ञानसामान्यजनकसामग्न्याः व्यापिका प्रमोत्पत्तिरित्येवंरूपम् । एवं च नोक्तलक्षणाधीः संसर्गशाब्दबोधे उपयुज्यते । न तरां तद्रूपेण पदज्ञानं हेतुरिति चेन्न । अभिहितान्वय इत्यस्य हि अयमर्थः- विभक्त्यन्तपदाभ्यां स्वार्थानुभवौ जन्येते । तादृशानुभवाविषयत्वमेव पदार्थस्याभिहितत्वम् । तदुत्तरं तु तादृशानुभवाभ्यामेव विभक्त्यन्तपदार्थयोः संसर्गानुभवः । न तु पदेन । तथा च पदाभिहितयोरर्थयोरन्वयधीः । न तु विभक्त्यन्तपदार्थयोर्मध्ये एकपदार्थान्वितस्यापरपदार्थस्य पदजन्यानुभव इति । अन्विताभिधानमित्यस्याप्ययमर्थः । एकपदस्य विभक्त्यन्तस्यार्थेनान्वितो ऽन्यपदार्थः पदेनानुभाव्यते । न तु विभक्त्यन्तपदार्थमात्रमिति । तथा चाभिहितान्वयपक्षे विभक्त्यन्तप्रत्येकपदजन्यानुभवस्य वाक्यार्थधीहेतुत्वेन घटमानयेत्यादौ स्वीकारेण 'तत्त्वमसी'त्यादावपि निर्विकल्पकस्य तादृशस्य प्रकृतिप्रत्ययोभयतात्पर्यविषयार्थानुभवस्यावश्यकत्वेनोक्तदोषानवकाशात् । घटमित्यादौ हि घटत्वकर्मत्वादिरूपोऽर्थः प्रकृतिप्रत्ययाभ्यामभिधीयते । तादृशाभिधायकत्वशक्तिसम्बन्धरूपघटादिपदस्य स्वार्थस्मारकत्वम् । अन्वितघटत्वानुभावकत्वमेव घटत्वेन घटपदस्य सम्बन्धः । अन्वितकर्मत्वानुभावकत्वमेव कर्मत्वस्य द्वितीयाविभक्तौ सम्बन्धः । कर्मत्वाद्यन्वयानुभावकत्वस्याभिहितकर्मत्वादेव स्वीकारेण पदेष्वस्वीकारात् । यदि त्वनुभावकत्वं न स्मारकसम्बन्धस्स्वीक्रियते, तदा घटादिपदस्य घटत्वादिस्मारकत्वं नोपपद्यते । न हि स्मरणानुकूलशक्तिरेव स्मार्यस्मारकयोस्संबन्धः स्मृतिप्रयोजकः । तथा स्वीकारेऽनुभवविरोधात् तादृशशक्त्यन्यस्य संयोगादेः सम्बन्धस्य हस्तिह-

स्तिपक्वादिनिष्ठस्य स्मृतिप्रयोजकस्य दृष्टत्वाच्च । उक्तानुभावकान्यस्य उक्तशक्त्यन्यस्य सम्बन्धस्य च कल्पने गौरवम् । ननु, घटादिपदेषु घटत्वादिस्मारकत्वस्याभिहितान्वयपक्षे स्वीकारे 'अभिहितघटना यदा तदानीं स्मृतिसमबुद्धियुगं पदे विभक्तः । परदृशि पुनरन्विताभिधाने पदयुगलात् स्मृतियुग्ममेव पूर्वम् ।' इति संक्षेपशारीरकोक्तिविरोधः । घटना अन्वयः । परदृशि शुद्धचितीत्यादिहि तदर्थः इति चेन्न । पदपदस्य प्रत्ययान्तप्रकृतिपरत्वात् । तथा च प्रकृतिप्रत्ययाभ्यां जायमाना धीर्न्न स्मृतिः । घटत्वीयकर्मतामनुभवामीति शृणोमीति चानुभूयमानत्वात् स्मृतिश्शक्तत्वान्यस्य स्मृतिप्रयोजकसम्बन्धस्यानुभावकत्वरूपस्यैव पदे वाच्यत्वाच्च । नापि प्रमाऽनुभवः । ज्ञातविषयकत्वात् । अतः स्मृतिसमः । ननु, केवलेनापि प्रकृतिपदेन प्रत्ययपदेन च घटत्वादेः कर्मत्वादेरनुभव एवाभिहितान्वयपक्षे उत्पद्यते । न स्मृतिः । तथा च पदपदस्य कथं प्रत्ययान्तपरत्वमिति चेन्न । 'प्रत्ययप्रकृतिशब्दतः बहिर्विद्यतेऽभिहितसङ्गतिश्च नः । प्रत्ययप्रकृतिशब्दयोः पुनर्नित्यमन्वितार्थयो निमित्तता ॥' इति संक्षेपशारीरकोक्त्या प्रकृतिप्रत्ययथोः घटत्वाद्यन्वितानुभावकत्वस्यैवोक्तत्वात् प्रत्ययप्रकृतिशब्दतो बहिरिति । प्रकृतिप्रत्ययशब्दार्थयोः केवलयोः यस्संसर्गः तदन्यस्य पदार्थयोः संसर्गस्येत्यर्थः । विभक्त्यन्तपदार्थप्रतियोगिकसंसर्गस्येति यावत् । अभिहितसङ्गतिरिति पदाभिहितार्थानुभाव्यतेत्यर्थः । अन्वितधियः प्रकृत्यर्थान्वितप्रत्ययार्थानुभवस्य । तद्भूतार्थाधिकरणीयवार्तिकोक्तपक्षाणां चरमत्वात् अयमेव पक्षः प्रामाणिकः । तथाहि—'भावनैव हि वाक्यार्थः सर्वत्राख्यातवत्तया । अनेकगुणजात्यादिकारकार्थानुरञ्जिता ॥ अन्वयव्यतिरेकाभ्यां प्रत्ययार्थस्तु सेष्यते । कैश्चिदन्यैस्तु धात्वर्थः सामीप्येनोपकारतः ॥ अपरैस्समुदायार्थः तत एव हि गम्यते । पाकादौ यत्र दृष्टा सा भवत्यादौ तथैव च ॥' इति वार्तिके । वाक्यार्थः वाक्यजन्यशाब्दधीमुख्यविशेष्यः । आख्यातवत्तया आख्यातसामान्यबोध्यत्वात् । प्रत्ययार्थः प्रत्ययमात्रवाच्यः । एवं धात्वर्थादिकं बोध्यम् । ततः अन्वयव्यतिरेकाभ्यां पचतीत्यादिस्थले आख्यातान्वये भावनान्वयः । पाक इत्यादिस्थले तद्व्यतिरेकेण भावनाव्यतिरेकः । भवत्यादौ सिद्धकर्तृक्रियावाचकधातौ । तदुक्तं वार्तिके । 'सिद्धकर्तृक्रियायोगा-

दाख्यातप्रत्यये सति ॥ सामानाधिकरण्येन करोत्यर्थोऽवगम्यते ॥' इत्यर्थके भावनामात्रं प्रत्ययगम्यं इति प्रथमपक्ष उक्तः । तत्र भावनेति कर्मत्वादेरुपलक्षणम् । तथा च प्रत्ययमात्रं कर्मत्वादिमात्रस्य वाचकम् । वाचकत्वं च अनुभावकत्वम् । शक्तिविषयकसंस्कारेणोद्बुद्धेन सहितादमादिपदात् कर्मत्वादेः प्रथमत एव शाब्दोऽनुभवः । न तु तत्स्मरणोत्तरम् । एवं घटादिपदादपि घटत्वादेस्तथा । तदस्मिन् पक्षे केवलघटत्वादेरशाब्दानुभवस्याननुभवपराहतत्वात् द्वितीयतृतीयपक्षावुक्तौ ।तत्र द्वितीयपक्षे प्रकृतेःप्राधान्येन मुख्यत्वात् कर्मत्वाद्यन्वितघटत्वाद्यनुभावकत्वम् । धातुपदस्य प्रकृतिमात्रपरत्वात् । सोऽयं पञ्चकं प्रातिपदिकार्थवादः । स्वार्थद्रव्यलिङ्गसङ्ख्याकर्मत्वादिरूपस्य पञ्चकस्य प्रातिपदिकार्थस्य तन्मते स्वीकारात् । उक्तं च वैयाकरणैः —'वाचिका द्योतिका वा स्युर्द्वित्वादीनां विभक्तयः । स्याद्वा सङ्ख्यावतोऽर्थस्य समुदायोऽभिधायकः॥' इति । न तु तस्या घटत्वाद्यन्वितकर्मत्वाद्यनुभावकत्वम् । तस्यास्तद्वाचकत्वाव्यवहारात् । यन्मुख्यविशेष्यकशाब्दबोधानुकूलशक्तिमत्त्वं यत्पदे तिष्ठति, तत्रैव तद्वाचकत्वव्यवहारात् । कर्मत्वादिप्रकारकघटत्वविशेष्यक एव शाब्दबोधे घटपदस्य शक्तत्वात्तद्वाचकत्वव्यवहारः । तार्किकादीनामपि सम्मतमेवैतत् । घटत्वादिवाचकत्वस्य घटादिपदे तैरस्वीकारात् । शक्तिज्ञानस्य कारणत्वे घटत्वानुभवानुकूलशक्तिमत्त्वेनैवेत्यन्यत् । अस्मिन् पक्षे करणत्वविशिष्टं दधि विधीयते । 'दध्नेन्द्रियकामस्य जुहुयां'दित्यत्रेति शास्त्रदीपिकाद्युक्तिः । तदत्रापि पक्षे कर्मत्वादेर्विशेष्यत्वेन बोधस्य सर्वानुभाविकस्य बाधात्तृतीयः पक्ष उक्तः । तत्र घटत्वादिविशिष्टकर्मत्वादिविषयकशाब्दानुभवे प्रकृतिपदोत्तरत्वविशिष्टप्रत्ययपदस्य कारणताग्राहकमानेन विशेषणीभूतप्रकृतेरपि कारणत्वग्रहात् घटत्वाद्यन्वितविषयकशाब्दत्वेन घटादिपदकार्यता । अमादिपदस्य तु प्रकृत्युत्तरत्वविशिष्टत्वेन रूपेण घटत्वादिविशिष्टकर्मतादिशाब्दबोध इवाम्त्वादिकेवलरूपेणान्वितकर्मत्वादिशाब्दत्वावच्छिन्ने कारणत्वम्।द्वितीयपक्षे प्रत्ययः पूर्ववृत्तितारूपेण सामीप्यसम्बन्धेन प्रकृतिनिष्ठकारणतावच्छेदकत्वात् प्रकृतेरुपकारकः। न तु कारणम्। तस्य कारणतायामुपाधित्वेन दण्डत्वादेरिव विशेषणत्वस्यास्वीकारात्। तृतीयपक्षे प्रकृतिरुत्तरवृत्तितारूपेण सामीप्यसम्बन्धेन प्रत्ययनिष्ठकारणतावच्छेदकत्वात् प्रत्ययस्योपकारिका । विशेषणत्वस्वीकारात् ज्ञायमानलिङ्गमिव कारण

Lt. PADMASHREE
Prof. V. VENKATACHALAM
VARANASI

मपीति भावः । तस्मात् केवलस्य घटत्वादेः स्मृतिरेव नानुभवः । घटत्वान्वि-
तकर्मत्वादेस्तु न स्मृतिः । नापि प्रमानुभवः । तस्य घटं पश्येत्यादिवाक्यार्थधी-
पूर्वमपि ज्ञातत्वेनाज्ञातविषयकत्वघटितप्रमात्वस्याभावात् । दर्शनादेर्घटत्वादिकर्मत्वे-
नाज्ञातत्वेऽपि घटत्वादेः कर्मत्वादिमात्रमुक्तवाक्यं विनापि ज्ञायत एव । अतो घटं
पश्येति प्रत्ययान्तपदाभ्यां ज्ञातविषयकत्वेन स्मृतिसममनुभवद्वयं जन्यते । अन्विता-
भिधानपक्षे तु तयोर्घटत्वीयकर्मत्वाद्यनुभावकत्वस्वीकारात्तदेव सम्बन्धं पुरस्कृत्य घटत्व-
कर्मत्वादेर्दर्शनाद्यन्वितप्रत्ययार्थस्य च स्मृतिद्वयमेव ताभ्यां जन्यते । प्रकृतिप्रत्य-
याभ्यां हि तादृशस्मृतिशक्तत्वं केवलघटत्वादिस्मृतिशक्तत्वमुक्तान्वयानुभावकत्वं वा
सम्बन्धं पुरस्कृत्य घटत्वकर्मतात्वयोः स्मृतिद्वयम् । तेन च घटत्वीयकर्मतास्मृतिः ।
कर्मत्वस्याखण्डशक्तिरूपत्वे तु तस्यैव स्मृतिः । अंतः प्रत्ययान्तपदघटकाभ्यां
प्रत्येकपदाभ्यां प्रयुक्तत्वादन्वितकर्मतास्मृतिः । प्रत्ययान्तपदजन्येति व्यवह्रियते । न
चाभिहितान्वयपक्षे अन्विताभिधानपक्षे च प्रथमत एव घटत्वाद्यन्वितकर्मत्वादिस्मृतिस-
म्भवात् । तया च यथामतं शाब्दधीसम्भवात् तत्पूर्वस्मृतिस्वीकारो व्यर्थ इति वाच्यम् ।
अन्वितकर्मतानुभावकतात्वादिरूपेण उक्तानुभावकत्वरूपशक्तिज्ञानं नोक्तकर्मत्वा-
दिशाब्दधीहेतुः । गौरवात् । किं तु घटत्वानुभावकतात्वकर्मत्वानुभावकतात्वादि-
रूपेण । तथा चानुभावकत्वरूपशक्तेः यदीयतया ग्रहणं यत्र पदे भवति, ततस्तस्यै-
व स्मरणाद्यपक्षे स्मृतिद्वयव्यवधानेन द्वितीयपक्षे स्मृतित्रयव्यवधानेन उक्तशाब्द-
धीः। अत एव घटमानयेत्यादौ घटादेर्लक्षणया शाब्दधीः शक्यस्मृतिजन्या । शक्यस्मृतेरे
व लक्षणात्वात्। 'घटेन जलमाहरे'त्यादौ तु घटत्वादेरेव जलाहरणादौ करणत्वेन शा-
ब्दधीः । अत एव 'व्रीहिभिर्यजेते'त्यादिश्रुतौ व्रीहित्वादेरेव करणत्वेन शाब्दधीः।
करणीभूतव्यक्तिपरिच्छेदद्वारा जातिगुणादेरपि करणतासम्भवात् । 'गोमयैः पच-
ति काष्ठैः पचती'त्यादौ परम्परयापि करणत्वव्यवहारात् । एवं च घटमित्यादि-
पदजन्यं ज्ञानं घटत्वकर्मतादेरादिपक्षे शाब्दधीजनकम् । तदन्वयस्य द्वितीयपक्षे।
तथापि घटमिति पदं न घटत्वादिशक्तमुच्यते । घटेत्यस्यैव कर्मत्वकरणत्वादिरूपघ-
टत्वान्वितमात्रं प्रत्यनुभावकत्वात् । उद्बोधकविधया स्वजन्यां स्मृतिं द्वारीकृत्य हि
पदज्ञानस्य शाब्दबोधे कारणत्वम् । तच्च यद्रूपविशिष्टपदविशेष्यकजातिरूपार्थश-
क्तिज्ञानत्वेन हेतुता, तद्रूपविशिष्टपदज्ञानत्वेनैव । तच्च रूपं घट इतिपदत्वं, घट

इति पदविशेष्यकस्यैव घटत्वशक्तिज्ञानस्य लाघवेन घटत्वान्वितविषयकशाब्दधीत्वावच्छिन्नं प्रति प्रथमपक्षे घटत्वान्वितप्रतियोगिकान्वयशाब्दधीत्वावच्छिन्नं प्रति द्वितीयपक्षे हेतुत्वात् । द्वितीयाविभक्त्यादिविशेष्यकस्यैव कर्मत्वादिशक्तिज्ञानस्यान्वितकर्मत्वादिशाब्दधीत्वावच्छिन्नं प्रति प्रथमपक्षे कर्मत्वाद्यन्वयशाब्दधीत्वावच्छिन्नं प्रति द्वितीयपक्षे हेतुत्वात् । अत एव घटत्वशक्तं घटपदमित्यादि मीमांसकानां व्यवहारः । यत्पदस्य यच्छक्तत्वज्ञानत्वेन हेतुता, तच्छक्तत्वेनैव तत्पदस्य व्यवहारात् । वस्तुतस्तु अभिहितघटनेत्युक्तवाक्यस्य तत्त्वमस्यादिवाक्यमधिकृत्योक्तत्वात् तत्रैव तत्त्वम्पदयोः स्मृतिसमधीद्वयजनकत्वम् । तादृशधीद्वयस्य निर्विकल्पकत्वात् पदार्थमात्रविषयकत्वेन पदार्थस्य च सत्यादिवाक्येन पूर्वं ज्ञातत्वात् स्मृतिसमत्वम् । न चोक्तपदाभ्यां प्रत्येकं शाब्दबोधजनने मानाभाव इति वाच्यम् । 'प्रातिपदिकान्यनतिरिक्तविषयाणि प्राह भगवान् प्रथमशब्दितविभक्त्या । पाणिनिरतस्सकलतर्कसमयज्ञो वष्टि वाचोऽनतिरिक्तविषयकत्वम् ॥' इति संक्षेपशारीरकोक्त्या तथा लाभात् । अत एव संसर्गाविषयकप्रमाजनकत्वे सत्यपर्यायशब्दत्वमिति अखण्डार्थकत्वलक्षणे घटः कलश इत्यादिवारणायापर्यायशब्दत्वमित्युक्तमित्यद्वैतसिद्धावुक्तम् । किं च अभिहितान्वयरक्षार्थमेव प्रत्ययान्तपदमात्रजन्यानुभवोऽवश्यं वाच्यः । अभिहितान्वये हि प्रत्ययान्तप्रकृतिपदमात्रधीजनितेन शाब्दानुभवेन जनितः प्रत्ययान्तपदद्वयार्थशाब्दानुभवः प्रत्ययान्तपदाभ्यां स्वजन्यस्मृतिद्वारा एकस्यैव शाब्दानुभवस्य स्वीकारे जन्यजनकभावापन्नयोरनुभवयोरसम्भवः । तथा च तत्त्वमसीतिवाक्यस्थपदयोरेव स्मृतिसमधीद्वयहेतुत्वात् घटत्वकर्मत्वादिबोधस्याज्ञातविषयकत्वेऽपि न क्षतिः । आद्यपक्षे घटत्वाद्यन्वितकर्मत्वादि शाब्दज्ञानस्य तादृशकर्मत्वाद्यन्वितशाब्दधीत्वावच्छिन्नं प्रति हेतुत्वेऽपि घटादिपदस्यापि घटत्वाद्यन्वितानुभावकत्वात् । ननु, तत्त्वमस्यादिवाक्यस्थपदानां लाक्षणिकानामपि प्रत्ययान्तपदतात्पर्यविषयत्वानुभावकत्वात् तादृशविषयशक्तत्वापत्त्या मुख्यामुख्यपदविभागानुपपत्तिर्दोष इति चेन्न । लक्ष्यार्थशाब्दधीस्थले लक्षणाया एव तादृशधीहेतुत्वात् । लक्षकपदज्ञानस्य हेतुत्वे मानाभावः । तस्याश्शाब्दत्वं तु शब्दाजन्यत्वेऽपि शब्दप्रयोज्यत्वादेव । अन्यथा भट्टमतेऽपि महावाक्यार्थज्ञानस्य शाब्दत्वानुपपत्तेः । यन्मते हि लक्षणाज्ञानं कारणं,

तन्मते गङ्गादिपदविशेष्यकस्य तीरादिसम्बन्धिप्रवाहशक्तत्वज्ञानस्य तीरस्मृति-हेतुत्वात्तस्य तद्द्वारा तीरशाब्दधीहेतुत्वसम्भवः । प्रवाहशक्तत्वप्रकारकगङ्गादिपद-ज्ञानजन्यप्रवाहस्मृतिजन्यतीरस्मृतिरूपलक्षणाया एव तीरशाब्दधीहेतुत्वमिति प्राची-नतार्किकमीमांसकादिमते तु तादृशस्मृतौ पदज्ञानस्य हेतुत्वे न मानमस्ति । गङ्गापदज्ञानस्य तादृशज्ञानत्वेनोद्बोधकविधया कारणत्वस्य गङ्गापदशक्तिज्ञान-संस्कारजन्यस्मृतिं प्रत्येव क्लृप्तत्वेन तीरादिशाब्दधीजनकस्मृतिं प्रत्यक्लृप्तत्वात् । न चैवं शक्यस्मृत्यैव शक्यार्थशाब्दबुद्धेः सम्भवात् तादृशस्मृतावेव पदज्ञानं हेतुरस्तु । न तूक्तशाब्दबुद्धाविति वाच्यम् । शक्तिग्रहकाले प्रवृत्त्यनुमितशाब्द-बोधं प्रति पदज्ञानस्य हेतुतां कल्पयित्वा तस्यास्साक्षादसम्भवेन तदुपपादकतया शक्यस्मृतिद्वारकत्वस्य क्लृप्ततयोक्तस्मृतेः कारणत्वमादाय पदज्ञानकारणत्वस्येदानीं त्यागे उपजीव्यविरोधापत्तेः शक्यार्थशाब्दधीहेतुधीविषयत्वस्यैव पदे शक्तिस-म्बन्धरूपत्वेन तत्र तस्याक्लृप्तत्वे सम्बन्धिज्ञानविधया पदज्ञानजन्यायाः शक्य-स्मृतेरसम्भवाच्च । लक्ष्यशाब्दधीस्थले तु प्रवृत्त्यनुमितया तया स्वकारणतया न पदं कल्प्यते । किं तु तादृशलक्षणैव । अतश्च पदं न लक्ष्यस्यानुभावकमिति न तत् शक्तम् । ततश्च लक्ष्यार्थं प्रत्यमुख्यमेवेति न मुख्यामुख्यपदविभागानुप-पत्तिः । एवं च तत्त्वमस्यादिवाक्ये सर्वपदलाक्षणिकत्वेऽपि लाक्षणिकं नानुभा-वकमिति सिद्धान्तस्य न भङ्गः । तत्त्वमादिपदानामनुभावकत्वास्वीकारात् उक्तप-दज्ञानजन्यशक्योपस्थितिमूलकलक्ष्योपस्थितेरेवानुभावकत्वस्वीकारात् । न चैवं भट्टमते पदाध्याहारनियमो न स्यात् । सर्वपदलाक्षणिकस्थले शाब्दबोधस्य प-दाजन्यत्ववत् शाब्दबोधहेतुस्मृतेः पदाजन्यत्वसम्भवादिति वाच्यम् । पदप्रयो-ज्यस्मृतेस्तदजन्यस्मृतिसहकारेण शाब्दबुद्ध्यनुपधायकत्वेन द्वारमित्येव श्रुते पि-धेहीति पदस्यावश्यकल्प्यत्वात् शाब्दीतिन्यायेन श्रुतशब्दस्य शब्देनैवाकांक्षा-पूरणात् । अत एव यत्र पदं किमपि न श्रूयते, तत्र न पदाध्याहारः । य-था 'पश्यतः श्वेतिमारूपं हेषाशब्दं च शृण्वतः । खुरविक्षेपशब्दं च श्वेतोऽश्वो धावतीति धीः । दृष्टा वाक्यविनिर्मुक्ता न पदार्थैर्विना क्वचित् ॥' इति वा-क्याधिकरणे भट्टैरुक्तम् । तच्च न्यायरत्नाकरे व्यख्यातम् । 'अश्वत्वाद्यनुपहितं श्वे-तत्वं पश्यन् तस्मिन् प्रदेशे हेषाशब्देनाश्वं खुरशब्देन गमनञ्चानुमिमानोऽनुप[illegible]ब्धिभ्र-

माणेन तत्प्रदेशे श्वेतत्वाद्यन्वययोग्यवस्त्वन्तरस्याभावं जानन् पुरुषः कल्पयति । श्वेतत्वादीनामन्यान्वयसाकांक्षाणां मिथोऽन्वयं विनानुपपन्नत्वधीसहकृतं साकांक्षत्वयोग्यत्वसन्निधिसहकृतं च श्वेतत्वादीनां ज्ञानं तेषां मिथोऽन्वयधीकरण'मिति । न च घटमानयेत्यादौ पदानामेकवाक्यताज्ञानस्यार्थज्ञानसहकारितया कल्पततया तदभावेऽर्थज्ञानस्य शाब्दबुद्ध्युपधायकत्वासम्भवात् श्वेतोऽश्वो धावतीति वाक्यमेव तत्र कल्प्यते । न तु तादृशस्यार्थज्ञानस्य शाब्दधीकारणत्वमिति वाच्यम् । नानावर्णघटितपदानां कल्पनापेक्षया एकस्यानुपपत्तिज्ञानस्यैव कल्पनाया लघुत्वात् । मीमांसकमते हि वर्णानां नित्यत्वात् घकारोत्तरटकारत्वं न घटपदत्वम् । किं तु घज्ञानोत्तरज्ञेयटत्वम् । तथा च वर्णसमसंख्याकज्ञानानां पदघटकत्वात् पदसमसंख्याकज्ञानानां च वाक्यघटकत्वात् अनुपपत्तिज्ञानस्य चैकत्वात् तदपेक्षया तस्य लघुत्वं स्पष्टम् । सम्भवति च श्वेतत्वं तद्देशे दृश्यमानमश्वान्यासंसर्गित्वेन प्रतीयमानं अश्वसंसर्गित्वं विनानुपपन्नमिति धीः । एवं धावनेऽप्यनुपपत्तिर्बोध्या । तस्माद्यत्र गवाश्वादिमत्त्वेन सम्भाविते देशे श्वेतत्वं दृश्यते, तत्रैव पदानि कल्पयित्वा तदेकवाक्यताज्ञानात् शाब्दधीः स्वीक्रियते । तदभावे तु तत्र न भवत्येव सा । भवत्यपि वा गौरश्वो वा श्वेतो धावतीति संशयात्मिका विप्रतिपत्तिवाक्यजन्यधीवत् । न चैवं श्वेतोऽश्वो धावतीति धीरर्थापत्तिरेव । न शाब्दधीरिति वाच्यम् । पदज्ञानस्य पदार्थप्रमायामेवोपक्षीणत्वेन साकांक्षयोग्यासन्नार्थज्ञानस्यैव श्रूयमाणपदस्थले वाक्यार्थशाब्दधीकरणत्वेन कल्पततया शाब्दधीत्वस्यापि तस्यां सिद्धत्वात् । मीमांसकमते गुणे जात्यस्वीकारेण शाब्दत्वार्थापत्तित्वादीनां अखण्डोपाधित्वाद्विषयताविशेषरूपत्वाद्वा साङ्कर्यस्यादोषत्वात् । अथवा अश्वान्यद्रव्यवृत्तित्वबाधधीसहकृता द्रव्यवृत्तित्वशाब्दधीसामग्री अश्वद्रव्यवृत्तित्वशाब्दधियं जनयति । इतरबाधधीसहकृतसामान्यसामग्र्या विशेषरूपेण ज्ञानजनकत्वात् । तथा च तादृशज्ञानं शाब्दधीरेव । नार्थापत्तिः । प्राचीनमते तु सामान्यसामग्री सामान्यरूपेणैव ज्ञानजनिका । न त्वितरबाधसहकृतापि विशेषरूपेण । विशेषरूपं विनानुपपत्तिधीस्तु विशेषरूपेणैव सर्वमते विशेषरूपेणैव धीजनिकेत्याशयेन न्यायरत्नाकरेऽनुपपत्तिज्ञानानुसरणम् । तस्मादुक्तार्थज्ञानं शाब्दसामान्ये करणम् । विशेषकरणं तु पदैकवाक्यत्वज्ञानादिरूप-

मेकं तत्र कार्यतावच्छेदकं तदुत्तरशाब्दधीत्वम्, अपरमनुपपत्तिज्ञानादिकं तत्कार्यतावच्छेदकं तदुत्तरशाब्दधीत्वम् । अत एव प्राभाकरमतेऽपि घटमित्यादिपदं विना घटकर्मत्वाद्यर्थाध्याहारादपि शाब्दधीः स्वीक्रियते । परं तु आनयेत्यादिपदधीसहकृतात् । एवं तदर्थाध्याहारादपि तदर्थशाब्दधीः घटमित्यादिपदधीसहकृतादिति बोध्यम् । उक्ताधिकरणे भाष्येऽप्युक्तम्—'अन्तरेणापि पदं शक्यत्वादेरन्वयधी'रिति । यदि तु लाक्षणिकमननुभावकमिति वृद्धोक्तेः लाक्षणिकं पदं स्वजन्यया स्मृत्याननुभावकमित्यर्थकत्वात् स्वजन्यशक्यस्मृतिजन्यया लक्ष्यस्मृत्या लाक्षणिकस्यानुभावकत्वं स्वीक्रियत एव, तथापि न तस्य लक्ष्यार्थशक्तत्वम् । स्वजन्यशक्यस्मृतिमात्रद्वारकानुभावकत्वस्यैव शक्तित्वात् । अत एव मुख्यामुख्यविभागोऽपि नानुपपन्न इति चिन्त्यते, तदापि न क्षतिः । वस्तुतस्तु सत्यत्वादिविशिष्टशक्तपदस्य सत्यत्वाद्युपलक्षितविशेष्यमात्रेऽपि शक्तिसत्त्वात्तस्य तदनुभावकत्वेऽपि न लाक्षणिकस्यानुभावकत्वापत्तिः । शक्त्यैवानुभावकत्वेन तत्र तस्य लाक्षणिकत्वाभावात् । प्रत्याख्यातं च पूर्वमस्माभिस्तस्य लाक्षणिकत्वम् । ननु गङ्गादिपदज्ञानस्य गङ्गात्वान्वितशाब्दत्वावच्छिन्नं प्रति हेतुत्वं न युक्तम् । तादृशशाब्दत्वं हि गङ्गात्वप्रकारतानिरूपितसांसर्गिकविषयताशालिशाब्दत्वम् । तथा च उक्तप्रकारताशालिशाब्दत्वेनैव तत्कार्यत्वमुचितम् । एवमन्विताभिधानपक्षे गङ्गात्वान्वितप्रतियोगिकान्वयशाब्दत्वेन गङ्गात्वप्रकारतानिरूपितसांसर्गिकविषयताशालिशाब्दत्वे पर्यवसितेन न तत्कार्यत्वं युक्तम् । किं तु गङ्गात्वप्रकारताशालिशाब्दत्वेन । लाघवात् । इति चेन्न । गङ्गात्वाद्यन्वयनिष्ठसांसर्गिकविषयतायां गङ्गादिपदज्ञानकार्यतावच्छेदककुक्षावप्रवेशे आकस्मिकतापत्तेः । न च गङ्गामित्यादिपदज्ञानस्य गङ्गात्वान्वितकर्मत्वादिशाब्दधीकरणत्वमवश्यं वाच्यम् । अन्यथा अम् गङ्गेत्यादिज्ञानादपि तदापत्तेः । तथा च तादृशविषयतायास्तादृशकारणनियम्यत्वेनाकस्मिकत्वाभावात् गङ्गादिपदज्ञानस्योक्तहेतुत्वे मानाभाव इति वाच्यम् । तथा सति गङ्गात्वप्रकारताशालिशाब्दत्वस्यापि तत्कार्यतावच्छेदकत्वस्य लोपापत्तेः । परामर्शत्वादेरनुमित्यादिकारणतावच्छेदकस्य घटकतया व्याप्तिज्ञानत्वादेरिव गङ्गामितिपदज्ञानत्वरूपशाब्दधीकारणतावच्छेदकस्य घटकतया गङ्गेतिपदज्ञानत्वस्यान्यथासिद्धत्वात् । अथ स्वतन्त्रान्वयव्यतिरेकाभ्यां प्राचीनमते वह्निव्याप्ति-

ज्ञानत्वादिना वह्न्यनुमितावि॒व गङ्गादिपदज्ञानत्वेन गङ्गात्वप्रकारकशाब्दबोधे हेतुत्वं, तर्हि गङ्गात्वप्रकारतानिरूपितसांसर्गिकविषयताकशाब्दत्वेनैव तत्कार्यत्वं युक्तम् । तद्रूपेणैवान्वयव्यतिरेकज्ञानात् । गङ्गां गङ्गया गङ्गायै इत्यादौ हि तादृशबोधस्यान्वये हि गङ्गापदस्यावश्यमन्वयः । तत्पदाभावेऽवश्यं बोधाभावः । यत्तु गङ्गापदज्ञानत्वेन गङ्गात्वप्रकारकशाब्दत्वावच्छिन्नेऽपि न कारणत्वमिति तन्न । गङ्गादिपदमात्रज्ञानादपि गङ्गात्वादिस्मृतिदर्शनेन स्मार्यस्मारकसम्बन्धस्य स्मार्यानुभावकत्वरूपस्यावश्यकत्वात् । न च गङ्गामित्यस्य स्वजन्यां गङ्गात्वकर्मत्वोपस्थितिं द्वारीकृत्य गङ्गात्वान्वितकर्मत्वशाब्दधीहेतुत्वस्यास्वीकारे गङ्गा कर्मत्वमित्यादिपदजन्योपस्थितिसहितात् गङ्गेतिपदज्ञानादपि शाब्दबोधापत्त्या तादृशहेतुत्वमावश्यकम् । तथा च गङ्गामित्यादेरेव शाब्दधीहेतुस्मृतिहेतुत्वसम्भवात् गङ्गेत्यादेस्तन्नावश्यकम् । शाब्दबोधानुपधायकगङ्गात्वादिस्मृतिहेतुत्वं तु तादृशशाब्दधीहेतुगङ्गामित्यादिपदघटकत्वरूपं गङ्गात्वादेस्सम्बन्धमादायाप्युपपद्यत इति गङ्गादिपदं नानुभावकमिति वाच्यम् । उक्तघटकत्वसम्बन्धप्रकारकगङ्गादिपदविशेष्यकसंस्कारोद्बोधकविधया गङ्गादिपदज्ञानस्य गङ्गात्वादिस्मृतिहेतुत्वे गौरवात् गङ्गात्वानुभावकत्वस्यैव उक्तघटकत्वस्थले निवेशनेन व्याप्तिज्ञानदृष्टान्तस्योक्तत्वेन च उक्तहेतुत्वौचित्येन गङ्गादिपदस्यानुभावकत्वे सिद्धेऽनुभावकघटकत्वापेक्षया लघोरनुभावकत्वस्यैव प्रयोजकताया युक्तत्वात् गङ्गापदस्यानुभावकत्वकल्पनापेक्षयानुभावकघटकत्वघटकानां विशेषणविशेष्यभावस्थाविनिगम्यत्वेन स्मृतिं प्रति नानाहेतुत्वानां गुरुतररूपैः कल्पने महागौरवात् । अत एव गङ्गात्वानुभावकत्वविषयकसंस्कारत्वेन शाब्दधीहेतुस्मृतिहेतुत्वम् । न तु गङ्गानुभावकत्वसंस्कारत्वेन । गौरवात् । अतश्च शाब्दबोधोऽपि गङ्गत्वान्वितस्यैव कर्मत्वादेः शक्त्या । नतु, गङ्गान्वितकर्मत्वादेरित्याकृत्यधिकरणे स्थितम् । किं च त्वदुक्तरीत्यापि विनिगमनाभावात् गङ्गापदोत्तराम्पदत्वेनैव अम्पदपूर्वगङ्गापदत्वेनापि ज्ञानं गङ्गात्वकर्मताशाब्दधीहेतुरिति वाच्यम् । तथा च शक्तिज्ञानतज्जन्यसंस्कारयोर्गङ्गात्वानुभावकत्वप्रकारकगङ्गादिपदविशेष्यकत्वेनैव हेतुतास्तु । अन्वितकर्मत्वादेरिव अम्पदपूर्वत्वादेरपि उक्तहेतुतावच्छेदकशरीरे निवेशे गौरवात् अम्पदपूर्वगङ्गापदज्ञानत्वावच्छिन्नाया गङ्गात्वान्वितकर्मत्वादिशाब्दबोधत्वावच्छिन्नजन्यतानि-

रूपितजनकताया एव गङ्गापदज्ञाने गङ्गात्वानुभावकतात्वेन भानसम्भवात् । एवं च गङ्गापदत्वेन रूपेण गङ्गात्वं प्रत्यनुभावकत्वरूपसम्बन्धग्रहात् तेन रूपेण तज्ज्ञानस्य तत्स्मृतिहेतुत्वात् तेनैव रूपेण तज्ज्ञानस्य गङ्गात्वान्वितविषयकशाब्दधीहेतुत्वं। व्यापारजनकतावच्छेदकत्वेन उपस्थितस्यैव फलजनकतावच्छेदकत्वौचित्यात्। तादृशहेतुत्वनिरूपितजन्यतापि गङ्गात्वान्वितशाब्दत्वेन । न तु तदन्वितकर्मतादि शाब्दत्वेन । गङ्गात्वान्वितकरणत्वादिशाब्दासङ्ग्रहात् । नापि गङ्गात्वशाब्दत्वेन गङ्गामित्यादेः गङ्गात्वकर्मताशाब्दधीहेतुताया आवश्यकत्वेनोक्तत्वात् । 'यद्विशेषयोः कार्यकारणत्वं वलक्ष्यं, तत्सामान्ययोरपीति न्यायेन सामान्यतो हेतुत्वे वाच्ये विशेषरूपकर्मतादित्यागेऽपि तदन्वयांशस्य त्यागायोगात् । अन्यथा गङ्गात्वान्वयशाब्दत्वावच्छिन्नाभावस्य गङ्गामिति पदज्ञानत्वगङ्गयेत्यादिपदज्ञानत्वरूपविशेषकारणतावच्छेदकावच्छिन्नाभावकूटप्रयुक्तत्वे गौरवात् । अतएव वह्न्यनुमितित्वावच्छिन्नाभावस्य परामर्शाभावकूटप्रयुक्तत्वे गौरवात् । वह्निव्याप्तिज्ञानत्वेनैव वह्न्यनुमितिहेतुता । अपि च गङ्गात्वविषयता नोक्तकार्यतावच्छेदिका । अज्ञातार्थविषयताया एव मीमांसकमते प्रमाणप्रयुक्तत्वस्वीकारात् प्रमाणकार्यतावच्छेदकत्वस्यैव प्रकृते प्रमाणप्रयुक्तत्वरूपत्वात्। पदार्थमात्रस्य शाब्दबोधात् पूर्वमुपस्थितत्वादज्ञातत्वाभावेन पदार्थयोरन्वयस्यैवाज्ञातत्वेन तद्विषयताया एव तादृशजन्यतावच्छेदकत्वस्यौचित्यात् । अत एव वह्न्यादिव्याप्तिज्ञानादिजन्यतापि वह्न्यादिसम्बन्धविषयकानुमितित्वादिनैव । ननु, कर्मत्वादिकारकं गङ्गात्वाद्यन्वितमिति ज्ञानस्य गङ्गामित्यादिशब्दजन्यशाब्दधीपूर्वं सत्त्वेन गङ्गात्वाद्यन्वयोऽपि नाज्ञात इति चेन्न । तादृशज्ञानस्योक्तधीपूर्वं सत्त्वान्नियमेन तादृशसत्त्वाभावकाले गङ्गादिपदज्ञानस्याज्ञातान्वयविषयताप्रयोजकत्वानपायात् कस्यांचित् क्रियायां कर्मता गङ्गात्वीया इति ज्ञानस्योक्तशाब्दधीपूर्वं सत्त्वनियमस्त्वसम्भवी । अत एव 'स्मृतिसमबुद्धियुगं पदे विधत्त' इत्यपि तत्त्वमस्यादिवाक्यस्थलाभिप्रायेण पूर्वं व्याख्यातम् । गङ्गात्वादिपदार्थमात्रं त्ववश्यं शाब्दधीमद्भिः सर्वैः पुरुषैः पूर्वं ज्ञातमिति विशेषात् । किं च मीमांसकमते जातेस्संस्थानव्यङ्ग्यतास्वीकारेण गुणकर्मणोरवयवसंयोगविशेषरूपसंस्थानाभावेन तयोर्जात्यस्वीकारेण शाब्दत्वानुमितित्वादेर्ज्ञानगतस्याखण्डस्य धर्मस्यैकस्मिन् ज्ञाने साङ्कर्ये बाध-

काभावः । तथा च स्मृत्यनुमितिशाब्दबोधादिसामग्रीणां दैववशेन मेलने सम्पन्ने स्मृतित्वानुमितित्वशाब्दत्वाविशिष्टमेकमेव ज्ञानं स्वीक्रियते । एवं च गङ्गायेत्यादिवाक्यजन्यशाब्दबोधे अनुमित्यादिधीसामग्रीबलात् पूर्वं पर्वतवह्निसंयोगादिभानेऽपि 'तादृशसंयोगं शाब्दयामी' ति प्रत्ययाभावात् तादृशप्रत्यये तादृशसंयोगविषयकत्वावच्छिन्नशाब्दत्वं विषयो वाच्यः। तादृशशाब्दत्वे प्रयोजकं पदज्ञानादिकमेवाते तादृशसंयोगादिबोधकपदज्ञानाभावकाले न तादृशशाब्दत्वविशिष्टोत्पत्तिः । तथा च 'पर्वतवह्न्योस्संयोगमनुमिनोमि,न तु पर्वतं वह्निं वा अनुमिनोमि, किं तु साक्षात्करोमि स्मरामि, वे'ति प्रत्ययस्येव 'गङ्गात्वकरणत्वयोः सम्बन्धं शृणोमि,न तु गङ्गात्वं करणत्वं वा शृणोमि;किं तु स्मरामी'ति प्रत्ययस्य सार्वलौकिकत्वात् गङ्गात्वादिविषयतामात्रस्य शाब्दत्वानवच्छेदकत्वात् । शाब्दत्वानवच्छेदकविषयतायाश्च पदज्ञानादिप्रयुक्तत्वे मानाभावः । अत एव अनुवादवाक्ये वाक्यार्थभूतान्वये स्मरामीति प्रत्ययस्यैव स्वीकारेण तद्विषयतायाश्शाब्दत्वानवच्छेदकत्वेन पदज्ञानाप्रयुक्तत्वात् स्मृतिसामग्रीप्रयुक्तत्वमेव । न च अनुवादवाक्यस्थलेऽपि पदज्ञानादिकारणबलादन्वयविषयतावच्छिन्नशाब्दत्वावच्छिन्नोत्पत्तिः स्यादिति वाच्यम् । उक्तशाब्दत्वावच्छिन्नं प्रति अन्वयाज्ञानस्य हेतुत्वात् । तस्मादन्वयघटितमेव पदशक्यम् । अत एवोक्तं शाबरभाष्ये—'प्रातिपदिकादुच्चरन्ती द्वितीयाविभक्तिः प्रातिपदिकार्थो विशेषक इत्याहे'ति । विशेषको व्यावर्तकः । उपलक्षणविधया व्यावर्तकत्वलाभार्थमितिशब्दः । तथा च प्रातिपदिकार्थोपलक्षितोऽन्वयः तद्विशिष्टवाचिका सेत्यर्थः । अत एव च निरुक्तकारैरुक्तं—'प्रकृतिप्रत्ययौ प्रत्ययार्थं सह ब्रूत' इति । घटत्वकर्मत्वाद्यंशे प्रकृतिप्रत्ययोरनुभावकत्वादन्वयमात्रांशे पर्यवसितं सहवाचकत्वमिति भावः। न्यायरत्नमालादौ घटत्वादिकमेव घटादिपदस्य शक्यम् । न त्वन्वयांशस्य तत्र निवेशः । तथा च घटत्वमात्रविषयकानुभवो घटादिपदधीजन्यः । न चैवं स्मृतिरपि तादृशी वाच्या । पदज्ञानस्य साक्षादनुभवाहेतुत्वात् । तथा चानुभवविरोधः । न हि पदज्ञानोत्तरं तादृशधीद्वयं क्रमिकमनुभूयत इति वाच्यम् । तादृशस्मृतौ मानाभावात् साक्षादेव तस्य तद्धेतुत्वात् । तदिदं पूर्वोपदर्शितवार्तिकोक्तपक्षत्रयस्याद्यपक्षावलम्बनम्, तन्नयुक्तम् । उक्तभाष्यादिविरोधात् पदतदर्थयोः सम्बन्धाग्रहेऽपि पदज्ञानार्थानुभावपत्तेः । अथ यथा पञ्चपाद्यामुक्तम् ।

व्याप्तिसंस्कारसहिता पक्षसम्बद्धधूमादिधीरनुमितिहेतुः । न त्वन्तरा व्याप्तिस्मृतिः कल्प्यते । गौरवादिति । तथा शक्तिसंस्कारसहिता पदधीः पदार्थानुभवहेतुः । न त्वन्तरार्थस्मृतिः कल्प्यते । तथा च नोक्तदोष इति चेन्न । तथाप्युक्तयुक्तिभिरन्वयघटितार्थस्यैव पदशक्यत्वात् । इदं तु बोध्यं—अभिहितान्वयमतमेव युक्तम् । घटत्वकर्मतां शृणोमीति अनुभवस्यानपलापात् । यच्तु समानार्थकपदत्रयस्थले अन्विताभिधानमते पदेषु प्रत्येकमर्थे इतरान्वये च शक्तिकल्पनात् षट् शक्तयः कल्प्याः । अभिहितान्वयमते तु पदेषु प्रत्येकमेकैका शक्तिरर्थे च एकैव वाक्यार्थानुभावकशक्तिरिति शक्तिचतुष्टयं ममेति न्यायरत्नमालोक्तं, तन्न । मतद्वयेऽप्युक्तस्थले शक्तिद्वयस्यैव कल्पनात् तृणाग्निमणिष्विव वह्निशक्तेः अभिहितान्वयमते पदत्रयेऽप्यर्थानुभावकशक्तेरेकस्या एव युक्ततत्वात् । अन्विताभिधानमतेऽप्यन्वितार्थानुभवरूपकार्यस्यैक्येनार्थेऽन्वये च पृथक्छक्तेरयुक्ततत्वात् । अर्थानुभवे अभिहितान्वयमत इवार्थस्मृतौ अन्वितार्थानुभवशक्तेरान्विताभिधानमतेऽप्यावश्यकत्वात् । न हि फलाशक्तो व्यापारः केनापि स्वीक्रियते । न चैवमुक्तरीत्या साक्षादेवान्वितानुभवहेतुत्वस्य पदज्ञाने सम्भवात् स्मृत्यस्वीकारेणैकैव शक्तिरन्विताभिधानमत इति लाघवमुक्तस्थल इति वाच्यम् । पदधीवाक्यार्थानुभवयोर्मध्ये अर्थज्ञानस्यानुभाविकस्यापलापासम्भवात् । अर्थस्मृतिशक्तिस्तु पदज्ञानेऽभिहितान्वयमतेऽपि कल्पैव । परं तु अर्थानुभवे तादृशस्मृतेर्नोपयोग इति पञ्चपादिकादृष्टान्तेनोक्तम् । तस्मादन्वयघटितार्थस्यैव पदशक्यत्वमिति सिद्धम् । अथ पदार्थद्वयान्वितविषयतावच्छिन्नशाब्दत्वं गङ्गामित्यादिविभक्त्यन्तपदज्ञानस्यैव जन्यतावच्छेदकम् । गङ्गेत्यादिपदज्ञानजन्यता तु अन्वयविषयतामात्रावच्छिन्नशाब्दत्वेनैवास्ताम् । न तु गङ्गात्वान्वयविषयतावच्छिन्नशाब्दत्वेन । गौरवात् । अन्वयविषयतात्वं च सांसर्गिकविषयतात्वमिति चेन्न । पदसामान्यज्ञानरूपसामान्यकारणस्योक्तशाब्दत्वावच्छिन्नहेतुत्वेऽपि गङ्गापदज्ञानरूपविशेषकारणस्य गङ्गात्वविषयतावच्छिन्नसंसर्गतावच्छिन्नशाब्दत्वावच्छिन्नं तादृशसंसर्गतानिरूपितमुख्यविषयतावच्छिन्नशाब्दत्वावच्छिन्नं वा प्रत्येव हेतुत्वौचित्यात् । घटत्वाद्यन्वयविषयतावच्छिन्नशाब्दत्वस्य गङ्गापदज्ञानाप्रयुक्तत्वेनान्वयविषयतामात्रस्य तत्कार्यतावच्छेदके प्रवेशनस्याप्युक्तत्वात् । अत एव गङ्गात्वान्वयविषयता-

मात्रस्य प्रत्यक्षादिसाधारणस्य न तत्कार्यतावच्छेदकत्वम् । किं तु तदवच्छिन्न-शाब्दत्वस्य । कर्मतायां गङ्गात्वं शाब्दयामीति प्रत्ययात् गङ्गात्वविषयतानिरूपित-संसर्गतानिरूपितकर्मताविषयत्वादिकमेव शाब्दत्वावच्छेदकम् । अतस्तादृशेत्याद्यु-क्तम् । पदज्ञानतज्जन्यस्मृत्योर्नाशेऽपि गङ्गात्वकर्मताविशिष्टं दर्शनमिति महावाक्यार्थ बोधस्य उत्पत्तेस्तत्र व्यभिचारात् मुख्येत्युक्तम् । तादृशबोधीयगङ्गात्वकर्मतावि-षयताशाब्दत्वावच्छेदिका अवान्तरवाक्यार्थबोधे जातेऽपि भ्रमत्वशङ्कया तादृशबो-धस्य तादृशकर्मतायामज्ञानानाशकत्वेन तदज्ञानसत्त्वेन तादृशविषयताप्रयोजकसा-मग्रीसत्त्वात् । एतेन घटत्वीयकर्मताविषयतावच्छिन्नशाब्दत्ववति बोधे तत्समानवि-षयकाज्ञानस्य हेतुत्वात् । अवान्तरबोधे जाते जायमाने महावाक्यार्थबोधे तादृशशाब्द-त्वाभावेनैव तद्वारणात् अमुख्येति व्यर्थमित्यपास्तम् । तादृशविशिष्टविषयताऽघटकवि-षयतानिरूपकत्वशून्येति मुख्यपदार्थः । गङ्गात्वविषयतायामपि तादृशविशेषणं देयम् । अन्यथा गङ्गामिति वाक्यजबोधोत्तरं शोभनगङ्गामिति वाक्यजशोभनगङ्गात्वकर्मताबो-धेऽनुपपत्तेः । न च तादृशहेतुत्वकल्पनं व्यर्थम् । तादृशविषयताशालिशाब्दत्वावच्छि-न्नाभावस्तु गङ्गादिपदज्ञानाभावादेव । न तु गङ्गेतिपदज्ञानाभावात् अम्गङ्गेतिपदज्ञान-काले तथा वक्तुमशक्यत्वादिति वाच्यम् । तथापि गङ्गापदज्ञानसामान्याभावकालीन-स्योक्तशाब्दत्वावच्छिन्नाभावाधिकरणत्वस्य गङ्गापदज्ञानस्य सामान्याभावेनैव प्रयुक्तस्य वाच्यत्वात् अधिकरणताविशेषाणामेव कारणाभावप्रयुक्तत्वात् । अत एव काष्ठस्य दाहाभाववत्त्वं मणिप्रयुक्तम् । न तु जलस्येति धीः । अस्तु वा वि-भक्त्यन्तगङ्गापदज्ञानत्वेनैव तादृशशाब्दबोधहेतुत्वम् । अथ गङ्गात्वप्रकारतैव तादृशकार्यतावच्छेदके निवेश्यताम् । न तु तद्विषयता । व्यापकरूपत्वेनान्यथा सिद्धत्वादिति चेन्न । गङ्गास्तीति वाक्याद्गङ्गात्वविशेष्यकशाब्दोत्पत्तेः तदसङ्ग-हापत्तेः । यद्यपि गङ्गात्वत्वादेरुपस्थापकपदाभावात् । धर्मितावच्छेदकत्वेनाभा-नात् निर्द्धर्मितावच्छेदकशाब्दास्वीकाराच्च गङ्गात्वं शुद्धं न विशेष्यं, तथाप्ये-कत्वस्य सामानाधिकरण्यसम्बन्धेन गङ्गात्वे विशेषणत्वेनास्तित्वांशे धर्मिताव-च्छेदकत्वसम्भवः विशिष्टवैशिष्ट्यबुद्धौ विशेष्यतावच्छेदकप्रकारकधियो हेतु-त्वास्वीकारेण प्रथमत एव एकमस्तीति शाब्दधीसम्भवात् । न चाभिहितान्वय-मते नामार्थक्रियान्वयबोधे नामार्थविभक्त्यर्थयोरवान्तरबोधस्य हेतुत्वात्तं विना

तदुत्पत्तिर्न सम्भवतीति वाच्यम् । 'श्वेतोऽश्वो धावती'त्याकारकवाक्याजन्यक्रियाबोधानुरोधेन क्रियान्वयबोधमात्रे क्रियान्वय्यर्थज्ञानमात्रस्यैव हेतुत्वेनावान्तरशाब्दबोधस्याहेतुत्वात् । अर्थज्ञानमात्रं तु स्मृतिरनुभवो वा शब्दादन्यतो वा जायत इत्युक्तम् । न च गङ्गामित्यादौ कर्मत्वादेः जातिवदखण्डत्वेन विशेष्यत्वासम्भव इति वाच्यम् । शक्तिविशेषरूपकर्मत्वादीनामखण्डत्वेऽपि सामानाधिकरण्यसम्बन्धेन सङ्ख्याविशिष्टरूपेण विशेष्यत्वसम्भवात् । परमार्थतस्तु शाब्दबोधे एकपदार्थांशे अपरपदार्थविशेष्यतायाः किञ्चिद्धर्मावच्छिन्नत्वनियमेऽपि शाब्दबोधीयविशेष्यतामात्रस्य नोक्तनियमः । आढ्यादिपदजन्यधनपदादिबोधे धनत्वाद्यंशे विशेष्यतायां व्यभिचारात् । तथा चानन्वितयोर्गङ्गात्वनिष्ठानवच्छिन्नविषयतैकत्वनिष्ठैकत्वत्वावच्छिन्नविषयताशालिसमूहालम्बनशाब्दधीसम्भवेन क्रियान्वये तज्जन्यत्वमपि सम्भवत्येव । यत्तु एकत्वत्वजातेरेव शक्यतया तादृशशाब्दबोधे भानसम्भवेन सङ्ख्याया न विशेष्यता । किं तु तन्निष्ठजातौ निर्विकल्पकविषयतेति, तत्तुच्छम् । भावनायां सङ्ख्याविशिष्टकरणत्वादिबोधे विशेषणीभूतसङ्ख्याया एव द्रव्यपरिच्छेदद्वारा करणत्वेनान्वयस्य आनुभाविकत्वात् सङ्ख्याया एव शक्यत्वेनोक्तजातिमात्रस्याबोधात् । अथ नीलादिवदेकत्वादिकमेकमखण्डमेव शक्यमित्युच्येत, तथापि प्रकृते न कोऽपि दोषः । परे तु सङ्ख्यादिविशिष्टं कारकं नामार्थे विशेष्यम् । कारकविभक्तेरभावे सङ्ख्यैव विशेष्येत्याहुः, तदसत् । प्रधानवाचकनाम्नो मन्त्रघटकतया प्रकृतक्रियान्वितयोपयोगार्थं गुणीभूतसङ्ख्यावाचकस्य बहुवचनस्यैकत्वलक्षणादिकल्पनाया 'अदितिः पाशान् प्रमुमोक्त्वेता' नितिमन्त्रादौ पाशाधिकरणोक्तायाविरोधापत्तेः । न च प्रथमबोधे संख्याविशेष्यत्वेऽपि पार्ष्ठिकबोधे संख्याया गुणत्वेन भानान्नोक्तविरोध इति वाच्यम् । नामार्थसंख्ययोरन्वयबोधस्य जातत्वेनाकांक्षितोक्तबोधस्य व्यर्थत्वात् । अरुणैकहायन्योस्तु परिच्छेदकाकांक्षासत्त्वादेवोक्तबोधस्वीकारात् । अन्ये तु गङ्गादिव्यतिरिक्तस्थले संख्या विशेष्यतया भाति । अस्तित्वाश्रयत्वं तु व्यक्तौ विशेषणम् । न तु विशेष्यम् । क्रियात्वेन भावनाया एव कारकेषु विशेष्यत्वात् । अत एवोक्तं 'जातेरस्तित्वनास्तित्वे न हि कश्चिद्विवक्षति । नित्यत्वात् लक्षणीयाया व्यक्तेस्ते हि विशेषणे ॥' इति । अत एव घटमानये-

त्यादौ कर्मत्वादौ व्यक्तेरेवान्वयः । तथा च गङ्गापदं नोक्तबोधे कारणम् । लाक्षणिकत्वात् । उक्तबोधीयव्यक्तिविषयतायां गङ्गात्वान्वयविषयतानिरूपितत्वेऽपि शाब्दत्वानवच्छेदकत्वेन गङ्गापदधीकार्यतानवच्छेदकत्वात् व्यक्तिगङ्गात्वयोरन्वयस्य पदार्थघटकत्वेन उक्तविषयतायाश्शाब्दत्वानवच्छेदकत्वात् पदार्थयोरन्वयविषयतायां एव शाब्दत्वावच्छेदकत्वादित्याहुः । तदप्यसत् । तावतापि नाम्नो मुख्यार्थबोधकत्वानुपपादनात् जातेरेव शक्यतायां आकृत्यधिकरणे स्थितत्वात् व्यक्तिपरिच्छेदद्वारा जातेरेव करणत्वाद्यन्वयधीसम्भवाच्च । प्रकृते जातेरेवान्वयसम्भवे तत्त्यागस्यायुक्तत्वात् विद्यमानव्यक्त्यवच्छेदेनास्तित्वस्य कालसम्बन्धरूपस्य नष्टव्यक्त्यवच्छेदेन नास्तित्वस्य च जातौ विवक्षासम्भवाच्च । एवमन्विताभिधानपक्षेऽपि गङ्गात्वान्वितविषयतानिरूपितान्वयविषयतानिरूपितविषयतावच्छिन्नशाब्दत्वेनैव गङ्गादिपदधीजन्यता । एतेन उक्तपक्षे साकांक्षयोग्यासन्नपदान्तरार्थान्वितघटत्वादिकं घटादिपदशक्यम् । तथा च घटेन जलमानयेत्यादौ आनयनकरणीभूतं घटत्वं घटपदेनानुभाव्यते, घटत्वकरणकमानयनमानयतिना, इति वाक्यार्थभेदात् वाक्यभेदस्स्यात् । न च घटपदेनापि घटत्वकरणकमानयनमनुभाव्यत इति वाच्यम् । तदा घटपदस्य नानार्थत्वापत्तिः । आनयनस्येव घटत्वस्यापि तदनुभाव्यत्वेन शक्यभेदादित्यादिशास्त्रदीपिकाद्युक्तिरपास्ता । घटत्वान्विते घटपदस्य करणत्वान्विते तृतीयाविभक्तेरन्वितानयने आनयतेः कार्यत्वान्विते लौकिकलिङादिपदस्यान्वितकार्ये वैदिकलिङादिपदस्यानुभावकतया तेषामेकवाक्यतया घटत्वकरणकानयनं कार्यमित्यनुभवोत्पत्तेः । अथैवमप्यभिहितान्वयपक्षे घटत्वान्वितस्यान्वितकरणत्वस्य च पृथग्भानेन घटत्वान्वितं करणत्वमित्येव ज्ञानस्याकारो न स्यात् । अन्विताभिधानपक्षे च घटत्वान्वितस्य करणत्वान्वितस्य पृथग्भानेन घटत्वान्वितकरणत्वान्वितमानयनमित्येवाकारो न स्यादिति चेन्न । 'प्रकृतिप्रत्ययौ सहार्थं ब्रूत'इति निरुक्तकारानुशासनेनोक्तपृथग्भानाभावेनोक्ताकारानियमस्थितेः । उक्तपृथग्भाने हि सति प्रकृतिप्रत्ययोरेकवाचकत्वरूपस्य सङ्घवाचकत्वस्य भङ्गापत्तिः । 'घटत्वान्वितं करणत्वमि'ति बोधे पदाभ्यां जनिते तु पदयोस्तद्वाचकत्वमुपपद्यते । एकस्यैवान्वयस्य भानादुभयकार्यतावच्छेदकविशिष्टस्योत्पत्तिः । एवं द्वितीयपक्षेऽपि घटत्वान्वितविषयतानिरूपितान्वयविषयताया एव करणत्वा-

न्वितविषयतानिरूपितान्वयविषयतात्वेन पदद्वयकार्यतावच्छेदकविशिष्टस्योत्पत्ति-निर्वाहः । यद्यप्याद्यपक्षे प्रकृतिप्रत्यययोः घटत्वकर्मत्वाद्यंशे न सहवाचकत्वं-तथापि न क्षतिः । तदंशविषयतायाः स्मृतित्वावच्छेदकत्वेन शाब्दत्वानवच्छेदकत्वात् तदंशे वाचकत्वस्यैवाभावेनान्वितांश एव सहवाचकत्वसत्वात् । एवं द्वितीयपक्षेऽप्यन्वयांश एव सहवाचकत्वम् । पक्षद्वयेऽपि तदन्यांशो वाच्योपाधिः। न तु वाच्यः । दण्डत्वादिरिव कारणोपाधिः । न तु कारणम् । अत एव घटत्वान्वितयोः शक्ययोर्भेदात् शक्तिभेदापत्तिरित्यपास्तम् । ज्ञाने पदानां शक्ति-शक्यादिन्यायेन शाब्दज्ञानस्यैव पदशक्यत्वाच्च । अत एव गोत्वोपहिता धान-कर्मविशेषा एव धेनुपदशक्याः । न तु गोत्वमिति प्राभाकराः । ननु, अन्विताभिधा-नपक्षे 'गङ्गात्वकर्मतां शृणोमी'ति प्रत्ययानुपपत्तिः । गङ्गात्वान्विताऽन्वितविषयता-या एव शाब्दत्वावच्छेदकत्वादिति चेन्न । तत्पक्षे 'गङ्गात्वकर्मतां स्मरामी'ति प्रत्य-यस्यैव स्वीकारेण गङ्गात्वकर्मताविषयतायाः शाब्दत्वानवच्छेदकत्वेन स्मृतित्वाव-च्छेदकत्वस्यैव स्वीकारात् । तत्पक्षे क्रियाकारकान्वयरूपवाक्यार्थस्यैव शाब्दत्वा-त् । अन्यथा 'घटत्वीया कर्मते'ति शाब्दधीस्वीकारे शाब्दधीमात्रस्य कार्यत्वविष-यत्वनियमस्य तत्पक्षे स्वीकृतस्य भङ्गापत्तेः । एवं च तस्याः ज्ञाननिष्ठविषयतात्वादपि प्रमाणाप्रयुक्तत्वेन न गङ्गादिपदज्ञानकार्यतावच्छेदकत्वमिति दिक् । वेदान्तदर्शने तु गङ्गादिपदघटितवाक्यतात्पर्यविषयविषयकशाब्दत्वेनैवोक्तकार्यत्वस्वीकारेणेयं गङ्गे-ति वाक्यात् अखण्डार्थकशाब्दबुद्ध्युपपत्तिः । अत एव तत्त्वमस्यादिवाक्येऽपि नानु-पपत्तिः । तदयं निष्कर्षः । अभिहितान्वयपक्षे अन्विताभिधानपक्षे च लाक्षणिक-सर्वपदप्रयुक्तवाक्यस्थले पदानामनुभावकत्वाभावेऽपि पदजन्यशक्योपस्थितिजन्यल-क्ष्योपस्थितेः वाक्यार्थानुभावकत्वम् । न चैवं प्रत्ययप्रकृतिशब्दयोः पुनर्नित्यमन्वित-विशेषे निमित्तते'ति संक्षेपशारीरकोक्तिविरोध इति वाच्यम् । तथा हि प्रकृतिप्रत्यय-योरन्वितविषयकशाब्दधीप्रयोजकत्वमेवोक्तम् । प्रकृतिप्रत्ययोरेकैकं न स्वार्थमनुभा-वयतिअत एवैकैकमात्राभिहितार्थानुभवो न प्रकृत्यर्थान्वितप्रत्ययार्थान्वयानुभवहेतुः । किं तु लाक्षणिकप्रकृतिप्रत्ययाभ्यां मिलिताभ्यां स्वार्थस्मृतिद्वारा स्वार्थयोरन्वयानु-भवो जन्यते । लाक्षणिकसर्वपदस्थलेऽपि वाक्यार्थबोधः परम्परया प्रकृतिप्र-त्ययाभ्यां प्रयुक्त इत्यत्रैव तस्यास्तात्पर्यात् । अत एव प्रत्ययप्रकृतिशब्दतो

बहिर्युज्यतेऽभिहितसङ्गतिश्च न इति पूर्वार्धे तथोक्तम् । अथ वा लाक्षणिकस्थले मुख्यार्थान्वये तात्पर्याभावज्ञानद्वारा लाक्षणिकार्थतात्पर्यज्ञानाय मुख्यार्थान्वयानुभवस्य तात्पर्याविषयस्यापि स्वीकारात् । उक्तसंक्षेपशारीरकोक्तिः तमादायैव सङ्गमनीया। उक्तं च तत्त्वमस्यादिवाक्यस्थले संक्षेपशारीरक एव—'सामानाधिकरण्यमत्र भवति प्राथम्यभागन्वयः पश्चादेव विशेषणेतरतया पश्चाद्विरोधोद्भवः । उत्पन्ने च विरोध एकरसके वस्तुन्यखण्डार्थधीः सर्वैरेव ततः पदैरयमिह ज्ञेयः क्रमस्सूरिभिः ॥' इति सामानाधिकरण्यं पदयोस्समभिव्याहारधीः । अन्वयः तात्पर्यविषयवाक्यार्थधीप्रयोजकः । विशेषणेतरतया विशेषणविशेष्यताशालिनी वाक्यार्थधीरित्यनुषज्यते । विरोधोद्भवः उक्तज्ञाने तात्पर्याभावधीद्वारा लक्ष्यार्थघटितवाक्यार्थज्ञाने तात्पर्यधीरन्वयधीरित्यनुषज्यते ।एवं च अभिहितार्थानुभवस्यापि सर्वपदलाक्षणिकतास्थले वाक्यार्थानुभवहेतुता वक्तुं शक्यते । अत एवाद्वैतसिद्धौ तत्त्वमस्यादिवाक्यस्थले पदाभिहितपदार्थानां वाक्यार्थानुभावकत्वमित्युक्तम् । लाक्षणिकस्थले मुख्यार्थान्वयानुभवस्यानावश्यकत्वे तु तदसङ्गतम् । पदार्थस्य पदाभिहितत्वाभावात् । पदजन्यानुभवविषयत्वं हि पदाभिहितत्वम् । न तु पदजन्यधीविषयत्वम् । प्रकृत्यर्थमात्रस्यापि पदाभिहितत्वापत्त्या 'प्रत्ययप्रकृतिशब्दतो बहिरित्यादिसंक्षेपशारीरकविरोधात् । ननु, तार्किकादिमतेऽपि प्रकृत्यर्थान्वितप्रत्ययार्थशाब्दानुभवस्य क्रियाकारकान्वयबोधे हेतुत्वम् । गङ्गादिपदज्ञानस्य गङ्गादिपदार्थान्वयविषयताकशाब्दसामान्यहेतुत्वं च स्वीक्रियते । तथा च अभिहितान्वयवादात्तन्मतस्याविशेष इति चेन्न । तार्किकादिमते गङ्गादिपदज्ञानस्य स्वप्रयोज्यगङ्गापदादिपदार्थधीद्वारा तदर्थविषयकशाब्दानुभवहेतुत्वस्वीकारेण स्मृतिरूपोक्तधीद्वारा प्रकृत्यर्थविशेषितप्रत्ययार्थशाब्दधीरूपोक्तानुभवस्य तादृशानुभवद्वारा क्रियाकारकान्वयधीरूपोक्तानुभवस्य च गङ्गादिपदज्ञानात् उत्पत्तिस्वीकारात् । अभिहितान्वयवादे च स्मृतिरूपोक्तार्थधीद्वारा उक्तप्रत्ययार्थशाब्दानुभव एव हेतुत्वस्योक्तपदज्ञाने स्वीकारेण क्रियाकारकान्वयानुभवस्योक्तपदज्ञानादुत्पत्त्यस्वीकारात् गङ्गापदार्थान्वयविषयतायाश्चोक्तपदज्ञानजन्यतावच्छेदकत्वस्वीकाराच्च द्वयोर्मतयोर्विशेषात् । न ह्यभिहितान्वयवादे क्रियाकारकान्वयानुभवस्य पदज्ञानकरणकत्वं स्वीक्रियते ।

ननु , तर्हि वेदान्तवाक्येभ्य एव पदार्थोपस्थितौ वाक्यार्थबोधे च सति तस्य स्वत एव प्रामाण्यात्तेनाज्ञानतत्कार्यनिवृत्त्युपपत्तौ किं विचारेणेति चेत्सत्यम् । वेदान्ता यद्यपि स्वतःप्रामाण्यान्निर्विकल्पकमात्मसा-

पदज्ञानकरणकानुभवस्यैव तत्करणतास्वीकारात् पदज्ञानस्य हि स्वप्रयोज्यधीद्वारा स्वार्थशाब्दधीनिर्कार्या। प्रयोज्यत्वस्य स्मृतावन्तरवाक्यार्थधीबोधे चानुगतस्येकस्याभावात् । स्मृतौ हि कार्यत्वं स्मृतित्वेन । शाब्दबोधे च तत्त्वेन । तथा च स्वजन्यस्मृतिद्वारावान्तरवाक्यार्थबोधे पदज्ञानस्य हेतुत्वम् । तद्वारा महावाक्यार्थबोधे तु हेतुत्वान्तरम् । तथा च द्वितीये मानाभावात् महावाक्यार्थधीरवान्तवाक्यार्थज्ञानेनैव जन्यते । न तु पदज्ञानेनेति भट्टमते स्वीक्रियते । न वा तार्किकादिमते अन्वयविषयताघटितरूपेण पदज्ञानस्य कार्यतायां मानमस्ति । ज्ञातार्थविषयताया अपि प्रमाणप्रयुक्तत्वस्वीकारेणोपदर्शितमानासम्भवात् । न हि तन्मते प्रमाणानामज्ञातज्ञापकत्वनियमः । किं च तार्किकादिमते प्रकृत्यर्थविशिष्टप्रत्ययार्थशाब्दबोधोत्तरमेव क्रियाकारकान्वयानुभव इति नियमो न स्वीक्रियते । 'खले कपोत' न्यायेन युगपदेव तादृशानुभवस्यापि स्वीकारात् । वाक्यार्थकर्मके कुलकादौ चावान्तरवाक्यार्थानुभवपूर्वकमहावाक्यार्थस्वीकारेऽपि महावाक्यार्थानुभवसामान्यस्य तादृशनियमास्वीकारादभिहितान्वयमते च तादृशनियमस्वीकारात् स्फुट एवोक्तमतयोर्विशेषः । अन्विताभिधानवादात्तु तार्किकादिमते स्फुटतरो विशेषः । तार्किकैः प्रकृत्यर्थविशिष्टप्रत्ययार्थमात्रस्य शाब्दानुभवस्वीकारात् अन्विताभिधानमते तदस्वीकारादित्यास्तां विस्तरः । ननु, प्रमात्वेन भासमानज्ञानादेवाज्ञाननिवृत्तिरिति वाक्यजज्ञानीयप्रमात्वभानार्थं शास्त्रमपेक्ष्यताम् । तत्राह—**तस्येति** । स्वत एव साक्षिमात्रभास्यादेव । प्रामाण्यात् प्रमात्वात् । तेनाज्ञाननिवृत्त्युपपत्ताविति्त्र हेतुरयम् । विचारेण विचारशास्त्रेण । श्रीकृष्णकृपाकटाक्षैः नितरां शुद्धचित्तस्य न विचारशास्त्रापेक्षेत्याशयेनाह—**सत्यमिति** । तथाप्यतथाभूतान्मन्दाधिकारिणः प्रति विचारशास्त्रमावश्यकमित्याशयेनाह—**वेदान्ता यद्यपीति** । स्वतः प्रामाण्यात् साक्षिमात्रभास्यं प्रमात्वमुत्सर्गतः प्राप्य्य जनयन्त्युत्पादयन्ति । संशयप्रतिबन्धेन तात्पर्यसंशयरूपदोषनियतप्रमात्वावरणप्रयुक्तेनापवादकेन प्रमात्वसंश-

साक्षात्कारं जनयन्ति, तथापि तस्य मन्दबुद्धीनां वादिविप्रतिपत्तिजसंशय-प्रतिबन्धेन अज्ञाननाशकत्वासामर्थ्यात् । विचारेण तु संशयनिवृत्तौ निरपवादमज्ञाननिवृत्तिरिति संशयबीजभूतवादिविप्रतिपत्तिनिरासार्थं विचार आरभ्यते । तत्र त्वम्पदार्थे प्रथमं विप्रतिपत्तयः प्रदर्श्यन्ते । तत्पदार्थस्य शास्त्रतात्पर्यविषयतयाभ्यर्हितत्वेऽपि त्वम्पदार्थस्य शास्त्रफलमोक्षभागितया ततोऽप्यभ्यर्हितत्वात् । तत्र देहाकारेण परिणतानि चत्वारि भूतान्येव त्वम्पदार्थ इति चार्वाकाः । चक्षुरादीनि प्रत्येकमित्यपरे । मिलितानीत्यन्ये ।

यरूपेणाज्ञाननिवृत्तिविरोधिना । निरपवादं उत्सर्गसिद्धस्वतःप्रमात्वस्यापवादकोक्तसंशयशून्यम् । इदं च निवृत्तिक्रियाविशेषणम् । तथा चौत्सर्गिकस्वतःप्रमात्वस्य दोषसमवधाननियतेन प्रमात्वावरणेनापवादात् प्रमात्वसंशयोदयेनानिश्चितप्रमात्वकस्य साक्षात्कारस्य नाविद्यानिवर्तकत्वम् । विचारे सति तु निश्चितप्रमात्वसाक्षात्कारस्याविद्यानिवर्तकतेति भावः । त्वम्पदार्थे मोक्षवादिभिः मोक्षभागित्वेनाभिमते । शास्त्रतात्पर्येति । जीवस्वरूपस्य शुद्धस्यापि सुषुप्त्यादिसिद्धत्वेन ज्ञातत्वात् ब्रह्मस्वरूपस्याज्ञातत्वेन सत्यादिवाक्येन शुद्धरूपेण ज्ञापयित्वा महावाक्येन जीवस्वरूपानुवादेन ब्रह्मस्वरूपस्य तदभेदेन विधानात् सत्यादिवाक्यविशिष्टमहावाक्यस्य विधायकत्वान्महावाक्यस्यैव द्वारीभूतशुद्धजीवोपस्थितिहेतुत्वम्पदत्वेन शुद्धजीवानुवादकत्वात् शुद्धब्रह्मण्येव शास्त्रतात्पर्यमिति ज्ञायते । महावाक्यार्थनिश्चयपूर्वं तत्त्वम्पदलक्ष्यस्वरूपयोर्भेदनिश्चयात्त्वम्पदार्थयोर्जीवस्वरूपस्यैव ब्रह्मरूपाभिन्नतया ज्ञायमानस्य मोक्षभागित्वेन स्वीकारात् जीवोऽभ्यर्हितः । शास्त्रतात्पर्यविषयापेक्षया हि शास्त्राधीनप्रतिपत्तिफलं मुख्यम् । तदर्थं तस्य ज्ञेयत्वात् । फलापेक्षयापि फलकामो मुख्यः । तस्य तद्गतसाक्षात्काररूपभोगजनकत्वादिति भावः । अभ्यर्हितत्वादिति । प्रथमश्लोके आचार्यैः पूजितत्वादित्यर्थः । तेन आचार्यैः मोक्षभागित्वेन प्रथमतः जीवस्वरूपस्य विवेचितत्वात् तत्रास्माभिरपि प्रथमं विप्रतिपत्तिरुच्यते । उच्यत इत्यर्थलाभात् आद्यश्लोकस्य प्राथम्येऽपि हेतुलाभः । देहेत्यादि । भूतानि जडस्वभावानि, तथाऽपि मदिराकारपरिणतस्यान्नस्य मादकत्ववत् देहाकारपरिणतस्य भूतचतुष्टयस्य ज्ञातृत्वं 'स्थूलोऽहं जानामि' इति प्रत्ययादिति भावः । चार्वाकैकदेशिनां मतान्याह—चक्षुरादीनीति । तत्र मते

मन इत्येके । प्राण इत्यपरे । क्षणिकं विज्ञानमिति सुगताः । शून्यमात्मा-
देहे ज्ञातृत्वाभावात् पश्यामीत्यादिप्रतीतेश्चेन्द्रियमात्मा । तत्र चक्षुः सर्वापेक्षया अधिकसुखहेतुत्वेन श्रेष्ठत्वात् तदेव ज्ञातृ । तदभावे श्रोत्रमेव । अन्यापेक्षयाधिकसुखहेतुत्वात् । तयोरभावे त्वगिन्द्रियम् । तद्धि यद्यपि रात्रिन्दिवं बहुधा विषयग्राहि चक्षुश्श्रोत्रापेक्षया निकृष्टं, तथापि रसनापेक्षया बहुधा विषयग्राहित्वेन श्रेष्ठम् । तदभावे रसनम् । प्रतिदिनमावश्यककार्यत्वेन घ्राणापेक्षया श्रेष्ठत्वात् । तदभावे घ्राणम् । **मिलितानीति** । यावन्ति इन्द्रियाणि एकशरीरे मरणपर्यन्तं तिष्ठन्ति, तावन्तीत्यर्थः । 'पश्यामी'त्यादिप्रत्ययेभ्यः कस्यचिच्चक्षुषः अधिकसुखम् अधिकविषयग्राहित्वमिव कस्यचिच्छ्रोत्रादिनैव तदुभयमिति विनिगमकाभावात् कस्य केनेन्द्रियेण तदुभयमिति परेण ज्ञातुमशक्यत्वाच्च । अन्यानीन्द्रियाणि आलोचनात्मकनिर्विकल्पकसाधनत्वात् नात्मा । मनस्तु सविकल्पकसाधनत्वादन्येन्द्रियप्रवृत्तिमूलसङ्कल्पादिमत्त्वात् श्वेतद्वीपवासिनामन्येन्द्रियाभावेऽपि सत्त्वात् आत्मेति केचित् । सर्वदा प्राणस्यैकरूपत्वादमनस्कानामपि योग्यादीनां प्राणसत्त्वात् प्राण एवात्मेत्यन्ये । **क्षणिकमिति** । यद्यपि सत्यं सर्वं क्षणिकं, तथापि ज्ञानमेवात्मा । ज्ञानभिन्ने ज्ञातरि मानाभावात् । तत्राहमिति आलयविज्ञानानां पूर्वपूर्वेणैव उत्तरोत्तरं जायते । इन्द्रियादिजन्यं प्रवृत्तिविज्ञानं षड्विधम् । न च क्षणिकस्यात्मनः कालान्तरभाविभोगार्थं प्रवृत्त्यनुपपत्तिरिति वाच्यम् । क्षणिकत्वभावनापरिपाकं विना स्थिरत्वगोचरानादिदृढवासनानुच्छेदात् । उक्तपरिपाके तु मोक्षप्राप्त्या प्रवृत्त्यभाव इष्ट एवेति वादिनः चत्वारः सौगताः । तत्र सर्वाधमः सौत्रान्तिकः । स हि मन्यते घटपटादयो बहिर्विषयाः सर्वे नित्यानुमेया अपि घटाद्याकारे हि ज्ञाने घटादीनां प्रतिबिम्बमुपलभ्य तत्प्रतिबिम्बं बिम्बपूर्वकम् । प्रतिबिम्बत्वात् मुखादिप्रतिबिम्बवादित्यनुमीयते । तत्र श्रेष्ठो वैभाषिकः । स हि घटादीनां प्रत्यक्षं नापलपति । तयोर्भेदे भ्रमस्थले शुक्त्यादौ रजताद्यभावेऽपि ज्ञानरूपमेव रजतादिकं ज्ञायते । तत्रैव चेदन्त्वादेः संसर्गाध्यासः । ततोऽपि श्रेष्ठो योगाचारः । स हि मन्यते घटादिकं सर्वं ज्ञानमेव । बहिरर्थस्य परमाणुसमूहरूपत्वे स्थौल्यादिबुद्ध्यनुपपत्तिः । अवयवित्वे च आवृतत्वानावृतत्वसकम्पत्वाकम्पत्वनीलत्वानीलत्वादिविरुद्धधर्माध्यासस्य भेदकस्य साधकत्वम् । अतस्तस्य दुर्वचत्वात् ता-

दात्म्यजातीयसम्बन्धस्य घटो द्रव्यमित्यादौ तु कल्पितत्वात् तादात्म्यान्यस्य ज्ञानविषययोः सम्बन्धस्य कल्पने गौरवाच्च घटादिकं ज्ञानात्मकमित्याकारविशेषः । ज्ञानस्य निरंशत्वात् विरुद्धनानाकारत्वानां संशयादिस्थलेऽनुपपत्तेर्न वास्तवः । एवं सर्वबौद्धमते प्रमाणप्रमातारोऽपि ज्ञानस्य कल्पिताकाराः । प्रमेयप्रकाशनव्यवहारोपयोगकत्वविशिष्टज्ञानरूपा प्रमितिः, प्रमितिव्यवहारानुकूला शक्तिः प्रमाणं, तदाश्रयः प्रमाता । पूर्वपूर्वज्ञानादेवोत्तरोत्तरज्ञानमुत्पद्यते । ज्ञानं च सर्वं स्वविषयकम् । न तु ज्ञानान्तरविषयः । अनवस्थाद्यापत्तेः । विज्ञानवादिमते घटादेः ज्ञानाकारस्यैव विषयत्वेन ज्ञानानां क्षणिकानां भिन्नकालीनत्वेन विषयविषयिभावसम्बन्धाभावात् । त्रयाणामेषां तु विशुद्धक्षणिकविज्ञानभावनया तद्धारारूप ईशप्रवेशो मोक्षः । उक्तभावनारूपपरिज्ञानस्य जीवसन्तानस्थस्य यस्मिन् विशुद्धविज्ञाने हेतुत्वं, तस्येश्वरसन्तानस्थेन तत्कालीनेन क्षणिकेन विज्ञानेन लाघवादैक्यस्वीकारेण मुक्तजीवेश्वरसन्तानयोरैक्यसम्पत्त्या जीवेश्वरसन्तानप्रवेश उच्यते । संसारिनानाजीवस्थानां तु विज्ञानानां नैकसन्तानप्रविष्टतापत्तिः । मिथो विलक्षणत्वात् । तत्सन्तानानां भिन्नकालगतसुषुप्तिपूर्वापरावधिकत्वेन तद्गतज्ञानानां कार्यकारणभावानापन्नत्वाच्च । सुषुप्तिर्हि विज्ञानसन्तानानां पूर्वापरावधिः । उक्तं हि पञ्चपाद्यां बौद्धमतविवेचने—'सुषुप्तौ विज्ञानलेशस्याप्यभावात् अकस्मादेव जागरेऽहमिति धीदर्शना' दिति । बौद्धाधिकारादौ तु सुषुप्तावप्यालयविज्ञानं प्रवृत्तिविज्ञानरहितं पक्षान्तरमालम्ब्य स्वीकृतम् । ततोऽपि श्रेष्ठो माध्यमिकः । स हि मन्यते विज्ञानरूपमपि सर्वं मिथ्यैव । क्षणिकभावनया शून्यभावनया च आत्महानरूपो मोक्ष इति । तदेतत् विज्ञानरूपात्ममिथ्यात्वमतमेव शून्यमात्मेत्यनेनोक्तम् । न हि शून्यं नाम किञ्चित्तत्त्वं तेनोच्यते । अत एव तत्त्वस्य कस्यचित्त्वयानङ्गीकारात् तत्त्वज्ञानं विना सर्वबाधासम्भवेन सर्वमिथ्यात्वासिद्धिरिति तन्मतं दूषितं भामत्याम् । सर्वं मिथ्येति माध्यमिकमतमिति खण्डनकारैरप्युक्तम् । दिगम्बरा आर्हताः । अर्हन्नाम नित्यसिद्धः पुरुषः । तत्कृतशास्त्रानुयायित्वात् । ते मन्यन्ते देहसमानपरिमाणः आत्मा महान्तं देहं त्यक्त्वा न्यूनदेहग्रहणे आत्मनो ह्रासेऽपि न नाशः । परिमाणभेदेऽपि द्रव्यस्यानाशात् । आत्मा सन्ततोर्ध्वगतिस्वभावोऽपि कर्मपाशेन बद्ध-

ध्यमिकाः । देहेन्द्रियातिरिक्तो देहपरिमाण इति दिगम्बराः । कर्ता भोक्ता जडो विभुरिति वैशेषिकतार्किकप्राभाकराः । जडो बोधात्मक इति भाट्टाः ।

त्वात् न संसारकाले ऊर्ध्वं गच्छति । कर्मणामत्यन्तोच्छेदे तु स तदोर्ध्वगतिं ल- मतो
भते । सैव मोक्षः, अलौकिकाकाशगमनं वेति । नास्तिकानां षड्दर्शनीमुक्त्वा आस्तिकानां तामाह—कर्तेत्यादि । वैशेषिकादयस्तु आत्मनः सुखदुःखयोगात् तद्धेतुभूतविहितनिषिद्धक्रियाकर्तृत्वमावश्यकम् । स च ज्ञानस्वरूपभिन्नत्वाज्जडः । जानामीति ज्ञानाश्रयत्वेन स भाति न ज्ञानरूपत्वेन । सर्वमूर्तसंयोगित्वरूप-विभुत्वमपि तस्यावश्यकम् । अणुपरिमाणत्वे हि देहव्याप्त्यभावेन युगपज्ज्ञाना-वयवावच्छिन्नसुखादिसमवायित्वं न स्यात् । प्रत्यक्षविषयता च न स्यात् । महत्त्वस्य तस्यां प्रयोजकत्वात् । मध्यमपरिमाणत्वे च सावयव-त्वेन जन्यत्वापत्तेर्जन्यभावत्वेन विनाशित्वापत्त्या परममहत्परिमाणत्व-स्वीकारेण विभुत्वोपपत्तिः । देहादिभिन्नत्वेन आत्मज्ञानपरिपाकात् आ-त्यन्तिककर्मोच्छेदेनात्यन्तिकदुःखोच्छेदरूपमोक्ष इत्याहुः । तादृशमेव भट्टमतम् अत्यन्तदुःखोच्छेदः, नित्यसुखसाक्षात्कारो वा मोक्षः । मोक्षकाले हि चक्षुरादिवि-च्छेदेऽपि मनसो विच्छेदास्वीकारात्, कर्मरूपस्य प्रतिबन्धस्योच्छेदेन नित्य-सुखविशिष्टतयात्मानं मनसैव साक्षात्करोति । आत्मनस्तु अंशद्वयमस्ति । चिदंशे-न द्रष्टृत्वं, 'सोऽहमि'तिप्रत्यभिज्ञाविषयत्वादिकं च । अचिदंशेन ज्ञानसुखादिरू-पपरिणामित्वं, च 'मामहं जानामी'ति ज्ञेयत्वं च, ज्ञानरूपातीन्द्रियव्यापारेण विषयनिष्ठज्ञाततारूपसंवित्कर्तृत्वं चेति विशेषः । भोक्तैवेति । न तु कर्ता । बुद्धिरेव कर्त्री । तदविवेकादात्मन- कर्तृत्वव्यवहारः । सर्वत्रैव हि भ्रमस्थले विषययोः असंसर्गाग्रहात् संसर्गव्यवहारः । धर्मिधर्मज्ञानयोर्भेदाज्ञानात् ज्ञानै-कत्वव्यवहारः । न तु विशिष्टं ज्ञानमस्ति । अन्यथाख्यात्यनभ्युपगमात् असं-सर्गाग्रहाख्यदोषात् । एवं चासंसर्गाग्रहेण न कस्यापि बाध इति लाघवम् । अत एव भ्रमस्थले प्राभाकरोऽप्येवमाहेति भावः । केवलबोधात्मक इति । असंग-स्वप्रकाशकूटस्थचिदात्मकः । अत एव भोक्ता । सुखदुःखाभ्यां विद्यमानाभ्यां बुद्धिधर्माभ्यां अविवेकोपलक्षितानुभवस्वरूपं हि भोक्तृत्वं, तच्च सत्यमेवेति भोक्तैवात्मा । तस्य बुद्धिविवेकज्ञानेन संप्रज्ञातासंप्रज्ञातसमाधिपरिपाकपर्यन्तेनावि-

भोक्तैव केवलबोधात्मक इति साङ्ख्याः पातञ्जलिश्च । अविद्यया कर्तृत्वादिभाक् परमार्थतो निर्धर्मकः परमानन्दबोध एवेत्यौपनिषदाः । एवं सामान्यतोऽहम्प्रत्ययसिद्धे चिदात्मनि वादिविप्रतिपत्तिभिः सन्दिग्धे अहम्प्रत्ययस्यालम्बनविशेषनिर्णयायाह भगवानाचार्यः—

न भूमिर्न तोयं न तेजो न वायुः
न खं नेन्द्रियं वा न तेषां समूहः ।
अनैकान्तिकत्वात्सुषुप्त्येकसिद्ध-
स्तदेकोऽवशिष्टश्शिवः केवलोऽहम् ॥ १ ॥

वेकनिवृत्त्या दुःखात्यन्तोच्छेदो मोक्ष इति विशेषः । सर्वास्तिकमतसारमतमाह—**अविद्ययेत्यादि** । वैशेषिको हि आस्तिकानामधमः । शब्दप्रामाण्यानभ्युपगमेन वेदप्रामाण्यानङ्गीकारात् । वेदप्रामाण्यस्वीकर्तृणां मध्येऽपि तार्किको न्यूनः । 'असङ्गो ह्ययं पुरुष' इत्यादि शुद्धजीवप्रतिपादकश्रुतीनां 'तत्त्वमसी'त्यादि श्रुतीनां च अभेदभावनापरत्वाभ्युपगमात्, 'इदं सर्वं यदयमात्मा सर्वं खल्विदं ब्रह्म ब्रह्मैवेदं सर्वमित्यादिश्रुतीनां ब्रह्मकर्तृकं विश्वमित्यर्थकत्वाभ्युपगमात् । प्राभाकरभट्टयोस्तु वेदान्तदर्शने विद्वेषाभावः । 'इत्याह नास्तिक्यनिराकरिष्णुरात्मास्तितां भाष्यकृदत्र युक्त्या। दृढत्वमेतद्विषयस्तु बोधः प्रयाति वेदान्तनिषेवणेन ॥' इति तर्कचरणीयभट्टकारिकया वेदान्तदर्शनपुरस्कारात् । आत्मा निष्प्रपञ्चब्रह्मैव । तथापि कर्मप्रसङ्गे न तथा वाच्यम् । उक्तं हि कृष्णेन भगवता—'न बुद्धिभेदं जनयेदज्ञानां कर्मसङ्गिनाम् ।' इति प्राभाकरग्रन्थगतोक्तेः । तथापि भट्टैः जडबोधात्मक आत्मेति स्वग्रन्थवाक्येन अविद्योपहितचिद्रूप आत्मेति सूचनात् प्राभाकरेण स्वप्रकाशजन्यबोधाश्रयोऽचिद्रूप आत्मेति स्वग्रन्थे कथनात् प्रपञ्चज्ञानेऽन्यथाख्यातित्वमात्रस्याप्यकथनाच्च प्राभाकरो भट्टापेक्षया न्यूनः । भट्टा अपि साङ्ख्यपातञ्जलापेक्षया न्यूनाः । साङ्ख्यादिवत्स्वग्रन्थे आत्मन असङ्गत्वानुक्तेः । साङ्ख्यस्तु पातञ्जलापेक्षया न्यूनः । 'क्लेशकर्मविपाकाशयैरपरामृष्टः पुरुषविशेष ईश्वर' इति सूत्रेण हि पातञ्जल ईश्वरं स्वीकृतवान् । न साङ्ख्य इत्याशयेन वैशेषिकादिनिर्देशोत्तरं तार्किकादिं निर्दिष्टवानाचार्यः। निर्धर्मकत्वे हेतुमाह—**अविद्यया क-**

अहम् अहम्प्रत्ययालम्बनम् । एकः अद्वितीयः । अवशिष्टः सर्वद्वैतबाधेऽप्यबाधितः । शिवः परमानन्दबोधरूपः । तस्यैव मङ्गलरूपत्वात् । केवलो निर्धर्मकः । तेनाद्वितीयः सर्वप्रमाणाबाध्यः परमानन्दबोध एवाहम्प्रत्ययालम्बनमित्यौपनिषदपक्ष एव श्रेयानित्यर्थः । एतदुपपादनायेतरवादिमतानि निराकरिष्यन् प्रथमं देहात्मवादं निराकरोति—न भूमिर्न तोयं न ते-

---

र्तृत्वादिभागिति । अविद्यात्मककर्तृत्वादिमानित्यर्थः । सन्दिग्धे । 'शरीरादिस्वभावो न वे'ति विशेषतः सन्दिग्धे । **अहमित्यादि** । अहम्प्रत्ययस्य यदालम्बनविशेषो देहाद्यात्मकतया भासमानं स्वरूपं, तस्य भूम्यादिभिन्नतया निर्णयायेत्यर्थः । अहम् अहम्प्रत्ययालम्बनं देहादितादात्म्येन भासमानं स्वरूपम् । **अद्वितीय इति** । 'एके मुख्यान्यकेवला' इति कोशादावेकशब्दस्य नानार्थकत्वोक्तावपि प्रकृते पदान्तरैरेवात्मनः प्रपञ्चापेक्षया मुख्यत्वान्यत्वयोर्लाभात् केवलार्थत्वमेव । केवलत्वं च इतरसम्बन्धशून्यत्वम् । तत्रैकेन घटेन जलमाहरेत्यादौ घटत्वादिसंसृष्टस्य करणत्वादौ तात्पर्यावधारणात् एकपदार्थसङ्कोचकल्पनया घटान्तररूपेतरसम्बन्धशून्यत्वबोधः । प्रकृते तु शुद्धस्वरूप एव तात्पर्यावधारणेन सङ्कोचाभावात् आत्मभिन्नरूपद्वितीयमात्रशून्यत्वं बुध्यत इति भावः । **अवशिष्टपदमुपयुक्तसंसृष्टमनुपयुक्तं बोधयति** । आत्मा ज्ञानेनोच्छेद्यतया नोपयुक्तः । उच्छेद्यप्रपञ्चसंसृष्टश्चेति स एव तत्पदार्थ इत्याशयेनाह—**अवशिष्ट इति** । ननु, शिवपदमिष्टार्थकम् । कथं परमानन्दार्थकमुक्तम् । तत्राह—**तस्येति** । **मङ्गलेति** । इष्टेत्यर्थः । ननु, एकपदं द्वितीयाभावसंसृष्टपरं न वा । आद्ये द्वितीयसामान्याभावसंसर्गव्याघातः । संसर्गस्यैव द्वितीयत्वात् सत्यकामादिश्रुतीनामपि सत्यकामत्वादिसंसृष्टपरत्वापत्तेश्च । द्वितीये एकपदवैयर्थ्यम् । सद्वितीयत्वभ्रमानिवर्तकत्वात् । तत्राह—**केवलो निर्धर्मक इति** । धर्माभावोपलक्षित इत्यर्थः । तथा च पूर्वोक्तरीत्या उपलक्षणतयान्वितामावसम्बन्धज्ञानस्यापि सद्वितीयत्वभ्रमनिवर्तकत्वसम्भवात् एकपदमसंसृष्टपरम् । अत एव 'एकमेवाद्वितीय'मिति श्रुतौ एकपदेन सजातीयस्य अद्वितीयपदेन विजातीयस्य एवकारेण धर्मस्य ब्रह्मणि निषेधः । एवं च एकपदेन सजातीयविजातीययोः केवलपदेन धर्माणां निषेध इति न तयोः पौनरुक्त्यमिति भावः । **औपनिषदपक्षः श्रीमच्छङ्कराचार्यमतम् । श्रेयान् सर्वमतेभ्य उत्कृष्टम् । आत्मनि देहादेः देहादौ** ।

जो न वायुर्न खमिति । अत्राहमिति सर्वत्र नञा सम्बध्यते । या भूमिः सेऽहं न भवामि योऽहं सा भूमिर्न भवतीति च परस्परतादात्म्याभावो द्रष्टव्यः । यद्यपि वादिना प्रत्येकं भूम्यादिरात्मत्वेन नाभ्युपेयते, संघातस्यैव तदभ्युपगमात्, तथापि तन्मते अवयव्यनङ्गीकारात्पञ्चमतत्त्वाभ्युपगमप्रसङ्गेन च सयोगादिसम्बन्धानभ्युपगमात्, संहन्तुरभावाच्च संघातो नोपपद्यते । तथापीत्यादि । तथापि तन्मते संघातो नोपपद्यत इत्यभिप्रेत्य प्रत्येकभूतनिराकरणेन भौतिकदेहात्मवादो निराकृत इति योजना । संघातोऽवयवी वा, संयुक्तचतुर्विधपरमाणवो वा, क्षणिकचतुर्विधपरमाणुपुञ्जस्वरूपो वा । तत्राद्यस्यानुपपत्तौ हेतु माह—अवयव्यनङ्गीकारादिति । कपालद्वयमेव घटः । कपालिकाद्वयमेव कपालम् । एवं त्रुटिपर्यन्तं विचारेण त्रुटेरन्यत् किमपि न प्रामाणिकम् । प्रामाणिकत्वे वा अवयवानामवयविनश्च द्विगुणगुरुत्वाद्युपलब्धिः स्यादित्यादियुक्तिभ्यः अवयव्यस्वीकारादित्यर्थः । द्वितीयस्यानुपपत्तौ हेतुमाह—पञ्चमेत्यादि । चत्वार्येव भूतात्मकानि तत्त्वानि । न च संयुक्तासंयुक्तस्वरूपवैलक्षण्याय संयोगादिकमवश्यं वक्तव्यमिति कथं चत्वार्येव तत्त्वानीति वाच्यम् । चतुर्विधपरमाणूनां क्षणिकत्वात् संयुक्तत्वेन पराभ्युपगतस्वरूपस्यासंयुक्तत्वेन पराभ्युपगतस्वरूपाद्भेदेन वैलक्षण्योपपत्त्या संयोगादिस्वीकारस्य व्यर्थत्वात् । घट इति उपलभ्यमानास्त्रुटय एव हि घटस्वरूपाः । तदेवंवादिनश्चार्वाकस्य मते पञ्चमतत्त्वाभ्युपगमप्रसङ्गेन संयोगादिकं न स्वीक्रियत इति भावः । नन्वेवम् अहमित्याकारकधीविषयत्रुटिसंघात एवात्मास्तु इत्याशङ्क्योक्तत्रिविधसंघातानामनुपपत्तौ हेतुमाह—संहन्तुरभावादिति । शरीरोत्पत्तेः पूर्वमात्मनोऽभावात् न चेतनस्य व्यापाराच्छरीरोत्पत्तिः । न च प्रलयास्वीकारेणानादिमातापितृपरंपराव्यापारेण शरीररूपसंघातोत्पत्तिरिति वाच्यम् । शरीरवैचित्र्ये हि नियामकमदृष्टं दृष्टं वा वाच्यम् । नाद्यः । प्रत्यक्षभात्रप्रमाणस्वीकारात् परलोकस्वीकारप्रसंङ्गाच्च । नान्त्यः । एकजातीयेन मातापितृव्यापारेण उत्पन्नयोः यमलयोः वैलक्षण्यस्य अदृष्टं विनानुपपत्तेः । कारणान्तरस्यापि प्रत्यक्षप्रमाणे-

पद्यत इत्यभिप्रेत्य प्रत्येकभूतनिराकरणेन भौतिकदेहात्मवादो निराकृतः । यद्यपि भूतचतुष्टयतत्त्ववादिनो मते आवरणाभावत्वेनाभिमतस्य स्थिरस्यासत आकाशस्य देहानुग्रादानत्वं, तथापि सिद्धान्ते तस्य भावत्वम् । देहोपादानत्वाद्यङ्गीकारात् । तत्राप्यात्मत्वप्रसक्त्या तन्निराकृतम् । अथवा न वायुरित्यन्तमेव देहात्मवादस्य निराकरणम् । न खमिति शून्यवादस्य । खशब्दस्य शून्यवाचकत्वात् । नेन्द्रियमिति प्रत्येकमिन्द्रियाणामात्मत्वनिरासः । न

नासिद्धत्वाच्च । तथा च क्षणिकत्रुटिसमुदायस्य दृष्टादृष्टद्वारा संघातयितृरूपो यस्संहन्ता, तदभावात् संघातस्योत्पत्त्यसम्भव इति भावः । निराकरणेन आत्मत्वनिराकरणेन । भौतिकेति । भूतसमुदायरूपेत्यर्थः । निराकृत इति । समुदायस्य प्रत्येकानतिरेकादिति शेषः । यद्यपीत्यादि । चार्वाकादिनास्तिकानां मते भूतचतुष्टयमेव तत्त्वं, तदपि क्षणिकम् । 'यत् सत् तत् क्षणिकमि'ति नियमात् । कथमुक्तनियम इति चेदुच्यते । यत्र यस्य सामर्थ्यं, तस्य तत्साधने विलम्बो नास्ति । विलम्बोऽस्ति चेत् सामर्थ्यमेव न स्यात् । तथा च यावत्सु कार्येषु सामर्थ्यं यस्य, तावतां द्वितीयक्षणवृत्तीनां प्रथमक्षणस्थितेन तेन तेन सिद्धिरिति द्वितीयक्षणस्थितेन तेन न कस्य चित् तृतीयादिक्षणवृत्तिनस्सिद्धिः । अतो द्वितीयादिक्षणे सत्त्वं वस्तुनो नास्ति । कार्यकारित्वमेव हि वस्तुनः सत्त्वम् । तस्मात् सर्वं क्षणिकम् । यत्तु अलीकं, तस्य कार्यकारित्वाभावेन सत्त्वाभावात् नोक्तरीत्या क्षणिकत्वमिति स्थिरत्वमिति प्रमाणागोचरत्वेऽपि विकल्पधीविषयत्वेन व्यवहारः तस्य । तथा च आवरणाभावरूपाकाशस्याभावत्वेनालीकत्वादसत्त्वास्थिरत्वावश्यकत्वात् देहं प्रत्युपादानत्वाभाव इति भावः । सिद्धान्ते औपनिषदमते । आत्मत्वप्रसक्त्येति । अवयविखण्डनयुक्तिभिराकाशादिस्वरूप एव देहो वाच्यः । तथा च आकाशादिप्रत्येकस्यापि आत्मत्वप्रसक्तिरिति भावः । तन्निराकृतं आकाशस्यात्मत्वं निराकृतम् । प्रसिद्धमतनिराकरणप्रस्तावे आधुनिकपक्षनिराकरणस्यासङ्गतत्वादाह — अथ वेति । शून्यवादस्य क्षणिकज्ञानरूपात्मा मिथ्येति वादस्य । खशब्दस्य शून्यवाचकत्वात् शून्यपदसमानार्थकत्वात् । तथा च खं नात्मेत्यस्य मिथ्याभूतविज्ञानं नात्मेत्यर्थः । खपदस्य सत्यत्वशून्यात्मकमिथ्याविज्ञानबोधकत्वात् । प्रत्येक-

तेषां समूह इति मिलितानां भूतानां देहावयव्याकारेण परिणतानामिन्द्रियाणां च मिलितानां निरासः । पूर्वं संघातमनभ्युपगम्य प्रत्येकं भूतानि निराकृतानि । अधुना संघातमभ्युपगम्यापि निराकृतानीति भेदः । भूतनिराकरणेन भौतिकयोः प्राणमनसोर्निरासः । मनोनिराकरणेन मनोवृत्तेः क्षणिकविज्ञानस्य देहातिरिक्तस्य कर्तृत्वभोक्तृत्वादिविशिष्टस्य च निरासः । सिद्धान्ते ज्ञानेच्छासुखादीनामन्तःकरणाश्रयत्वाभ्युपगमात् । काम सङ्कल्पादीन्प्रकृत्य मन एवेति श्रुतेः । तेन देहमारभ्य केवलभोक्तृपर्यन्ता-

---

मिति । इन्द्रियपदस्येन्द्रियत्वरूपेण सर्वेन्द्रियबोधकत्वात् सर्वेन्द्रियेषु प्रत्येकमात्मत्वनिराकरणमिति भावः । मिलितानां भूतानां संहतानां पार्थिवादिपरमाणूनामात्मत्वेन चार्वाकस्वीकृतानाम् । **परिणतानामिति** । यद्यपि चार्वाकेणावयवी न स्वीक्रियते । तथाप्यन्यैस्तत्स्वीकारात्तत्रापि प्रसक्तमात्मत्वं निरस्तम्। अवयवावयविनोस्तादात्म्यमते अवयविनः अवयवसमूहात्मकत्वात् समूहपदेन निर्देश इति भावः । अनभ्युपगम्य उपपद्यत इत्यस्वीकृत्य । उपगम्य उपपद्यत इति स्वीकृत्य । **भूतनिराकरणेनेति** । न तेषां समूह इति वाक्येनेत्यर्थः। **प्राणमनसोरिति** । अपिशब्दश्शेषः । **मनोनिराकरणेनेत्यादि** । मनोनिराकरणेन क्षणिकविज्ञानस्य कर्तृत्वभोक्तृत्वादिविशिष्टस्य च निरास इत्यन्वयः । ननु, मनोनिरासेन कुतस्तयोर्निरासः । 'विज्ञानमेव सर्व'मिति, योगाचारमते मनस एवास्वीकारात्तार्किकादिमते कर्तृत्वादिविशिष्टस्य मनोभिन्नत्वादित्याशंक्य तयोर्हेतुगर्भविशेषणमाह—**मनोवृत्तेरिति** । मनःपरिणामत्वेनास्मत्सम्मतस्येत्यर्थः । देहातिरिक्तस्य देहमनआदिभिन्नत्वेन तार्किकादिस्वीकृतस्यापि । तथा च तेषां समूह इत्यस्य भौतिकत्वेनास्मत्सम्मत इत्यर्थकत्वात् योगाचारादिस्वीकृतक्षणिकविज्ञानस्य तार्किकादिस्वीकृतकर्तृत्वादिविशिष्टस्य च मन्मते मनःपरिणामत्वात् भौतिकत्वेनास्मत्सम्मतत्वात् तयोरात्मत्वनिरास इति भावः । कर्तृत्वादिविशिष्टस्य भौतिकत्वमस्मत्सम्मतम् । श्रुतिसिद्धत्वादित्याह—**ज्ञानेत्यादि** । **मन एवेति** । धर्मधर्मिणोस्तादात्म्यमेव सम्बन्ध इति कामादिमनोधर्माणाम्मनस्तादात्म्योक्तिः । **तेनेति** । भूतनिराकरणेनेत्यादुक्तव्याख्यानेनेत्यर्थः । **केवलभोक्तृपर्यन्तानामिति** । भोक्तैव आत्मा । न तु कर्ता इति

नां तत्तद्वाद्यभ्युपगतानामनात्मत्वं प्रतिज्ञातं भवति । तत्र हेतुमाह—अने कान्तिकत्वादिति । व्यभिचारित्वात् विनाशित्वादिति यावत् । आत्मनो देशकालापरिच्छिन्नत्वात्तत्परिच्छिन्नानां घटादिवदनात्मत्वात् ध्वंसप्रागभाव साङ्कुच्यमते भोक्तृत्वमात्मनः।नानुभवस्वरूपत्वमात्रम् । मोक्षेऽपि भोक्तृत्वापत्तेः । किं तु सुखदुःखसंसृष्टानुभवरूपत्वम् । तथा च भौतिकमनःपरिणामसुखादि-संसृष्टरूपेण भौतिकस्याप्यात्मनो नात्मत्वं प्रतिज्ञातं न तेषां समूह इत्यनेन सम्भवतीति भावः । **तत्रेति** । देहादिष्वनात्मत्वप्रतिज्ञायामित्यर्थः । **व्यभि-चारित्वादिति** । सर्वेषु देशकालवस्तुषु सम्बध्य वर्तत एवेति नियमरहितत्वादि-त्यर्थः । क्वचिद्देशे काले वस्तुनि वर्तमानो यः अभावः, तत्प्रतियोगित्वरूपपर्य-वसितहेतौ वर्तमानपर्यन्तं वैयर्थ्यादाह—**विनाशित्वादिति** । विविधो देशका-लवस्तुगतः नाशः अदर्शनं यतः, स विनाशः ससंर्गाभावतादात्म्याभावयोरन्यत-रः । तद्विशिष्टत्वात् । तत्प्रतियोगित्वात् । अभावप्रतियोगित्वादिति यावत् । अभावप्रतियोगित्वादिति हेतुकरणे अभावपदवैयर्थ्यात् अभावस्यैव प्रतियोगितास-म्बन्धेन हेतुतेति बोध्यम् । यथाश्रुतं विनाशित्वादित्यसङ्गतम्।आत्मन इत्याद्युत्तर-ग्रन्थेनाभावप्रतियोगित्वस्यात्मभिन्नं प्रत्यव्यभिचारित्वप्रतिपादनवैयर्थ्यात् । अथ-वा अभावप्रतियोगितात्वरूपसामान्यधर्मविशिष्टस्याव्यभिचारित्वप्रतिपादने ध्वंसप्र-तियोगितात्वरूपधर्मविशिष्टस्य सुतरां तत् भवतीत्याशयेनात्मन इत्यादेरुक्तत्वात् यथाश्रुतमेव विनाशित्वादिति रम्यम् । ननु , विनाशित्वस्यात्मान्यत्वं , प्रति व्याप्यताग्रहो न सम्भवति । तर्काभावादित्याशंक्यानात्मत्वस्य विनाशहेतुत्वक-थनद्वारा तादृशव्याप्यताग्राहकतर्कं सूचयति—**आत्मन इति** । तथा च वि-नाशित्वात् अनात्मेत्यनेनोक्ते अनात्मनिष्ठे विनाशित्वहेतुकत्वे हेतुः देशका-लपरिच्छिन्नानां घटादिवदनात्मत्वादिति । तत्र हेतुः—**आत्मनो देशकालापरी-त्यादि । आत्मन इति**। आत्मत्वावच्छेदेनेति भावः । देशकालापरिच्छिन्नत्वात् दे-शकालवृत्त्यभावप्रतियोगिभिन्नत्वग्रहात् । तत्परिच्छिन्नानां देशकालवृत्त्यभावप्र-तियोगिनां तादृशावच्छेदेनेति शेषः । अनात्मत्वात् अनात्मत्वग्रहात् । तथा च आत्मत्वव्यापकमपरिच्छिन्नत्वमितिग्रहात् परिच्छिन्नत्वरूपविनाशित्वमनात्मत्व-व्याप्यतया गृह्यते । परिच्छिन्नत्वं यद्यनात्मत्वव्याप्यं न स्यात् । तदात्मत्व-

योश्च ग्रहीतुमशक्यत्वात्, अनात्मनां जडत्वात्, स्वभिन्नस्य चात्मत्वाभावात्, आत्मन एकत्वेऽपि सुखदुःखाद्याश्रयाणामन्तःकरणानां भेदाभ्युपगमाद्व्यवस्थो-

व्यापकस्यापरिच्छिन्नत्वस्याभावो न स्यात् । भवति तु तादृशाभावरूपम् । तस्मात् अनात्मत्वव्याप्यमिति तर्कपर्यवसानसम्भवादिति भावः । नन्वपरिच्छिन्नत्वस्याभावाप्रतियोगित्वरूपस्यात्मत्वव्यापकतानिश्चये सति उक्ततर्कपर्यवसानं वाच्यम् । स एव न सम्भवति । तर्काभावादित्याशंक्य तन्निश्चायकं तर्कं ज्ञापयितुं आत्मनि ध्वंसप्रागभावाप्रतियोगित्वं तद्धेतूपन्यासपूर्वकमाह—न तस्य ध्वंसप्रागभावावित्यन्तेन ग्रन्थेन ध्वंसप्रागभावयोरित्यादिना । चकारेणात्मन इत्यनुषज्यते । आत्मनो ध्वंसप्रागभावयोः गृहीतुमशक्यत्वात् न तस्य ध्वंसप्रागभावाविति अग्रे अन्वयः । अशक्यत्वे हेतुमाह—**अनात्मनां जडत्वादिति** । आत्मभिन्नानां ज्ञानरूपत्वाभावात् आत्मभिन्नेऽनात्मध्वंसप्रागभावौ विषयीकर्तुं न शक्येते इत्यर्थः । नन्वेकस्या आत्मव्यक्तेः ध्वंसप्रागभावौ अन्यदीयात्मव्यक्त्या गृह्येयाताम् । तत्राह—**स्वभिन्नस्यात्मत्वाभावादिति** । यदात्मव्यक्तेः ध्वंसप्रागभावौ ग्राह्यौ, तद्भिन्नस्यात्मत्वाभावादित्यर्थः । नन्वात्मनो नानात्वमवश्यं वाच्यम् । अन्यथा यदा चैत्रस्सुखी, तदा मैत्रोऽपि अवश्यं सुखी स्यात् । न च यदा चैत्रशरीरे चन्दनादियोगः, तदा मैत्रशरीरे तस्यानियमात् सुखानियम इति वाच्यम् । व्यञ्जकचन्दनादियोगं प्रति त्वेकात्मनिष्ठादृष्टस्यैव नियामकत्वात् सर्वशरीरेषु युगपच्चन्दनादियोगोत्पत्त्यापत्तेः । न च शरीरविशेषे चन्दनादियोगं प्रति अदृष्टविशेषस्य हेतुत्वान्नोक्तापत्तिरिति वाच्यम् । तदापि एकस्य तत्त्वदर्शने सति कुत्रापि संसारो नोपलभ्येतेति आत्मनानात्वावश्यकत्वात् । तत्राह—**आत्मन एकत्वेऽपीति** । **व्यवस्थोपपत्तेरिति** । यस्मिन् मनसि चन्दनादियोगहेत्वदृष्टमस्ति, तत्रैवोक्तयोगोत्पत्तिः । मनस एव जीवविभाजकोपाधित्वे यस्य मनसो ज्ञानेनोच्छेदः, तदुपलक्षितजीवस्यैव मुक्तिः । अविद्याया जीवविभाजकोपाधित्वे यत्र मनसि तत्त्वदर्शनं, तदुपादानभूताया एव तेनोच्छेद इति व्यवस्थोपपत्तेः । न च मनसि प्रमाणाभाव इति वाच्यम् । 'मम मन इदानीं प्रसन्नं, इदानीं विक्षिप्त'मिति साक्ष्यनुभवात् 'अन्यत्रमना अभूवं नादर्श' 'एतत्सर्वं मन एवे'त्यादिश्रुतेश्च तत्र मानत्वादिति भावः । नन्वात्मनैव स्वध्वंसप्रागभावौ गृह्यं-

पपत्तेः । स्वेनैव स्वाभावग्रहणे विरोधात् ग्राह्यकाले ग्राहकासत्त्वात् ग्राहकसत्त्वे ग्राह्याभावात्, कृतहान्यकृताभ्यागमप्रसङ्गाच्च न तस्य ध्वंसप्रागभावौ । सद्रूपस्यात्मनः सर्वत्रानुगमाच्च नात्यन्ताभावसम्भवः । द्वैतस्य मि-

---

यातम् । तत्राह—**स्वेनेति** । ग्रहणे विषयीकरणे । ननु, भिन्नकालीनयोरपि विषयविषयिभावसम्भवात् आत्मनः स्वध्वंसादिविषयकत्वं न विरुद्धम् । तत्राह—**ग्राह्येति** । ग्राह्ययोः विषययोः आत्मध्वंसप्रागभावयोः काले ग्राहकस्य विषयिणः आत्मनोऽभावात् ग्राहकस्य विषयिणः आत्मनः सत्त्वे ग्राह्ययोस्तयोरसत्त्वादित्यर्थः । आत्मनो विषयग्राहकत्वं नाम तादात्म्येन विषयसम्बद्धत्वम् । तथा च भिन्नकालीनविषये तादात्म्यासम्भवेनात्मनो ग्राहकत्वासम्भव इति भावः । आत्मनो ध्वंसप्रागभावाप्रतियोगित्वे गृहीतुमशक्यत्वादिति हेतुं सोपपत्तिकमुक्त्वा हेत्वन्तरमप्याह—**कृतेत्यादि** । आत्मनो नाशस्वीकारे कृतस्य यागादिजन्यादृष्टस्य फलजनकत्वरूपहानिः स्यात् । उपादानीभूतस्यात्मनो नाशे तदुपादेयस्यादृष्टस्य नाशावश्यकत्वात् । तथा च कर्तुः फलप्राप्त्यभावेन प्रवृत्त्यनुपपत्तिः । आत्मनः प्रागभावस्वीकारे उत्पद्यमानस्यात्मनः पूर्वं सञ्चितादृष्टाभावेन तदकृतेनादृष्टेन भोगाभ्यागमो वाच्यः । स न सम्भवति । पित्रादिकृतेनादृष्टेन पुत्रादेर्भोगजनने मानाभावात् कल्पनापेक्षया लाघवात् आत्मनोऽनादित्वकल्पनाया एवोचितत्वादिति भावः । नन्वेतावतापि नात्यन्ताभावाप्रतियोगित्वसाधकतर्कलाभः । तत्राह—**सद्रूपस्येति** । **सर्वत्रानुगमादिति** । घटस्सन् पटस्सन्नित्यादिप्रत्ययेन दृश्यमात्रे सद्रूपसम्बन्धविषयीकरणादित्यर्थः । ननु, सद्रूपस्य तादात्म्यमेव दृश्ये भाति । तस्य च न सद्रूपात्यन्ताभावविरोधित्वम् । अतः कथमुक्तप्रत्ययेनात्यन्ताभावनिरास इति चेदुच्यते । यथा 'इदं रजत' मित्यादिभ्रमस्थले रजतादाविदन्त्वादिसंसर्गोऽपि भासते । न त्विदमादितादात्म्यमात्रम् । अधिष्ठानस्य हि तादात्म्यमिव तद्वृत्तिधर्मसंसर्गोप्यारोपेऽध्यस्यते । तथा च सद्रूपस्याधिष्ठानस्य तादात्म्यमिव तद्वृत्तिधर्मसंसर्गोऽपि घटादावुक्तप्रत्ययेन भ्रमरूपेण विषयीक्रियते । तद्वृत्तिधर्मश्च सद्रूपात्मकसत्यनित्यादिकमेव । स्वस्यैव स्वस्मिन् कल्पितधर्मत्वस्वीकारात् । तथा च सद्रूपसत्त्वाद्याधारत्वस्य सद्रूपेऽपि सत्त्वादुक्तप्रत्ययविषयतया दृश्यमात्रेऽपि सत्त्वाच्च सद्रूपस्य सर्वधर्मत्वेन न कुत्रा-

थ्यात्वेनाधिष्ठानसत्तादात्म्यापन्नतयैव सिद्धत्वात् शुक्तिरजतादिवदध्यस्त-

प्यत्यन्ताभाव इति भावः। नन्वेतावतापि नान्योन्याभावाप्रतियोगित्वसाधकतर्कलाभः। तत्राह—द्वैतस्येत्यादि । द्वैतस्य तत्तादात्म्याभावानुपपत्तिरिति योजना । तादात्म्येनाभावस्तादात्म्याभावः भेद इति यावत् । ननु, तादात्म्यस्य मिथ्यात्वेन तद्धत्यपि दृश्ये तदभावः सिद्धान्तेऽपि स्वीक्रियत एवेति कथं तदनुपपत्तिरिति चेन्न । तादात्म्याभावपदस्य भेदार्थकत्वात् । ननु, तादात्म्यबलादेव दृग्दृश्ययोर्भेदोऽपि वाच्यएव। अत्यन्ताभिन्नयोस्सिद्धान्ते तादात्म्यास्वीकारात् । तत्राह—**सत्तादात्म्यापन्नतयैव सिद्धत्वादिति**।घटस्सन्नित्यादिव्यावहारिकप्रमया व्यावहारिकसत्तादात्म्यविशिष्टतयैव द्वैतस्य प्रमितत्वादित्यर्थः । एवकारेण व्यावहारिकप्रमया दृग्दृश्ययोर्व्यावहारिकभेदग्रहणं नास्तीत्युक्तम् । तथा च व्यावहारिकतादात्म्यान्यथानुपपत्त्या कल्प्योऽपि भेदः प्रातीतिक एव । कार्यकारणभावादिकाल एव तदन्यथानुपपत्त्या भेदप्रत्ययात् । न च प्रातीतिकेन भेदेनोपपाद्यं कार्यकारणभावादिकमपि प्रातीतिकं स्यात् । कल्पितधूमान्यथानुपपत्त्या कल्प्यमानवह्नेर्ज्ञानप्रातीतिकत्वदर्शनादिति वाच्यम्। पर्वते धूमादर्शनेऽपि धूलीपटलादिकल्पितधूमान्यथानुपपत्त्या कल्पितवह्नेः व्यावहारिकत्वदर्शनेन तथा नियमाभावात् । भेदोपपाद्यतादात्म्यादेः प्रातीतिकत्वादर्शनेन समसत्तयोः तयोर्विरोधेन व्यावहारिकत्वावश्यकत्वात् कपालघटाद्योर्व्यावहारिकस्य प्रातीतिकत्वे क्षतिविरहाच्च । अत एवारम्भणाधिकरणे भाष्यं—'न हि कार्यकारणभावादिकं वेदान्तिभिः स्वीक्रियत' इति । यद्यपि तादात्म्यप्रत्ययमात्रे भेदसमानाधिकरणतादात्म्यत्वेन तादात्म्यस्य संसर्गतया भानमिति सयुक्तिकमुक्तं चन्द्रिकायां भेदाभेदवादप्रस्तावे प्रथममिथ्यात्वलक्षणविचारे, तथापि कार्यकारणभावाद्यज्ञानदशायां तादात्म्यप्रत्ययेनात्यन्ताभेदज्ञानात् न भेदज्ञानम्। तथाहि—कपालद्वयं घट इत्यादिप्रत्यये विषयः, न घटत्वादिकं जातिः । किं तु कपालद्वयत्वादिकमिति ज्ञायते । तथा चात्यन्ताभेदे सति संसर्गाभावादभेदोऽपि न संसर्गः उक्तप्रकारः । न चैवं घटो घटः तद्घटस्तद्घटवानित्यादाविव घटो नील इत्यादावपि भ्रमत्वव्यवहारः स्यादिति वाच्यत् । साम्याभावात् । घटो नील इत्यादौ घटे औपाधिको भेदो भाति। घटत्वे नीलत्वस्य यो भेदस्तस्यैव घटानुयोगिकत्वनीलप्रतियोगिकत्वाभ्यां प्रातीतिकाभ्यां ज्ञानात्। व्यावहारिकोऽपि भेदः ताभ्यां विशिष्टेन रू-

पेण प्रातीतिक इति विवेकादभेदविषयके घटो नील इत्यादौ भ्रमत्वव्यवहारः । उक्तविवेकाभावे तूक्तभेदस्य व्यावहारिकत्वग्रहान्नोक्तज्ञाने भ्रमत्वव्यवहारः । तद्घटस्तद्घट इत्यादौ तु भेदस्य प्रातीतिकत्वग्रहे नोक्तविवेकापेक्षा । औपाधिकत्वाभावादिति । तत्र तत्काले सदैव भ्रमत्वग्रहः । तथा च घटो नील इत्यादौ भ्रमत्वव्यवहार इष्ट एव । स च तद्घटस्तद्वानित्यादिस्थलीयभ्रमत्वव्यवहारेण न तुल्यः । विशिष्टसत्ता सत्तेत्यादावपि विशिष्टसत्तात्वस्य यो भेदः, तस्मिन् शुद्धसत्त्वानुयोगिकत्वेन व्यावहारिकेण विशिष्टसत्ताप्रतियोगिकत्वं प्रातीतिकं कल्पितम् । घटाकाशमठाकाशयोस्तु औपाधिकोऽपि भेदो व्यावहारिकः । घटपटयोस्तादात्म्याभावेन व्यावहारिकयोस्तादात्म्यभेदयोः विरोधस्य दूषणस्याभावात् । न च तादात्म्यं भेदो वा व्यावहारिक इति विनिगमकशून्यमिति वाच्यम् । तादात्म्यान्यथानुपपत्त्या भेदस्य कल्पनीयतया तादात्म्यादेरुपजीव्यत्वेन प्राबल्यस्यैव व्यावहारिकत्वे प्रयोजकत्वात् । एवं च 'घटस्स'न्नित्यादिप्रतीतेस्तादात्म्यांशे प्रमात्वेऽपि भेदांशे भ्रमत्वं तद्व्यवहारश्च । वस्तुतो विशेषणभिन्नतया ज्ञायमाने विशिष्टे तादात्म्येन विशेषणप्रकारकज्ञानत्वं विशेषणांशे तादात्म्येन प्रमात्वम् । न तु विशेषणभेदसमानाधिकरणतादात्म्यसंसर्गकत्वघटितम् । तथा च विशेषणविशेष्ययोर्भेदाग्रहकाले न तादात्म्यप्रमा । तस्याभेदविषयकत्वानियमेन भ्रमत्वानियमश्च । ज्ञानान्तरेण भेदग्रहेऽपि तादात्म्यप्रभासम्भवादिति ध्येयम् । प्रातीतिकभेदप्रतियोगित्वं च न परिच्छिन्नत्वम् । प्रातीतिकध्वंसप्रतियोगित्वस्यापि तत्त्वापत्तेरिति भावः । ननु, 'घटस्सन्नि'त्यादिप्रत्यये सत्ताजातेः समवायो भाति । न तु सद्रूपतादात्म्यम् । अतो दृश्यमात्रे सद्रूपभेदस्य व्यावहारिकत्वमेवेत्यतोऽधिष्ठानेत्यन्तमुक्तम् । द्वैतस्य दृश्यस्य । मिथ्यात्वेन सद्रूपज्ञाननिवर्त्यत्वेन । रजतादिवत् रजतादेरिव । अध्यस्तस्य सद्रूपाज्ञानमूलकभ्रमविषयस्य । अधिष्ठानेति । कारणीभूताज्ञानाश्रयेत्यर्थः । यथा शुक्तिरजतादेः शुक्तिज्ञाननिवर्त्यत्वरूपमिथ्यात्वेन शुक्त्यवच्छिन्नसद्रूपाज्ञानकल्पितत्वेन उक्ताज्ञानाश्रयस्येदमवच्छिन्नसद्रूपस्य तादात्म्येन भानम् । 'रजतमिदं सदि' ति प्रतीतेः, तथा दृश्यमात्रस्य सद्रूपब्रह्मज्ञाननिवर्त्यत्वरूपमिथ्यात्वेन सद्रूपाज्ञानकल्पितत्वात् सद्रूपतादात्म्येन भानम् । घटस्सन्नित्यादिप्रतीतेरज्ञानस्य स्वाश्रयतादात्म्यवैशिष्ट्येनैव दृश्यरूपेण परिणा-

स्य तत्तादात्म्याभावानुपपत्तेः । तेन आत्मा नाभावप्रतियोगी । अभाव-

मकल्पनात् । अन्यथा सत्ताजात्या द्रव्यगुणकर्ममात्रवृत्त्या 'ध्वंसस्सान्नि'त्यादिप्रत्ययानिर्वाहात् । अनादिदृश्यानामपि अनादिसत्तादात्म्यविशिष्टतयैव प्रत्ययात् । तथा च सर्वत्र सत्तादात्म्यविशिष्टतया भासमानदृश्ये सद्भेदस्य व्यावहारिकस्यासम्भवः । सद्रूपेऽपि सद्रूपात्मकसत्ताधारत्वोपपादनाय कल्प्योऽपि सद्रूपभेदो न व्यावहारिकः । विचारदशायामेव प्रतीतेरिति भावः । ननु, अनुमित्यादिरूपे गुरुत्वादिप्रत्यये सत्तादात्म्यभानानियमात्सत्तादात्म्याविषयानुमित्यादिसिद्धगुरुत्वादौ व्यावहारिकसद्भेदसत्त्वे बाधकाभाव इति चेन्न । द्वैतस्येत्यादिना सिद्धत्वादित्यन्तेन सर्वव्यावहारिकद्वैतज्ञानं स्वविषयीभूतद्वैतमात्रसत्तादात्म्यविषयम् । भ्रमत्वात् प्रातीतिकभ्रमवदित्यस्य सूचितत्वात् । न चेदमनुपपन्नम् । ज्ञानजनकसामग्रीमात्रं सत्तादात्म्यविशेषितमेव ज्ञापयतीति नियमस्यानुभवबलेन कल्पनात् । अत एव सर्वोऽपि विषयः कालसम्बन्धित्वरूपसत्त्वेन भातीति भट्टाः । ज्ञानसम्बन्धित्वरूपसत्त्वेनेति प्राभाकराः । अत एव सद्रूपाधारत्वस्यापि पूर्वोक्तरीत्या सर्वदृश्येषु प्रतीतिसिद्धत्वात्सद्रूपात्यन्ताभावो न कुत्राप्यस्ति । न चोक्ताधारत्वस्य कल्पितत्वात् तद्वति तदत्यन्ताभाव इव सद्रूपात्यन्ताभावोऽप्यास्तामिति वाच्यम् । शुद्धस्य सद्रूपस्यात्यन्ताभावो हि न प्रत्यक्षेण गृह्यते । किञ्चिद्धर्मविशिष्टप्रतियोगिकाभावस्यैव तेन ग्रहणात् । नाप्यनुमानादिना । व्याप्तिग्राहकतर्काद्यभावात् । प्रत्युत सत्यस्य सत्यमित्यादिश्रुतिपीडनात् सद्रूपसम्बन्धिनि तदत्यन्ताभावस्वीकारे सद्रूपं मिथ्यास्यात् । येन हि सम्बन्धेन यत् यद्विशिष्टं तत्सम्बन्धावच्छिन्नं तस्य तन्निष्ठात्यन्ताभावप्रतियोगित्वं मिथ्यात्वम् । तथा च सद्रूपस्याधारे आधारत्वसम्बन्धेनाभावस्वीकारेण मिथ्यात्वापत्त्या उक्तश्रुतिः पीड्येत । आधारत्वादेस्तु दृश्यत्वादिना मिथ्यात्वानुमानमुक्तश्रुत्या अनुगृह्यत इति ध्येयम् । ध्वंसप्रागभावयोरित्यादिना आत्मनअभावाप्रतियोगित्वं स्वीकृत्य आत्मन इत्यादिना तत्पूर्ववाक्येन उक्तमर्थमुपसंहरति—तेनेत्यादि । तेनात्मनः अभावाप्रतियोगित्वग्राहकमानसत्त्वेन । आत्मा नाभावप्रतियोगी आत्मत्वावच्छेदेन आत्माभावप्रतियोगित्वेन न गृह्यते । तेनेति । आत्मत्वव्यापकतया गृहीतं यदभावाप्रतियोगित्वं, तदभावत्वेन हेतुनाभा-

प्रतियोगिनश्च देहेन्द्रियादयः । तेन तेऽमी नात्मानः । किं तु स्वप्रकाशबोध-

---

वप्रतियोगित्वेऽनात्मत्वव्याप्यताग्रहात् अनात्मरूपपक्षे वृत्तित्वग्रहाच्चानुमिति सम्भवेनेत्यर्थः । नात्मानः आत्मस्वरूपत्वाभाववन्तः । यथाश्रुते आत्मभेदस्य साध्यत्वे तस्य प्रातीतिकस्यैव वाच्यत्वेन देहाद्यात्मवादिनं प्रति उपन्यासानौचित्येन असङ्गतेः । आत्मस्वरूपत्वं चात्ममात्रविषयकधीविषयत्वम् । ननु द्वैतस्य पूर्वोक्तमिथ्यात्वे दृश्यत्वादिकमेव हेतुः । दृश्यत्वादिकं च दृक्तादात्म्यादिरूपम् । तस्य कथं मिथ्यात्वव्याप्यतायोजकत्वमिति चेन्न । मिथ्यात्वव्याप्यत्वं न स्याच्चेत् तर्हि दृश्यत्वं न स्यादिति तर्कसम्भवात् । अथ दृग्दृश्ययोस्तादात्म्यमनुपपन्नम् । तस्य दृग्दृश्याभ्यां सम्बन्धान्तरकाले तस्यापि सम्बन्धान्तरम्, एवं तस्यापीति अनवस्थानात् । तस्य ताभ्यां सम्बन्धान्तरास्वीकारे ताभ्यामसम्बद्धस्य तस्य कथं तदुभयं प्रति सम्बन्धता । तथा च तत्तादात्म्यमनुपपद्यमानं सत् स्वमिव स्वप्रतियोगित्वानुयोगित्वोपहितत्वरूपेण दृग्दृश्यावपि मिथ्यात्वेन ज्ञापयतीति चेत्, एवमपि तत्तादात्म्योपहितरूपेणैव दृश इव दृश्यस्य मिथ्यात्वं स्यात् । न तदनुपहितरूपेणापि दृश्यस्य । अथानुपपद्यमानदृक्सम्बन्धाधीनसिद्धिकत्वात् दृश्यमात्रस्य मिथ्यात्वम् । तर्हि वेदान्तवाक्यजज्ञानीयानुपपद्यमानसम्बन्धाधीनासिद्धिकत्वात् आत्मापि मिथ्या स्यात् । अत आह—**किं तु स्वप्रकाशेत्यादि** । स्वप्रकाशबोधरूपे कल्पिता अनिर्वचनीया एवेति योजना । स्वप्रकाशतादात्म्यवर्जितस्यानुपपन्नत्वेन कल्पितत्वमेवेत्यर्थः । अनुपपद्यमानस्सम्बन्धः स्वोपहितमेव मिथ्यात्वेन ज्ञापयतीति वेदान्तवाक्यजवृत्तिज्ञानोपहितस्य मिथ्यात्वेऽपि न शुद्धब्रह्मणो मिथ्यात्वम् । न हि यत्र यत्रानुपपद्यमानमस्ति तन्मिथ्येति नियमे मानमस्ति । मिथ्योपहितं तु मिथ्यैव । मिथ्यावटितत्वात् । दृक्तादात्म्यानुपहितमपि सर्वं दृश्यरूपं मिथ्या । उक्तरीत्यानुपपद्यमानेन घटत्वादिसम्बन्धेनोपहितत्वात् । न हि दृश इव दृश्यस्य अनुपहितं रूपमस्ति । दृश्यग्राहकप्रमाणमात्रस्य सम्बन्धोपहितदृश्यग्राहकत्वात् निर्विकल्पकप्रत्यक्षस्याप्रामाणिकत्वात् । प्रामाणिकत्वेऽपि सम्बन्धमगृह्णतोऽपि तस्य सम्बन्धोपहितस्य स्वरूपग्राहकत्वेन चरितार्थत्वात् । अनुपहितरूपग्राहकत्वकल्पने गौरवात् । वेदान्तजन्यधीविषयस्तु अनुपहितमेव । तात्पर्यानुरोधात् । तच्च स्वप्रकाशचिदानन्दस्व-

पे

रूपाख्ये आत्मनि अद्वैतेऽप्यनाद्यनिर्वचनीयाविद्याकल्पिता अनिर्वचनीया एवेति सिद्धान्तरहस्यम्। ननु, बोधरूप आत्मेति तवाभ्युपगमात्सुषुप्तौ च बोधाभावात् गाढं मूढोऽहमासं न किञ्चिदवेदिषमिति सुप्तोत्थितस्य परामर्शात्

रूपम् । अन्यथा स्वतःपुरुषार्थरूपमोक्षरूपत्वानुपपत्तेः । तथा च अनात्मानः केनापि स्वरूपेण निर्वक्तुमशक्यत्वात् अनिर्वचनीयाः । उपहितैः स्वीयसर्वरूपैः अनुपपन्नत्वात् विचारासहत्वात् मिथ्याभूता इति भावः । ननु, तर्हि स्वप्रकाशे शुद्धात्मनि न दृश्यारोपस्सम्भवति । अप्रकाशमान एव शुक्त्यादौ रूप्याद्यारोपदर्शनात् । अथ अज्ञानसम्बन्धात् तत्सम्बन्ध इति चेन्न । तस्यापि तत्रासम्भवात् । अत आह—**अनाद्यनिर्वचनीयेत्यादि** । इदमाद्याकारमनोवृत्तिनिर्गमनात् शुक्त्यादौ साक्षिरूपप्रकाशसम्बन्धे सति अज्ञानसम्बन्धेन रूप्याद्यारोपात् प्रकाशमानेऽप्यात्मनि अज्ञानात् दृश्यारोपसम्भवः । न च दृष्टान्तेऽप्यसम्भवः। अज्ञानस्यानादित्वात् अनिर्वचनीयत्वाच्च प्रमाणजन्यज्ञानरूपेणैव प्रकाशेनाज्ञानस्य विरोधः । न तु चित्प्रकाशेन मन्ददीपान्धतमसयोरिव तयोः स्वीयसर्वकालेषु मिथः संसृष्टतयैवोपलम्भात् । तथापि तयोर्विरोधः स्यात् यद्यज्ञानमुत्पद्येत । न ह्यन्धतमसमपि कृतमन्ददीपे गृहे उत्पद्यते । अथापि महालोकतमसोरिव समसत्ताकत्वे विरोधः स्यात् । अज्ञानं तु विचारासहत्वेन मिथ्याभूतं न परमार्थचित्प्रकाशसमसत्ताकमिति भावः । सुप्तोत्थितस्य सुषुप्त्युत्तरं जाग्रतः पुरुषस्य अवेदिषमिति परामर्शादिति योजना । परामर्शात् स्मरणात्।अव्यभिचारिता अभावाप्रतियोगिता।

सुषुप्तीति । मनोऽवच्छिन्नजीवस्य ब्रह्मणो वा स्वप्नाध्यासोपादानत्वे मनोलयसहितं तद्विषयकमवस्थाज्ञानं सुषुप्तिः । शुद्धब्रह्मण एव तदुपादानत्वे तद्विषयकमूलाज्ञानमेव मनोलयसहितं सा । तत्र पक्षद्वयेऽपि गाढंमूढोऽहमिति मूलाज्ञानस्योल्लेखः । आद्यपक्षे न किञ्चिदवेदिषमित्यनेन स्वप्नोपादानाज्ञानस्य मनोऽवच्छिन्नचिदज्ञानस्येव व्यावहारिकप्रपञ्चविषयकत्वस्वीकारादिति। अन्यथा न किञ्चिदवेदिषमिति सर्वव्यावहारिकविषयकाज्ञानस्मृतेरनुपपत्तेः । वस्तुतो घटादिव्यावहारिकपदार्थानां सुषुप्तौ जागरकालीनेन अज्ञानान्तरावृतत्वेन प्रकाशाप्रसक्तेः स्वप्नहेत्वज्ञानविषयत्वास्वीकारेऽपि जीवेशचिदज्ञानसम्बन्धादौ जागरे सदा भानेन प्रकाशप्रसक्तेः स्वप्नहेत्वज्ञानविषयत्वावश्यकत्वात् । वार्तिकमते जीवस्यानावृतसाक्षितादात्म्येनेशस्य साक्षित्वेन च तयोर्भेदस्य च अनावृतत्वेन साक्षिभा-

कथमव्यभिचारिता तस्येत्याशङ्क्याह—सुषुप्त्येकसिद्ध इति । अयमर्थः । आत्मनः सुषुप्तिसाक्षित्वान्न तत्र तदभावः । अन्यथा मूढोऽहमासमिति परामर्शानुपपत्तेः मातृमानमितिमेयानां व्यभिचारित्वेऽपि तद्भावाभावसाक्षि-

स्यत्वप्रसक्तेः न किञ्चिदवेदिषमित्यनेनोक्तभेदादिविषयकतया मनोऽवच्छिन्नचिदज्ञानस्योल्लेखः । न तु घटादिविषयकतयापि । द्वितीयपक्षे तु मूढोऽहमासमित्याकारं मूलाज्ञानविषयकस्मरणम् । न किञ्चिदवेदिषमित्याकारकं तु उक्तभेदादिविषयकस्य सुषुप्तावनुभूयमानस्य स्वप्नानुपादानस्यापि अज्ञानावस्थाविशेषस्य स्मरणमिति ध्येयम् । **अन्यथेति** । सुषुप्तिरूपाज्ञानविषयकसाक्षिणः सुषुप्तिकालेऽनङ्गीकार इत्यर्थः । ननु, सुषुप्त्याकाराया अविद्यावृत्तेरेव तादृशस्मृतिहेतुत्वसम्भवेन किं सुषुप्तिकालीनसाक्षिस्वीकारेण । तत्राह—**मातृमानमिति मेयानामिति** । ज्ञातृज्ञानकरणज्ञानज्ञेयव्यक्तीनां व्यभिचारित्वेऽपि साक्षिसम्बन्धे क्वचित्काले अभावेऽपि कालत्रये ज्ञात्रादेः पूर्वकालस्थितिकालनाशकालेषु कालत्रयाव्यभिचारित्वे हेतुमाह—**तद्भावाभावसाक्षिण इति** । ज्ञात्रादिस्वरूपतद्भावभासकस्येत्यर्थः । यथा प्रतिकर्मव्यवस्थायां वक्ष्यमाणरीत्या देहस्थविषयस्थतदन्यानां मनोवृत्तिभागावच्छिन्नप्रमातृप्रमाणरूपत्वं, तथा सुषुप्तौ मनोवृत्त्यभावेन प्रमाणाद्यभावेऽपि अविद्याविशिष्टा चित् ज्ञातृ, अविद्यावृत्त्यवच्छिन्ना ज्ञानं तत्करणावच्छिन्नाज्ञानकरणं, विषयोपहिता ज्ञेयेति ज्ञात्रादिसाधकोऽनुभवोऽवश्यं वाच्यः । न ह्यविद्यावृत्तिरनुभवः । येन तयैव स्ववृत्तिर्वाच्या । अस्वप्रकाशरूपत्वेन स्वयं सन्दिग्धत्वेन सुषुप्त्याद्यर्थासाधकत्वात् । तदुक्तं—'अप्रत्यक्षप्रकाशस्य नार्थदृष्टिः प्रसिध्यती'ति । अस्वप्रकाशज्ञानवादिनोऽर्थप्रकाशो नोपपद्यत इत्यर्थः । ज्ञानस्य स्वप्रकाशत्वं च ज्ञानविषयत्वं विनैव संशयादिविषयत्वायोग्यविद्यमानस्वरूपकत्वम् । अत एवोक्तं तार्किकादिभिरपि न हि जानन्नेव जानामि न वेत्याद्यनुभवती'ति । इयांस्तु विशेषः—यत्तार्किकादिमते ज्ञानस्य स्वाभाववत्त्वज्ञाने प्रतिबन्धकत्वात् संशयाद्यविषयत्वं, मन्मते त्वनावृतत्वादिति । अत एव तन्मतं तादृशप्रतिबन्धककल्पनाद्ध्येयम् । संशयादिकं प्रति मन्मते आवरणस्य हेतुत्वं तन्मते विशेषादर्शने हेतुत्वस्य स्थाने

णः कालत्रयेऽप्यव्यभिचारात् । ननु,प्रमाश्रयः प्रमाता स एव कर्ता भोक्ता प्रदीपवत्स्वपरसाधारणसर्वभासकश्चेति न घटादिवत्साक्षिसापेक्ष इति

इति न गौरवकरम् । प्रत्युत विशेषादर्शनं व्याप्यतया ज्ञातस्य निश्चयाभावः ! तरवं चाज्ञानत्वजातिरूपादावरणत्वाद्गुरुतरम् । गृहीताप्रामाण्यस्याहार्यस्याव्याप्यवृत्तिविषयकत्वेन गृहीतस्य निश्चयस्याप्रतिबन्धकत्वात्तदन्यत्वेन निश्चयो विशेषणीयः । ज्ञानस्य स्वरूपसतः प्रतिबन्धकत्वेऽपि तादृशनिश्चयस्य प्रतिबन्धकत्वमावश्यकम् । घटादौ तादृशनिश्चयसत्त्वे घटज्ञानवान्न वेति तादृशसंशयानुदयात् । आवरणं तु तादृशनिश्चयविषयेऽप्यस्तीति तत्र संशयादिकं स्यादेवेति केवलरूपेण हेतुरिति मे लाघवम् । ज्ञानस्य ज्ञानान्तरेण स्वेन वा प्रकाश्यत्वे तु अनवस्थात्माश्रयगौरवादिकम् । साक्षात्करोमि जानामि अनुभवामीत्यनुगताकारबुद्धौ एकस्यैवानुभवस्य भानात् वृत्त्यविषये सुखादौ सुखं जानामीत्यादिप्रतीतेश्च न वृत्तीनामनुभवत्वम् । तस्मादेकस्य भानस्य तादात्म्यात् तदन्येषु सर्वेषु भातीतिव्यवहारः । तस्य चानुभवस्य अनुभवाविषयत्वेऽपि नालीकत्वापत्तिः । वेदान्तवाक्यजन्यप्रमावृत्तिविषयत्वात् कालादिसम्बन्धाच्च । तस्मिन्नुक्तव्यवहारस्तु स्वरूपेणैव । न त्वनुभवान्तरापेक्षः । घटाद्यभावे तद्व्यवहार इव तदन्याभावानपेक्षः । तथा च विषयतासम्बन्धेन उक्तव्यवहारं प्रति अनुभवव्यक्तेः तादात्म्येन हेतुत्वमुक्तव्यवहारपूर्वकालीनत्वविशिष्टायां तद्व्यक्तौ तद्व्यक्तेस्तादात्म्यसत्त्वात् कार्यवति स्वस्मिन्नपि कारणस्य सत्त्वम् । सर्वस्यैव हि कारणस्य कार्यप्राक्कालीन एव कार्योपलक्षिते सत्त्वमपेक्ष्यते । कार्यप्राक्कालीनत्वावच्छेदेन हि यत्र यद्वर्तते, तत्कार्यप्राक्कालीन एव तत्र वर्तत इति नियमादिति भावः । प्राभाकरमतमाशङ्कते—**नन्वित्यादि** । प्रमाश्रयः ज्ञानाश्रयः । प्रमाता ज्ञाता । **प्रदीपवदिति** । यथा दीपः स्वस्य स्वप्रभासंयुक्तस्य च चाक्षुषजननरूपावभासने नालोकान्तरसापेक्षः, तथा ज्ञाता स्वस्य स्वनिष्ठज्ञानस्य तद्विषयस्य च व्यवहारजननरूपावभासने नान्यापेक्षः । विषयतासम्बन्धेन घटादाविव समवायेन ज्ञातरि तादात्म्येन स्वस्मिंश्च घटज्ञानस्य सम्बद्धतया तेषु व्यवहारस्य तत एवोत्पत्तिसम्भवात् । तथा च सुषुप्तौ अविद्यामुखवृत्तिरूपज्ञानस्वीकारेऽपि तत्साक्षिस्वीकारो निर्युक्तिकः । 'जानामी'त्यनुगताकारधीस्तु विप्रतिपन्ना । न ह्यनु-

चेन्न । **विकारित्वेन स्वविकारसाक्षित्वानुपपत्तेः दृश्यस्य द्रष्टृत्वानुपपत्तेः प्रमातुश्च परिणामित्वेन दृश्यत्वात् एकस्य कूटस्थस्यैव सर्वसाक्षित्वात् । ननु,** गताकारबुद्ध्यर्थमेकं वस्तु स्वीक्रियते । अतिप्रसङ्गादिति भावः । विकारित्वेन परिणामित्वेन । स्वविकारसाक्षित्वानुपपत्तेः स्वपरिणामविषयकज्ञानवत्त्वानुपपत्तेः । सुखादिरूपेण परिणतस्य प्रमातुः सुखादिरूपापत्त्या पूर्वरूपोच्छेदेन पूर्वरूपस्य न सुखादिप्रमातृत्वसम्भव इति भावः । अथवा—**विकारित्वेनेत्यादि** । भिन्नकालीनसुखादिरूपनानापरिणामित्वरूपापन्नत्वेन तादृशपरिणामान् प्रति द्रष्टृत्वानुपपत्तेः । एकस्य भिन्नकालीनपरिणामद्रष्टृत्वं प्रत्यभिज्ञायते । योऽहं पूर्वं सुखमन्वभूवं, सोऽहमिदानीं दुःखमनुभवामीत्यादिप्रत्ययाच्च । पूर्वापरकालीनमेकं द्रष्टारं विनानुपपन्नम् । त्वन्मते च न द्रष्टुरेकत्वं सम्भवति । विकारित्वेन नानारूपापन्नत्वादिति भावः । ननु, प्रमातुरेकदेश एव सुखादिरूपमापद्यते । तथा च तदीयपूर्वरूपस्यापि विद्यमानत्वेन द्रष्टृत्वोपपत्तेः । अत एवोक्तप्रत्यभिज्ञाप्युपपद्यते । तत्राह—**दृश्यस्य द्रष्टृत्वानुपपत्तेरिति** । दृश्यस्यानुभवविषयत्वेन भासमानस्यानुभवाश्रयत्वमात्रानुपपत्तेः । ननु, अहं सुखमनुभवामीतिधिया प्रमाश्रयत्वेनैवाहमर्थो भाति । न प्रमेयतया । तत्राह—**प्रमातुश्च परिणामित्वेन दृश्यत्वादिति** । प्रमातुरपि बीजादिवत् नानाविधभिन्नकालीनपरिणामाश्रयत्वानुभवविषयत्वस्वीकारादित्यर्थः । 'अहं सुखीत्यानुभवस्य सुखादिविशिष्टप्रमातृविषयत्वात् प्रमाश्रयत्वमात्रमहमर्थस्येति वक्तुमशक्यम् । किं च प्रमाविषयत्वमेव तत्र वाच्यम् । नत्वाश्रयत्वम् । उक्तप्रत्यभिज्ञाया विकारिण्यनुपपत्तेः । पूर्वरूपस्य उत्तररूपतादात्म्यात्तदुत्पत्तिविनाशाभ्यां तदुत्पत्तिविनाशप्राप्तेरिति भावः । ननु, प्रमाता न परिणामी । आरम्भवादस्यैव स्वीकारेण निर्विकारस्यापि प्रमासुखादिसमवायित्वस्वीकारादित्याशङ्क्य धर्मधर्मिणोस्तादात्म्यानुभवात् धर्मस्योत्पत्तिविनाशाभ्यां धर्मिणस्तावश्यं वाच्यौ । तदुक्तं—'उपयन्नपयन् धर्मो विकरोति हि धर्मिण'मिति । उपयन् जायमानः अपयन् विनश्यन् विकरोति उत्पत्तिविनाशभाजं करोतीत्याशयेन उपसंहरति—**एकस्येत्यादि** । एकस्य सर्वदृश्यानुस्यूतस्य । तत्र हेतुः—**कूटस्थस्येति** । स्वसमसत्ताकं रूपान्तरमापद्यते यः तदन्यस्येत्यर्थः । एवकारात् प्रमाता सुखादिरूपं स्वसमसत्ताकपरिणाममाप-

द्यमानो न साक्षीत्यर्थः । ननु, गुणादिधर्मस्य धर्मितादात्म्यमेव सम्बन्धः । न तु समवायाख्यः तदन्य इत्यत्र का युक्तिरिति चेदत्रोच्यते । यत्र यत्र समवायः प्राभाकरादैरुच्यते, तत्र तत्र तादात्म्यमेव युक्तम् । तथा हि—संयोगविशेषयुक्तं कपालद्वयं घटः, शाखादिसमुदाय एव सन्निवेशविशेषयुक्तो वृक्ष इत्यनुभवात् । तादात्म्यान्यसम्बन्धो न लौकिकानुभवविषयः । इह कपाले घट इत्यादिधीस्तु न लोकानां स्वाभाविकी । किं तु तार्किककल्पनामात्रम् । न ततोऽर्थसिद्धिः अतिप्रसंगात् । किं च नीलादिघटादौ तादात्म्यस्वीकारे घटो नील इत्यादिसर्वज्ञाने घटादौ नीलादिगुणस्य तादात्म्यसम्बन्धेन विशेषणता । न तु समवायेन । तस्यैवासिद्धत्वात् । तथा च घटो न नील इत्यादिज्ञाने नीलादिगुणभेदस्यैव विषयत्वम् । न तु नीलादिसमवायिप्रतियोगिकभेदस्येति नीलादिगुणतादात्म्यधीतद्भेदधियोः घटो नीलगुणात्मकः, घटो न नीलगुणात्मक इत्याकारकयोरेव विरोधित्वं कल्प्यते । सर्वैरेव स्वीकारात् । न तु नीलसमवायितादात्म्यधीनीलसमवायिभेदधियोः । अलीकत्वात् । तथा च लाघवम् । अपि च नीलादेस्तादात्म्यसम्बन्धेन घटादौ विशिष्टबुद्धिं प्रति घटादौ नीलादिगुणभेदविशिष्टबुद्धेर्विरोधित्वं त्वया मया च कल्प्यम् । त्वया तु समवायेन तत्र तद्विशिष्टबुद्धौ समवायेन यो नीलादिगुणात्यन्ताभावः, तद्विशिष्टबुद्धेर्विरोधित्वं वाच्यमिति समवायतदत्यन्ताभावतद्ज्ञानताद्विरोधित्वादिकल्पने तु महागौरवम् । तस्मात् कपालघटादिसम्बन्धेषु तादात्म्यत्वरूपाखण्डधर्म एव कल्प्यते । 'द्रव्यं घट' इत्यादिधीस्थले सम्बन्धनिष्ठतया कल्पनत्वात् । न तु समवायत्वरूपः । क्वाप्यकल्पनत्वात् । 'अहं सुखी' त्यादावपि तादात्म्यादिसम्बन्धः सुखादेर्वृत्तिनियामकः । क्वचित् संयोग इव तथा । 'घटे रूपमि'त्यादिधीस्तु लोकानां वर्तत एव । तत्रापि तादात्म्यं रूपादेः वृत्तिनियामकमिति दिक् । ननु, प्रमाश्रयस्यैव लोके साक्षित्वेन व्यवहारात् एकरूपकूटस्थस्य साक्षित्वं न युक्तम् । न च प्रमाश्रयस्य प्रमेयत्वे विरोधः । गमने गन्तुरिव प्रमायां प्रमातुः कर्मत्वासम्भवादिति वाच्यम् । प्रमोपहितप्रमाविशिष्टरूपेण एकस्यापि प्रमातृत्वप्रमेयत्वोभयोपपत्तेः । अत एव प्रमाया अपि प्रमेयत्वम् । अत्यन्ताभेदे सम्बन्धास्वीकारेऽपि प्रमात्वोपहितप्रमात्वाविशिष्टरूपभेदेन विषयत्वोपपत्तेः ।

एकः कूटस्थो निर्धर्मकः साक्षी नाद्रियते अप्रामाणिकत्वादिति चेन्न । 'तमेव भान्तमनुभाति सर्वं तस्य भासा सर्वमिदं विभाति' 'न दृष्टेर्द्रष्टारं पश्येः' 'अदृष्टो द्रष्टा' 'नान्योऽतोऽस्ति द्रष्टे'त्यादि वदता वेदान्तप्रमाणराजेन तस्यैव सर्वसाक्षित्वेनाभिषिक्तत्वात् । ननु महदेतदिन्द्रजालं। प्रमाश्रयानकूटस्थान्विहाय कूट-

न च विकारिणि प्रमातरि नानारूपे उक्तप्रत्यभिज्ञानुपपत्तिरिति वाच्यम् । सुखादिपरिणामात्मकतया नानात्वेऽपि स्वरूपेण प्रमातुरेकत्वात् । एवं च स्वविषयकजन्यप्रमाया धर्मव्यवहारोपपत्तौ तदन्यनित्यज्ञानरूपे साक्षिणि मानाभाव इति शङ्कते—**एक इत्यादि** । निर्धर्मकः प्रमादिधर्मशून्यः । एकादिपदं श्लिष्टम् । एको न साक्षी। किं तु द्वौ, त्रयो वा । कूटे कपटे साक्षित्वे यस्तिष्ठति, यो वा धर्मशून्यः, स न साक्षी । धर्मशास्त्रे तथोक्तत्वात् इति शेषः । भान्तम् अपरोक्षव्यवहारविषयम् । अनु आश्रित्य। किं दृग्दृश्ययोस्सहापरोक्षताव्यवहारमात्रं विवक्षितम् । तत्राह—**तस्य भासेति** । तदभिन्नभानेनेत्यर्थः । विभाति अपरोक्षव्यवहारविषयः। दृष्टेः चाक्षुषादिवृत्तिज्ञानस्य द्रष्टारम् अनुभवरूपम् । **पश्येरिति**।चाक्षुषादिवृत्तिविषयीकुर्याः।अदृष्टः वृत्तिभिन्नानुभवस्यापि अविषयः । तर्हि नित्यचिद्रूपसाक्षिण एव वास्तवं नानात्वमस्तु । तत्राह—**नान्योऽतोऽस्ति द्रष्टेति**। यो द्रष्टा, सोऽन्तर्यामिस्वरूपादन्यः सन् कुत्रापि नास्ति मिथ्येत्यर्थः । शुद्धेनान्तर्यामिरूपेण द्रष्टा सन् । न तु तदन्यरूपेणेति द्रष्टुर्नानात्वं मिथ्येति भावः । तस्य कूटस्थचिद्रूपस्य सर्वसाक्षित्वेन स्वभिन्नं सर्वं प्रत्यनुभवरूपतया।अभिषिक्तत्वात् लाघवतर्कगङ्गाजलेन संशोध्य सर्वान् प्रति ज्ञापितत्वात् । तथा च लाघवतर्कसहकृतयोक्तश्रुत्या स्वभिन्नसर्वविषयकम्, अन्याविषयीभूतमेकं नित्यचिद्रूपं ज्ञानं कल्प्यते । चक्षुरादिजन्यप्रमा तु ज्ञानव्यक्तिका । न तु ज्ञानम् । सुखादौ चित एव ज्ञानत्वस्य कल्पितत्वात् । तत्र जन्यज्ञानतत्सामग्र्यादिकल्पने तु महागौरवम् । यद्यपि यथामितवक्तरि प्रमातर्येव साक्षिशब्दस्य लोके रूढिः कल्पता । तथापि 'साक्षी चेता' 'सर्वस्य साक्षी'त्यादिश्रुत्या गौण्या वृत्त्या चैतन्येऽपि तत्प्रयोगः । प्रमाता रागद्वेषादिविकारवतामनेकेषाम् अन्येषु दुष्टादुष्टत्वव्यवहारं जनयति । चैतन्यमपि सर्वेषां विकारवतां व्यवहारं प्रमातृषु जनयतीति सादृश्यादिति भावः । **कूटस्थमप्रमाश्रयमिति** । अप्रमाश्रयस्य साक्षिता लोकविरुद्धा युक्ति-

स्थमप्रमाश्रयमेव प्रमाणराजः सर्वसाक्षिणं करोतीति । बाढम् । इन्द्रजालमेवैतत्स्वप्नवदविद्याविलसितत्वात्, तथापि दृश्यस्य घटादिवज्जडत्वेन कथं प्रमाश्रयत्वमिति चेन्न । दर्पणादिवत्स्वच्छत्वेन चित्प्रतिबिम्बग्राहकत्वाच्चि-

---

विरुद्धा च । सा हि सर्वविकारितादात्म्यरूपा वाच्या । न च कूटस्थस्य विकारितादात्म्यं सम्भवतीति इन्द्रजालवत् सेति भावः । एतत् कूटस्थसाक्षित्वम् । विलसितत्वात् प्रयुक्तत्वात् । तथापि अविद्याप्रयुक्तत्वेन मिथ्यात्वात् कूटस्थाकूटस्थतादात्म्यस्यासम्भवपरिहारेऽपि । दृश्यस्य साक्षिभास्यमनसः । जडत्वेन साक्षिचिदन्यत्वेन साक्षिचिदाश्रयत्वाभावेन । **कथं प्रमाश्रयत्वमिति** । प्रमा हि अज्ञातविषयकस्वप्रकाशकज्ञानम् । स्मृतेः प्रमात्वाभावात् स्वप्रकाशत्वाभावे स्वयं सन्दिग्धत्वेन विषयभासकत्वाभावात् । तथा चाज्ञातं घटादिकं ज्ञात्वा तत्प्रमाजननाय चक्षुर्व्यापारादौ यदा मनः प्रवर्तते, तदा तस्याज्ञातघटादिज्ञातृत्वमनुपपन्नम् । साक्षिण एव तत्सम्भवात् । तदुक्तं विवरणे—'अज्ञाततया ज्ञाततया च सर्वं साक्षिभास्य'मिति । एवं मनसोऽपि घटादिविषयकस्वप्रकाशज्ञानाश्रयत्वमनुपपन्नम् । तथा चाज्ञातघटादिज्ञानाश्रयत्वेनापि मनसः प्रमातृत्वानुपपत्तिः । 'प्रमिणोमी'ति धीविषयस्य ज्ञानाश्रयत्वस्य चानुपपत्तिः । न च चिद्रूपे ब्रह्मणि घटादेरिव मनसोऽपि तादात्म्येनाध्यासात् घटाद्याकारनिर्गतमनसो वृत्त्या घटादिचैतन्यस्य मनोऽवच्छिन्नत्वसम्पत्त्या घटादिविषयकस्वप्रकाशकचिदाश्रयत्वं मनसः सम्भवतीति वाच्यम् । मनसो ज्ञानतादात्म्येऽपि ज्ञानाश्रयत्वासम्भवात् । न ह्यधिष्ठानाश्रयत्वमारोप्ये क्वापि दृष्टम् । ईशस्य जीवस्य वा जगदुपादानत्वेऽप्येवमिति भावः । **स्वच्छत्वेन** प्रतिबिम्बसम्बन्धयोग्यत्वेन । **चित्प्रतिबिम्बग्राहकत्वात्** साक्षिप्रतिबिम्बवत्त्वात् । तथा च साक्षिरूपज्ञानाधारत्वं मनस उपपन्नम् । प्रतिबिम्बत्वं हि मुखादेर्दर्पणादौ अन्तराश्रितत्वम् । दर्पणस्यान्तर्मुखमस्तीत्यनुभवात् । तदृष्टान्ते न साक्षिणो मनस्यन्तराश्रितत्वम् । विशिष्टरूपेणाध्यासकल्पनात् । नन्वन्तराश्रितत्वसम्बन्धमात्रेण साक्षी, मेनोभासको न स्यात् । तादात्म्यस्यैव घटादौ साक्षिभास्यतानियामकत्वेन कल्पतत्वात् । अपि च साक्षितादात्म्यं विना अज्ञातघटादिप्रमार्थं मनसः प्रवृत्त्यनुपपत्तेरित्युक्तम् । 'अहमि'ति प्रत्यये साक्षिमनसोस्तादात्म्यस्य भानं सर्वानुभाविकं च । तत्राह—**चित्तादात्म्याध्यासादिति** । साक्षितादात्म्याध्यासादित्यर्थः ।

तादात्म्याध्यासाद्वा । ननु नीरूपस्य निरवयवस्य कथं प्रतिबिम्ब इति चेत् कात्रानुपपत्तिः । विभ्रमहेतूनां विचित्रत्वात् । जपाकुसुमरूपस्य नीरूपस्यापि स्फटिकादौ प्रतिबिम्बदर्शनाच्छब्दस्यापि प्रतिशब्दाख्यप्रतिबि-

अविद्योपहितेऽहङ्कारोऽध्यस्यते । तदुपहिते कामादयः, तद्विशिष्टे स्थूलशरीरमित्यादेः वक्ष्यमाणत्वात् अविद्योपहितसाक्षिणः विशेषरूपेणाधारत्वेन मनस्तादात्म्यवत्त्वेन भ्रमे स्फुरणम् । 'अज्ञोऽहमि'ति प्रत्ययात् । शुद्धचित् सर्वदृश्यानामधिष्ठानमेव । नाधार इति न विरोधः । इदं रजतमित्यादिभ्रमे हि इदमादेराधारत्वेन रजततादात्म्येन स्फुरणेऽपि शुक्तित्वादिविशिष्टस्याधिष्ठानस्य यथा अस्फुरणं, तथा प्रकृतेऽपि । जीवेशयोर्मनोऽविद्याप्रतिबिम्बत्वपक्षे बिम्बचिदेव साक्षी। ईशस्य बिम्बत्वं जीवस्याविद्यायां प्रतिबिम्बत्वमिति पक्षे तु शुद्धचित् । वार्तिकमते तु अविद्याचिदाभासरूपं, ईशस्साक्षीति पक्षत्रयं मूले वक्ष्यते । तथाप्यविद्यायां तद्वृत्तौ वा प्रतिबिंबितजीवः साक्षीति पक्षान्तरमद्वैतसिद्धावुक्तम् । सर्वथापि साक्षिण एव ज्ञानत्वात्तस्यैव मनसि प्रतिबिंबितत्वेन मनसो ज्ञानाश्रयत्वम् । तत्र मनस्तादात्म्याध्यासेन मनोभासकत्वं च बोध्यम् । उक्तानां त्रयाणां पक्षाणां मध्ये आद्ये असाक्षिणो जगदुपादानत्वे साक्षिणस्तद्वारा मनस्तादात्म्यम् । द्वितीये साक्षिण एव जगदुपादानत्वात् साक्षादेव तत् । अन्यथा तूपादानद्वारा । तृतीये तु साक्षिण एव जगदुपादानत्वात् साक्षादेव । वस्तुतस्तु यत्पक्षे यस्साक्षी, तदेवोपादानम् । अधिष्ठानस्यैवाध्यासिकतादात्म्येन भासकत्वात् । अतस्साक्षादेव तादात्म्यम् । **निरवयवस्येति** । साक्षिण इति शेषः । विचित्रत्वात् एकविधत्वाभावात् । सरूपस्येव नीरूपस्यापि प्रतिबिम्बभ्रमरूपकार्योपलम्भात् सरूपस्थलीयकारणाद्विलक्षणं कारणं नीरूपस्थले कल्प्यत इति भावः । न तु, प्रतिबिम्बस्य सरूपसावयवत्वेन प्रतीतिः । रूपावयवविशिष्टस्यैव हि मुखादेर्दर्पणाद्युपाध्यन्तर्गतत्वमारोपितं प्रतिबिम्बशब्देन व्यवह्रियते । तथा च कथं नीरूपादेः प्रतिबिम्बोक्तिस्तत्राह—**जपाकुसुमेत्यादि । प्रतिशब्दाख्यप्रतिबिम्बेति** । मठमध्यस्थपुरुषकर्णावच्छिन्नत्वेन उपलभ्यमानशब्दस्य मठान्तरुपरिभागावच्छिन्नाकाशरूपोपाध्यन्तर्गतत्वेन प्रतीयमानत्वात् प्रतिबिन्बत्वमस्तीति प्रतिबिम्बीभूतशब्दबोधिका प्रतिशब्द इत्याख्या यस्येत्यर्थः । तथा च प्रतिबिम्बस्य सरूपसावयवत्वेनैव धीरिति न नियमः । किं तूपाध्यन्तर्गतत्वरूपप्रतीबिम्बत्वेनैवेति भावः ।

म्बोपलम्भात्तयोः सम्प्रतिपन्नप्रतिबिम्बवैलक्षण्यानिरूपणात् । तथापीन्द्रियग्राह्यस्यैव प्रतिविम्ब इति चेन्न । व्यभिचारात् । अनिन्द्रियग्राह्यस्य साक्षिप्रत्यक्षस्याकाशस्यापि जलादौ प्रतिविम्बोपलम्भात् । अन्यथा जानुमात्रे

सम्प्रतिपन्नप्रतिबिम्बेति । प्रतिबिम्बत्वेन सर्वसम्मतमुखादिप्रतिबिम्बेत्यर्थः । दर्पणाद्यन्तर्गतत्वेन भ्रमो यावद्दर्पणसन्निधानं तदनुवृत्तिश्च मुखादिप्रतिबिम्बेऽस्ति। जपारूपादावपि स्फटिकाद्युपाध्यन्तर्गतत्वभ्रमो यावत्स्फटिकाद्युपाधिसन्निधानं तदनुवृत्तिश्चेति स्फटिकादौ प्रतीयमानजपाकुसुमरूपादेः मुखादिना साम्यमेव । न तु तस्य ततो वैलक्षण्यं निरूपयितुं शक्यमिति भावः । शङ्कते—तथापीति । नीरूपादेः प्रतिबिम्बस्वीकारेऽपीत्यर्थः । प्रत्यक्षस्येति । साक्षिभास्यस्येत्यर्थः । ननु, नभसः सुखादिवत् साक्षिभास्यत्वे अन्धस्यापि नभस्साक्षात्करोमीति व्यवहारः स्यादिति चेत्, स्यादेव । जाग्रत्स्वप्नयोर्हि भासमानमूर्तावच्छिन्नतया नभो भासत एव । ननूर्ध्वं व्यापृतचक्षुषो यावति नभोभागे संयोगो जायते तावानेव स भासते । तस्मात् नभश्चाक्षुषमिति प्राभाकरमतं न युक्तम् । किं च घटादौ भासमाने तदवच्छिन्नमेव नभो भातीति कुतस्सम्पूर्णमेव नभो भायात् । नभसश्चाक्षुषत्वे तु घटादाविव नभस्यपि यावति भागे चक्षुषस्संयोगः तावानेव स भासत इति युक्तमिति चेन्न । यथा हि कालस्य साक्षिबोध्यत्वेऽपि भासमानघटाद्यधिकरणरूपकाल एव तदा घटाद्याकारवृत्तेर्घटाद्यधिकरणलक्षणावरणविरोधित्वस्वीकारेण तस्यैवानावृतसाक्षिसम्बन्धात् तद्घटानैव इदानीं घट इदानीं पट इत्यादिप्रत्ययोपपत्तेश्चापरोक्षज्ञानत्वे तु अतीतानागतक्षणानां वृत्तिविषयत्वस्वीकारादेव सर्वप्रत्ययेषु विषयाधिकरणकालविषयत्वनियमोपपत्तेश्च, तथा नभसस्साक्षिबोध्यत्वे भासमानघटाद्यवच्छिन्नस्यैव तस्य तद्घटाद्याकारवृत्तेरेव घटाद्यवच्छिन्नाकाशावरणविरोधित्वेन तस्यैवानावृतसाक्षिसम्बन्धात्तावतैव घटाद्याकाशं पटाद्याकाशमित्यादिप्रत्ययोपपत्तेश्च । ऊर्ध्वं व्यापृतेन चक्षुषा यावानेवालोकभागो गृह्यते, तावदवच्छिन्नाकाशं साक्षिणा गृह्यते । अन्धेनापि त्वचा गृह्यमाण एव घटादौ तदवच्छिन्नं नभः साक्षिणैव गृह्यते । यदि च तेन तमो गृह्यते, तदा तदवच्छिन्नं नभोऽपि । एवं मनसि गृह्यमाणे तदवच्छिन्नं नभोऽपि शरीरस्यान्तर्बहिराकाशस्य प्रतीतेः । यदि च तमआद्यवच्छिन्नं नभः न प्रतीयत इत्यनुभवः तदा घटाद्याकारेन्द्रियजन्यमनोवृत्त्यभिव्यक्तसाक्षिभास्यं तदास्ताम् । नन्वाच्छादितमुखे घटादौ गृह्यमाणे तदन्तराकाशं साक्षिणा गृह्यतामिति चेन्न ।

Prof. V. VENKATACHALAM
VARANASI

ऽप्युदके अतिगम्भीरप्रतीतिर्न स्यात् । आकाशप्रतिबिम्बस्य सालोकस्य त्वेपि अधिष्ठानग्रहणार्थं चक्षुषोऽपेक्षणात् । एतेन नीलं नभ इत्यादि-विभ्रमेऽपि चक्षुरन्वयव्यतिरेकौ व्याख्यातौ । तत्र सालोकस्याकाशस्या

अन्तर्भागस्येन्द्रियाद्यसंयुक्तत्वेन तत्र साक्षिणोऽनभिव्यक्तया तदवच्छिन्नाकाशस्याभिव्यक्तसाक्षिसम्बन्धाभावात् । तस्मादाकाशाकारमनोवृत्तिं विनापि यद्देशावच्छेदेन साक्ष्यभिव्यक्तस्तद्देशावच्छिन्नभसस्तद्ग्राह्यतेति भावः । **जानुमात्रेऽप्युदकेऽतिगम्भीरप्रतीतिरिति** । जानुमात्रपरिमाणापेक्षयाऽधिकपरिमाणविशिष्टस्याकाशभागस्य जानुमात्रोदकान्तर्गतत्वेन प्रतीतिरित्यर्थः । जानुद्वयादिपरिमिते जले अन्तर्गततया यावत आकाशभागस्य धीस्तावतो जानुमात्रजलेऽपीति तदन्यथानुपपत्त्या तत्रोपरिस्थितस्य तावत आकाशस्य प्रतिबिम्बत्वमवश्यं वाच्यमिति भावः । ननूक्तव्यभिचारोक्तिर्न युक्ता । नभसोऽपि चाक्षुषत्वात् । चक्षुषा हि जलाभिहतेन नभो गृहीत्वा तत्र जलान्तर्गतत्वमारोप्यते । अन्यथा जानुद्वयादिपरिमितमाकाशमस्मिन्नुदकेऽन्तर्गतमिति भ्रमे चक्षुस्संयोगापेक्षा न स्यात् । उक्तभ्रमे आकाशस्य अधिष्ठानत्वेन अधिष्ठानज्ञानार्थं चक्षुरपेक्षेत्यस्य वक्तुमशक्यत्वात् । तथा च निमीलितचक्षुषोऽपि पुंसः तत्स्यात् । तत्राह—**प्रतिबिम्बस्येत्यादि** । **अधिष्ठानग्रहणार्थमिति** । अधिष्ठानसामान्यांशरूपस्य जलस्य चाक्षुषार्थमित्यर्थः । आकाशभागविशेषशून्यजलस्योक्तभ्रमभूलीभूताज्ञानविषयत्वरूपमधिष्ठानत्वम् । अतस्तत्सामान्यांशरूपजलज्ञानस्योक्तभ्रमहेतुत्वात्तादृशज्ञानार्थं चक्षुरपेक्षणेऽपि नभसश्चाक्षुषत्वासिद्ध्योक्तव्यभिचारोक्तिर्युक्तेति भावः । नन्वेवमपि 'नीलं नभ' इत्यादिभ्रमे नभस एवाधिष्ठानत्वात्तच्चाक्षुषार्थतया चक्षुरपेक्षणं वाच्यम् । तथा च नभसस्साक्षिमात्रवेद्यत्वहानिः । उक्तभ्रमे चक्षुरनपेक्षणे तु निमीलितचक्षुषोऽपि स स्यात्तत्राह—**एतेनेति** । अधिष्ठानसामान्यांशमिश्रस्य साक्षिमात्रवेद्यत्वेऽप्युक्तांशज्ञानरूपस्य भ्रमकारणस्य निष्पत्तये चक्षुरपेक्षणमिति वचनेनेत्यर्थः । व्याख्यातौ चक्षुषो भ्रमोपयोगिताग्राहकत्वेन सूचितौ । 'नीलं नभ' इति भ्रमश्चक्षुस्संयोगेसति भवति, असति च न भवतीत्यन्वयव्यतिरेकाभ्यां तादृशभ्रमकारणेऽधिष्ठानसामान्यज्ञाने चक्षुरपेक्षेति निर्णीयत इति भावः । ननु, तथापि नभसश्चाक्षुषत्वमेवागतम् । तत्राह—**तत्रेति** । नीलं नभ इति वाक्येन कथ्यमाने

धिष्ठानत्वात् । तस्माच्चाक्षुषबिम्बमेव रूपसापेक्षं, नान्यदित्यवधेयम् । तथाप्यात्मनः प्रतिबिम्बे किं प्रमाणमिति चेत् शृणु । 'रूपं रूपं प्रतिरू-

---

भ्रम इत्यर्थः । सालोकस्य सालोकस्यैव । अधिष्ठानत्वात् अधिष्ठानसामान्यांशरूपत्वात् । तथा च नभश्शब्देन सालोकनभ एव कथ्यत इति भावः । नन्वेवं सालोकाकाशस्यैव जले प्रतिबिम्ब इति वक्तुं शक्यत्वादिन्द्रियग्राह्यस्यैव प्रतिबिम्ब इति नियमे कथं व्यभिचार उक्त इति चेन्न । चक्षुरपेक्षणान्यथानुपपत्त्या नभोनैल्यभ्रमे सालोकाकाशस्यैव भानम् । जले आकाशप्रतिबिम्बभ्रमे तु सालोकनभसो नियमेन भाने मानाभावः । तत्र चक्षुरपेक्षणस्य जलरूपाधिष्ठानग्रहणार्थत्वेनैवोपपन्नत्वादिति भावः । ननु, यत्र यत्र प्रतिबिम्बभ्रमस्तत्रतत्रोपाधिनासंयुक्तास्तेनाभिहताश्चक्षूरश्मयो बिम्बेन सह पश्चात्सम्यूज्य बिम्बे चाक्षुषमुत्पादयन्ति । पश्चाद्बिम्बे उपाध्यन्तर्गतत्वमारोप्यत इति क्रमनियमः । तथा च रूपं विना बिम्बभूतद्रव्यचाक्षुषाभावात्कथं नभसः प्रतिबिम्बत्वमुक्तम् । तत्राह— **तस्मादिति** । इन्द्रियग्राह्यस्यैव प्रतिबिम्ब इति नियमाभावादित्यर्थः । चाक्षुषप्रतिबिम्बं चाक्षुषद्रव्यस्य प्रतिबिम्बम् । रूपसापेक्षम् उक्तरीत्याऽपेक्षितबिम्बचाक्षुषजनकरूपसापेक्षम् । तथा च सर्वत्र प्रतिबिम्बभ्रमे नोक्तक्रमनियम इति नभःप्रतिबिम्बे बाधकाभावादिति भावः । **किं प्रमाणमिति** । ननूक्तरीत्या प्रमाश्रयत्वान्यथानुपपत्तिर्मनस आत्मप्रतिबिम्बवत्त्वे मानमित्यस्योक्तत्वात्कथं पुनर्मानप्रश्न इति चेदुच्यते । प्रमिणोमीत्यादिप्रत्यये प्रमातादात्म्यमेव भाति । न तु प्रमाश्रयत्वम् । मातु वा तदेव । तथापि प्रमाया अज्ञातविषयकज्ञानरूपत्वात् । ज्ञानस्य चासत्त्वापादकाज्ञानविषयत्वाभावप्रयोजकविशिष्टचिद्रूपत्वात्तादृशचिद्रूपस्यैव ब्रह्मणीव मनस्यप्याश्रयत्वं कल्पितं स्वीक्रियते । तत एव 'आनन्दो विषयानुभवः नित्यत्वं चेति सन्ति धर्मा अष्टथक्त्वेऽपि चैतन्यात्पृथगिवावभासन्त' इत्यादिपञ्चपाद्युक्त्या निर्धर्मकब्रह्मणो धर्मो देहादौ कथमध्यस्यत इति पूर्वपक्षस्समाहितः । तथा च तत एव ब्रह्मणि ज्ञानमितिवत् मयि ज्ञानं अहं ज्ञानवानिति व्यवहारः । न चाहं जानामीति वद्धटो जानातीति व्यवहारस्स्यादिति वाच्यम् । उक्ताज्ञानविरोधिविशिष्टचिद्रूपज्ञानस्य ब्रह्मधर्मस्य देहमनसोरेव संसर्गाध्यासात् पूर्वपूर्वतदध्याससंस्काररूपकारणस्य तयोरेव सम्भवेन तयोरेव तदध्यासस्वीका-

पो बभूवे'तदस्य रूपं प्रतिचक्षणाय मायाभासेन जीवेशौ करोती'त्यादिश्रु-
ति:; एकश्र् बहुधा चैव दृश्यते जलचन्द्रवदिति स्मृतिः; स एष इह प्रविष्टः

रादुक्तज्ञानसमानाधिकरणतदनुकूलव्यापारविशेषस्यैवोक्तव्यवहारविषयत्वेन तस्य घटादावसत्त्वात् । तथा चासत्त्वापादकाज्ञानविरोधिविशिष्टरूपेण चितो मनआश्रितत्वस्वीकारेऽपि साक्षिणो मनस्यन्तर्गतत्वरूपप्रतिबिम्बितत्वे न मानम् । अत एव वाचस्पतिमते तन्न स्वीक्रियत इति श्रुतेरेव तत्र मानतां वक्तुं किं प्रमाणमिति प्रश्नोपन्यासः । **रूपमिति** । रूप्यते अहमिति धिया व्यवह्रियते आत्मा येन मनसा तत् रूपं रूपं प्रतिरूपः प्रतिबिम्बरूपः । प्रतिबिम्बशब्दस्येव बिम्बस्वरूपार्थकरूपपदान्तकस्य प्रतिरूपशब्दस्यापि प्रतिबिम्बार्थकत्वात् स पक्षी भूत्वा पुरःपुरुष आविशदिति पूर्ववाक्येन मनोरूपासु पूषु तदन्तर्गतत्वरूपस्य प्रवेशस्योक्तत्वात्तदुत्तरेण 'तदेतदृषिः पश्यन्नवोचद्रूपंरूपं प्रतिरूपो बभूवे' तिवाक्येनोक्तप्रवेशस्यैवोक्तेर्युक्तत्वात् । **तदिति** । प्रतिबिम्बात्मकमित्यर्थः । प्रतिचक्षणाय अहमित्यादिव्यवहाराय । माया अविद्या आभासेन स्वगतप्रतिबिम्बेन जीवेशौ प्रतिबिम्बबिम्बरूपौ करोति **सर्वान्प्रति** व्यवहारयति । जीवविषयकव्यवहारस्याभासप्रयुक्तत्वं स्फुटमेव । **ईशविषय**कस्यापि व्यवहारस्य तदस्त्येव । जीवत्वोपहितचिद्रूपस्य आभासप्रयुक्तत्वेन ईशप्रयुक्तस्येशविषयकव्यवहारस्येशद्वारा आभासप्रयुक्तत्वसम्भवात् । इत्यादिश्रुतिरित्यादिपदेन 'यथा ह्येको ज्योतिरात्मा विवस्वानपो भिन्ना बहुधैकोऽनुगच्छन् । उपाधिना क्रियते भेदरूपो देवःक्षेत्रेष्वेवमजोऽयमात्मा' इत्यादिश्रुतयो ग्राह्याः । **एकधेत्यादि** । परमार्थत एकरूप एवात्मा, तथाप्युपाधिप्रतिबिम्बितबहुप्रकारैर्दृश्यते प्रतीयते । जलप्रतिबिम्बितनानाप्रकारैश्चन्द्र इवेत्यर्थः । 'एक एव तु भूतात्मा भूते भूते व्यवस्थित' इति पूर्वार्धम् । **तदित्यादि** । तत् जगत् सृष्ट्वा ब्रह्म तदेव जगत् अनुप्राविशदित्यर्थः । यद्यप्यविद्यायां मनसि च प्रतिबिम्बरूपः प्रवेशः । न तु शरीरघटादौ, तथाप्यविद्यामनस्तद्वृत्तिद्वारा सर्वत्र दृश्ये प्रवेशः । अतीन्द्रियार्थेष्वपीश्वरीयमायावृत्तिविशिष्टरूपेषु प्रतिबिम्बत्वरूपप्रवेश इति बोध्यम् । न चैवमीश्वरीयमायावृत्तिद्वारैव सर्वत्र प्रवेशसम्भवात् मनस्तद्वृत्तिषु प्रवेशस्य प्रकृतश्रुतिबोध्यत्वे मानाभाव इति वाच्यम् ।

'रूपंरूप'मित्यादिश्रुत्या 'पुरश्चक्रे द्विपदः पुरश्चक्रे चतुष्पदः पुरः स पक्षी भूत्वा पुरः पुरुष आविशत्' इत्यादिपूर्विकया मनःप्रवेशस्यैव प्रतीतेः । 'स एष इह प्रविष्ट आनखाग्रेभ्य' इत्यादिपुर्विकया 'प्राणन्नेव प्राणो नाम भवति वदन्वाग्वि'त्यादिश्रुत्या च तथैव प्रतीतेः । श्रुत्यर्थापत्तिः श्रुतेरन्यथानुपपन्नत्वधीः । प्रवेशबोधनमात्रेण न मनसि प्रतिबिम्बलाभः । अधिष्ठानतयापि प्रवेशसम्भवात् । परं तु वटादावप्यधिष्ठानतया प्रवेशसम्भवान्नखाग्रपर्यन्तप्रवेशस्य मनस्येवोक्तेः प्रतिबिम्बत्वरूपमनोन्तर्गतत्वरूपप्रवेशविशेषतात्पर्यकत्वं विनानुपपन्नत्वग्रहाच्छ्रुतेया तादृशप्रवेशबोधनमिति भावः । आभास एव चेत्यस्य द्वितीयाध्यायतृतीयपादस्थसूत्रस्यायमर्थो भाष्योक्तः । आभास एव च एष जीवः परस्यात्मनो जलसूर्यकादिवल्लक्षितव्यः । न स एव साक्षात् । नापि वस्त्वन्तरम् । यथा नैकस्मिन् जलसूर्यके कम्पमाने जलसूर्यकान्तरं कम्पते एवमेकैकस्मिन् जीवे कर्मफलसम्बन्धिनि जीवान्तरस्य न तत्फलसम्बन्ध इति । 'अत एव चोपमा सूर्यकादिवदि'ति तृतीयाध्यायद्वितीयपादस्थसूत्रस्यायं भाष्योक्तार्थः । यत एकोयमात्मा निर्विशेषचिद्रूपो नेति नेतीत्यादिश्रुतिप्रमितः । अत एवापारमार्थिकीं विशेषवत्तामभिप्रेत्य जलप्रतिबिम्बितसूर्यवदित्युपमोपादीयते । 'यथा ह्येको ज्योतिरात्मा विवस्वानि' त्यादिवाक्येष्विति । इत्यादीत्यादिपदेन 'अम्बुवदग्रहणात्तु न तथात्वम् ।' वृद्धिह्रासभाक्त्वमन्तर्भावाद्उभयसामञ्जस्यादेवम् ' । 'दर्शनाच्चे'ति सूत्राणि गृह्यन्ते । मूर्तसूर्यदेशापेक्षया दूरदेशस्थत्वं सूर्यप्रतिबिम्बोपाधेरम्बुनो गृहीतं, तथा मूर्तात्मदेशापेक्षया दूरदेशस्थत्वं च मनसो न दृष्टम् । अतो नात्मनो मनसि प्रतिबिम्बोदयः । उपमावाक्यं तु वृद्धिह्रासभाक्त्वं यथा जलगतसूर्यके प्रतीयते, तथा मनोगतमात्मनीति बोधयति । न तु यथा जले सूर्यस्यान्तर्भावः सूर्यप्रतिबिम्बत्वं, तथा मनस्यात्मन इत्याद्यसूत्रार्थः । 'अहं सुखी दुःखी' त्यादिप्रत्ययेष्वात्मनोन्तर्भावरूपं प्रतिबिम्बत्वमादायैव वृद्धिह्रासभाक्त्वमेव पूर्वोक्तोपमावाक्येन बोध्यते । न त्वन्तर्भावं त्यक्त्वा । उभयोर्विप्रकृष्टमूर्तप्रतिबिम्बस्य सन्निकृष्टामूर्तप्रतिबिम्बस्य च सामञ्जस्यादुपपन्नत्वात् । सन्निकृष्टामूर्ताकाशादेर्जलादाविव तादृशात्मनोऽपि अहङ्कारप्रत्ययेन मनस्यन्तर्भावसिद्धिः । भ्रमहेतूनां नानाविधानामनुभवबलेन कल्पनादिति द्वितीयसूत्रार्थः । 'स पक्षी भूत्वा पुरः पुरुष आविशे'दित्यादिश्रुत्या आत्मनो मनोन्तर्भावो-

'स एतमेव सीमानं विदार्यैतया द्वारा प्रापद्यत' 'तत्सृष्ट्वा 'तदेवानुप्राविश' दित्यादिप्रवेशश्रुत्यर्थापत्तिः, आभास एव च' 'अत एव चोपमा सूर्यकादिव'दित्यादिसूत्राणि च तत्र[1] प्रमानानि । तस्य च प्रतिबिम्बस्य सत्यत्वमेवेति प्रतिबिम्बवादिनः । मिथ्यात्वमेवेत्याभासवादिनः । स्वरूपे तु न विवाद एवेत्यन्यदेतत् । अचेतनविलक्षणत्वन्तु श्रुतिसिद्धम् अनुभवसिद्धं च । तस्मात्सिद्धमन्तःकरणस्य प्रतिबिम्बाध्यासद्वारा प्रमातृत्वम् । ननु, अध्यासोपि नोपपद्यते । तथा हि आत्मनि वानात्मा अध्यस्यते—अनात्मनि वा आत्मा । नाद्यः । तस्य निस्सामान्यविशेषत्वेन सर्वदा भासमानत्वेन सादृश्यादिरहितत्वेन

क्तिदर्शनाच्चोक्तार्थः प्रामाणिक इति तृतीयसूत्रार्थः । ननु, (प्रतिबिम्बस्योपाध्यन्तर्गतत्वाविशिष्टबिम्बरूपत्वमिति) विवरणकारादिमते मनःप्रतिबिम्बस्वरूपस्य चिद्रूपत्वादहमित्याकारधीविषयत्वं युक्तम् । तद्धियश्चेतनविषयकत्वात्प्रतिबिम्बस्वरूपमुपाध्यन्तर्गतमारोपितं मिथ्येति वार्तिककारादिमते तु तस्य कथमहमित्याकारधीविषयत्वम् । तत्राह—**तस्येत्यादि** । **श्रुतिसिद्धमिति** । 'तदस्य रूपं प्रतिचक्षणाय' इत्यादिश्रुतिसिद्धमित्यर्थः । मिथ्यात्वपक्षेऽपि तस्याधिष्ठानीभूतचित्तादात्म्याध्यासाच्चेतनत्वमिति भावः । अनुभवसिद्धम् अहं चेतन इत्याद्यनुभवसिद्धम् । एवं च मनसि चित्प्रतिबिम्बे श्रुत्यादिसिद्धे तत एव प्रमाश्रयत्वं तत्रोपपादनीयम् । प्रेमास्पदत्वनित्यत्वादेर्ब्रह्मधर्मस्य दृश्यमात्रे संसर्गाध्यासस्वीकारेऽपि देहमनसोरेव ज्ञानरूपब्रह्मधर्मसंसर्गाध्यास इति कल्पने मानाभावात् । वाचस्पतिमते त्वमूर्तस्य प्रतिबिम्बास्वीकारेऽपि स प्रामाणिक इत्याशयेनाह—**तस्मादिति** । चित्प्रतिबिम्बस्य प्रामाणिकत्वादित्यर्थः । **प्रतिबिम्बेति** । अविद्योपहितचित्प्रतिबिम्बेत्यर्थः । प्रमातृत्वं प्रमाश्रयत्वम् । **नन्वध्यासोऽपीत्यादि** । मनसः प्रमातृत्वानुपपत्तेश्चित्प्रतिबिम्बाध्यासेन निरासो न युक्तः । अध्यासस्याप्यनुपपत्तेरित्यर्थः । **निस्सामान्येत्यादि** । आत्मनः स्वप्रकाशत्वेन सदा भानात्सादृश्यादिदोषहीनत्वाच्च नाधिष्ठानता । अज्ञातं हि दोषसंसृष्टमधिष्ठानं भवति । ननु, चिद्रूपेणात्मा स्वप्रकाशः । न तु पूर्णानन्दरूपेण । तथा चेदन्तेन ज्ञातापि शुक्तित्वेनाज्ञाता शुक्तिरिव सोऽधिष्ठानं स्यात् । अत उक्तं—**निस्सामान्यविशेषत्वेनेति** । चिद्रूपः सामान्यांशः धर्मिणि भासमानत्वात् । पूर्णानन्दस्तु वि-

१, 'प्रतिबिम्बरूपं सत्यमिति' इति पाठान्तरम् ।

चाधिष्ठानत्वासम्भवात् । नापि द्वितीयः । तस्य मिथ्यात्वाभ्युपगमात् । मिथ्यावस्तुनोधिष्ठानत्वे शून्यवादप्रसङ्गात् । तस्य च सत्यत्वे तदनिवृत्तेरनिर्मोक्षप्रसङ्गाच्च । न हि सत्यं क्वचिन्निवर्तते निवर्त्यमानं वा ज्ञानेन।श्रुतयश्च—'भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः । क्षीयन्ते चास्य कर्माणि त-

शेषांश इति विभागस्याप्यध्यासत्वेन अध्याससामान्यम्प्रति न तस्योपपादकतेति भावः । तस्य अनात्मनः । मिथ्यात्वाभ्युपगमात् सिद्धान्तिना स्वरूपतो मिथ्यात्वस्वीकारात् । मिथ्यावस्तुनः मिथ्यास्वरूपस्य । शून्यवादप्रसङ्गात् शून्यवादिनं प्रत्यापादितदोषप्रसङ्गात् । सर्वस्य मिथ्यात्वे हि ज्ञानानां बाध्यबाधकत्वव्यवस्था न स्यात् । भ्रमयैव भ्रमो बाध्यते । शून्यवादे च सर्वस्य मिथ्यात्वात् न प्रमास्तीति बाध्यबाधकभावो न क्वापीति दोष आपादितः । तस्य अनात्मनः । **अनिर्मोक्षेति** । निश्शेषसंसारोच्छेदाभावेत्यर्थः । निवर्तते उच्छिन्नं भवति । ननु प्रपञ्चसत्यतामते घटादिकं दण्डादिप्रहारेणोच्छिद्यत एव । तत्राह—**निवर्त्यमानामिति** । उच्छिद्यमानमित्यर्थः । सत्यमित्यनुषज्यते । तथा च सत्यं यत् तत् ज्ञानोच्छेद्यं न भवतीत्यर्थः । ननु सेतुदर्शनादिना पापादिकं सत्यमुच्छिद्यत एव परमत इति चेन्न । ज्ञानशब्दस्य स्वप्रयोजकाज्ञानसमानविषयकज्ञानार्थकत्वात् । तथा च यदसत्यं तत् स्वप्रयोजकाज्ञानसमानविषयकज्ञानेनोच्छिद्यत इत्यर्थः । स्वपदं ज्ञानपरम् । तादृशञ्च ब्रह्मज्ञानमेव । **भिद्यत इत्यादि** । हृदयस्याहङ्कारचित्तादात्म्याध्यासस्य ग्रन्थिरिव मूलीभूतमज्ञानम् । भिद्यते विदार्यते आवरणशक्तिमुच्छिद्य भोगसमाप्तिपर्यन्तं विक्षेपशक्तिमात्रविशिष्टं स्थाप्यते । शक्तिद्वयानङ्गीकारे अज्ञानस्वरूपमुच्छिद्य तत्कार्यसंस्कारदेहादिमात्रं स्थाप्यत इत्यर्थः । सर्वसंशयाः आत्मा कर्ता न वा अकर्तापि भोक्ता न वा अभोक्तापि ब्रह्म न वेत्यादिसंशयाः । छिद्यन्ते भिद्यन्ते आवरणशक्तिरूपमूलोच्छेदादुत्पत्त्ययोग्याः क्रियन्त इति यावत् । कर्माण्यभुज्यमानानि पूर्वं सञ्चितपापपुण्यानि । क्षीयन्ते उपादानीभूतविक्षेपशक्तिविशिष्टाज्ञानसत्त्वपर्यन्तं विद्यमानान्यपि स्वाश्रये मनसि सुखादिकं न जनयन्ति । 'तस्य पुत्रा दायमुपयन्ति सुहृदः साधुकृत्यांद्विषन्तः पापकृत्यां' इति श्रुत्या ज्ञानिनः पुण्यादिना तदीयसुहृदादौ फलजननोक्तेः । उक्तप्राप्त्यस्वीकारे तु नश्यन्तीत्यर्थः । अस्य दृष्टतत्त्वस्य । हृदयग्र

स्मिन् दृष्टे परावरे ॥' 'तमेव विदित्वातिमृत्युमेति' । 'नान्यः पन्था विद्यते अयनाय ।' 'तरति शोकमात्मवि'दित्याद्याः ज्ञानात्सर्वसंसारनिवृत्तिं दर्शयन्त्यः तस्य च मिथ्यात्वं सूचयन्ति 'एकमेवाद्वितीयं' 'अतोऽन्यदार्तं' 'नेह

न्ध्यादिषु त्रिषु तदन्वयः । तस्मिन्प्रत्यगात्मनि दृष्टे साक्षात्कृते । परावरे परः ईशोऽपि अवरः अध्यस्तत्वेनापकृष्टः यस्माच्छुद्धब्रह्मणः तदभिन्ने । तमेवात्मानमेव । अतिमृत्युमेति अज्ञानमतिक्रामति नाशयतीति यावत् । अन्यः तन्मात्रज्ञानादन्यः । पन्थाः उपायः । अयनाय स्वरूपप्राप्तये । तरति नाशयति । शोकम् अज्ञानम् । सर्वसंसारेति । सर्वप्रपञ्चमूलाज्ञानेत्यर्थः । तस्य सर्वप्रपञ्चस्य । सूचयन्तीति । आज्ञानादेर्ज्ञाननिवर्त्यत्वरूपमिथ्यात्वोक्त्या तन्मूलकसर्वप्रपञ्चस्य मिथ्यात्वं सूचितम् । अज्ञानोच्छेदकस्याज्ञानमूलकदृश्योच्छेदकत्वनियमादित्यर्थः । एकं सजातीयद्वितीयरहितम् । एव स्वगतधर्मरूपद्वितीयरहितम् । अद्वितीयं विजातीयद्वितीयशून्यम् । 'सदेव सोम्येदमग्र आसी'दिति पूर्ववाक्यम् । ननु नानेन वाक्येन सर्वदृश्यमिथ्यात्वं बोध्यते । सृष्टिपूर्वकालावच्छेदेन ब्रह्मणो दृश्याभावबोधनादिति चेन्न । दृश्याभावे अग्रकालावच्छिन्नत्वानन्वयात् । इदं हि वाक्यं सद्रूपं जगत्कारणमनभ्युपगच्छतां सौगतानामद्वितीयजगत्कारणमनभ्युपच्छतां तार्किकादीनां च मतनिराकारणाय । तथा च यदग्रे सृष्टेः पूर्वमासीत् तत् सद्वितीयञ्चेति बोध्यते । तत्र निषेधस्य प्राप्तिपूर्वकत्वात् । येन सम्बन्धेन यद्देशकालावच्छेदेन यस्य दृश्यस्य सद्रूपवैशिष्ट्यं प्राप्तं, तेन सम्बन्धेन तदवच्छेदेन तदभावसम्बन्धस्य तत्र बोधनात् सर्वदृश्यस्य मिथ्यात्वं सिध्यत्येव । 'सदेव सोम्येद' मित्यत्र इदंशब्देन प्रपञ्चात्मकब्रह्मणि द्वितीयसामान्याभावबोधनात् इदन्तादात्म्यस्य उद्देश्यतावच्छेदकत्वेन उद्देश्यतावच्छेदकप्रपञ्चतादात्म्यकालावच्छेदेन द्वैताभाववत्त्वलाभेन मिथ्यात्वलाभात् । यद्यपि प्रतियोगिसत्त्वकालावच्छेदेनाभावस्य बोधः, तथापि स नाहार्यः । प्रतियोगिन इदन्त्वरूपदृश्यत्वेन भानात् आत्मभिन्नत्वरूपद्वितीयत्वावच्छिन्नाभावत्वेनाभावस्य भानात् । 'नेहनानास्ती'त्यादौ तु इहपदेन प्रपञ्चवतो बोधनादुद्देश्यतावच्छेदकप्रपञ्चसत्त्वकालावच्छेदेन द्वैताभाववत्त्वधीः । अतो नेह नानेत्यादिवाक्यान्यपि व्याख्यातानि । अतोऽन्यदार्तामिति । अतः आत्मतोऽन्यत् आर्तं पीडितम् ।

नानास्ति किं चन' 'अथात आदेशो नेति नेती'त्याद्याः श्रुतयः साक्षादेव मिथ्यात्वं प्रतिपादयन्ति । दृश्यत्वेन शुक्तिरजतादिवन्मिथ्यात्वानुमानाच्च ।

येन सम्बन्धेन यदवच्छेदेन यत् यत्र तिष्ठति , तत्तदवच्छेदेन तत्र वर्तमानाभावस्य तत्सम्बन्धावच्छिन्नप्रतियोगितात्वविशिष्टमित्यर्थः । एतस्यापि निषेधवाक्यत्वेन प्राप्त्यनुसारेण निषेधबोधकत्वात् । **दृश्यत्वेनेत्यादि** । ब्रह्मान्यत् मिथ्या । दृश्यत्वात् । शुक्तिरूप्यवदित्यनुमानादित्यर्थः । पक्षतावच्छेदकावच्छेदेन साध्यसिद्धेरुद्देश्यत्वात् शुक्तिरूप्यादौ न सिद्धसाधनम् । ब्रह्मणि बाधवारणाय ब्रह्मान्यदित्येव पक्षः । दृश्यत्वञ्च दृग्विषयत्वम् । मिथ्यात्वञ्च सत्स्वरूपान्यत्वम् । ननु सत्स्वरूपस्य ब्रह्मणो भेदे साध्ये सिद्धसाधनम् । सत्त्वावच्छिन्नप्रतियोगिताकभेदे साध्ये किमिदं सत्त्वं ज्ञाननिवर्त्यत्वादिरूपमिथ्यात्वशून्यत्वं चेत्तर्हि तादृशमिथ्यात्वमेव साध्यमस्तु । किञ्च तादृशमिथ्यात्वशून्यं सिद्धान्ते ब्रह्मैव । तथा च ब्रह्मत्वापेक्षयोक्तशून्यत्वस्य गुरुत्वेन प्रतियोगितानवच्छेदकत्वात् साध्याप्रसिद्धिरिति चेन्न । परमते उक्तशून्यत्वस्य ब्रह्माभिन्नेऽपि स्वीकारेण पररीत्या परान्प्रत्युक्तसाध्योपन्याससम्भवात् । गुरुरूपस्यापि नव्यैः प्रतियोगितावच्छेदकत्वस्वीकारात् । ज्ञाननिवर्त्यं सर्वं ज्ञेयमित्याकारकयत्किञ्चिद्धीविषयत्वावच्छिन्नप्रतियोगिताकभेदस्य साध्यत्वसम्भवात् । प्रपञ्चसत्यत्ववादिना उक्तधीविषयत्वस्य ब्रह्मणीव प्रपञ्चेऽपि स्वीकारात् न सिद्धसाधनम् । उक्तधीविषयताव्यक्तेः शुद्धाया एवावच्छेदकतया निवेशान्नावच्छेदकगौरवनिबन्धनसाध्याप्रसिद्धिः । अलीकवादिनं प्रत्यनुमानोपन्यासे अलीकभेदोऽपि पक्षे विशेषणं वाच्यम् । अन्यथा अलीके भागासिद्ध्यापत्तेः । अनुकूलतर्कस्तु दृश्यं यदि मिथ्या न स्यात् अनुपपद्यमानसम्बन्धं न स्यात् इत्यादि पूर्वमेव दर्शितम् । ज्ञाननिवर्त्यत्वं वा साध्यम् । तच्च स्वप्रयोजकाज्ञानाधिकरणकालपूर्वत्वशून्यवृत्तिज्ञानकालकत्वरूपं ज्ञानोच्छेद्यत्वम् । तत्त्वज्ञानरूपस्य वृत्तिज्ञानस्य कालोपहितत्वात् प्रयोजकाज्ञानाधिकरणकालपूर्वत्वशून्य इत्युक्तम् । स्वपदं यत्र ज्ञाननिवर्त्यत्वं स्थाप्यं तत्परम् । शुक्तिरूप्यादावपि ब्रह्मज्ञानमादायैव साध्यसत्त्वम् । अज्ञानाधिकरणकालपूर्वत्वस्थले लाघवादज्ञानकालत्वमेव निवेश्यम् । ननु जीवेशभेदादेरना-

दित्वेन स्वप्रयोजकाप्रसिद्ध्या तत्र लक्षणासङ्गतिरिति चेन्न । स्वप्रयोजकपदेन स्वकाले वर्तमानमात्रस्योक्तत्वात् । तथा च जीवेशभेदकाले अज्ञानं वर्तत इति तत्र लक्षणान्वयः । अत एवाज्ञानस्याज्ञानकाले सत्त्वादेतस्य साध्यस्य मिथ्यात्वलक्षणत्वे वृत्तिज्ञानं स्वाविषयकं निवेश्यम् । तेन ब्रह्मणि नातिव्याप्तिः । अथ वा येन सम्बन्धेन येन रूपेण यदवच्छेदेन यत्र यदस्ति तदवच्छेदे तत्र विद्यमानाभावस्य तदवच्छिन्नतद्रूपावच्छिन्नप्रतियोगित्वं साध्यम् । कपालादौ समवायादिसम्बन्धेन घटत्वादिरूपेण यदवच्छेदेन घटादिकमस्ति, तदवच्छेदेन कपालादिनिष्ठात्यन्ताभावस्य समवायादिसम्बन्धावच्छिन्नघटत्वावच्छिन्नप्रतियोगित्वस्य व्यधिकरणधर्मावच्छिन्नाभावमते घटादौ स्वीकारात् । तत्सम्बन्धावच्छिन्नायास्तादृशाभावप्रतियोगितायाः अवच्छेदकत्वं वा तद्रूपं साध्यते । तेन न साध्याप्रसिद्धिः । ननु, व्याप्यवृत्तिपदार्थेषु नैतादृश साध्यसम्भवः । तदवच्छेदकाप्रसिद्धेः । किं च सिद्धान्ते अभावानां सर्वदेशकालवृत्तित्वेन किञ्चिद्देशकालावच्छिन्नत्वे मानाभावः । तथा च उक्तसाध्यं सिद्धान्ते अप्रसिद्धमिति चेत् तर्हि यदवच्छेदतदवच्छेदावनिवेश्यावच्छिन्नवृत्तिकत्वशून्य एव निवेश्यः । न चैवं घटादेरसर्वदेशकालनिष्ठाभावप्रतियोगित्वस्वीकारेऽलीकत्वमेव स्यादिति वाच्यम् । घटादेरसत्तादात्म्यवत्त्वेन प्रतीयमानत्वेनालीकवैलक्षण्यात् । अलीकं तु न तथा प्रतीयते । अलीकं सत् इति बुद्धेः बौद्धेनाप्यस्वीकारात् सत्तादात्म्यविनाशवत्त्वादिमत्त्वेनैव घटादेरलीकवैलक्षण्यसम्भवाच्च । तथा च सर्वदेशकालनिष्ठात्यन्ताभावप्रतियोगित्वे सति सत्तादात्म्यशून्यत्वमविनाशित्वं वा अलीकलक्षणम् । बौद्धमतेऽपि यद्यत् सत् तत् क्षणिकमिति नियमात् । प्रपञ्चस्य क्षणिकत्वेन विनाशित्वमलीकस्य स्थिरत्वेनाविनाशित्वमिति स्वीक्रियत एवेति ध्येयम् । आदेशः उपदेशः ज्ञापनम् । नेति नेतीति । प्रत्यक्षादिप्रमाणैर्यद्यत् प्राप्तं तत् इतिशब्दद्वयेन उच्यते । तथा च कपालादौ घटादिकं समवायसम्बन्धेन कालविशेषावच्छेदेन वर्तत इति यत्, तत् नेत्यर्थः तत्र तेन सम्बन्धेन तदवच्छेदेन तत्, नास्तीति यावत् । घटादौ तु घटत्वादिकं समवायादिसम्बन्धेन अवच्छेदकमनपेक्ष्यैव प्राप्तं तथैव निषिध्यते । साक्षादेवेति । आर्षपदेन पीडितोक्त्याऽबोधपीडितत्वलाभेन ज्ञाननिवर्त्यत्वरूपमिथ्यात्वविशिष्टं बोध्यते । अद्वितीयमित्यादौ तु नञ्पदेन प्रतियोग्यवच्छेदका-

आत्माध्यस्ततयैवानात्मनि सिद्धे तत्रात्माध्यासः, अनात्माध्यासेन चात्मनो दोषसादृश्यादिसम्भवात् तत्र चानात्माध्यास इत्यात्माश्रयादिदोषप्रसङ्गाच्च । एतेनात्मानात्माध्यासस्याविद्यात्मकत्वान्नाविकल्पा-

---

वच्छिन्नाभाववति व्याप्यवृत्त्यभाववति वा लक्षणया । 'नेह नानास्ती'त्यादौ तु नञ्पदेन तादृशाभावो लक्षणया बोध्यते । यत्किञ्चिदवच्छेदेन वर्तमानस्यावच्छेदकाविशेषितस्य वा द्वितीयाभावस्य ब्रह्मणि प्रत्यक्षादिप्राप्ततया उक्ताभावबोधने उक्तवाक्यावैयर्थ्यादुक्ताभावघटितमिथ्यात्वस्यानुमानव्याख्याने व्युत्पादितत्वेन तदुत्तरमथात इति ग्रन्थो व्याख्यातः । तदेवमनात्मनो मिथ्यात्वेन श्रुतिसिद्धत्वात्तस्यात्मसंसर्गाध्यासम्प्रति अधिष्ठानत्वानुपपत्तिमुक्त्वाऽत्माश्रयादिदोषादपि तामाह—**आत्माध्यस्ततयेत्यादि** । आत्माध्यस्ततया आत्मसंसृष्टत्वेनैव प्रतीयमानतया । आत्माध्यासः आत्मसंसर्गाध्यासः । सिद्धान्ते आत्मनोऽनध्यासात् । तथा च आत्मनो घटस्सन्निति तत्तादात्म्येनैव प्रत्ययादनात्माध्यासस्य आत्मसंसर्गघटितस्यात्मसंसर्गस्यापेक्षणीयत्वादात्माश्रयः । आत्मसंसर्गापेक्षोऽनात्मा तत्सापेक्ष आत्मसंसर्ग इत्यन्योन्याश्रयश्चेति भावः । **सादृश्यादीति** । सादृश्यादिज्ञानेत्यर्थः । अध्यासकारणसंस्कारोद्बोधकतया सादृश्यादिज्ञानापेक्षयेति भावः । **आत्माश्रयादीति** । अनात्मव्यक्तीनां मध्ये स्वस्य स्वं प्रति दोषविषया कारणत्वे आत्माश्रयः । द्वयोः परस्परं प्रति तत्स्वीकारे अन्योन्याश्रयः । स्वकारणकारणं प्रति स्वस्य तत्स्वीकारे चक्रकम् । एकं प्रत्यन्यस्येत्यादिस्वीकारे अनवस्थेत्यर्थः । **एतेनेति** । अव्यवहितपूर्वोक्तात्माश्रयादिना व्यवहितपूर्वोक्तेनानिर्मोक्षप्रसङ्गश्रुतिविरोधप्रसङ्गाभ्यामनात्मसत्यत्वासम्भवेन चेत्यर्थः । आत्मानात्माध्यासस्य व्यावहारिकयोरात्मसंसर्गानात्माध्यासयोरविद्यात्मकत्वात् अविद्यारूपदोषमूलकत्वात् व्यावहारिकाध्यासे यद्यपि कामकर्मणोरपि दोषत्वम् । आवृतं ज्ञानमेतेन ज्ञानिनो नित्यवैरिणा । कामरूपेण कौन्तेयेत्यादिगीतोक्तेः । अज्ञानं भ्रमाधिष्ठानचैतन्यम् । तथा चाधिष्ठानावारकत्वेनैव दोषत्वलाभात् 'कर्मक्षये ज्ञानमपास्तदोषमित्यादि' महीघटत्वं घटतः कपालः कपालिका चूर्णरजस्ततोऽणुः । जनैस्स्वकर्मस्तिमितात्मनिश्चयैरालक्ष्यते' इत्यादिविष्णुपुराणोक्तेश्च । स्वकर्मभिस्तिमितः प्रतिबद्धः आत्मनिश्चयो येषान्ते । तथापि पूर्वपूर्वकामकर्मणोरुत्तरोत्तरतद्धेतुत्वेनानवस्थादोषे प्राप्ते प्रवाहरूपेण बीजांकुरादिवत् अनादित्वेन तत्परिहारो वाच्यः ।

वसर इत्यपास्तम् । स्वप्रकाशात्मनि अविद्याया अप्यनुपपत्तेः । तथा हि सा ध्यस्ता, * अनध्यस्ता वा । तत्राद्ये कथं नात्माश्रयादिदोषप्रसङ्गः । अन्त्ये तस्यानुच्छेदादनिर्मोक्षप्रसङ्गः । सर्वस्याध्यासमूलत्वे भ्रमप्रमादिव्यवस्था च न स्यात् । एकस्यैवात्मनः प्रमाणमेयप्रमितिप्रमातृरूपता च विरुद्धा । अविरोधाभ्युपगमे वा सौगतमतापत्तिरिति । अत्रोच्यते । अहं मनुष्यः कर्ता भोक्तेत्यादिप्रतीतिस्तावत्सर्वजनसिद्धा ।

अविद्याया दोषविषया हेतुत्वे तु नानवस्थादोष इत्याशयेन तदेव सिद्धान्तिनोक्तम् । विकल्पावसरः आत्माश्रयादिविकल्पावसरः । अविद्याया अनादित्वेन तत्रान्यदोषानपेक्षेति भावः । स्वप्रकाशेति । स्वप्रकाशस्य सत्यत्वात् तत्प्रकाशरूपाविद्या मिथ्यैव । तथा च वक्ष्यमाणदोषापत्तेस्तदनुपपत्तिरिति भावः । **आत्माश्रयादीति** । अविद्यारूपदोषस्य उत्पत्तौ तस्यैव हेतुत्वे आत्माश्रयः । तत्कार्यस्य हेतुत्वेऽन्योन्याश्रयः । अविद्यान्तरस्य हेतुत्वे तत्रापि अविद्यान्तरस्येत्यादिस्वीकारे त्वनवस्थादिकम् । अकार्यत्वन्तु नाविद्यारूपाध्यासस्य सम्भवति । प्रातीतिकाध्यासे तददर्शनादिति भावः । सर्वस्य व्यावहारिकप्रातीतिकरूपस्याध्यास मूलत्वे भ्रममात्रविषयत्वे । भ्रमप्रमादिव्यवस्था 'इदं रजत' मित्यादिधीर्भ्रमः, 'इयं शुक्तिरित्यादिधीः प्रमा, आद्या बाध्या द्वितीया बाधिकेत्यादिव्यवहारः । **एकस्येत्यादि** । चित एव प्रमाणत्वादिकं सिद्धान्ते स्वीक्रियते । तद्विरुद्धमित्यर्थः । ननु अध्यासोपाधिभेदेन एकस्यापि प्रमाणादिरूपत्वे न विरुद्धम् । तत्राह—**अविरोधेत्यादि** । **सौगतेति** । अध्यस्तकारणभेदेन ज्ञानमेव प्रमात्रादिरूपमिति सौगतमतादविशेषापत्तिरित्यर्थः । ननु अध्यासोऽपीत्यादिना सौगतमतापत्तिरित्यन्तेन उक्तान् सर्वपूर्वपक्षान् समाधातुं प्रतिजानीते—**अत्रोच्यत इति** । **न स्मृतिरिति** । यद्यपि नाबाधितार्थकस्मृतिरित्येव वक्तुमुचितम् । भ्रमत्वमात्रस्यैव प्रकृते वाच्यत्वात्, तथापि ग्रहणलक्षणोऽस्यरूपत्वेन यो भ्रमत्वनिषेधः सांख्यादिसम्मतः तन्निराकरणाय स्मृतित्वनिषेधः । अपरोक्षावभासत्वात् प्रत्यक्षरूपतया प्रतीयमानत्वात् । ननु, अहमित्यंशे प्रत्यक्षम् । मनुष्य इत्यंशे तु स्मृतिः । तयोस्तद्विषययोश्च भेदाग्रहादेकत्वव्यवहारः । अथवा 'अहं मनुष्य' इत्यत्र मनुष्यदेहस्वामी आत्मा विषयः एवम् 'अहं कर्ते'त्यत्र कर्तृमनस्स्वामी । 'अहं भोक्तेत्यत्र सुखाद्याश्रयमनस्स्वामी ।

सा च न स्मृतिरपरोक्षावभासत्वाद्भेदाग्रह- अपूर्वकत्वाच्च नापि प्रमा श्रुति-
युक्तिबाधितत्वात् । तथा च श्रुतयः ५ 'योऽयं विज्ञानमयः ६ प्राणेषु हृ-

---

तथा च स्वामित्वतत्संसर्गयोस्स्मृतिरूपमपि विशेष्ये प्रत्यक्षमेकं सम्भवति । तत्राह—भेदाग्रहपूर्वकत्वादिति । भेदाग्रहजन्यविशिष्टबुद्धित्वादित्यर्थः । उपस्थितविशेष्यविशेषणयोर्भेदाग्रहत्वेन विशिष्टविषयकप्रवृत्त्यादिहेतुत्वे गौरवात् । विशेष्यविशेषणविशिष्टविषयकधीत्वेनैव तदुचितमिति भ्रमत्वं बाधितवैशिष्ट्यज्ञानत्वरूपम् । न तूपस्थितयोर्भेदाग्रहत्वम् । आत्मनि शरीरमनसोर्भेदाग्रहजन्यं च । 'अहं मनुष्य'इत्यादिज्ञानं नात्मनि शरीरादिस्वामित्वविषयम् । तस्यात्मनि शरीरादेर्भेदग्रहपूर्वकत्वनियमादिति भावः । श्रुतय इति । ब्रह्मस्वरूपतां दर्शयन्तीत्यग्रे अन्वयः । 'विज्ञानमयः 'विज्ञानं यज्ञं तनुते कर्माणि तनुतेऽपिचे'ति श्रुत्युक्तकर्तृरूपविज्ञानशब्दितबुद्ध्यभिमानी 'स्त्रीभियोऽयं जाल्म' इति वत्तदभिमानित्वोक्त्या तद्भेदलाभः । एवं प्राणेषु प्राणाभिमानी हृदि मनस्यभिमानसम्बन्धेन विद्यमानम् । अन्तर्जन्यज्ञानरूपबहिर्ज्योतिर्भिन्नम् । ज्योतिः स्वप्रकाशचैतन्यम् । पुरुषः पुरुषु दृश्येषु अनुस्यूत इत्यनेनापि सर्वदृश्यभिन्नचिद्रूपलाभात् । अकर्तृभोक्तृत्वलाभः । अत एव 'ध्यायतीवलेलायतीवे'त्याद्युत्तरवाक्येन परमार्थतो ध्यानादिशून्यत्वमुक्तम् । विज्ञानं स्वप्रकाशचित्स्वरूपम् आनन्दस्वरूपम् । न तु मत्वर्थप्रत्ययलोपात् आनन्दयुक्तम् । आनन्दो ब्रह्म एष एव परमः आनन्दः एतस्यैवान्यानि भूतानि मात्रामुपजीवन्ती'त्यादिश्रुतिभ्यः । अन्यानि औपाधिकभेदेन एतस्मात् भिन्नानि । भूतानि जीवाः मात्रां विषयसुखरूपमंशम् । उपजीवन्ति भुञ्जते । अनन्तमभावाप्रतियोगी । ब्रह्म शुद्धत्वाद्यतिशयवत् । अपहतो निर्गतः पाप्मा यस्मात् सोऽपहतपाप्मा । साक्षादपरोक्षात् अपरोक्षचिद्रूपम् । न तत्तादात्म्येन घटादिवदपरोक्षः । सर्वान्तरस्सर्वदृश्याधिष्ठानम् । अशनाया पिपासे प्राणस्य । शोकमोहौ मनसः । जरा मृत्यू देहस्य धर्मः । अत्येति तेषामनाधारः । स यत्तत्रेत्यादिवाक्यं जाग्रदाद्यवस्थाबोधकवाक्यानामेकैकोत्तरमस्ति । तथा च जागरितत्तद्वाक्योत्तरवाक्यस्थस्य तत्रेत्यस्य जाग्रदवस्थायामित्यर्थः । एवं स्वप्नसुषुप्तिवाक्योत्तरस्थस्य स्वप्ने सुषुप्तावित्यर्थः । स जीवो यदिति ज्ञेये ज्ञानक्रियायाञ्च विशेषणं पश्यति जानाति अनन्वागतः असंसृष्टः तेन ज्ञेयेन ज्ञानेन चापरोक्षविषयस्यापि सर्वानुस्यूतसद्रूपचिदात्मके

द्यन्तर्ज्योतिः पुरुषः' 'अयमात्मा ब्रह्म' ५ 'सत्यं ज्ञानमनन्तं ब्रह्म' 'विज्ञानमानन्दं ब्रह्म', 'य आत्मा अपहतपाप्मा' 'यत्साक्षादपरोक्षात् ब्रह्म' 'य आत्मा सर्वान्तरः' 'योशनाया पिपासे ५ शोकं मोहं जरां मृत्युमत्येति' 'स यत्तत्र किं चित्पश्यत्यनन्वागतस्तेन भवति' ५ 'असंगोह्ययं पुरुष इत्याद्या अकर्तृ भोक्तृ परमानन्दब्रह्मरूपतामात्मनो दर्शयन्ति। युक्तयश्च विकारिणः परिच्छिन्नत्वेन अनात्मत्वापत्तेः स्वेनैव स्व-

---

जीवे तादात्म्यप्राप्त्या निषेधो न व्यर्थः । असङ्गः सम्बन्धसामान्यशून्यः हि शब्दोऽसङ्गत्वहेतुतां द्योतयति । अयन्दृग्रूपः पुरुषः सर्वदृश्येषु अधिष्ठानत्वेनानुस्यूतः । तथा च दृग्दृश्ययोस्सम्बन्धानुपपत्तेः । सर्वदृश्यानां दृशि कल्पितत्वात् । असङ्गत्वहेतुर्नासिद्ध इति भावः । इत्यादिपदेन सलिलएको द्रष्टाद्वैतो भवतीत्यादिश्रुतिसङ्ग्रहः । ब्रह्मरूपतां अद्वितीयेशरूपताम् । श्रुतिबाधितत्वं प्रदर्श्य युक्तिबाधितत्वं प्रदर्शयति । युक्तयश्चेतीत्याद्याः इत्यग्रेऽन्वयः । युक्तयोऽनुमानं तदनुकूलतर्कश्च तत्र निर्धर्मकनित्यस्वप्रकाशसुखात्मक एक एवात्मेति अनेन वक्ष्यमाणवाक्येनात्मा निर्धर्मकः । नित्यत्वान्नित्यः । स्वप्रकाशसुखरूपत्वादित्यनुमानद्वयं विवक्षितम् । स्वप्रकाशसुखरूपत्वयोः स्वप्रकाशानभ्युपगमे इत्यादिनानुमानद्वयं विवक्षितम् । विकारिण इत्यादिना च तर्काविवक्षिताः । तत्र निर्धर्मकत्वं परमार्थत्वरूपेण धर्माभावस्तेन धर्माभावरूपधर्मस्य साध्यस्य व्यावहारिकत्वे स्वव्याघातः। प्रातीतिकत्वे अनुमानस्यामावसत्त्वम्। पारमार्थिकत्वे अद्वैतश्रुतिविरोधः। धर्माभावस्वरूपत्वे साध्ये सधर्मकत्वाप्रतिक्षेपापत्तिरित्यादि परास्तम् । वस्तुतो व्यावहारिको धर्माभावो न स्वव्याघातकः । धर्मतदभावयोर्व्यावहारिकयोस्स्वाप्नयोर्गजतदभावयोरिवाविरोधात् । अत्र गज इति स्वाप्नज्ञानोत्तरं कदापि नात्र गजोऽस्तीति स्वाप्नज्ञानस्येव इहात्मनि धर्मोऽस्तीति ज्ञानोत्तरमात्मा निर्धर्मकइत्यनुमितेः प्रतियोगिसमसत्ताकाभावविषयकत्वसम्भवात् । विस्तृतञ्चैतच्चन्द्रिकायाम् । ननु यदि निर्धर्मको न स्यात् तदा नित्यो न स्यात् । धर्मधर्मिणोस्तादात्म्येन धर्मोत्पत्तिनाशाभ्यान्धर्मिण उत्पत्तिनाशरूपविकारापत्तिरिति तर्को वाच्यः । तत्र इष्टापत्तिरेवेत्यत आह—विकारिण इत्यादि । आत्मनो विकारस्वीकारे अभावप्रतियोगित्वरूपपरिच्छेदादात्मत्वस्याभावापत्तिरित्यर्थः । आत्मा यदि कर्तृत्वादिमान् स्यात्तदा द्रष्टा न स्यादित्यभेदे द्रष्टृदृश्यभावानुपपत्तिरिति तर्कमाह—स्वेनेत्यादि । स्वेन आत्मना स्वस्य कर्तृत्वादिमदात्मनो ग्रहणे विषयीकरणे कर्ता सा-

स्य ग्रहणे कर्तृकर्मविरोधात्, दृग्दृश्यसम्बधानुपपत्ते र्भेदेनाभेदेनवा धर्मध-र्मिभावानुपपत्तेश्च । ज्ञानानित्यत्वपक्षे तत्तद्व्यक्तिभेदध्वंसप्रागभावसमवाय-

क्षी विषयिव्यवहर्तृत्वात् स एव कर्मविषयः । व्यवहार्यत्वात् तत्र विरोधः । एकत्वे सम्बन्धासम्भवेन विषयिविषयभावसम्पादकतादात्म्यसम्बन्धानुपपत्तिरित्यर्थः । कर्तृत्वं ज्ञानं चिद्रूपं प्रत्यपि सम्भवति । जन्यविषयतावच्छिन्नत्वरूपेण तस्य जन्यत्वात् नित्यविषयावच्छिन्नं ज्ञानमपि क्षेमसाधारणजन्यतावदिति वा । तथा च कर्तृकर्मत्वयोर्व्यवहारक्रियानपेक्षत्वेऽपि न क्षतिः । ननु तादात्म्यं प्रत्यनुयोगित्वं विषयत्वं प्रतियोगित्वं विषयित्वं तत्राद्यं कर्तृत्वादिविशिष्टरूपेण द्वितीयं शुद्धरूपेणैकस्यात्मनस्सम्भवत्येव । तत्राह—दृग्दृश्येत्यादि । दृग्दृश्ययोस्सम्बन्धनिर्वचनस्य पूर्वोक्तरीत्या असम्भवात् । दृगात्मनि विषयिणि विषयरूपं सर्वं मिथ्येति निर्धर्मकत्वमात्मन इति भावः । आत्मा यदि पारमार्थिकधर्मवान् स्यात्तदा निरूपणार्हधर्मसम्बन्धवान् स्यादिति तर्कमाह—भेदेनेति । तादात्म्यान्यसम्बन्धेनेत्यर्थः । अभेदेन तादात्म्यसम्बन्धेनानुपपत्तेनेति शेषः । **अनुपपत्तेरिति** । तादात्म्येन तदन्येन वा सम्बन्धेन सम्बन्धयोर्धर्मधर्मिता वाच्या । तादात्म्यादिसम्बन्ध एव तु न सम्भवति सम्बन्धान्तरेणासम्बद्धस्य तस्य सम्बन्धस्य सम्बन्धत्वासम्भवेन सम्बन्धान्तरं वाच्यम् । एवं तस्यापि सम्बन्धान्तरमिति अनवस्थापत्तेः । न च सम्बन्धस्य सम्बन्धान्तरेण न सम्बन्धता । किं तु स्वेनैव सम्बन्धेनेति वाच्यम् । स्वस्य स्वप्रतियोगिकसम्बन्धत्वासम्भवात् । स्वं न स्वीयमित्यनुभवात् । अन्यथा धर्मधर्मिणोरपि स्वेन सम्बन्धतापत्त्या सम्बन्धमात्रलोपापत्तेः । अथ तयोस्सम्बन्धान्तरं प्रतीयते । तस्य तु न प्रतीयत इति चेत् सत्यम् । प्रतीयमानमनुपपन्नंमिथ्येति भावः । आत्मा यदि कर्तृत्वादिधर्मकस्स्यात् तदा कर्तृत्वादिधर्मविशिष्टस्य ज्ञानरूपत्वन्न स्यादिति तर्के आत्मा ज्ञानरूपो न भवत्येव तस्य नित्यत्वेनोत्पत्तिनाशवत्त्वेनानुभूयमानज्ञानरूपत्वासम्भवात् । इतीष्टापत्तिर्निरस्यति । **ज्ञानेत्यादि** । अनित्यत्वपक्षे अनित्यत्वादितार्किकादिमते—**तत्तद्व्यक्तीत्यादि** । तत्तज्ज्ञानव्यक्तयस्तासां भेदध्वंसप्रागभावाः समवायः ज्ञानत्वजातिः आदिपदेन तज्ज्ञानतध्वंसेषु अनन्तकारणानीत्येतेषामनन्तानां स्वीकारे गौरवादित्यर्थः । एकत्वाभ्युपगमे एकैव ज्ञानव्यक्तिः सर्वज्ञेयविषयिकेति स्वीकारे अतिलाघवात् । आत्मन एव ज्ञानस्वरूपत्वसम्भवेन ज्ञानस्वरूपस्याप्यकल्पनीयत्वेनातिलाघवात् ।

ज्ञानत्वजात्याद्यभ्युपगमे गौरवात्, एकत्वाभ्युपगमे चातिलाघवात् । घट-ज्ञानं पटज्ञानमित्युपाधिभेदपुरस्कारेणैव ज्ञानभेदप्रतीतेः । स्वतस्तु ज्ञानं ज्ञानमित्येकस्वरूपावगमात् । तदुत्पत्तिविनाशप्रतीत्योश्चावश्यकल्प्यवि-

---

ननु, घटज्ञानं पटज्ञानमिति भेदप्रतीतेः । कथमेकं ज्ञानं सर्वस्येत्यत आह— **घटज्ञानमित्यादि** । **इत्युपाधिभेदपुरस्कारेणेति** । धर्मिप्रतियोगिरूपोपाध्योरित्थं-भूतौ घटविषयकत्वपटविषयकत्वरूपौ यौ भेदौ विशेषौ तत्पुरस्कारेण तदुल्लेखे-नेत्यर्थः । एवकारार्थं स्फुटयति । **स्वत इति** । उपाधिपुरस्कारं विनेत्यर्थः । ज्ञानं ज्ञानमित्येकरूपावगमात् ज्ञानमित्याकारकसर्वप्रत्ययैरेकस्यैव ज्ञानस्वरूपस्य विष-यीकरणात् । तुशब्देन तज्ज्ञानव्यक्तिरेकज्ञानव्यक्तिभिन्नेत्युपाध्यपुरस्कृतप्रत्ययो नास्तीत्युक्तम् । ननु, ज्ञानस्य उत्पत्तिनाशप्रत्ययात् कथमात्मरूपता । तत्राह— **तदुत्पत्तीत्यादि** । **विषयसम्बन्धेति** । विषयज्ञानोभयसम्बन्धेत्यर्थः । विषयज्ञान-योस्सम्बन्धमविषयीकृत्य ज्ञानमुत्पन्नन्नष्टमिति प्रत्ययस्यानुदयात् ज्ञानोत्पत्त्यादिप्र-त्यये ज्ञानविषयसम्बन्धविषयकत्वमवश्यं कल्प्यम् । तथा च घटज्ञानमुत्पन्नन्नष्ट-मिति धीरुपपद्यते । अयमिदानीं शिखी जातः अयं शिखी नष्ट इति धीवत् **विशेषणोत्पत्तिनाशविषयकत्वात्** । तथा हि प्रत्यक्षज्ञानस्थले यावन्मनोऽवच्छि-न्नचिता घटादेस्सम्बन्धस्तिष्ठति तावदेव घटमहं साक्षात्करोमीतिव्यवहारात् । तादृशसम्बन्धोत्पत्तिनाशावेव घटप्रत्यक्षमुत्पन्नन्नष्टमिति धीविषयौ । स च सम्ब-न्धो वृत्तेः चिदुपरागार्थत्वपक्षे मनोऽवच्छिन्नचिति घटादेः स्वावच्छिन्नवृत्तिप्र-तिबिम्बितत्वम् । आवरणनाशार्थत्वपक्षे स्वनिष्ठस्याज्ञानविषयत्वस्य प्रयोजकं यत् स्वावच्छिन्नवृत्त्यादिकन्तद्विशिष्टत्वम् । अर्थविवेचनज्ञानामीतिधीस्थले घटादिविषय-कस्यासत्त्वापादकाज्ञानस्य आश्रयत्वाभावः । यावन्मनोऽवच्छिन्नचितिः तावदेव घटादिजानामीति व्यवहारात् तादृशाभावरूपस्य घटादिसम्बन्धस्य उत्पत्तिना-शावेवोक्तधीविषयौ । असत्त्वापादकाज्ञानाश्रयत्वाभावविशिष्टचितः स्वाकारवृत्तिप्र-तिबिम्बितचितस्तादृशाज्ञानाविषयकत्वप्रयोजकविशिष्टचितो वा ज्ञानात्यर्थत्वेनोक्त-व्यवहारे उक्ताभावस्य विशेषणत्वात् । ननूक्ताभावोऽत्यन्ताभाव एव अज्ञानना-शो हि न ज्ञानेन जन्यते । किं तु अज्ञानतत्कार्यविरोधीत्युक्तम् । तथा च कथं तस्योत्पत्तिविनाशाविति चेत् सत्यम् । तथापि तत्तत्कालस्योत्पत्तिविनाशसम्भवेन तत्तत्कालविशिष्टाधिकरणात्मकविशेषणतासम्बन्धविशिष्टरूपेण उक्ताभावस्य उत्प-

षयसम्बन्धविषयतयाप्युपपत्तेः । उपाधिपरामर्शमन्तरेण स्वत एव घटात्

त्तिनाशसम्भवात्तदतिरिक्तनित्यविशेषणतादेरभावीयसम्बन्धत्वपक्षे तत्तत्कालावच्छिन्नरूपेण तस्य तत्सम्भवात् स हि सम्बन्धो नित्योऽपि प्रतियोगिमति देशे प्रतियोगिसम्बन्धावच्छेदककालावच्छिन्न एव । तथा च घटाद्याकारमनोवृत्तिकाल एव घटाद्यज्ञानाभावसम्बन्धस्य प्रमातरि स्वीकारात् । तत्कालावच्छिन्नरूपेण तदुत्पत्त्यादिसम्भवः । सुखादेरपि विद्यमानत्वदशायामेव प्रमातर्यज्ञानाभावस्वीकारात् तत्कालावच्छिन्नस्य तदभावस्य उत्पत्त्यादिसम्भवः । घटादिकार्यं प्रति जीवस्योपादानत्वपक्षे घटादौ विद्यमाने जीवतादात्म्यस्य तदा सदासत्त्वात् सदैव घटादिकंजानामीति प्रत्ययापत्तिः । विद्यमानसुखादाविव भासकतानियामकतादात्म्यरूपस्य जीवोपरागस्य सत्त्वात् । अतोऽसत्त्वापादकाज्ञानं तादृशप्रत्ययविरोधिघटाद्यवच्छेदेन स्वीक्रियते । तथा चोक्ताज्ञानाविषयत्वघटित एव जानात्यर्थः । न तु घटादितादात्म्यापन्नजीवभेदतो नोक्तानुपपत्तिः । यदा तु ब्रह्मैव घटाद्युपादानं तदा उक्ततादात्म्यास्वीकारात् असत्त्वापादकाज्ञाने मानाभावात् तदविषयत्वघटितो ज्ञानात्यर्थो न सम्भवतीति । घटाद्याकारवृत्तिप्रतिबिम्बितचैतन्यं घटादिज्ञानम् । सुखादिप्रतिबिम्बितं सुखादिज्ञानम् । न च जीवस्य जगदुपादानत्वपक्षेऽप्युक्ताज्ञाने मानाभावः । घटाद्याकारवृत्तिप्रतिबिम्बिता चित् घटादिज्ञानमित्यादेर्वक्तुं शक्यत्वात् जीवोपादानत्वस्य वाचस्पतिसम्मतत्वेन सिद्धान्तबिन्दावुक्तत्वात् । वाचस्पतिमते च वृत्त्यादौ चित्प्रतिबिम्बास्वीकारात् आवरणभङ्गार्थत्वमेव वृत्तेस्स्वीक्रियते । न तु प्रतिबिम्बघटितोपरागार्थत्वम् । यदि च वाचस्पतिमतेऽपि चिदुपरागो वृत्तेः प्रयोजनं अन्यथा तन्मते पञ्चवाज्ञानस्वीकारे त्वावरणभङ्गस्य प्रयोजनत्वसम्भवेऽपि तदस्वीकारपक्षे प्रयोजनाभावात्तदा विषयावच्छिन्नचिति जीवचितोर्भेदनाश एव प्रयोजनम् वृत्तेरिति वाच्यम् । सोऽयं वृत्तेरभेदाभिव्यक्त्यर्थत्वपक्षः । असत्त्वापादकाज्ञानास्वीकारपक्षे जीवचैतन्यस्य घटादिना तादात्म्यास्वीकारपक्षे च घटाद्याकारवृत्तिप्रतिबिम्बितरूपेण सुखादिप्रतिबिम्बितरूपेण च चित उत्पत्त्यादिसम्भवात् । चित्प्रतिबिम्बानङ्गीकर्तृवाचस्पतिमते तु वृत्तिविशिष्टरूपेण सुखादिरूपेण च चित उत्पत्त्यादिव्यवहार इति भावः । ननूपाधिविशिष्टरूपेण भेदमादाय भेदबुद्धिमुपपाद्यैकत्वसमर्थने घटादावप्येकत्वं स्यात्तत्राह—**उपाधीति** । तत्तद्देशकालविशिष्टत्वरूपोपाधीत्यर्थः । परामर्शमुल्लेखमन्तरेण

घटान्तरस्य भेदप्रतीतेः तत्प्रतिबन्दीग्रहासम्भवात्, आकाशकालदिशामपि नानात्वापत्तेश्च । कर्तृत्वादेर्वास्तवत्वेऽनिर्मोक्षप्रसङ्गात् स्वप्रकाशानभ्युपगमे च जगदान्ध्यप्रसङ्गात् परमप्रेमास्पदत्वेन च तस्यानन्दरूपत्वात् ।

नाना । स्वतः तत्तद्घटव्यक्तित्वाभ्याम् । तत्प्रतिबन्दीग्रहासम्भवात् घटादेरप्येकत्वमस्तु । भेदधीस्त्वौपाधिकभेदेन उपपादनीयेति प्रतिद्वन्द्विन उपादानासम्भवात् । ननु तथापि पुरुषभेदेन ज्ञानं वाच्यम् । चैत्रीयं ज्ञानं न मैत्रेऽस्तीत्यादिप्रत्ययात्तत्राह—**आकाशेत्यादि** । घटाकाशं पटे नास्ति तद्घटकाल एतद्घटकालः न प्राची न प्रतीचीत्यादिप्रत्ययैराकाशादिस्वरूपभेदो विषयीक्रियताम् । अथ तत्र घटकालोपाधिदिगुपाधिविशेषविशिष्टरूपेण भेदो विषयस्तर्हि प्रकृतेऽपि चैत्रीयत्वादिविशिष्टरूपेणाभावो विषय इति न ज्ञानं नानेति भावः । ननु, 'न हि घ्रातुर्घ्रातेर्विपरिलोपो विद्येतेऽविनाशित्वा'दित्यादिश्रुत्या घ्राणजवृत्त्यादिसामर्थ्यरूपघ्रात्यादेरविनाशोक्तेः आत्मनः कृत्यादिजननशक्तिरूपकर्तृत्वादेर्ज्ञानानुच्छेद्यतया सत्यत्वेन कथमात्मनः पारमार्थिकत्वेन धर्माभाववत्त्वम् । तत्राह—**कर्तृत्वादेरित्यादि** । **अनिर्मोक्षेति** । विद्वान्नामरूपाद्विमुक्तः इत्यादिश्रुत्या सर्वनामरूपोच्छेदस्य ज्ञानाधीनतया बोधितस्य त्यागेत्यर्थः । तथा च न हीत्यादिश्रुतिर्घ्राणेन्द्रियाद्यभिव्यक्तचित्स्वरूपानाशबोधिका । अत एव न तु तद्द्वितीयमस्ति ततोन्यद्विभक्तं यज्जिघ्रेदित्याद्युत्तरवाक्येन चिदन्यस्य विषयतदाकारवृत्तितत्साधनेन्द्रियाभावेन घ्राणजप्रत्यक्षाभावः । न तु चिदभावादिति उक्तमिति भावः । अथवा कर्तृत्वादिधर्मोत्पत्तिनाशाभ्यामात्मन उत्पत्त्याद्यावश्यकत्वे कथं नित्यज्ञानरूपता । तत्राह—**कर्तृत्वादेरिति** । तथा च मिथ्याधर्मोत्पत्त्यादिना नात्मन उत्पत्त्यादीति भावः । ननु, स्वप्रकाशसुखरूपत्वेन साधनीयं नित्यत्वम् । तत्र स्वप्रकाशसुखरूपः आत्मा यदि नित्यो न स्यात् तदा मोक्षरूपपरमपुरुषार्थो न स्यादिति तर्कोऽनुकूलो वाच्यः । स्वप्रकाशत्वे तु किं साधकम् । तत्राह—**स्वप्रकाशेत्यादि** । चकारस्तुशब्दार्थे । सुखरूपस्यात्मनो यदि स्वप्रकाशत्वं न स्वीक्रियते, तदा जगच्छ्रवणाद्यधिकारिमात्रस्य मोक्षबोधरूपपरमपुरुषार्थादर्शनरूपान्ध्यप्रसङ्गः । द्वितीयाभावेन मोक्षरूपात्मसुखस्य परप्रकाश्यत्वासम्भवात् । अप्रकाशमानसुखस्यापुरुषार्थत्वात् । अथवात्मनः स्वप्रकाशत्वास्वीकारे जगत्सु सर्वदृश्येष्वान्ध्यस्याप्रकाशस्य प्रसङ्गः अप्रकाशेनात्मचैतन्येन दृश्यप्रकाशनासम्भवात् । प्रकाशान्तराणां कल्पने अनवस्थानादित्यर्थः । आस्तां स्वप्रकाशत्वं सुखरूपत्वे को हेतुः । तत्राह—**परमप्रेमास्पदत्वेनेति** । चकरस्तु-

निर्धर्मकनित्यस्वप्रकाशसुखात्मक एवात्मेत्याद्याः । तस्मात् परिशेषात् भ्रान्तिरियमिति स्थिते तत्कारणमपि योग्यं किञ्चित्कल्पनीयम् । कल्प्यमानं च तदद्वितीयात्मनि अध्यस्ततयैव धर्मिग्राहकमानेन सिद्ध्यतीति न जानामीति साक्षिप्रतीतिसिद्धमनिर्वाच्यमज्ञानमेव तत् । न चेदमभावरूपम् । ज्ञानस्य नित्यत्वेन तदभावानुपपत्तेरित्युक्तत्वात् । धर्मिप्रतियोगिज्ञानाज्ञा-

---

शब्दार्थे । मा भूवमिति न किं तु भूयासं सदेतीच्छा प्रेमा । सा परमा अन्येच्छानधीना तद्विषयत्वेनात्मनः सुखरूपतासिद्धेः । असुखे हीच्छा सुखरूपफलेच्छाधीनैव न तदनधीना । यद्यपि सुखरूप आत्मा सिद्धः, तथाप्युत्तरकालसम्बन्धविशिष्टरूपेण तस्य भावित्वेनैवेच्छाविषयत्वम् । ननु सुखमिव दुःखाभावेऽपि परमप्रेमदर्शनात् दुःखाभाव एवात्मा किं न स्यादिति चेन्न । सुखत्वेन ज्ञानत्वमेवोक्तप्रेम्णः प्रयोजकम् । न तु दुःखाभावत्वेन ज्ञानत्वम् । गौरवात् । तथा च सुखाभिव्यक्तिसाधनत्वज्ञानेनैव दुःखाभावे प्रेमेति सुखाभिव्यक्तीच्छाधीनोऽयं परमप्रेमविषय इति परमप्रेमविषयत्वेन दुःखाभावरूपत्वानुमानासम्भव इति भावः । अत्रेदं पर्यवसितम् । धर्मधर्मिभावापत्तेश्चेत्यन्तं निर्धर्मकेत्यत्र तर्काणां हेतुत्वबोधकम् । नानात्वापत्तेश्चेत्यन्तं तु नित्येत्यत्र । अनिर्मोक्षप्रसङ्गादित्यन्तं तदुभयत्र परिशिष्टं स्वप्रकाशकसुखरूपत्वे हेतुपरम् । तस्मात् आत्मनः निर्धर्मकत्वेनात्मनि प्रतीयमानस्य मनुष्यादितादात्म्यकर्तृत्वादेर्मिथ्यात्वात् । इयम् अहं मनुष्यः कर्त्ता भोक्तेत्यादिधीः । तत्कारणं सविषयकभ्रमस्य परिणामिकारणम् । योग्यं परिणामितायोग्यम् । ननु तस्य कल्पनारूपमानविषयत्वेन सत्यत्वादद्वैतश्रुतिविरोधः । तत्राह—**कल्प्येत्यादि** । यतो अद्वितीयत्वेन श्रुत्यनुमानसिद्ध आत्मनि कल्प्यमानम् अतत्स्वरूपात्मकधर्मिग्राहकमानेन कल्पनारूपेण तदध्यस्तं मिथ्याभूतमेव कल्प्यं भवतीत्यर्थः । **इति न जानामीत्यादि** । यतः कल्पनया मिथ्यात्वेन सिध्यति, अतोऽनिर्वाच्यं तद्वस्तु अहमात्मानं न जानामीत्याकारसाक्षिसिद्धाज्ञानाभिन्नमेवेत्यर्थः । तस्य साक्षिसिद्धाज्ञानैक्योक्तेः फलमाह—**न चेत्यादि** । इदम् उक्तसाक्षिसिद्धम् अज्ञानम् । अभावरूपम् आत्मज्ञानाभावरूपम् । ज्ञानस्य आत्मव्यवहारप्रयोजकसाक्षिरूपस्य । **ज्ञानाभाव इति** । आत्मव्यवहारप्रयोजकज्ञानाभावेत्यर्थः । नन्वात्मविषयकज्ञानाभावरूपं तत् । साक्षिज्ञानं तु न तथा । तत्राह—**धर्मीत्यादि** । 'आत्मानमहं न जानामीति' प्रत्यये आत्मज्ञानाभावस्याहमर्थे धर्मिणि विषयीकरणे अभावबुद्धौ धर्मिप्रतियोगिज्ञानयोर्हेतुत्वात् पूर्वं तयोस्सत्त्वे अहमर्थे आ-

नाभ्याञ्च व्याघातापत्तेः।नापि भ्रमसंशयतत्संस्कारपरंपरारूपम्।अपरोक्षत्वात् अतीतानागतभ्रमसंशयतत्संस्काराणाञ्चापरोक्षत्वेन ज्ञातुमशक्यत्वात् । आवरणात्मकत्वात् भ्रमोपादानत्वाच्च। आत्मनो निर्विकारत्वात्, ६ अन्तः-

---

त्मज्ञानाभावस्यासत्त्वादुक्तप्रत्ययस्याप्रमात्वापत्तिः । पूर्वं तयोरसत्त्वे कारणाभावादुक्तप्रत्यय एव नोत्पद्यत एव । अथ तयोर्नाशोत्पत्तिक्षणे उक्तप्रत्ययोत्पत्तौ नोक्तदोष इति चेन्न । तादृशज्ञानयोस्स्वरूपसतोरेवाभाववत्त्वधीप्रतिबन्धकत्वेन उक्तक्षणेऽपि तदनुपपत्तेः । तदुक्तं—'न हि जानन्नेव न जानामीति प्रत्येती'ति । उक्तप्रत्ययस्य धर्मिप्रतियोगिविषयकत्वतदभावाभ्यां व्याघातस्यापरिहाराच्च । यथा ह्युक्तप्रत्ययस्य उत्पत्तिक्षणे पूर्वोत्पन्नयोस्तयोस्सत्त्वे तयोरात्मविषयकत्वेन व्याघातः, तथोक्तप्रत्ययस्यैव धर्मिप्रतियोगिविषयकत्वे धर्मिप्रतियोगिनोरात्मघटितत्वेनात्मविषयत्वात् वर्तमानमात्मज्ञानाभावं गृह्णतः उक्तप्रत्ययस्यानुपपत्तिरिति भावः । ननु, निर्विकल्पकात्मज्ञानाभावरूपत्वे नोक्तदोष इति चेन्न । तादृशस्य आपात आत्मज्ञानस्य सत्त्वेऽपि आत्माज्ञानप्रत्ययोदयात् । न च मुक्त्युपधायक ज्ञानाभावरूपत्वे न दोष इति वाच्यम् । मुक्त्युपधायकत्वमविषयीकुर्वतोऽपि तादृशप्रत्ययस्योत्पत्तेः । **नापीति**।इदमित्यनुषज्यते। भ्रममात्रं नाज्ञानम् । दिनद्वयादिवर्तिन एकाज्ञानस्य प्रत्यभिज्ञानात्। अतो भ्रमादिपरम्परारूपं वाच्यम् । तथा च नापरोक्षत्वसम्भव इतीत्याशयेनाह—अतीतेत्यादि । ननु, सति भात्यपि आत्मनि नास्ति न भातीत्यादिव्यवहारोत्पादकत्वमस्ति भातीतिव्यवहाराभावप्रयोजकत्वञ्चावरणात्मकत्वम्। तच्च भ्रमादेरपि सम्भवति । अपरोक्षं तु अतीतानागतांशे न स्वीक्रियते । किं तु वर्तमानभ्रमाद्यंशे। अत आह—भ्रमाद्युपादानत्वादिति । नन्वात्मैवोपादानमास्ताम् । तत्राह—**आत्मन इति**। निर्विकारत्वादपरिणामित्वात् । तथा च परिणामिकारणमनात्मैवेति भावः । **तज्जन्यत्वादिति** । तथा च प्राथमिककार्यादिसर्वकार्येषु एकं परिणामिकारणं कल्प्यते । ईश्वररूपैककर्तृवत् । न च प्रतिसर्गं प्राथमिककार्येषु निमित्तकारणतया कल्पितानां संस्काराणामेव परिणामित्वसम्भवादतिरिक्तैककारणकल्पने गौरवमिति वाच्यम् । वीक्षणरूपाद्यकार्ये वीक्षणसंस्कारो वा परिणामिकारणम् ईश्वरप्रसादरूपमदृष्टं वेत्यत्र विनिगमकाभावात्। ननु, वीक्षणत्वावच्छिन्नं प्रति निमित्ततया नादृष्टं कल्पनम् । किं तु ईक्षणाकाशादिसाधारणरूपावच्छिन्नं प्रति । तथा च तादृशरूपविशिष्टे अदृष्टस्य परिणामित्वमस्तु । वीक्षणत्वावच्छिन्नं प्रति निमित्ततया नियतपूर्ववृत्तित्वेन कल्प-

करणादेश्च तज्जन्यत्वात्,'देवात्मशक्तिं स्वगुणैर्निगूढा'मिति गुणवत्त्वश्रुतेश्च मा-

---

प्तस्य ईक्षणसंस्कारस्यैव परिणामितया अनन्यथासिद्धत्वं लाघवात् कल्पयितुं युक्तमिति चेन्न । गुणत्रयात्मकमज्ञानं सृष्टिकाले वीक्षणरूपेणाकाशादिरूपेण विषयभूतगुणत्रयात्मकेन परिणतं प्रलयकाले समीभूतगुणत्रयात्मकेन ईक्षणाकाशादिसूक्ष्मावस्थारूपेण परिणमते । तथा चावस्थाभेदेऽप्यवस्थावतोऽनुगतरूपस्य न भेदोऽस्ति । पूर्वं तादृशमिदानीमिदृशं जातमिति प्रत्यभिज्ञानात् तद्वेदं तर्हि अव्याकृतमासीत्' 'भूतग्रामस्स एवायं भूत्वा भूत्वा प्रलीयत' इति श्रुतिस्मृतिभ्याञ्च । ततश्च नानासर्गीयेक्षणेषु यदनुगतं सत्त्वगुणस्वरूपं, तस्यैव तेषु सात्त्विककार्यान्तरेषूपादानत्वं युक्तम् । तज्जातीयकार्यं प्रति अनुगतत्वस्यैव तदुपादानत्वव्यवस्थापकत्वात् । एवं राजसतामसकार्येषु रजस्तमोरूपयोरुपादानत्वं युक्तम् । अत एव गुणत्रयस्वीकारे गौरवात् । एकगुणोऽस्तूपादानमित्यपास्तम् । एकगुणस्य सर्वकार्येषु दृक्त्वरूपेण एकेनानुगत्यभावेन विलक्षणगुणत्रयविशिष्टेषु तादृशगुणानामुपादानत्वावश्यकत्वात् । यत्तु प्रतिसर्गीयवीक्षणादिषु अननुगतं वीक्षणादिसंस्काररूपं, तस्य वीक्षणसंस्कारत्वाद्यनुगतरूपेण निमित्तत्वमेव । तस्मात् गुणत्रयरूपमज्ञानमेव सर्वकार्योपादानमिति भावः । उक्तन्यायानुग्राह्यां श्रुतिमाह— **देवात्मशक्तिमिति** । देवस्य सृष्ट्यादिक्रीडावतो ब्रह्मणः स्वाश्रयां स्वविषयिकां शक्तिं कार्यजननसामर्थ्यरूपां मायाम् स्वगुणैः स्वात्मसत्त्वादिगुणैः निगूढां घटिताम्। अथवा स्वधर्मैर्वीक्षणाकाशादिसंस्कारैर्विशिष्टाम् । गुणवत्त्वश्रुतेर्गुणत्रयरूपत्वश्रुतेः । अथवेत्यादिव्याख्याने संस्कारवत्त्वश्रुतेः पूर्वं किं कारणमित्यादिप्रश्नमुपन्यस्यते । ध्याननियोगानुगतापश्यन्नित्यादिवाक्यस्योक्तत्वात् । कार्यजननोद्यतस्य ब्रह्मणः सामर्थ्यरूपा या सर्वकार्येषु कारणं, सा च त्रिगुणीरूपेत्युक्तम् । अथवेत्यादिव्याख्याने संस्काराश्रयत्वोक्त्या संस्काराणां नोपादानत्वमित्यपि ज्ञापितम् । प्रकृतिं सङ्कोचकाभावात् सर्वकार्योपादानम् । इन्द्रोऽपरिच्छिन्नत्वेन सर्वोपाधिसम्बन्धात् नानारूपमासौ प्रभुरात्मा। मायाभिरविद्याभिर्हेतुभिः पुरुरूपः नानारूप इत्यर्थः । ईयते ज्ञायते । एकाविद्यापक्षे अदृष्टादिसहकारिकरणानां नानात्वात् तद्घटितरूपेणाविद्याया नानात्वं बोध्यम् ।'प्रजा अहरहर्ब्रह्म गच्छन्त्यः न विन्दन्ति अनृतेन हि प्रत्यूढा' इत्यत्र अहरहस्सुषुप्तौ गच्छन्त्योऽपि स्थूलसूक्ष्मोपाधिलयेन तदभिमानकृतब्रह्मभेदशून्या अपि ब्रह्म न जानन्ति । हि यस्मात् अनृतेन मिथ्याभूताज्ञानेन प्रत्यूढाः आच्छादितस्वरूपका इति व्याख्यातम् । 'न तं विदाथ

यां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरम्' 'इन्द्रो मायाभिः पुरुरूप ईयते' 'अनृते न हि प्रत्यूढाः' 'नीहारेण प्रावृता' 'भूयश्चान्ते विश्वमायानिवृत्तिः' इत्यादिश्रुतिभ्यश्च मायाविद्या अनिर्वाच्यमनृतं तत्त्वज्ञाननिवर्त्यञ्च अज्ञानमेव स्वपराध्यासे कारणम् । न चात्माश्रयादिदोषप्रसङ्गः । अनादित्वेन तन्निरासात् अनादित्वेनोक्त्यभावात् स्वप्रकाशात्मन एव तज्ज्ञप्ति-

---

य इमा जजान अन्यद्युष्माकमन्तरं बभूव नीहारेण प्रावृता' इत्यत्र तमात्मानं न यूयं विदाथ। य आत्मा इमाः प्रजाः जनयामास। कुतः कुतो न विद्मः। तत्राह—अन्यदित्यादि । अन्यत् आत्मनो विलक्षणमसद्रूपम्। अन्तरमावारकं व्यवधायकम् आत्मनि भात्यपि स न भातीतिव्यवहारजनकं स भातीति व्यवहारप्रतिबन्धकञ्च। बभूव अनादिकालं व्याप्यास्ति। ननु तस्यानादित्वमिवाविनाशित्वमपि स्यात्। तथा च अस्मान् प्रति तदुपदेशो व्यर्थस्तत्राह—नीहारेणेति । तस्माद्यूयं नीहारसदृशेन तेनान्तरेणाच्छादिताः। तया च नीहारवदेव तस्य विनाशित्वमावारकत्वादिति व्याख्या।'तस्याभिध्यानाद्योजनात्तत्त्वभावात् भूयश्चान्ते विश्वमायानिवृत्ति'रित्यत्र तस्यात्मनोऽभिध्यानात् तत्त्वमस्यादिवाक्यतात्पर्यविषयत्वेन तदनुकूलतर्केण च चिन्तनात् श्रवणमननाभ्यामिति यावत्। योजनाद्योगात् निदिध्यासनादिति यावत् । तत्त्वभावात् साक्षात्काररूपतत्त्वप्राप्तेश्च। विश्वमाया असत्त्वापादकाभानापादकरूपानेकाज्ञाननिवृत्तिः । अन्ते प्रारब्धभोगान्ते। भूयः पुनः देहादिकार्यरूपविश्वमायानिवृत्तिरिति व्याख्या । आदिपदेन 'अमूढो मूढ इव व्यवहरन् आस्ते मायय्यैव अविद्यायामन्तरे वर्तमाना' इत्यादिश्रुतिसङ्ग्रहः। **मायाविद्येत्यादि** । मायादिरूपमेवाज्ञानं स्वपराध्यासकारणम् । श्रुतिभ्यश्चेति चकारात् पूर्वोक्तकल्पनाया लाघवज्ञानसाक्षिप्रत्यक्षसनाथायाः समुच्चयः । तत्र मायाशब्देन सदसद्विलक्षणत्वरूपानिर्वाच्यत्वस्य निरूपणानर्हविचित्रकार्यजनकत्वरूपमायात्वस्य लाभः । प्रावृतादिशब्देनाच्छादकत्वरूपाविद्यात्वस्येति भावः । **अनादित्वेनेति** । आवरणविक्षेपरूपकार्ययोः प्रवाहरूपेणानादित्वात् तत्कारणस्याकार्यत्वरूपमनादित्वं युक्तमिति भावः । ननु, तथाप्यज्ञानस्य ज्ञानरूपाध्यासे दोषादिकारणापेक्षणात् आत्माश्रयादि स्यादेव । तत्राह—**स्वप्रकाशात्मन इत्यादि** । उत्पत्तौ ज्ञप्तौ वा आत्माश्रयादिकं सम्भाव्यते । तत्र ज्ञप्तेरनादित्वेन नाद्यम् । ज्ञप्तेरनादित्वेऽपि यदि स्वप्रकाशत्वं न स्यात्, तदा तस्यैव तज्ज्ञप्तिरूपत्वे आत्माश्रयः । तयोः परस्परज्ञप्तिरूपत्वे अन्योन्याश्रयः। ज्ञानान्तरापेक्षायामनवस्था स्यात्। स्वप्रकाशत्वे तु

रूपत्वात्। तेनाज्ञानाध्यासविशिष्टचैतन्येहङ्काराध्यासः । तद्विशिष्टे कामसङ्कल्पादीनामहङ्कारधर्माणामिन्द्रियधर्माणाञ्च काणत्वबधिरत्वक्लीबत्वादीनामध्यासः । इन्द्रियाणां तु परोक्षत्वान्नापरोक्षधर्म्यध्यास इति सिद्धान्तः । तद्विशिष्टे स्थूलदेहाध्यासो धर्मिपुरस्कारेणैवाहं मनुष्य इत्याद्याकारः मं

न तदिति भावः । एवञ्च स्वपराध्यासे कारणमित्यस्य स्वपराध्यासे स्वान्यपरिणामिकारणानपेक्षमित्यर्थ इति ध्येयम् । चित्प्रतिबिम्बाध्यासद्वारा मनसः प्रमातृत्वमिति यदुक्तं तत्र ननु, अध्यासोऽपि नोपपद्यत इत्यादिनोद्भावितदोषाणां निरसनं कृत्वा इदानीं तदेव प्रमातृत्वं विस्तरेणोपसंहरति—**तेनाज्ञानेत्यादि** । तेनाध्यासस्य निर्दोषत्वसमर्थनेन । अज्ञानाध्यासविशिष्टे अज्ञानप्रतिबिम्बितत्वविशिष्टे । अहङ्काराध्यासः मनोऽध्यासः । तद्विशिष्टे मनोविशिष्टे । **इन्द्रियधर्माणामिति** । चक्षुषः काणत्वं रूपाद्यग्राहकत्वम् । श्रोत्रस्य बधिरत्वं शब्दाद्यग्राहकत्वम् । उपस्थस्य क्लीबत्वं रत्यसामार्थ्यम् । आदिपदात् दूरग्राहकपाटवादिसङ्ग्रहः । न च काणत्वादिकमदृष्टविशेष इति वाच्यम् । मनः काणमित्यादिव्यवहारापत्तेः । ननु, इन्द्रियाध्यासमनुक्त्वा तद्धर्माध्यासः कथमुक्तः । तत्राह—**इन्द्रियाणामित्यादि** । धर्म्यध्यासः धर्मिणि तादात्म्येन अध्यासः । ननु, परोक्षतयैव इन्द्रियमपरोक्षधर्मिणि मनोविशिष्टचैतन्ये अध्यस्यताम् । तत्राह—**इति सिद्धान्त इति** । सयुक्तिका मूलोक्तिरित्थमित्यर्थः । तत्र युक्तिरुच्यते । अज्ञोहमिति प्रतीतिबलात् अज्ञानविशिष्टे मनोध्यासः स्वीक्रियते । अज्ञश्चक्षुः इत्यस्य अहं चक्षुरित्यस्य वा अपरोक्षाया अपि प्रतीतेरभावात् अज्ञानादिविशिष्टे चक्षुरादेः तादात्म्येन नाध्यासः । अहं चक्षुष्मानित्यादिधीस्तु शरीरस्य इन्द्रियसंयुक्तत्वात् नानुपपन्ना । अत एव अयं गुरुत्वविशिष्टः अहमदृष्टवानित्यादिपरोक्षप्रतीतिबलात् अपरोक्ष एव धर्मिणि परोक्षस्याध्यासः, स्वीक्रियते । अत एव देहेन्द्रियादिष्वहंममाभिमानहीनस्य प्रमातृत्वानुपपत्तौ प्रमाणप्रवृत्त्यनुपपत्तेरित्यत्र भाष्ये इन्द्रियेषु ममाभिमान एव पञ्चपादिकादावुक्तः । ननु धर्म्यध्यासं विना कथं धर्माध्यासः । न च स्फटिकादौ जपापुष्पस्यानध्यासेऽपि तद्धर्मलौहित्याध्यासदर्शनात् न दोष इति वाच्यम् । अप्रतिबिम्बरूपेण धर्माध्यासस्य धर्म्यध्यासव्याप्यत्वादिति चेन्न । धर्माध्यासाधिष्ठाने अवश्यं धर्म्यध्यासः । न तु धर्माध्यासाधारे । तथा सति कामादिधर्मस्य अध्यासाधारे मनोविशिष्टचैतन्ये मनसोऽध्यासाभावेन व्यभिचारापत्तेः । तथा च अविद्यामनोविशिष्टचैतन्ययोः मनस्तद्धर्मान् प्रति मनोविशिष्टचैतन्यस्य काणत्वादीन् प्रति अध्यासाधारत्वात् ।

न तु स्वरूपतः अहं देह इत्यध्यासः । तथा प्रतीत्यभावात् । तद्विशिष्टे च स्थौल्यादीनां च, तद्विशिष्टे बाह्यानां पुत्रभार्यादीनां साकल्यवैकल्यादि-

तदध्यासाधिष्ठानस्य च ब्रह्मचैतन्यस्य इन्द्रियाध्यासेष्यधिष्ठानत्वात् धर्माध्यासाधिष्ठाने धर्म्यध्यासाधिष्ठानत्वमवश्यमिति नियमो न व्याहतः । अथ धर्म्यध्यासविशिष्टस्यैवाप्रतिबिम्बरूपधर्माध्यासाधारत्वमिति नियम इति चेन्न । अप्रतिबिम्बरूपत्वस्यैव नित्यपरोक्षधर्म्यवृत्तित्वस्यापि धर्मविशेषणत्वमादायैवोक्तनियमस्वीकारात् । मनोवच्छिन्नचिति काणत्वादिविशिष्टरूपेणैव चक्षुरादेस्तादात्म्येनाध्यासः । न तु चक्षुष्ट्वादिधर्मरूपेणेति स्वीकार एव यथाश्रुतोक्तनियमेऽपि क्षत्यभावाच्च । धर्मपुरस्कारेण मनुष्यत्वादिगौरत्वाद्यवान्तरधर्मविशिष्टरूपेण । स्वरूपतः देहत्वादिसामान्यविशिष्टरूपेण । **प्रतीत्यभावादिति** । अहं मनुष्य इत्यादिपूर्वपूर्वधीजन्यसंस्कारस्याहं मनुष्य इत्याद्यध्यासहेतुत्वकल्पनात् तादृशाध्यास उत्पद्यते । अहं देह इत्यादेस्तु प्रत्ययस्यैवाप्रसिद्ध्या तज्जन्यसंस्कारस्याप्रसिद्धेः न तस्य तादृशाध्यासहेतुत्वमिति भावः । **भार्यादीनामिति** । स्वामित्याद्यध्यासपूर्वकमिति शेषः । साकल्यं विनयादिगुणभूषणादिमत्त्वरूपं पूर्णत्वम् । तदभावो वैकल्यम् । तथा च स्थौल्यादिविशिष्टे पुत्रादिस्वामित्वमध्यस्य पुत्रादिगतसाकल्यवैकल्ये अध्यस्येते । ननु, स्थूलोऽहं सकल इत्यत्र सकलस्वामित्वमेव प्रतीयत इति चेन्न । पुत्रादौ पूजिते पूजितोहमित्यभिमानात् । अत्रेदं बोध्यम् । तन्वभावे सन्ध्यवदुपपत्तेः । भावे जाग्रद्वदिति सूत्रयोः तन्वभावे इन्द्रियस्थूलदेहाभावेऽपि सन्ध्यवत् स्वप्नवत् ब्रह्मलोके सगुणब्रह्मोपासकस्य भोग उक्तः । देहस्य भावे तु जाग्रद्वत् जाग्रत्कालीनभोगवदित्यर्थकयोः सेन्द्रियस्थूलशरीरानभिमानेऽपि मनोविशिष्टजीवे स्वप्नब्रह्मलोकयोः भोगोक्त्याऽज्ञानविशिष्ट एव मनोध्यासः । न स्थूलविशिष्टे नापीन्द्रियधर्मविशिष्टे । अदृष्टादिविशिष्टमनोविशिष्टेनैव जीवेन काणत्वादिविशिष्टस्थूलदेहग्रहणात् तत्रैव तदध्यासः । स्थूलदेहविशिष्टस्यैव पुत्रादिस्वामित्वप्रतीतेः तत्रैव तदध्यासः । पुत्रस्वामित्वादिविशिष्टजीवेन तादृशे स्वस्मिन् उपयोगितया वित्तादिस्वीकारात् तत्रैव तदध्यासः । अत एव पुत्राद्यपेक्षया प्रियस्य देवताराधनाद्यर्थतया वित्तादेर्ग्रहणम् । न तु पुत्राद्यर्थम् । तत्स्वामित्वस्य स्थूलदेहविशिष्टेऽध्यासः । न तु पुत्रादिस्वामिनि । अत एव तद्वित्तापेक्षया देवतादिरेव प्रियः । तत्प्रयोजकत्वात् । तदेव 'मज्ञोऽहमहं कामी काणः कामी काणो मनुष्य इ-

धर्माध्यासः । एवं चैतन्यस्याप्यहङ्कारादिषु देहपर्यन्तेष्वध्यासः संसर्गतः अध्यासव्यवधानतारतम्याच्च प्रेमतारतम्यम् । तदुक्तं वार्तिकामृते—'वित्तात्पुत्रः प्रियः पुत्रात् पिण्डः पिण्डात्तथेन्द्रियम्। इन्द्रियेभ्यः प्रियः प्राणः प्राणादात्मा-परः प्रिय' इति । पिण्डः स्थूलशरीरम् । प्राणः अन्तःकरणम् ।

ति सकल' इत्यादिप्रतीतिसत्त्वात् अज्ञानादिविशिष्टे मनआदिकमध्यस्यते । अज्ञानादिविशिष्टचिदवच्छेदेन शुद्धचिति मनआदेरुत्पत्त्या तादात्म्यस्वीकारेण उक्तप्रतीतिनिर्वाह इति यावत् । उक्तचितोऽवच्छेदकत्वेऽपि उक्तचितः शुद्धचिन्निष्ठसम्बन्धोऽप्यवच्छेदकः । स च विशेष्यतारूपे अवच्छेदकीभूतस्य ज्ञानज्ञेयसम्बन्धस्यैव विशेष्यतात्वात्। इदं रजतमित्याकारकभ्रमे इदञ्चित्सम्बन्धस्य विशेष्यतात्वेन क्लृप्तत्वात् । एवमवच्छेद्यज्ञेयसम्बन्ध एव प्रकारता । तादृशभ्रमे रजतचित्सम्बन्धस्य तथा क्लृप्तत्वात् । एवं विशेष्यतात्वादिकमतिरिक्तं न कल्प्यते । गौरवात् । तथा चाज्ञानविशिष्टविशेष्यतावच्छिन्नमनःप्रकारताकप्रत्ययस्य निर्वाह इत्युक्तम् । इदानीमुक्तप्रत्ययवत् अहमज्ञः काम्यहं मनुष्यः कामी सकलो मनुष्य इत्यादिप्रत्ययस्यापि सत्त्वात् । मनआद्यवच्छेदेन शुद्धचिति अज्ञानादिविशिष्टचितोन्तर्गतत्वरूपप्रतिबिम्बत्वरूपसंसर्गोऽध्यस्तो जायते । तथा च उक्तप्रत्ययस्यापि निर्वाहः तन्नान्तरीयकतया मनसः प्रतिबिम्बाध्यासाधीनप्रमातृत्वस्यापि पूर्वोक्तस्य सिद्धिरित्याशयेनाह—**एवञ्चैतन्यस्येत्यादि** । चैतन्यस्य अज्ञानादिविशिष्टचैतन्यस्य अहङ्काराद्याधारस्य अहङ्कारादिषु । मनआद्यवच्छेदकेषु। देहपर्यन्तेषु साकल्यादिविशिष्टदेहपर्यन्तेषु । संसर्गतः प्रतिबिम्बत्वरूपेण। 'स एष इह प्रविष्ट आनखाग्रेभ्य' इति श्रुतेः । जलयुक्तपाषाणादेरिव मनोयुक्तदेहादेरपि प्रतिबिम्बाधारत्वसम्भवात् प्रतिबिम्बाधारत्वयोग्यतारूपस्वच्छत्वं बोध्यम् । ननु, मनआदीनां सर्वेषामानन्दरूपात्मनि तादात्म्याध्यासेन तेषु जायमानस्य प्रेम्णः उत्कटानुत्कटत्वरूपं वैषम्यं कुतस्तत्राह—**अध्यासव्यवधानेत्यादि** । अध्यासैरानन्दस्य व्यवधानाधिक्ये प्रेम्णोऽनुत्कटत्वं तन्न्यूनत्वे प्रेम्ण उत्कटत्वम् । सुषुप्तौ कार्यप्रपञ्चलयेनानन्दाभिव्यक्तिदर्शनेन स्वप्नजाग्रतोश्च तदपेक्षयानन्दाल्पत्वदर्शनेनाध्यासाधिक्यस्यानन्दापकर्षप्रयोजकत्वेन क्लृप्तत्वादिति भावः । **वित्तादिति** । अनेन पुत्रादिस्वामित्वविशिष्टचिति वित्तादिस्वामित्वाध्यास इति अनुक्तमपि सूचितम् । पिण्डात्तथेन्द्रियं इन्द्रियेभ्यः प्रियः प्राण इत्यनेन पंगुत्वकाणत्वादिविशिष्टरूपेण चक्षुरादीनां मनोविशिष्टचिति

Prof. V. VENKATACHALAM
VARANASI

देहापेक्षया चेन्द्रियाणां प्रियत्वं शस्त्रवृष्ट्यादिधारापाते चक्षुरादीनां मोलनदर्शनात् अनुभवसिद्धम् । तेनान्योन्याध्यासात् चिदचिद्ग्रन्थिरूपोध्यासः।

अध्यास इति सूचितम् । अन्यथा ब्रह्मणि तादात्म्येनाध्यस्तत्वमात्रेण मनोपेक्षया अनुत्कटप्रेम्णः चक्षुरादावसम्भवात् । न च पुत्रादाविव ममताध्यासेनापि चक्षुरादावुत्कटप्रेमसम्भव इति वाच्यम् । पंगुत्वादिरूपेण तादात्म्याध्यासः ममताध्यासो वेत्यत्र विनिगमकाभावात् । अन्यथा मनुष्यत्वकार्यत्वादिधर्मविशिष्टेऽपि ममताध्यास एव कल्प्येत । अथ धर्मितादात्म्याध्यासस्य धर्मसंसर्गाध्यासव्यापकत्वात् सोऽप्यावश्यक इति चेत् । तर्हि इन्द्रियतादात्म्याध्यासोऽपि तथा । आत्मा अज्ञानविशिष्टचित्तदपेक्षया शुद्धात्मा उत्कटप्रेमविषय इति बोध्यम् । 'प्रेयोन्यस्मात् सर्वस्मादन्तरं यदयमात्मेति' श्रुतेः । अनुभवसिद्धमिति । पूर्णानन्दांशस्यावृतत्वेऽपि अविद्याद्यवच्छिन्नानन्दांशानामनावृतत्वम् । अज्ञोऽहं सदा भूयासमिति प्रेम्णान्यथानुपपत्तेः । तथा च उत्कर्षापकर्षवत्तयापि तदनुभवसम्भव इति भावः । अज्ञोऽहमित्यादिवत् सदाकाशस्सन् वायुरित्यादावपि परस्पराध्यासः । आकाशस्सन् वायुस्सन्नित्यादिप्रतीतिसत्त्वादित्याह—तेनेति । अज्ञोऽहमित्यादित्थले परस्पराध्यासस्वीकारेणेत्यर्थः । परस्पराध्यासात् परस्पराध्यासप्रत्ययात् । अध्यासः अध्यासमात्रम् । चिदचिद्ग्रन्थिरूपः शुद्धचिद्रूपेऽधिष्ठानेऽचितोरधिष्ठानभिन्नयोः ग्रन्थिः परस्परावच्छेदेन परस्परसम्बन्धौ रूपे यस्य तादृशः । इदं रजतमित्यादौ सर्वत्र भ्रमे ह्याकारतादर्शनादिदमादिसम्बन्धावच्छेदेन रजतादिसम्बन्धस्य प्रत्ययेन तदुभयमध्यस्तम् । तत्र रजतादेस्सम्बन्ध इव स्वरूपमध्यस्तम् । इदं रजतं नेत्यादिप्रत्ययेन विनिगमकाभावात् द्वयोरपि बाध्यमानत्वात् इदमादेस्तु सम्बन्ध एव बाध्यस्तः । न स्वरूपम् । रजतमिदं नेत्यादिबाधेन संसर्गस्यैव बाध्यमानत्वात् तादृशबाधोत्तरमपि हि एतत्संसृष्टतया रजतं ज्ञातमिति अंगुल्या निर्दिश्यमानत्वात् । किञ्चेदं रजतमिति यज्ज्ञानं तन्मिथ्येति प्रत्ययेनाकारद्वयसहितधीमिथ्यात्वावगमात् आकारद्वयघटकसम्बन्धद्वयमवश्यं मिथ्येति वाच्यम् । इदमादेरपि संसृष्टरूपेण भ्रमविषयत्वात् मिथ्यात्वसम्भवाच्च मिथ्यात्वम् । एवं सदाकाशमित्यादावपि सतः संसृष्टरूपेणाकाशादेस्स्वरूपेण मिथ्यात्वम् । सदाकाशमिति यत् ज्ञानं, तन्मिथ्येति प्रत्ययात् सदाकाशं न आकाशस्सन्नेति द्विविधबाधकसत्त्वाच्च । तस्मात्सवि-

एकतरस्याध्यासाङ्गीकारेऽन्यतरस्याभानप्रसङ्गात्, अध्यस्तस्यैव भ्रमे भान-नियमात् इमे रङ्गरजते इति समूहालम्बनवदवश्यमितरेतराध्यासः। सर्व-

---

कल्पकप्रत्ययमात्रे विशेष्यविशेषणसंसर्गाणां त्रयाणां युगपदुत्पत्तिः । प्रातीतिकस्थले आगन्तुकदोषघटिता । व्यावहारिकस्थले त्वविद्याघटिता सामग्री । तदेतदाह—**एकतरस्येति** । विशेषणस्य विशेष्यसंसर्गस्य वा अन्यतरस्य विशेष्यसंसर्गस्य विशेषणस्य वा । **अभानप्रसङ्गात्** भ्रमाविषयतापत्तेः । **अध्यस्तस्यैवेति** । उक्तबाधकप्रत्ययबाध्यत्वेनेति शेषः । **भ्रमे भानेति** । भ्रमविषयत्वेत्यर्थः । नन्विदं रजतमित्यादौ एक एवाकार उल्लिख्यते । अथ कथं द्याकारत्वनियमः । तत्राह—**इमे इति** । रजतरङ्गे इत्यर्थः । अवश्यमित्यनेन परस्पराध्यासस्य भाष्योक्तत्वं सूचितम् । तदुक्तं भाष्ये — 'अन्योन्यस्मिन्नन्योन्यात्मकतामन्योन्यधर्मांश्चाध्यस्येति' । ननु रजतादाविदन्त्वादेरिदमादौ रजतत्वादेश्च संसृष्टतयाध्यासोऽन्योन्यधर्माध्यासः । तत्र च मानाभावः । प्रतीत्योरन्योन्यतादात्म्याध्यासाभ्यामुपपत्तेरिति चेन्न । द्याकारप्रतीत्योर्धर्मयोस्संसर्गाध्यासाभ्यां धर्मिणोस्तादात्म्याध्यासाभ्यां वोपपत्तेरित्यत्र विनिगमकाभावात् । संक्षेपशारीरकेप्युक्तम्—'इदमर्थवस्त्वपि भवेद्रजते परिकल्पितं रजतवस्त्विदमि । रजतभ्रमेऽस्य च परिस्फुरणात् न यदि स्फुरेत् न हि तु शुक्तिरिव ॥' इति । अस्य इदमर्थस्य न यदीदमर्थः कल्पितः, तदा भ्रमे न स्फुरेत् तु शुक्तिरिव शुक्तित्वविशिष्टवत् शुक्तित्वविशिष्टस्येव संसर्गोपहित इदमादेरकल्पितत्वेन उक्तबाधकाबाध्यत्वेन भ्रमाविषयत्वापत्तिरिति भावः । पञ्चपाद्यामुक्तं—'यदि युष्मदर्थस्यैव प्रत्यगात्मनि अध्यासः स्यात् प्रत्यगात्मा न प्रकाशेत । न हि शुक्तौ रजताध्यासे शुक्तिः प्रकाशते । प्रकाशते च इह चैतन्यमहङ्कारादा'विति । युष्मदर्थस्यानात्मनः । किं च अवश्यमित्यनेन सर्वभ्रमाणां द्याकारता तार्किकादेरपि सम्मतेति सूचितम् । तथा हि—सविकल्पकधीमात्रे भ्रमत्वेनास्मत्सम्मते विशेष्यतावच्छिन्नं प्रकारत्वं प्रकारतावच्छिन्नं विशेष्यत्वं वेत्याकारद्वयं सप्रकारकधीमात्रनिष्ठं तार्किकादिभिरङ्गीक्रियते । तादृशाकारद्वयं च रजततादात्म्येनेदं साक्षात्कारोमि इदन्तादात्म्येन रजतं साक्षात्करोमि इदं रजतं साक्षात्करोमीति सार्वलौकिकधीभिः गृह्यते । रजतप्रकारत्वं इदंविशेष्यत्वञ्च परस्परानवच्छिन्नमित्यादितान्त्रिकवा-

परचनामात्रेण अर्थासिद्धेः । तथा चेदंविषयतायां रजतविषयतावच्छेदकत्वञ्च रजतविषयतायाम् इदंविषयतावच्छेदकत्वञ्च उक्तधीषु भाति । मूलविशिष्टः संयोगीत्यादौ संयोगित्वरूपे विधेये उद्देश्यतावच्छेदकीभूतमूलवैशिष्ट्यस्यावच्छेदकत्वभानवत् रजतमिदमित्यादौ रजतविषयकसाक्षात्कारे इदंतादात्म्यविषयकत्वस्य विधेयत्वेन इदं तादात्म्यविषयकत्वस्य रजतविषयतावच्छिन्नत्वलाभात्।रजततादात्म्येन इदमित्यादौ त्विदंविषयकसाक्षात्कारे रजततादात्म्यविषयकत्वस्य विधेयत्वेन तत्र इदंविषयतावच्छिन्नत्वलाभात्।एकविषयतावच्छेदकापरविषयतात्वस्यैव विशेष्यतात्वरूपस्य वक्ष्यमाणत्वात् उक्तलौकिकधीभिः उभयोः परस्परविशेष्यविशेषणकत्वघटिताकारयोः सिद्धिरिति नास्माकमेव तत्स्वीकारेण गौरवाद्यापत्तिः।मन्मते तु विशेष्यतात्वादेरतिरिक्तस्याखण्डधर्मरूपस्यास्वीकारात् महदेव लाघवम् । तथा हि—चिच्चेत्यसम्बन्धो विषयता। विषयतात्वमखण्डधर्मस्तस्यां स्वीक्रियते । एकविषयताविशिष्टापरविषयतायाम् अवच्छेदकविषयता विशेष्यता तादृशविशेष्यतायामवच्छेदकविषयता विशेष्यतावच्छेदकताशब्देन व्यवह्रियते । तदाश्रयस्य इदन्त्वादेरपि विशेष्यतावच्छेदकत्वात् । एवं च यस्याः तादात्म्यादिनिष्ठसांसर्गिकविषयतायाः अवच्छेदकत्वं विशेष्यतानिष्ठम् सा तत्रावच्छेदकत्वे निरूपिका तन्निष्ठनिरूपकताया. अवच्छेदिकापि विषयिता सांसर्गिकविषयितावच्छेदकताशब्देनोच्यते । तदाश्रयतादात्म्यत्वादेरपि निरूपकतावच्छेदकत्वात् । संसर्गविषयता यया विषयतया विशिष्टा सती तादृशावच्छेदकतानिरूपिका या सा प्रकारता । तथा च तादृशप्रकारतावच्छेदिका या विषयता सा प्रकारतावच्छेदकताशब्देनोच्यते । तदाश्रयस्य रजतत्वादेरपि तादृशप्रकारतावच्छेदकत्वसत्त्वात् । तदिदं विशेष्यतादौ प्रकारतासांसर्गिकविषयतावच्छेदकत्वादिकं तार्किकादिभिरपि स्वीक्रियते । रजतत्वनेदं जानामि रजतत्वसमवायेन इदं जानामि रजततादात्म्येनेदं जानामीत्यनुभवेन प्रकारतासंसर्गविषयतावच्छेदकत्वेन विशेष्यत्वावगाहनात् । तथा च तेनैवाखिलव्यवहारनिर्वाहे विशेष्यतात्वप्रकारतात्वसांसर्गिकविषयतात्वविशेष्यताप्रकारतावच्छेदकतात्वानाम् अखण्डधर्माणां स्वीकारः न तेषां युक्तः । इदंविषयतावच्छिन्ना या रजतविषयता तद्विशिष्टा या तादात्म्यविषयता तच्छालिप्रत्यक्षत्वेन इदं रजतमित्याकारकप्रत्यक्षस्य प्रवृत्तिहेतुत्वसम्भवात् । तदयं निष्कर्षः । इदं

विषयता तादात्म्यविषयताविशिष्टायां रजतनिषयतायाम् अवच्छेदिका मूलादिकमिव संयोगादिविशिष्टे विहगादौ। तादृशावच्छेदकत्वे इदन्त्वविषयता अवच्छेदिका मूलादिनिष्ठावच्छेदकत्वे मूलत्वादिकमिव । एवम् इदंविषयतानिष्ठावच्छेदकत्वे निरूपकत्वं यत् तादात्म्यादिविषयतानिष्ठं तदवच्छेदकत्वं तादात्म्यत्वादिविषयतासु स्वीक्रियते । संयोगत्वादाविव मूलादिनिष्ठावच्छेदकतानिरूपकतावच्छेदकत्वम् । इयांस्तु विशेषः । यन्मूलत्वादेस्समवायेन मूलादिसम्बन्धत्वात् उक्तावच्छेदकत्वम् । इदन्त्वादिविषयतानां तु चिद्घटितेन सामानाधिकरण्येन इदमादिविषयसम्बन्धत्वात् उक्तावच्छेदकत्वम् । इदमादिविषयतानिष्ठमनवच्छिन्नमेव तादृशावच्छेदकतानिरूपकत्वम् इदन्त्वादिविषयतावच्छिन्नमित्यादि बोध्यम् । तस्मात् सांसर्गिकविषयतात्वस्यैव अखण्डधर्मत्वनियमः । न तु विशेष्यतात्वस्य प्रकारतात्वस्य वा । ननु, घटस्सन् पटस्सन्नित्यादौ सत्तादात्म्यस्य एकस्यैव भानसम्भवात् विशेषणविशेष्यसंसर्गाणां युगपदुत्पत्तिरिति पूर्वमुक्तमयुक्तमिति चेन्न । घटापटाद्यवच्छिन्नतादात्म्यानाम् ऐक्यानुपपत्तेः । अवच्छेदकभेदेन परमते विषयतादीनामिव तादात्म्यानां भेदस्यावश्यकत्वात् । ननु, वृत्तिज्ञानीयसम्बन्धानां विषयनिष्ठानां विशेष्यतादिरूपत्वस्य अवश्यवाच्यतया तैरेव विषयताव्यवहारनिर्वाहे चिच्चेत्यसम्बन्धानां विषयतात्वकल्पने मानाभाव इति चेन्न । अहं सुखीत्यादौ वृत्तिज्ञानीयसम्बन्धेन सुखादौ विषयताव्यवहारासम्भवात् । सुखादौ साक्षिमात्रभास्यत्वेन वृत्त्यस्वीकारात् । तत्र सुखादिचित्सम्बन्धस्यैव सुखादिविषयतात्वेन कल्पतत्वेन चित्सम्बन्धस्यैव सर्वत्र विषयतात्वस्वीकारात् । ज्ञानज्ञेयसम्बन्धस्यैव विषयताव्यवहारविषयत्वात् वृत्तेः ज्ञानव्यञ्जकत्वेऽपि ज्ञानत्वाभावात् । ज्ञानव्यञ्जकत्वानुरोधेनैव वृत्तेः ज्ञानावरणरूपाज्ञानसमानविषयकत्वात् चिन्मात्रविषयकत्वम् । अज्ञानस्यैव वृत्तेः विषयतायां विशेष्यविशेषणयोः संसर्गः व्यक्तिमात्रञ्चावच्छेदकम् । नास्त्येव वावच्छेदकं यथा पर्वते वह्नेः संसर्गावच्छिन्नचिद्विषयकानुमितिरूपवृत्तेः सोऽयमित्यादिवाक्यजन्यवृत्तेर्वा तत्त्वमस्यादिवाक्यजन्यवृत्तेर्वा। तथा चावच्छिन्नानवच्छिन्नरूपेण चिदेव वृत्तेर्विषयः । न घटादयः तादृशविषयतावन्तः । तेषु तु वक्ष्यमाणरीत्या सांसर्गिकविषयतावच्छेदकत्वरूपं विषयत्वम् अवच्छेदकीभूतसंसर्गस्य प्रतियोगित्वानुयोगित्वरूपे विशेषणविशेष्यत्वे वा न मुख्ये।

तथा चैतन्यनिष्ठमपि वृत्त्यज्ञानयोर्विषयत्वं न मुख्यविषयत्वम् । ज्ञानीयत्वाभावात् । किं त्वाकाराख्यस्सम्बन्धविशेषः । उदयनाचार्यादिभिरपि बौद्धाधिकारादौ प्रकाशस्य सतस्तदीयतामात्रनिबन्धनः स्वभावविशेषः विषयतेत्यादिना प्रकाशशब्दितज्ञानीय-सम्बन्धस्यैव विषयतात्वमुक्तम् । उक्तञ्च तट्टीकासु वर्धमानाद्यैः—इच्छादीनां विषयता तज्जनकज्ञानीया याचितमण्डनन्यायेन । न तु स्वाभाविकी । न च प्रतियोगित्वानुयोगित्वमात्रस्य तादृशविशेषणत्वादिरूपत्वे अनुमित्यादिवृत्तेः विशेष्ये विशेषणमित्यादिरूपाया विशिष्टस्य वैशिष्ट्यमित्यादिरूपायाश्च विषयताया भेदः कुतस्त्य इति वाच्यम् । प्रतियोगितानुयोगितयोरेव नानाविधानुभूयमानविशेषाणां स्वीकारात् । वह्न्यादिप्रकारकानुमितिस्थले वह्नित्वाद्यवच्छिन्नप्रतियोगिकसंयोगात्तादात्म्यविशिष्टचैतन्यनिष्ठसांसर्गिकविषयतास्वीकारात् विशेषणीभूतसंयोगतत्प्रतियोगित्वयोरपि मिथो निरूप्यनिरूपकभावापन्नाः सांसर्गिकविषयताः सिद्धान्तेऽपि स्वीक्रियन्ते । सर्वो हि विषयः सद्रूपचित्तादात्म्यविशिष्टतयैव विशिष्टज्ञानमात्रे भासते । तथा च विशेषणविशेष्ययोरिव संयोगादिसंसर्गस्यापि चित्तादात्म्यविशिष्टतया भानात् तत्तादात्म्यविशिष्टतया चितोऽपि भानम् । संयोगनिष्ठोक्तविषयतानिरूपिता या प्रतियोगित्वनिष्ठविषयता सापि सांसर्गिकविषयतैव । तादृशविषयतावती प्रतियोगितैव प्रकारतेत्युच्यते । तदन्यप्रकारत्वे मानाभावात् । एवं संयोगादिविषयतानिरूपितविषयतावदनुयोगितैव विशेष्यता । अत एव भासमानवैशिष्ट्यप्रतियोगित्वानुयोगित्वे प्रकारताविशेष्यते इति तार्किकादयो वदन्ति । भासमानवैशिष्ट्यस्य भासमाने प्रतियोगित्वानुयोगित्वे इति तदर्थः । विशिष्टविषयतानिरूपितप्रकारतात्वं वह्नित्वावच्छिन्नप्रकारतायाः एव स्वीक्रियते । लाघवात् । एवं पर्वतत्वाद्यवच्छिन्नानुयोगितायाः एव तादृशविशेष्यतात्वम् । एवं च पूर्वकल्पे वह्नित्वाद्यवच्छिन्नप्रतियोगितात्वेन प्रतियोगितायाः विषयता यत्र तत्र वह्नित्वविशिष्टनिरूपितवैशिष्ट्यधीः । पर्वतत्वाद्यवच्छिन्नानुयोगितात्वेनानुयोगिताभाने पर्वतत्वविशिष्टाधिकरणधीवैशिष्ट्यधीः । यत्र तु प्रतियोगितानुयोगितयोः न तथा भानम् । किं तु वह्नित्वाद्युपहितनिष्ठतया तत्र विशेष्ये विशेषणमित्यादिधीः । द्वितीयकल्पे तु वह्नित्वादेः प्रकारतावच्छेदकत्वादिरूपे प्रकारत्वे विशिष्टवैशिष्ट्यम् । केवलप्रकारत्वे विशेष्ये विशेषणमित्यादिरूपत्वम् । आद्य एव तु कल्पो युक्तः ।

बाधावधिभूतचैतन्यपरिशेषेण च न शून्यवादापत्तिः । सत्यानृतसम्भेदाव-भासत्वादध्यासस्य । तस्मात्पूर्वपूर्वाध्यासमूल एवायमुत्तरोत्तरोहङ्काराध्या-

---

विषयवैलक्षण्यं विना विषयतामात्रभेदेन ज्ञानानां वैलक्षण्यापादने साकारवादापत्तेः । ननु, इदं रजतमित्याकारकज्ञाने इदं चित्सम्बन्ध एवावच्छेदकतया भाति । न तु रजतचित्सम्बन्ध इत्यत्र किं व्यवस्थापकम् इति चेत् अनुभव एव । अन्यथा मूलविशिष्टः कदम्बः कृष्णसंयोगीत्यत्र प्रत्यक्षे मूलस्यैवावच्छेदकतया भानम् । न तु कृष्णसंयोगस्येत्यत्राप्यनुभवान्यव्यवस्थापकान्वेषणापत्तेः । तथा चानुभवेनैव अवच्छेदकत्वे व्यवस्थापिते तन्निर्वाहाय मूलादेर्मूलाद्यवच्छिन्नसंयोगादिहेतुत्ववदज्ञानादेरिदमाद्यवच्छिन्नरजतादिहेतुत्वं कल्प्यते । स्वविषयतावच्छेदकविषयतावत्त्वादिसम्बन्धेन रजतादिकं प्रति स्वाश्रयतावच्छेदकत्वसम्बन्धेनाज्ञानादेर्हेतुत्वम् । विवेचितञ्चैतत् चन्द्रिकाभास्माभिः । तस्मात् व्याकारानुभवात् इदमादिकं यदि भ्रमकालेऽध्यस्तं न स्यात् तदा भ्रमविषयो न स्यात् । शुक्तित्वविशिष्टवदिति तर्कादिदमादिकं भ्रमकालेऽध्यस्तं न स्यात् । भ्रमविषयत्वात् रजतादिवदित्यनुमितेश्च परस्पराध्यास आवश्यकः । तदुक्तं संक्षेपशारीरके— 'अनुभूतियुक्त्यनुमितित्रितयात् इतरेतराध्यसनसिद्धिरतः' । इति । ननु, सदिदं-रजतमित्यादिभ्रमे सद्रूपचितोऽपि विषयत्वात् साप्यध्यस्ता स्यात् । तत्राह— **सर्वबाधेत्यादि** । साक्षिरूपत्वेन चितो बाधासम्भवात् । चैतन्यं सर्वबाध्यज्ञानानामविषयरूपोऽवधिः । अतः तस्य परिशेषात् मिथ्यात्वास्वीकारात् शून्यवादस्य सर्वमिथ्यात्ववादस्य आपत्तिरिति भावः । तथा च संसृष्टरूपेणैव सद्रूपस्य भ्रमविषयत्वं मिथ्यात्वञ्च । न तु शुद्धरूपेणेति भावः । **सत्यानृतसम्भेदावभासत्वात्** । वस्तुगत्या सत्यनिष्ठो योऽनृतसम्बन्धः तद्विषयकत्वात् । सत्यविषयकत्वं विनाधिष्ठानज्ञानस्य बाधकत्वासम्भवेन आरोपितस्य अनृतत्वासिद्धेराधिष्ठानं सत्यमेवेति भावः । ननु, मनुष्यत्वादिविशिष्टरूपेणैव देहादेरध्यासः । न तु देहत्वादिविशिष्टरूपेण । एवमज्ञानादिविशिष्ट एव चैतन्ये अहङ्काराद्यध्यासः । न तु आकाशादिविशिष्टे इत्यत्र किं मानम् । तत्राह—**तस्मादिति** । प्रतीतिरूपकार्यानुसारेण तत्कारणकल्पनमित्यस्य धर्मपुरस्कारेणेत्यादिनोक्तत्वादित्यर्थः । अध्यासमूलः अध्यासजन्यसंस्कारजन्यः । अहङ्काराध्यासः अहङ्कारादि-

सः बीजांकुरवदनादिः । अविद्याध्यासश्च एक एवानादिः । नन्वध्यास-स्यानादित्वे स्मृतिरूपः परत्र पूर्वदृष्टावभासोऽध्यास इति वदता भाष्यकारेण स्मृतिरूपत्वेन संस्कारजन्यत्वमुक्तं विरुध्येतेति चेन्न । कार्याध्यासाभिप्राय-त्वात्तस्य । परत्र परावभास इति एतावन्मात्रस्यैव उभयानुगतस्य लक्षणत्वा-त् । यद्वा सत्यानृते मिथुनीकृत्येति भाष्यवचनात् सत्यमिथ्यावस्तुसम्भेदावभा-

रूपः । तद्रीरूपश्चाध्यासः । अर्थाध्यासे अर्थस्य ज्ञानाध्यासे ज्ञानस्य सूक्ष्मावस्थारूपः संस्कारो हेतुरिति भावः । संस्कारजन्यत्वेऽपि भाष्योक्तमनादित्वं समर्थयते । **बीजांकुरादिवदनादिरिति** । एकजातीयस्य स्वसृष्ट्यवधिप्रलय-पर्यन्तसर्वकाले सत्त्वमनादित्वमिति भावः । ननु, अज्ञानाध्यासस्य उत्पत्त्य-भावः न चात्माश्रयादीत्यादिनोक्तः । स च न युक्तः । अहङ्कारस्य कार्यत्वेन तदवच्छेदेन संसृष्टतया घटाद्यवच्छेदेन कपालादाविव कारणस्य अज्ञानस्या-प्युत्पत्तिसम्भवात् । तत्राह—**अविद्येत्यादि** । एक एव अहङ्कारानवच्छिन्न एव । अविद्याध्यासः चिन्निष्ठाविद्यासम्बन्धः । अनादिः अनुत्पन्नः । अहङ्काराध्यासकाले अहङ्कारावच्छेदेन अविद्यासंसर्गाध्यासेऽपि अविद्याविशिष्टचैतन्यस्य तत्पूर्वकाले सत्त्वमवश्यं वाच्यम् । अन्यथा चिदसम्बन्धेन अज्ञानेन चित्सम्बन्धाहङ्कारज-ननासम्भवादित्यहङ्काराद्यनवच्छिन्नस्याप्यनुत्पन्नस्य अज्ञानचित्सम्बन्धस्य आ-वश्यकत्वात् । तद्विशिष्टरूपेण अनुत्पन्नत्वम् अज्ञानाध्यासस्याविरुद्धमिति भावः । वस्तुतस्तु अहङ्कारोत्पत्तेः पूर्वमपि नानुत्पन्नोऽविद्यासम्बन्धः । किं तु उत्पन्नः पूर्वोत्पन्नस्य अहङ्कारावच्छिन्नस्य अज्ञानचितोः तादात्म्यस्य संस्कारः । पूर्वोत्पन्नः अहङ्कारसंस्कारेणावच्छिन्नस्तेन सम्बन्धेन चिति सम्बन्धस्याज्ञान-स्याहङ्कारजनकत्वम् । तस्यावश्यकत्वेन तदन्यसम्बन्धे मानाभावादिति ध्येयम् । अध्यासस्याज्ञानाध्यासस्य । अनादित्वे अनुत्पन्नत्वे । स्मृतिरूपः स्मृतिसदृशः । स्मृतिरूपत्वेन स्मृतिरूपत्वोक्त्या । **परत्र परावभास इति** । अवमतो भासो ज्ञानं ज्ञेयं वावभासः । तथा चावमतत्वं ज्ञानार्थाध्यासयोर्लक्षणम् । **तच्च** येन रूपेण येन सम्बन्धेन च यदवच्छेदेन यत्र यत्प्रतीयते, तदवच्छेदेन तत्र वर्त-मानाभावस्य तद्रूपसम्बन्धाभ्यामवच्छिन्नप्रतियोगित्वं तन्निष्ठमित्यर्थाध्यासस्य ता-दृशप्रतियोगित्वाश्रयविषयकज्ञानत्वं ज्ञानाध्यासस्येति भावः । अत्र यथाश्रुतवा-**क्यस्य** लक्षणाबोधकत्वादाह—**यद्वेत्यादि** । अनृतत्वमेव लक्षणम् । तदाश्रयस्य सद्-

सोऽध्यास इत्येव सिद्धान्तलक्षणम् । तेन कारणाध्यासेऽपि न लक्षणाव्याप्तिः । कार्याध्यासस्य च प्रवाहरूपेण बीजांकुरवदनादित्वाभिधानान्नकोऽपि दोषः । एवमध्यासे सिद्धे एकस्यात्मनो जीवेश्वरादिव्यवस्था मानमेयादिप्रतिकर्मव्यवस्था चोपपद्यते। तथाहि—अज्ञानोपहित आत्मा अज्ञानतादात्म्यापन्नः स्वचिदाभासाविवेकादन्तर्यामी साक्षी जगत्कारणमिति च कथ्यते । बुद्ध्युपहितश्च तत्तादात्म्यापन्नः स्वचिदाभासाविवेकाज्जीवः कर्ता भोक्ता प्रमातेति च कथ्यते। इति वार्तिककारपादाः । प्रतिदेहं बुद्धीनां च भिन्नत्वात् तद्गताचिदाभासभेदेन तदविविक्तं चैतन्यमपि भिन्नमिव प्रतीयते।

सद्व्यावृत्तिज्ञापनाय सत्यसम्भेदेत्युक्तम् । सत्यतादात्म्येत्यर्थः । सत्यं हि न सत्यसम्भिन्नं सत्ययोरभावात् । नाप्यलीकं तथा । सदसतोस्सम्बन्धाभावादिति भावः । अथवा सत्यसम्भिन्नत्वं लक्षणान्तरमथवा सत्यस्य चैतन्यज्ञानरूपत्वेन सम्बन्धोक्त्याऽनृतज्ञानत्वं ज्ञानाध्यासलक्षणमुक्तम् । अध्यासे अज्ञानाहङ्काराध्यासे । उपपद्यत इति । तथा च तदुपपादनार्थमेव प्रथमोत्पन्नमप्याकाशाध्यासमनुक्त्वाहङ्काराध्यास उक्त इति भावः । अज्ञानोपहितेत्यादि । अज्ञानोपाधौ प्रतिबिम्बभावापन्नत्वात् अन्तर्गतत्तादात्म्यापन्नो यः अज्ञानोपहित आत्मन आभासः । प्रतिबिम्बः सोऽज्ञानोपहितात्मा । विविक्तः बिम्बप्रतिबिम्बयोरभेदस्य यावदुपाधिसत्त्वं भानात् । सोऽन्तर्यामिरूपः । तस्य च स्वरूपतो मिथ्यात्वेऽप्यात्माविवेकाच्चेतनत्वसाक्षित्वादीति ज्ञापयितुम् आत्मा विशेष्यत्वेनोक्तः न तु तथा विवक्षितमित्यत्र । अथवेत्यादिना तादृशपक्षस्य वक्ष्यमाणत्वात् । अन्तर्यामी सर्वेषां प्रेरकः साक्षी सर्वव्यवहारहेतुज्ञानस्वरूपः । तेनैव ज्ञानेन सर्वेषां जीविनां व्यवहार इति भावः । जगत्कारणमिति । न च जगत्कारणत्वरूपेणेशस्य जीवान् प्रति आवृतत्वात् साक्षिरूपेणावृतत्वापत्त्या साक्षित्वानुपपत्तिरिति वाच्यम् । अज्ञानप्रतिबिम्बत्वरूपसाक्षित्वविशिष्टेऽहङ्काराध्यासस्य विवरणादिमत इव वार्तिकमतेऽपि स्वीकारात् जीवान् प्रति साक्षिणोऽनावृतत्वात् । तत्र प्रमाणवृत्त्यभावकालेऽप्यहमज्ञ इति प्रत्ययात् अहङ्कारविशिष्टस्यैव सुखदुःखादिसाक्षित्वेनाज्ञानसाक्षिणोश्वरत्वस्वीकारादिति भावः । बुद्ध्युपहित इति । अहङ्कारोपहित इत्यर्थः । पूर्ववदहङ्कारोपहित आत्मन आभासः तदविविक्ताहङ्कारोपाध्यन्तर्गतप्रतिबिम्बरूपः जीवादिरूपः सुषुप्तावपि संस्काररूपेणाहङ्कारसत्त्वाज्जीवसत्त्वम्। बुद्धीनामहङ्काराणाम्। सर्वत्र सर्वकालेषु। सा-

अज्ञानस्य तु सर्वत्राभिन्नत्वात्तद्गताचिदाभासभेदाभावात् तदविविक्तसाक्षिचैतन्यस्य न कदाचिदपि भेदभानमिति । अस्मिंश्च पक्षे तत्त्वमादिपदे जहल्लक्षणैव । साभासस्योपाधेर्वाच्यार्थस्य हानात् । आभासस्यापि जडाजडविलक्षणत्वेनानिर्वचनीयत्वात् । तदुक्तं संक्षेपशारीरके—'साभासाज्ञानवाची यदि भवति पुनर्ब्रह्मशब्दस्तदा हंशब्दोऽहङ्कारवाची भवति तु जहती लक्षणा तत्र पक्षे । इति ।' न चाभासस्यैव बद्धत्वात् केवलचैतन्यस्य मुक्तत्वात् बन्धमोक्षयोर्वैयधिकरण्यं स्वनाशार्थं प्रवृत्त्यनुपपत्तिश्चेति वाच्यम् । केवलचैतन्यस्यैवाभासद्वारा बद्धत्वाभ्युपगमात् । तदुक्तं वार्तिककारपादैः—'अयमेव हि नोऽनर्थो यत्संसार्यात्मदर्शनम् ।' इति । तेन शुद्धचैतन्यस्याभास एव बन्धः, तन्निवृत्तिश्च मोक्ष इति न किञ्चिदसमञ्जसम् । अथवाभासाविविक्तचैतन्यमपि तत्त्वंपदवाच्यम् । तेन वाच्यैकदेशस्यात्यागादस्मिन्प

क्षिचैतन्यस्येति । 'कर्माध्यक्षः सर्वभूताधिवासः साक्षी'त्यादिश्रुतिः ईशस्य सर्वसाक्षित्वे मानम् । ननु उपाधितादात्म्यापन्नाभासोऽपि विनिगमनाभावात्तत्त्वमादिपदवाच्यः। आभासश्च उपाध्यन्तर्गतस्वरूपोऽपि तद्धर्मविशिष्टचिदेव । तथा च जहदजहल्लक्षणैव । तत्राह—**आभासस्येति** । सोपाध्याभासस्येत्यर्थः । वाच्यार्थस्येत्यनुषज्यते। अनिर्वचनीयत्वात् वार्तिकमते मिथ्यास्वरूपत्वस्वीकारात् । साभासाज्ञानवाची साज्ञानाभासवाची साभासाहङ्कारस्य साहङ्काराभासस्य वाचकः । बद्धत्वात् कर्तृत्वादिसंसारवत्त्वात् । मुक्तत्वात् तत्त्वज्ञानाभिव्यक्तपूर्णानन्दस्वरूपत्वात् । न अधिष्ठानीभूतचिन्मात्रस्वरूपकाणाम् आभासानामित्यर्थः । दर्शनं भासकत्वयोग्यशुद्धचिन्निष्ठम् आभासतादात्म्यमिति यावत् । **तन्निवृत्तिरिति** । तथा च स्वीयवास्तवमुख्यस्वरूपप्राप्तये स्वस्य बद्धस्य नाशार्थमपि प्रवृत्तिः न दोषाय । सर्वमतेष्वपि मुक्तस्य स्वीयरूपस्य प्राप्त्यर्थं बद्धस्वरूपस्य नाशार्थं बद्धे प्रवृत्तिस्वीकारात् । मनोदेहादिविशिष्टरूपं हि बद्धम् । तन्नाशद्वारा तदुपलक्षितमुक्तरूपप्राप्त्यर्थं तत्र प्रवृत्तेः स्वीकारात् । अत्र अज्ञानमेव शुद्धचिन्निष्ठं बन्धः, तन्नाशो मोक्ष इति युक्तम् । 'अविद्यास्तमयो मोक्षः सा च बन्ध उदाहृतः ।' इति वार्तिकोक्तेः । आभासस्याप्यज्ञानजन्यत्वात् । तथाप्याभासस्य सुखदुःखाद्याश्रयत्वेन स्फुटबन्धवत्त्वेन प्रत्ययात् स एव बन्ध उक्तः । अत एव संसार्यात्मदर्शनमित्यनेनाभासस्य दुःखादिसंसारवत्त्वमुक्तम् । नन्वेवं यत्र बन्धस्तदेव जीवस्य स्वरूपं स्यात्तत्राह—**अथवेत्यादि** । **चैतन्यमपीति** । यदा चिदविविक्ताभासो वाच्यः, तदा विनिगमकाभावात् आभासाविविक्तं चैतन्यमपि वाच्यम् । वाच्यार्थस्य चिद्रूपतया

क्षे जहदजहल्लक्षणैवेति न कोऽपि दोषः । अयमेव पक्षः आभासवाद इति गीयते ॥ अज्ञानोपहितं बिम्बचैतन्यमीश्वरः, ५ अन्तःकरणतत्संस्कारावच्छिन्नाज्ञानप्रतिबिम्बितं चैतन्यं जीव इति विवरणकाराः ॥ अज्ञानप्रतिबिम्बितं चैतन्यमीश्वरः, ५ बुद्धिप्रतिबिम्बितं चैतन्यं जीवः, ५ अज्ञानोपहितं बिम्बचैतन्यं शुद्धमिति संक्षेपशारीरककाराः ॥ अनयोः पक्षयोः बुद्धिभेदाज्जीवनानात्वम् । प्रतिबिम्बस्य पारमार्थिकत्वात् जहदजहल्लक्षणैव त-

---

भानस्य उभयथापि निर्वाहादिति भावः । **एकदेशस्येति** । यद्यपि चिदविविक्ताभासस्य वाच्यत्वेऽपि चितो वाच्यविशेषणत्वेन वाच्यत्वमस्ति, तथापि चित्स्वरूपलक्षणा न जहदजहल्लक्षणोच्यते । शक्तिमुख्यविशेष्यलक्षणाया एव तथात्वात् । शक्तिस्वाभाव्येन विशेष्यतयैव भानं चितः स्यात् । जहदजहल्लक्षणा हि शक्यैकदेशशक्तिरेव । यथा बलवदनिष्टाजनकत्वविशिष्टेष्टसाधनत्वज्ञानशक्ताविधिप्रत्यये श्येनेनाभिचरन् यजेतेत्यादौ केवलेष्टसाधनत्वबोधोपधायकतादृशशक्तिरित्युक्तं शब्दमणौ । तथा च विशेषणतया शक्यस्याविशेषणतया च शाब्दधीर्यदि शक्त्या स्यात्, तदा गौर्नित्या पशुरपशुरित्यादावपि स्यात् । किं च विशेषणस्यावाच्यतापक्षे चिदविविक्तस्य वाच्यत्वेऽपि चितो वाच्यत्वाभावेन वाच्यैकदेशत्वाभावे बोधो लक्षणयैवेति भावः । **आभासवाद इति** । स्वरूपतो मिथ्याभूतं प्रतिबिम्बमिति वादः आभासवादः । स्वरूपतः सत्यं प्रतिबिम्बत्वरूपेण मिथ्याभूतं बिम्बमेव प्रतिबिम्बमिति वादस्य विवरणोक्तस्य वक्ष्यमाणस्य प्रतिबिम्बवादत्वमिति भावः । बिम्बचैतन्यम् अज्ञानोपाध्यनन्तर्गतचैतन्यांशुद्धत्वाद्व्यावर्तयति — **अज्ञानोपहितमिति** । **अन्तःकरणेत्यादि** । अन्तःकरणं स्थूलावस्थं मनः । तत्संस्कारं सूक्ष्मावस्थं मनः । तयोरन्यतरविशिष्टं यदज्ञानं तत्प्रतिबिम्बितमिति उक्तान्यतररूपे अज्ञाने च प्रतिबिम्बितमिति यावत् । मनस्त्वेन निवेशे मनस्संस्कारस्य असङ्ग्रहः । तत्र मनस्त्वसत्त्वे मानाभावात् । न हि घटसंस्कारे घटत्वमस्ति । अतस्संस्कारोऽपि पृथगुक्तः । उपाधेः प्रतिबिम्बपक्षपातित्वेन पूर्णानन्दो नास्ति न भातीति व्यवहाररूपकार्यमविद्याप्रतिबिम्ब एव जनयति । न तु बिम्बे । दर्पणादेः स्वगतमालिन्यादिसंसर्गस्य प्रतिबिम्बीभूतमुखादौ जनकत्वदर्शनात् । अतो जीवस्यैव प्रतिबिम्बत्वमुक्तं नेशस्येति बोध्यम् । **शुद्धं** जीवेशानुस्यूतं साक्षिरूपम् । **नानात्वमिति** । मनोवाच्छिन्नस्यैव संसाराश्रयत्वप्रतीत्या मनस उपाधित्वमावश्यकम् । तथा च जीवनानात्वमिति भावः । प्रतिबिम्ब-

स्वमादिपदेषु । इममेव प्रतिबिम्बवादमाचक्षते । अज्ञानविषयीकृतं चैतन्यमीश्वरः,* अज्ञानाश्रयीभूतं च जीव इति वाचस्पतिमिश्राः । अस्मिंश्च पक्षे अज्ञाननानात्वात् जीवनानात्वम् । प्रतिजीवं च प्रपञ्चभेदः । जीवस्यैव

स्वरूपचितः प्रतिबिम्बत्वविशिष्टरूपेण कल्पितत्वेऽपि प्रतिबिम्बस्य स्वरूपचैतन्यमकल्पितमिति भावः । 'रूपं रूपं प्रतिरूपो बभूव तदस्य रूपं प्रतिचक्षणाय' इत्यादिश्रुतयोऽनेकमनोरूपे प्रतिबिम्बितानां जीवत्वे मानानि । ईशस्य प्रतिबिम्बितत्वेऽपि तत्र अविद्या पूर्णानन्दो नास्तीत्यादिव्यवहारं न जनयति । सार्वज्ञ्यश्रुतेः । अज्ञानविषयेत्यादि । ब्रह्म नास्तीत्यादिव्यवहारो यदाश्रितः अज्ञानमपि तदाश्रितम् । कार्यकारणयोः एकाश्रितत्वस्य युक्तत्वात् । स च जीवाश्रित इत्यज्ञानमपि तदाश्रितम् । न च अज्ञानाश्रयस्यैव जीवस्वरूपत्वात् आत्माश्रय इति वाच्यम् । अज्ञानोपहितस्यैव जीवत्वेन जीवाश्रितस्याज्ञानस्य स्वाश्रितत्वाभावात् । न हि दण्डत्वोपहितस्य घटकारणत्वे दण्डत्वस्यापि तत् । एवं च अज्ञानाश्रयो नास्ति न भातीतिव्यवहाराभावात् अज्ञानानाश्रयीभूतस्यैव अज्ञानविषयत्वात् तदुपहितचिदेव ईश इति भावः । **अज्ञाननानात्वादिति** । कस्मिंश्चिज्जीवन्मुक्तेऽपि कस्यचित् बन्धोपलब्धेः जीवभेदप्रयोजकं जीवोपाध्यज्ञाननानात्वं कल्प्यते । प्रपञ्चभेदः ईशाकाशादिप्रपञ्चनानात्वम् । एकाज्ञाननाशेऽपि अज्ञानतद्विषयेशतत्कार्याकाशादीनां सत्त्वात् नानात्वमिति भावः । ननु, सृष्ट्यारम्भकाले सर्वैरज्ञानैः एक एव प्रपञ्चो जन्यताम् । अज्ञानभेदेन प्रपञ्चभेदकल्पने गौरवात् । एकाज्ञानस्य उच्छेदक्षणे प्रपञ्चस्य उच्छेदे तत्तद्वितीयक्षणे विद्यमानाज्ञानानां परिणामः प्रपञ्चान्तरं जायते । एवञ्च एकस्मिन् प्रपञ्चोच्छेदक्षणे केनापि प्रपञ्चो नोपलभ्यत इति स्वीक्रियते । उक्तलाघवानुरोधात् । न च भवन्मतेऽपि तत्तदज्ञानव्यक्तिभिः क्रमेण नानाप्रपञ्चोत्पत्तिस्वीकारेण न लाघवमिति वाच्यम् । शतादिसंख्यपुरुषाणां युगपत् मुक्तिस्थले शताद्यज्ञानव्यक्तानां युगपन्नाशेन तावदज्ञानभेदेऽपि प्रपञ्चभेदाभावात् । युगपन्नानाप्रपञ्चस्वीकारे युगपदुत्पन्ननानाकाशादिषु नानापुरुषैः युगपदनुभूयमाननानन्तसंयोगादिव्यक्तिकल्पने गौरवाच्चेति चेन्न । सृष्टिप्रलयवाक्यैस्तावत् परिमितप्रलयकालोत्तरमाकाशादीनां क्रमेण सृष्टिबोधनात् । युगपदेवाकाशादिसर्वप्रपञ्चोत्पत्तौ मानाभावात् । तत्तदसाधारणकारणसमवधानं विना उक्तद्वितीयक्षणे उ-

स्वाज्ञानोपहिततया जगदुपादानत्वात् । प्रत्यभिज्ञा चापि सादृश्यात् ।

पलभ्यमानसर्वकार्योत्पत्त्यसम्भवात् । तत्तदसाधारणानां हेतुहेतुमद्भावापन्नानामपेक्षणे चानेकक्षणेषु तत्तत्कार्योपलम्भापलापापत्तेः । न हि क्रियोत्पत्तिद्वितीयक्षणे प्रपञ्चोच्छेदे विभागाद्युत्पत्तिस्सम्भवति । किं च जीवस्य जगदुपादानत्वबोधिका 'पुरत्रये क्रीडति यस्तु जीवस्ततस्तु जातं सकलं विचित्र'मित्यादिश्रुतिः । अज्ञानस्य तद्बोधिका । 'मायां तु प्रकृतिं विद्यात्' सृष्ट्वा प्रविश्य । 'मूढ इव व्यवहरन्नास्ते मायथैवे'ति श्रुतिश्च एकवचनान्तानां जीवमायामूढपदानां स्वारस्यात् । एकैकजीवस्याज्ञानस्य च जीवाज्ञानान्तरनिरपेक्षोपादानत्वं बोधयति । त्वत्पक्षे तु तद्बाधस्स्यात् । तथा च साधूक्तं प्रतिजीवं प्रपञ्चभेद इति । पुरत्रये विराट्हिरण्यगर्भाव्याकृतरूपेण । नन्वेवं 'यो घटो मया दृष्टः स एव त्वये'ति प्रत्यभिज्ञा न स्यात् । तत्राह—**प्रत्यभिज्ञेति । सादृश्यादिति** । दृष्टत्वरूपसाधारणधर्मविषयकात् त्वद्दृष्टो मद्दृष्ट इत्याकारकेत्यर्थः । त्वद्दृष्टव्यक्त्यभेदस्य मद्दृष्टव्यक्तावभावेऽपि मदीयप्रपञ्चान्तर्गतस्य मया कल्पितस्य व्यावहारिकस्य मद्दृष्टव्यक्तिनिष्ठस्य त्वद्दृष्टत्वस्य उक्तप्रत्यभिज्ञाविषयता । यद्यपि मद्दृष्टत्वं तादृशं मद्दृष्टव्यक्तावेव वर्तते । न तु त्वद्दृष्टे, तथापि त्वद्दृष्टतात्वस्य त्वद्दृष्टत्वे त्वत्कल्पिते सत्त्वात् एकजातीयस्य त्वद्दृष्टत्वस्य सादृश्यत्वसम्भवः । न हि घटादिरिव घटत्वादिरपि जीवभेदेन भिन्नः । येन त्वद्दृष्टतात्वमपि तथा स्यात् । सादृश्यप्रत्ययबलेन हि जातिमात्रं सर्वजीवज्ञेयमेकमेव स्वीक्रियते । तथा च त्वद्दृष्टतायाः त्वद्दृष्टवृत्तिरूपादिस्वरूपत्वेन तद्वृत्तिजातिविशेषस्यैव त्वद्दृष्टतात्वरूपत्वेन तद्घटितं सादृश्यम् । न च तथापि त्वदीयत्वद्दृष्टवृत्तिरूपादिजातीयरूपवान् मद्दृष्ट इति ज्ञानासम्भवः । अन्यदृष्टस्य अन्येन ज्ञातुमशक्यत्वादिति वाच्यम् । तथाऽपि वस्तुगत्या त्वद्दृष्टरूपवृत्तिजातिविषयस्य ज्ञानस्य सम्भवेन तस्यैव प्रकृते प्रत्यभिज्ञापदार्थत्वात् । एवञ्च तत्त्वज्ञानं स्वाश्रयजीवमात्रदृश्यस्यैवोच्छेदकं, न तु जातेः । अथवा 'येयं गङ्गा नरैस्सेव्या सेव्यते सा सुरादिभिः । सर्वेषां पावनी सैका प्रयच्छति परं पदम्॥'इत्यादिपुराणादिवाक्यमूलार्षप्रत्यभिज्ञैवात्र प्रत्यभिज्ञापदार्थः । आर्षज्ञानस्य देवनरादिदृष्टगङ्गादिरूपसजातीयरूपवतीयं गङ्गेत्याकारकस्य सर्वजीवप्रपञ्चग्राहकत्वात् । वस्तुतस्तु सर्वजीवाज्ञानजन्यनानाग-

ईश्वरस्य सप्रपञ्चजीवाविद्याधिष्ठानत्वेन कारणत्वोपचारादिति । अयमेव चावच्छेदवादः । अज्ञानोपहितं बिम्बचैतन्यमीश्वरः । अज्ञानप्रतिबिम्बचै-

---

ङ्गादीनां सर्वजीवग्राह्यत्वेऽपि न क्षतिः । एकस्य तत्त्वज्ञानेनापरस्य प्रपञ्चानुच्छेद इत्येतदर्थमेव प्रपञ्चभेदस्वीकारात् । तथा च त्वदृष्टस्यापि मम ग्रहणात् ऐक्यप्रत्यभिज्ञा सम्भवत्येव । प्रत्यभिज्ञा चेत्यादिमूलं तु पूर्वदिने मुक्तो यः पुरुषः तदृष्टो घटः इदानीं मया दृष्ट इत्यादिधियः सादृश्यविषयकत्वपरम् । तत्र तद्दृष्टस्य इदानीमभावेन मद्दृष्टे तदैक्यविषयत्वासम्भवात् । यद्यपि जीवनिष्ठाज्ञानविषयब्रह्मोपादानकं जगत् । अविद्या तु प्रमातृदोषविधया जगतो निमित्तकारणम् । न तूपादानम् । ब्रह्मनिष्ठजगतो व्यधिकरणत्वात् । न हि शरावादिनिष्ठदुग्धादेः घटादिनिष्ठदध्यादिरूपपरिणामस्सम्भवतीति कल्पतर्वादौ वाचस्पत्याशयो वर्णितः, तथापि मायोपादानत्वज्ञापिकायाः त्रयमप्येतत् सुषुप्तं स्वप्नं मायामात्रम् । 'मायां तु प्रकृति'मित्यादिश्रुतेः स्वारस्यात् जीवोपादानत्वपरतयापि वाचस्पतिवाक्यानां नेतुं शक्यत्वात् जीवोपादानत्वश्रुतेश्च जीवोपादानत्वमुक्तम् । एवञ्चाज्ञानाविषयस्यापि जीवस्य परिणामिकारणाज्ञानाश्रयत्वादेव उपादानत्वं न विरुद्धम् । ब्रह्मणश्चानुपादानत्वेऽपि तज्ज्ञानमेवाज्ञाननिवर्तकम् । समानविषययोरेव ज्ञानाज्ञानयोः नाश्यनाशकभावस्य कल्पनत्वात् । इदं रजतमित्यादिभ्रमस्थलेऽपि पल्लवाविद्यापरिणामरजताद्युपादानत्वमुक्ताविद्याश्रयत्वात् जीव एव । तस्यैव शुक्त्याद्युपादानत्वात् शुक्त्याद्यवच्छेदेन जीवगतरजतादिप्रतीतिरुक्ताविद्यायाः शुक्त्याद्यवच्छिन्नचिद्विषयकत्वात् तादृशज्ञाननाश्यत्वम् । **ईश्वरस्येत्यादि** । जीवो न जगदुपादानम् । किं तु ईश्वर इत्यादिशास्त्रीयवाक्येषु उपादानपदमुपादानभूतजीवनिष्ठाविद्याविषयपरमित्यर्थः । 'यतो वा इमानि भूतानि जायन्ते' इत्यादिश्रुतिस्तु ब्रह्मणः जगत्कारणत्वं बोधयति । जीवब्रह्माभेदपरा इति बोध्यम् । **अवच्छेदवाद** इति । 'घटसंवृतमाकाशं नीयमाने घटे यथा । घटो नीयेत नाकाशं तद्वज्जीवो नभोपम' इत्यातिश्रुतयो जीवस्यावच्छिन्नरूपत्वबोधिकाः । **अज्ञानोपहितमित्यादि** । जीवोपाधौ मनो न निवेश्यते । हस्तपादाद्यवच्छिन्नानामिव मनोवच्छिन्नानां भेदेऽपि जीवभेदास्वीकारात् । परं तु अज्ञानमेवोपाधिः । तस्य चैकत्वमेव । लाघवात् । 'मायांतु प्रकृतिमजामेका' मित्यादिश्रुतिसिद्धैकवचनादिति भावः । **अज्ञानानुपहितमिति** । अज्ञानोपहितात् भिन्नमित्यर्थः । नन्वीश्वरस्याज्ञानानुपहि-

तन्यं जीव इति वा, अज्ञानानुपहितं शुद्धचैतन्यमीश्वरः अज्ञानोपहितं जीव इति वा मुख्यो वेदान्तसिद्धान्तः एकजीववादाख्यः । इममेव दृष्टिसृष्टिवादमाचक्षते । अस्मिंश्च पक्षे जीव एव स्वाज्ञानवशात् जगदुपादानं निमित्तं च । दृश्यं सर्वं प्रातीतिकम् । देहभेदाच्च जीवभेदभ्रान्तिः । एकस्यैव च स्वकल्पितगुरुशास्त्राद्युपबृंहितश्रवणमननादिदार्ढ्यादात्मसाक्षात्कारे सति मोक्षः । शुकादीनां च मोक्षश्रवणं त्वर्थवादः । महावाक्ये च तत्पदमनन्तसत्यादिपदवदज्ञानानुपहितचैतन्यस्य लक्षणयोपस्थापकमित्याद्या अवान्तरभेदाः स्वयमूहनीयाः । ननु, वस्तुनि विकल्पासम्भवात् कथं परस्परविरुद्धमतप्रामाण्यम् । तस्मात् किमत्र हेयं किमुपादेयमिति

तत्वे प्रपञ्चमध्ये अवस्थानं न स्यात् । तथा च 'यः पृथिव्यां तिष्ठन्निति-श्रुतिविरोधस्स्यादिति बिम्बप्रतिबिम्बरूपेश्वरजीववादिभिः विवरणकारैरवच्छेदवादे दूषणमुक्तम् । तत्राह—शुद्धमिति । तथाचोपहिते जीवचैतन्ये अधिष्ठानतया केवलचैतन्यस्य तादात्म्यमवश्यं वाच्यमिति प्रपञ्चमध्ये तदवस्थाने न कोपि दोष इति भावः । ईश्वरस्य जगदुपादानत्वे स्रष्टव्यालोचनं कल्प्यमवश्यम् अधिष्ठानाद्यभिज्ञकर्तृककार्यं प्रति कर्तव्यत्वेन तदालोचनस्य हेतुत्वात् । मायाविकर्तृकेन्द्रजालादौ तथा दृष्टत्वात् । जीवस्य जगदुपादानत्वे तु तन्न कल्प्यम् । स्वापादिरूपकार्यं प्रति तदहेतुत्वस्य दृष्टत्वात् । तथा च लाघवात् जीवस्यैव जगदुपादानत्वमित्याशयेनाह—अस्मिंश्चेत्यादि । स्वाज्ञानवशात् स्वं प्रति आवारकं यदज्ञानं तद्वशात् । जीव एव उपादानं निमित्तं कर्ता च । नेशः । उक्तरीत्या कार्यालोचनकल्पने गौरवादिति भावः । दृश्यमज्ञानतत्प्रयुक्तं प्रातीतिकं यदा यदा विद्यते, तदावश्यं ज्ञायते । साक्षिस्वरूपेण जीवेन स्वनिष्ठं सर्वं विद्यमानतादृशायां प्रकाश्यते । न तु तत्रावरणं तद्ज्ञकमनोवृत्तिर्वा कल्प्यते । गौरवादिति भावः । देहभेदादित्यादि । देहावच्छिन्नानां भेदेऽपि अविद्यावच्छिन्नरूपेण जीवैक्यं न विरुद्धमिति भावः । अर्थवादः श्रवणादेर्विधेयस्य स्तुतिः । ननु, 'तत्त्वमसी'ति वाक्ये तत्पदं न प्रक्रान्तेशपरम् । 'तत्तेजोऽसृजते'त्यादिपूर्ववाक्येन जगत्कारणजीवस्यैव प्रक्रान्तत्वेनासङ्गतेः । तथा च श्रुतिविरुद्धोऽयं पक्षः तत्राह—सत्यादिपदवादिति । यथा सत्यादिपदं जगत्कारणत्वादिप्रक्रान्तरूपमनुपस्थाप्य लक्षणया शुद्धोपस्थापकं, तथा तत्पदमपि द्वारम् । न

चेन्न । क एवमाह वस्तुनि विकल्पो न सम्भवतीति । स्थाणुर्वा पुरुषो-वा राक्षसो वेत्यादिविकल्पस्य वस्तुन्यपि दर्शनात् । अतात्त्विकी सा कल्पना पुरुषबुद्धिप्रभवा । इयं तु शास्त्रीया जीवेश्वरविभागादिव्यवस्थेति चेत् । नूनमतिमेधावी भवान् । अद्वितीयात्मतत्त्वं हि प्रधानं फलवत्त्वाद-ज्ञातत्वाच्च प्रमेयं शास्त्रस्य । जीवेश्वरविभागादिकल्पनास्तु पुरुषबुद्धिप्रभवा अपि शास्त्रेणानूद्यन्ते । तत्त्वज्ञानोपयोगित्वात् । 'फलवत्सन्निधावफलं तद-ङ्ग'मिति न्यायात् भ्रमसिद्धस्यापि श्रुत्यानुवादसम्भवात् । एतेन द्वैतज्ञा-नेनाद्वैतज्ञानस्य बाधो निरस्तः । घटादिद्वैतज्ञानस्यापि अद्वैतसन्मात्रांशे अज्ञाते प्रामाण्याभ्युपगमाच्च । ज्ञानाज्ञानयोस्समानाश्रयविषयत्वनियमात् ।

तु सत्यादिपदेषु सत्यत्वादिविशिष्टोपस्थितिः । तत्पदे युगपत् सर्वज्ञरूपप्रसिद्धा-र्थोपस्थितिरिति भावः । ननु, 'यस्सर्वज्ञस्सर्वविद्यस्य ज्ञानमयं तपस्तस्मादेतद्ब्र-ह्म नाम रूपमन्नञ्च जायत' इति श्रुत्या जगत्कारणे जीवे सर्वज्ञत्वबोधानुपप-त्तिः । तत्राह—इत्यादीति । उक्तश्रुतौ सर्वविषयकज्ञानवत्त्वमात्रं विवक्षितम् । न तु युगपत् सर्वज्ञानवत्त्वम् । तथा च जीवस्यापि क्रमेण तत्सम्भवान्न दो-षः । अथवा युगपत्सर्वज्ञाभेदो जीवे उक्तश्रुत्या बोध्यते । यतो वेत्यादिश्रुतिवदि-ति भावः । वस्तुनि पुरुषप्रयत्नानिष्पाद्ये । विकल्पासम्भवात् विरुद्धपक्षद्वयबोध-कवाक्ययोः प्रामाण्यासम्भवात् । प्रयत्नसाध्ये विरुद्धनानापक्षबोधकयोरनुष्ठानप-रत्वसम्भवेन कालभेदेन तद्बोधनात् प्रामाण्यसम्भवः । न तथाभूतवाक्ययोरि-ति भावः । अतथाभूतवाक्ययोः प्रामाण्यासम्भवेऽपि विचित्ररुचिनानापुरुषीयना-नाविधकल्पनानुवादकत्वमिति सिद्धान्तयितुं दृष्टान्तमाह—क एवमाहेत्यादि । शास्त्रीया तत्त्वावेदकशास्त्रतात्पर्याधीना । प्रधानम् इतरप्रतिपादनोपकार्यप्र-तिपत्तिकम् । तदङ्गं तदुपकारकम् । भ्रमसिद्धस्य स्वाभ्रमप्रपञ्चस्य । श्रुत्या स्व-भ्रमबोधकश्रुत्या । एतेन अद्वैतज्ञानस्य परमपुरुषार्थसाधनत्वाज्ञातविषयकत्वादिरू-पबलवत्त्वसम्भवेन । ननु, प्रत्यक्षादिप्रमाणानां सन्मात्रांश इव घटाद्यंशेऽपि प्रा-माण्यं स्यात् । तथा च कथमद्वैतज्ञानं बलवत्तत्राह—घटादीत्यादि । सन्मा-त्रांशे न तु घटाद्यंशे । ननु, घटादेरज्ञानत्वाभावेऽपि घटं पश्यामीत्यादिप्र-तीत्या चाक्षुषादिविषयत्वसम्भवात्तदंशे प्रामाण्यं सम्भवति । तत्राह—ज्ञानेत्या-दि । तथा च चाक्षुषादिवृत्तेः समानविषयकाज्ञाननिवर्तकत्वानुरोधेनाज्ञातचिद्वि-

जडे च प्रमाणप्रयोजनाभावेनाज्ञानानभ्युपगमात् तदवच्छिन्नचैतन्याज्ञा-

---

षयत्वेऽपि घटादिविषयकत्वे मानाभावः । घटं पश्यामीति साक्षिधीस्तु घटावच्छिन्नचिद्विषयकचाक्षुषादि विषयीकुर्वती चाक्षुषादिवृत्तेः विषयतावच्छेदकत्वेन घटादिकं भासयतीति भावः । ननु, 'घटं न जानामी'ति साक्षिधिया घटादेरप्यज्ञानविषयत्वावगाहनात् चाक्षुषादिवृत्तिविषयत्वेनैव घटादिकं गृह्यते साक्षिणा । न त्ववच्छेदकत्वेन । तत्राह —जडे चेत्यादि । अज्ञानेति । अज्ञानविषयत्वेत्यर्थः । घटाद्यवच्छेदेन चितस्स्फुरणवारणाय घटाद्यवच्छेदेन चित्यज्ञानविषयतावश्यकल्प्या । अतस्तदवच्छेदकत्वेनैव घटादीनामस्फुरणोपपत्तौ तेष्वज्ञानविषयतान्तरकल्पने गौरवम् । न च घटाद्युपहितचैतन्यानि केवलचितो भिन्नानि न वा । आद्ये तेष्वज्ञानविषयत्वानि घटादिषु तदवच्छेदकत्वानि कल्पनीयानीति तदपेक्षया घटादिष्वज्ञानविषयत्वानां कल्पनैव लघीयसी । द्वितीये घटाद्यवच्छेदेन स्फुरणं घटादिविशेषितचिद्रूपे संशयाद्यभावः । तदावरणं च तस्मिन्नज्ञानविषयताऽपि घटादावज्ञानविषयत्वानां स्वीकारेण निर्वहतीति वाच्यम् । आद्ये घटादाववच्छेदकत्वानामकल्पनादज्ञातचित्तादात्म्यादेव तत्राज्ञातत्वव्यवहारात् । न च विनिगमकाभावः । घटादावज्ञातत्वस्वीकारेऽपि अज्ञातघटादितादात्म्येन तदुपहितचित्यज्ञातत्वव्यवहारसम्भवादिति वाच्यम् । चित्यज्ञातत्वस्वीकारे हि अज्ञातत्वशून्याचिद्रूपमपरोक्षत्वं वाच्यम् । घटादौ तत्स्वीकारे तु नापरोक्षत्वं तथा । घटाद्याकारवृत्त्यभावकालेऽपि घटादेरपरोक्षत्वापत्तेः । किं तु अज्ञातत्वशून्योपहितत्वविशिष्टचिद्रूपम् । तथा च गौरवम् । न चाज्ञातत्वशून्यत्वमेव तदिति वाच्यम् । अलीकस्यापि तदापत्तेः । न चाभानापादकाज्ञातत्वम् अलीके सदास्त्येवेति वाच्यम् । साक्ष्यसम्बन्धादेव तत्राभानोपपत्तौ अज्ञातत्वास्वीकारात् । न च अज्ञातत्वशून्यं यत् घटादि तत्तत्स्वरूपमेव तदिति वाच्यम् । 'घटोऽपरोक्षः पटोऽपरोक्ष' इति प्रतीतेः एकापरोक्षतात्वव्यक्तिविषयत्वात् । अज्ञातत्वशून्यचित्वस्यैव तादृशव्यक्तित्वात् घटाद्युपादानकप्रवृत्त्यादौ घटाद्यपरोक्षतानां तेन रूपेणैककारणत्वस्य मन्मते सम्भवाच्च । एवं पूर्वोक्तयुक्तेः द्वितीयपक्षेऽपि न घटादावज्ञानविषयत्वम् । नन्वज्ञातत्वशून्यचैतन्यं दितीयपक्षे ब्रह्मज्ञानोत्तरमपि अप्रसिद्धम् । तदापि घटं न जानमीति प्रत्ययेन चितः अज्ञातत्वशून्यत्वाभावात् । तथा च तदापि घटाद्याकारवृत्तिकाले घटं साक्षात्करोमीति व्यवहारो न स्या-

दिति चेन्न । द्वितीयपक्षे 'घटं साक्षात्करोमी'त्यादौ घटाद्यवच्छिन्नेनाज्ञानविषयत्वेन शून्यं चैतन्यं साक्षात्करोमीति व्यवह्रियते । तथा च घटाद्याकारवृत्तिकाले घटाद्यवच्छिन्नस्याज्ञानविषयत्वस्यापसरणात् 'घटं साक्षात्करोमी' ति व्यवहारः । एवं च आद्यपक्षे अज्ञातत्वशून्यचिति तादात्म्यस्य द्वितीयार्थस्यान्वयः, द्वतीयपक्षे तु अज्ञातत्वे अवच्छिन्नत्वस्य द्वितीयार्थस्येति विवेकः । आख्यातस्य तदनुकूलव्यापारोऽर्थः । ननु, द्वितीयपक्षो नोपपद्यते । अज्ञातत्वसामान्याभाववच्चितः साक्षात्करोत्यर्थत्वेन घटाद्यवच्छिन्नाज्ञातत्वाभाववच्चितस्साक्षात्करोतिना बोधासम्भवात् । एव 'मिदं सुखं साक्षात्करोमी' ति धीर्न स्यात् । एतत्सुखावच्छिन्नस्याज्ञानविषयत्वस्याप्रसिद्ध्या तदभाववच्चितोऽप्यप्रसिद्धेः । न च घटाद्यवच्छिन्नविषयत्वीयविशेषणतासम्बन्धेनाज्ञानविषयत्वस्याभावो बुध्यते । यदर्थबोधकपदोत्तरं द्वितीयासमभिव्याहृतः सक्षात्करोतिः, तदवच्छिन्नविषयत्वीयविशेषणतासम्बन्धभानस्य व्युत्पत्तिसिद्धत्वादिति वाच्यम् । पदार्थयोस्संसर्गविषया भासमान एव समभिव्याहारस्य नियामकत्वेनापदार्थबोधे तस्यानियामकत्वादिति चेत् अत्रोच्यते । द्वितीयपक्षे अज्ञातत्वे अभावे चिति च साक्षात्करोतेश्शक्तित्रयस्वीकारात् अज्ञातत्वे च घटाद्यवच्छिन्नत्वस्यान्वयेन घटाद्यवच्छिन्नाज्ञातत्वस्यैवाभावेऽन्वयेन तादृशाभावस्य च चित्यन्वयेन विशिष्टचिद्बोधसम्भवः । चितस्तु तद्व्यक्तित्वेनैव शक्यता शाब्दधीविशेष्यता च । तेन शाब्दधीविशेष्यतायाः किञ्चिदवच्छिन्नत्वनियमेऽपि न दोषः । अथवा चिन्निष्ठविशेष्यतासम्बन्धेनाभाववदेव द्वितीयं शक्यम् । तृतीयं तु नाभ्युपेयते । अभावस्य तु पदार्थैकदेशत्वेऽपि ससम्बन्धिकत्वात् तत्राज्ञातत्वान्वयेऽपि न दोषः । 'एतत्सुखं साक्षात्करोमी' त्यादौ तु नाप्रसिद्धिः । सुखमात्रे नित्यत्वादिभ्रमहेत्वज्ञानविषयत्वस्य सर्वसुखावच्छिन्नस्य प्रसिद्धत्वात् । 'ब्रह्म साक्षात्करोमी' त्यादौ तु न ब्रह्मावच्छिन्नत्वस्याज्ञानविषयस्याभानम् । अप्रसिद्धत्वात् । नाप्याधेयत्वस्य द्वितीयार्थतया ब्रह्मवृत्त्यज्ञातत्वशून्यचितो भानम् । ब्रह्मज्ञानोत्तरमपि घटाद्यवच्छिन्नस्य ज्ञातत्वस्य ब्रह्मचिदसत्त्वेन तादृशचितोऽप्रसिद्धेः । किं तु ब्रह्मवृत्त्यज्ञातत्वानवच्छिन्नविषयत्वीयविशेषणतासम्बन्धेन योऽभावस्तद्भानम् । आधेयत्वं तु द्वितीयया लभ्यते । ब्रह्मपदसमभिव्याहारस्य च तत्सम्बन्धभाननिया-

मकत्वात् । 'घटं साक्षात्करोमी' त्यादौ तु घटत्वाद्यवच्छिन्नाज्ञातत्वस्यैव नोक्तसम्बन्धेनाभावभानम् । दृश्यवाचकपदसमभिव्याहृतद्वितीयाया एवावच्छिन्नार्थकतया न 'ब्रह्म साक्षात्करोमी' त्यादौ द्वितीययावच्छिन्नत्वबोधः । वस्तुतस्तु साक्षात्करोतेस्सकर्तृकत्वात् प्रयोजकेऽपि शक्तिः । तथा च 'घटं साक्षात्करोमी' त्यादौ घटत्वाद्यवच्छिन्नोऽज्ञातत्वस्य योऽभावः, तत्प्रयोजकविशिष्टचिद्बोधः । अवच्छिन्नत्वं च अवच्छेदकतासम्बन्धेनाधेयत्वम् । 'ग्रामं गच्छती'त्यादौ द्वितीयायाधेयत्वबोधात् । अथवाज्ञातत्वाभावप्रयोजकत्वविशिष्टचित्येकैव शक्तिः । न चैवं ब्रह्मसाक्षात्कारपूर्वमपि 'ब्रह्म साक्षात्करोमी' ति धीस्स्यात् । घटाद्याकारवृत्तिकाले घटाद्यवच्छेदेन ब्रह्मवृत्तेरज्ञातत्वाभावस्यानुभवात् । एकशक्तिपक्षे हि नानवच्छिन्नविषयत्वीयविशेषणतासम्बन्धेनाज्ञानविषयत्वस्याभावो बुध्यते । येन तस्य व्याप्यवृत्तितया घटाद्यवच्छिन्नता न स्यादिति वाच्यम् । अनवच्छिन्नस्याज्ञानविषयस्य ब्रह्मणि व्याप्यवृत्तितया तत्सत्त्वे तादृशाभावस्यासम्भवात् । न चैवं 'घटं साक्षात्करोमी' त्यादौ अज्ञातत्वाभावस्य ब्रह्मज्ञानपूर्वं घटाद्यवच्छिन्नतया धीर्न स्यादिति वाच्यम् । तादृशबुद्धेरेव कल्प्येऽनुपपन्नत्वेऽपि 'घटं साक्षात्कारोमी' त्यादौ अज्ञानविषयतावच्छेदकत्वाभावविशिष्टचिति शक्त्यन्तरस्वीकारेण तद्धीसम्भवात् 'ब्रह्म साक्षात्करोमी' त्यादावेव विषयतामात्रसम्बन्धेनाज्ञानाभावघटितशक्त्यर्थसम्भवात् । न च ब्रह्मज्ञानपूर्वं घटाद्याकारवृत्तिकाले घटाद्यवच्छेदेनाज्ञानविषयताभावस्य ब्रह्मणि सत्त्वात् 'ब्रह्म साक्षात्करोमी' ति धीस्स्यादिति वाच्यम् । अनवच्छिन्नस्याज्ञातत्वस्य ब्रह्मणि सत्त्वे घटाद्यवच्छेदेनाज्ञातत्व सामान्याभावो नास्तीत्यस्य पूर्वमेवावेदितत्वात् । अवच्छिन्नचितां केवलचिदन्यत्वपक्षे त्वज्ञाततासामान्याभावश्चिद्वृत्तिर्निवेश्यः । चिति तादात्म्येन ब्रह्मघटादेरन्वयः । घटाद्यवच्छिन्नचिति घटादेरिव वृत्तिविषयत्वोपहितब्रह्मचिति ब्रह्मणस्तादात्म्यसत्त्वात् । अत एव फलवत्त्वेन बुध्यमाना चिदेव ज्ञानकर्मतत्तादात्म्यात् घटादिकं तथा व्यवह्रियते । ज्ञानात्यर्थं तु असत्त्वापादकमेवाज्ञानं निवेश्यम् । अधिकं स्वग्रे वक्ष्यते । तस्मात् घटावच्छिन्नचितां केवलचिदनन्यत्वेऽपि न काप्यनुपपत्तिः । अज्ञानस्य पूर्णानन्दनिष्ठविषयतान्या या विषयता तदवच्छेदकत्वानां घटादौ स्वीकारे तेषामेव घटाद्याकारवृत्तिनाश्यत्वम् । तथा

नादेव तत्राप्यज्ञानव्यवहारोपपत्तेः । सर्वप्रमाणानां चाज्ञातज्ञापकत्वेनैव

च वृत्तिकाले घटादीनामज्ञानविषयतानवच्छेदकत्वात् उक्तरीत्या 'घटं साक्षात्करोमी'ति धीसम्भवः । यदि तु सम्बन्धिनाशे सम्बन्धस्य सत्त्वासम्भवात् ब्रह्मज्ञानोत्तरं ब्रह्मनिष्ठस्याज्ञानस्य तद्विषयत्वस्य च नाशे तदवच्छेदकत्वानामपि नाशात् घटादौ वृत्त्यभावकाले साक्षात्करोमीत्यादिव्यवहारापत्तेः । उक्तावच्छेदकत्वानामावरणरूपत्वासम्भवादिति चिन्त्यते, तदाप्यज्ञानस्य पूर्णानन्दनिष्ठानवच्छिन्नविषयत्वमेव ब्रह्मज्ञाननाश्यम् । अज्ञानं तु चरमेणैव ब्रह्मज्ञानेन नाश्यम् । न तु प्रारब्धभोगकालीनेनेति स्वीक्रियते । अथवा अज्ञाननानात्वपक्षमवलम्ब्याज्ञानानामेव वृत्तिनाश्यता स्वीक्रियते । तस्मादेकाज्ञानपक्षे घटाद्यवच्छिन्नचितां केवलचिदन्यत्वे तासु पूर्णानन्दे च अनवच्छिन्नान्येवाज्ञानविषयत्वानि । तासां तदनन्यत्वे तु एकस्यैवाज्ञानस्य एकविषयता पूर्णानन्दनिष्ठा स्वीक्रियते । अन्यासां तु विषयतानां घटादाववच्छेदकत्वानि । नानाज्ञानपक्षे पक्षेवाज्ञानानां विषयतावच्छेदकत्वानि घटादिषु स्वीक्रियन्ते । न तु विषयत्वम् । प्रमाणाभावात् चिन्निष्ठैनैवाज्ञानविषयत्वेन तेषु न भातीति व्यवहारसम्भवेन प्रयोजनाभावाच्चेति भावः । नन्वास्तां चित एवाज्ञातत्वम् । प्रमेयत्वं तु घटादेरेव । घटादिविषयिकयैव प्रमया घटाद्यवच्छिन्नचिद्विषयकाज्ञाननाशस्य सम्भवात् । तत्राह—**सर्वेति** । स्मृतिप्रामाण्यवारणायाज्ञातविषयकत्वघटितं प्रामाण्यमिति भावः । ननु, कथमज्ञातज्ञापकत्वेन स्मृतेर्वारणम् । तज्जनकसंस्कारस्यानुद्बोधकत्वे स्मृतिपूर्वं तद्विषयेऽपि अज्ञातत्वसम्भवात् । अज्ञातत्वाभावे तत्र भ्रमस्यानुभवसिद्धस्यानुपपत्तेरिति चेन्न । स्वकरणस्य यो व्यापारः तदुत्पत्त्यव्यवहितपूर्वक्षणे स्वकरणाधिकरणक्षणे वा यदज्ञातं व्यवहारकाले चाबाधितं तद्विषयकाज्ञानत्वस्यैव प्रमात्वरूपत्वात् । स्मृतौ तदभावात् । समानविषयकनिश्चयरूपस्य तत्करणस्याधिकरणक्षणे तद्व्यापाररूपसंस्कारस्य उत्पत्त्यव्यवहितपूर्वक्षणे वा तद्विषयस्याज्ञातत्वासम्भवात् । अथ ज्ञानान्तरेण योऽर्थो यस्मिन् क्षणे गृहीतः, तदव्यवहितोत्तरक्षणोत्पन्नस्य तदर्थज्ञानस्य तदर्थव्यवस्थापकत्वं न स्यात् । तदर्थविपरीतबुद्ध्यनुत्पादप्रयोजकत्वरूपस्य तदर्थव्यवस्थापकत्वस्य तदर्थविपरीतबुद्ध्युत्पादकाज्ञाननिवर्तकज्ञानेष्वेव सत्त्वात् ज्ञानान्तरगृहीते चाज्ञानाभावेन तद्विषयकोक्तज्ञानस्याज्ञाननिवर्तकत्वात् । तथा चोक्तज्ञानस्य प्रमात्ववारणाय

स्वोत्पत्त्यव्यवहितपूर्वक्षणे यदज्ञातं तद्घटितमेव प्रमात्वम् । न तु स्वकरणादिघटितमिति चेन्न । स्मृतौ प्रमात्वस्यावश्यवारणीयत्वेन स्वकरणादिघटितत्वस्यापि आवश्यकत्वात् । स्मृतिर्हि सर्वाऽप्यविद्यावृत्तित्वेन भ्रम इति वेदान्तसिद्धान्तः । ननु, कथमेतदुपपद्यते । उच्यते । गृहीतग्रहणस्वभावा स्मृतिरित्यध्यासलक्षणे वाचस्पत्युक्तेः स्मृतिमात्रस्य ज्ञातत्वविशिष्टविषयकत्वात् ज्ञातत्वस्य प्रकृते पूर्वगृहीतप्रमाविषयत्वभ्रमविषयत्वान्यतररूपस्य स्वविषयस्मृत्या ग्रहणात् भ्रमविषयत्वेन मिथ्यात्वपर्यवसितेन स्वविषयग्राहिण्याः स्मृतेर्भ्रमत्वावश्यकत्वात् । न च प्रमाविषयत्वेन स्वविषयग्राहिण्याः स्मृतेर्भ्रमत्वे मानाभावेन न स्मृतिसामान्यस्य भ्रमत्वं युक्तम् । युक्तत्वेऽनुमित्यादावपि क्वचित् भ्रमविषयत्वेन स्वविषयग्राहकत्वसम्भवेनानुमित्यादिसामान्यस्य भ्रमत्वं स्यादिति वाच्यम् । अनुमित्यादिसामान्यस्य भ्रमत्वे लाघवात् परामर्शादेरेव तत्र दोषविधया हेतुत्वापत्त्या दोषजन्यत्वनिश्चयेन न तत्प्रामाण्यं साक्षिणा लिङ्गादिना वा गृह्येत । न हि दोषजन्यत्वेन निश्चिते भ्रमादौ तद्ग्रह इति वक्ष्यते । तथा च प्रवृत्त्यादेस्ततो जायमानस्यापलापापत्तिः । स्मृतिसामान्यस्य भ्रमत्वे तु संस्कारत्वेन स्मृतिरूपभ्रमहेतुत्वसिद्धा संस्काररूपदोषजन्यत्वस्य निश्चयेऽपि प्रमितविषयकत्वेन लिङ्गेन प्रमात्वानुमानसम्भवः । न च दोषजन्यस्य प्रमात्वताद्विषयत्वे च प्रमितत्वं न सम्भवतीति वाच्यम् । अविद्यावृत्तित्वेन दोषजन्यत्वेऽपि ताद्विषये मिथ्यत्वानिश्चयेन वक्ष्यमाणस्य प्रवृत्त्युपयुक्तत्वस्य दोषजन्याविद्यावृत्तौ बाधानवतारदशायां सम्भवात् । न च प्रवृत्त्युपधायकानुमित्यादौ प्रमितविषयकत्वं नियमेन गृह्यते । स्मृतौ तु साक्षिणैव तद्गृह्यते । स्मृतिजनकज्ञानं हि पूर्वं प्रमात्वेन साक्षिणा भ्रमत्वेन लिङ्गादिना च गृह्यते । तथा च तद्विषयत्वस्य प्रमितत्वेन मिथ्यात्वेन वा निश्चितत्वात् स्मृतेरपि तादृशविशिष्टविषयकत्वात् तद्ग्राहकेण तथैव तद्ग्रहणम् । ज्ञानस्यावश्यवेद्यत्वमते स्मृतेर्गृहीतग्रहणं सुतरामुपपद्यते । तस्मात् स्मृतिसामान्यस्य गृहीतग्रहणस्वभावत्वेन उक्तरीत्या भ्रमत्वजातिविशिष्टरूपाविद्यावृत्तित्वात् मनोवृत्तिमात्रनिष्ठस्य प्रमात्वस्य न तत्र सम्भवः । ननूक्तरूपं प्रमात्वं न युक्तम् । दोषाभावे सति ज्ञानग्राहकमात्रग्राह्यत्वरूपस्य ज्ञप्तौ स्वतस्त्वस्य तत्राभावात् । न हि उक्तक्षणस्याबाधितत्वस्य च ज्ञानग्राहकसाक्षिणा प्रमाणनिरपेक्षेण ग्रहणसम्भव इति चेन्न । इदं हि प्रमात्वं

न स्वतो ग्राह्यम् । किं तु सर्वप्रमानुगतत्वात् अप्रमाव्यावृत्तत्वाच्च प्रमाणलक्षणम् । यत्तु प्रमात्वं प्रवृत्तिप्रयोजकं बाधानवतारकालीनभ्रमे स्मृतौ चानुवर्तते, तत् स्वतोग्राह्यम् । आवश्यकं च तस्य स्वतोग्राह्यत्वम् । तद्बुत्तया गृहीतस्य स्वोत्पत्तिद्वितीयक्षण एव प्रवृत्त्युपधायकत्वात् । तच्च मिथ्यात्वरूपेण यदज्ञातं तद्विषयकत्वम् । भ्रमस्यापि बाधाभावकाले मिथ्याविषयकत्वे नानिश्चयात् मिथ्यात्वविशिष्टविषयकाज्ञानस्य साक्षिणा ग्रहणसम्भवाच्च भ्रमात् प्रवृत्त्युपपत्तिः । न च ज्ञानाज्ञानादेः स्वविशिष्टस्यावरणशून्यस्य साक्षिणा मानानपेक्षेण ग्रहणसम्भवेऽपि मिथ्यात्वविशिष्टस्य कथं तद्ग्राह्यतेति वाच्यम् । 'ज्ञाततयाऽज्ञाततया वा सर्वं साक्षिभास्य'मिति विवरणकारोक्तेः स्वगृह्यमाणज्ञानाज्ञानयोर्विषये ग्राहकत्वस्य साक्षिणि सिद्धान्ते स्वीकारात् । न च घटादौ मिथ्यात्वग्रहे मिथ्यात्वेनाज्ञातत्वस्य गृहीतुमशक्यतया घटादिज्ञानात् प्रवृत्त्यनुपपत्तिरिति वाच्यम् । विशेषणतावच्छेदकप्रकारकनिश्चयादेर्विशिष्टवैशिष्ट्यविषयताशालिजन्यधीहेतुत्वस्वीकारेऽपि साक्षिणस्तादृशस्य नित्यत्वेन तत्र तस्याहेतुत्वात् । मिथ्यात्वविशिष्टावच्छिन्नविषयताकाज्ञानाश्रयतावच्छेदकघटविषयकज्ञानम् इदमित्याकारकज्ञाने घटमिथ्यात्वस्यानाकारत्वेन घटो मिथ्येति ज्ञानस्य तत्रानुपयोगात् 'इयं न शुक्ति'रिति ज्ञानकालेऽपि इमां शुक्तिं न जानामीत्यस्य च घटो न मिथ्येति ज्ञानकालेऽपि घटं मिथ्याभूतं न जानामीत्यस्य ज्ञानस्यानुभूयमानत्वाच्च उक्तप्रमात्वस्येच्छादौ निश्चयेऽपि न ततः प्रवृत्त्यादिकम् । प्रमात्वेन निश्चीयमाननिश्चयत्वेनैव प्रवृत्त्यादिहेतुत्वात् । अत एव संशयादपि प्रवृत्तिस्स्यात् । 'अयं स्थाणुर्नवे'ति धीकालेऽपि मिथ्यात्वेनेदं न जानामीत्यनुभवात् संशयस्यापि प्रमात्वेन निश्चयसम्भवादिति परास्तम् । ननु, भ्रमस्मृत्योरपि प्रमात्वे प्रमापदमुख्यार्थत्वापत्तिरिति चेन्न । लक्षणात्मकपूर्वोक्तप्रमात्वविशिष्टस्यैव प्रकृष्टज्ञानरूपस्य प्रमापदमुख्यार्थत्वात् सुखादिज्ञानस्य तदभावेऽपि न क्षतिः । प्रमाणाजन्यत्वात् । ज्ञानत्वं त्वसत्त्वापादकत्वरूपजातिविशेषाश्रयाज्ञानविषयत्वाभावप्रयोजकंविशिष्टचित्त्वम् । तादृशप्रयोजकत्वं च घटादिज्ञानस्थले घटाद्याकारवृत्तिः । विद्यमानसुखादिज्ञानस्थले तु वृत्त्यस्वीकारपक्षे सुखादिजनकसामग्र्येव । सूक्ष्मावस्थभावितादृशायां हि सुखादौ तत्र जानामीत्यनुभवात् तद्-

ज्ञातं भ्रमविषयत्वादित्यनुमानाच्चाज्ञानसत्त्वात् तद्विषयत्वाभावस्य विद्यमानतादशायां तत्र सत्त्वात् तत्प्रयोजकेन चन्दनादिसंयोगेन विशिष्टायाश्चितस्तज्ज्ञानत्वसम्भवः । वस्तुतस्तु घटादिज्ञानस्थलेऽपि घटाद्याकारकवृत्त्युपधायकस्यैव अज्ञानविषयकत्वाभावप्रयोजकत्वम् । अन्यथोक्तवृत्तेः स्वोत्पत्तिकालीने अज्ञातत्वाभावे प्रयोजकत्वासम्भवात् उक्तवृत्त्युत्पत्तिकाले अज्ञातत्वस्य स्वीकारे ज्ञातत्वेन सह तस्य विरोधानापत्तेः उक्तवृत्त्युत्पत्तिकाले उक्तज्ञानतद्विषयत्वाभावसत्त्वेऽपि उक्ताज्ञानकार्यसत्त्वं स्वीक्रियते । द्वितीयक्षण एव तदुच्छेदात् । ब्रह्माकारवृत्तिस्थले तथा दर्शनात् । प्रयोजकत्वं च अखण्डचिद्धर्मः । कार्योत्पत्त्यादिनिष्ठप्रयोज्यत्वादिवत् क्षेमसाधारणजनकत्वमेव वा । उक्तप्रयोजकवैशिष्ट्यं च उक्तप्रयोजकजन्यप्रतिबिम्बितत्वं ग्राह्यम् । तेन वृत्तिसुखादिकाले तदुपधायकरूपप्रयोजकस्यासत्त्वेऽपि न क्षतिः । तादृशप्रयोजकजन्ये वृत्तिज्ञाने सुखादौ वा प्रतिबिम्बितत्वस्य तत्काले चिति सत्त्वात् । अविद्यादिज्ञानस्थले तु अविद्यादिकमेव तादृशप्रयोजकम् । तत्सत्त्वेऽग्रिमक्षणे अविद्यादिनिष्ठस्योक्ताभावस्य तदभावे तत्क्षणे तादृशाभावाभावस्य च सत्त्वात् तज्जन्यत्वमपि क्षेमसाधारणम् । चित्प्रतिबिम्बो हि नाविद्यादावस्तीति तत्प्रतिबिम्बत्वं चितो बोध्यम् । तादृशप्रयोजकजन्योपहितचिदेव जानात्यर्थः । प्रयोजकत्वजन्यत्वयोः तदवच्छेदकभेदात् भिन्नत्वेऽपि जानातेर्नानार्थकत्वात् घटमित्यादिपदयोगस्य वृत्तिसामग्र्यादिनिष्ठप्रयोजकत्वादिबोधे नियामकत्वाच्च न दोषः । वस्तुतस्तु तादृशाभावप्रयोजकविशिष्टचिदेव जानात्यर्थः । प्रयोजकत्वं च समानकालीनत्वे सति कारणत्वम् । तेन वृत्त्यभावकाले तादृशाभावस्वरूपयोग्यचैतन्यमादाय घटादौ न ज्ञातत्वव्यवहारः । कारणत्वमधिष्ठानविधया जगदुपादानस्य चितोऽविद्याया वा ग्राह्यम् । तद्विशिष्टत्वं तत्तादात्म्यमेव । तच्च मनउपहितचित्यस्तीति तद्वत्त्वेन जीवो ज्ञाता । न च पुरुषान्तरीयज्ञानमादायातिप्रसङ्गः । स्वनिरूपिताज्ञानस्य निवेशात् । स्वं विशिष्टान्तर्बोध्यं मनोवच्छिन्नचैतन्यम् । एवं च उक्तज्ञानवाचकजानतेः सकर्मकत्वमुपपद्यते । फलावच्छिन्नव्यापारबोधकस्य स्वबोध्यव्यापारव्यधिकरणफलबोधकस्य वा सकर्मकत्वादुक्ताभावरूपफलप्रयोजकविशिष्टचिद्वाचकस्य तदुपपत्तेः । यत्तु जानातेस्सकर्मकत्वं न युक्तम् । जानातेश्च सकर्मकत्वं फलापेक्षया । न तु कर्मका-

रकापेक्षयेति विवरणकारोक्तेरिति, तन्न । तदुक्तेरस्मदनुकूलत्वात् । तथा हि—भावि-भूतस्य विषयस्य स्वरूपेण ज्ञानक्रियानिमित्तत्वरूपस्य कारकत्वस्याभावेपि ज्ञानक्रियाजनकसामग्र्युपहितसूक्ष्मावस्थारूपेण ज्ञानक्रियानिमित्तत्वादसत्त्वापादकाज्ञानविषयत्वाभावरूपफलवत्त्वाच्च कर्मत्वमित्याभिप्रायकविवरणोक्तिरस्मदर्थानुकूला । न च फलापेक्षयेत्यस्य वृत्तिगतं साक्षिचिल्लतिबिम्बरूपफलमपेक्ष्येत्यर्थ इति वाच्यम्। तथासति वृत्तिं जानामीत्येव स्यात्। न तु घटं जानामीति । अथ प्रतिबिम्बोपहितरूपेण वृत्तेरपि फलत्वाद्विषयतासम्बन्धेन तद्वतो घटादेः कर्मतासम्भव इति चेन्न । तथासति प्रत्यक्षधीस्थलेऽपि उक्तवृत्तेरेव फलत्वसम्भवेन आवरणभङ्गस्य तत्रैव फलत्वं, न तु परोक्षधीस्थल इत्यत्र विनिगमकाभावात् । तस्मात् वृत्तेश्चिदुपरागार्थत्वपक्षे प्रतिबिम्बमेव फलम् । आवरणभङ्गार्थत्वपक्षे त्वज्ञानाविषयत्वमिति परोक्षापरोक्षसाधारणं वाच्यम् । तत्राद्यपक्षे घटादिज्ञानम् । घटाद्याकारवृत्तिप्रतिबिम्बिताचित्सुखादिज्ञानं तु सुखादिप्रतिबिम्बिताचिदेव जानात्यर्थः । प्रतिबिम्बितत्वं प्रतिबिम्बप्रयोजकप्रयोज्यप्रतिबिम्बविशिष्टत्वम् । तेन फलविशिष्टवाचकत्वेन जानातेस्सकर्मकत्वम् । तादृशप्रयोजकं च घटादिज्ञानस्थले वृत्तिसामग्री । सुखादिज्ञानस्थले तु सुखादिसामग्री । तादृशप्रयोज्यमपि वृत्तिसुखादिकम् । अविद्यादिज्ञानस्थले अविद्यादिनिष्ठप्रतिबिम्बस्यानादित्वेऽपि क्षेमसाधारणं तत्प्रयोजकत्वमविद्यादावस्त्येव । तादृशप्रतिबिम्बस्य स्वबिम्बत्वसम्बन्धेन स्वाश्रयोपहितत्वसम्बन्धेन वा वैशिष्ट्यं निवेश्यम् । वस्तुतस्तु तत्प्रयोज्यमपि प्रतिबिम्बविशिष्टाविद्यात्मकं मनोवाच्छिन्नचैतन्यं जानात्यर्थः । मनोवच्छिन्नचितो घटाद्याकारवृत्तिसुखाविद्यादौ प्रतिबिम्बसम्भवात्तदादाय यथाक्रमं घटादिज्ञानं निर्वाह्यम् । चैत्रीयघटाद्याकारवृत्तिनिष्ठप्रतिबिम्बप्रयोजकशुद्धचितमादाय मैत्रीयज्ञानस्य व्यवहारापत्तेः । उक्तवृत्तौ च चैत्रीयमनोवच्छिन्नचित एव प्रतिबिम्बोदयात् । तस्याश्च चैत्रजीव एव सत्त्वान्नोक्तदोषः । न च चैत्रमनोवच्छिन्नचितः स्वकर्तृकालोकसंयोगाधीनमैत्रीयघटादिवृत्तिजननद्वारा तद्गतप्रतिबिम्बप्रयोजकत्वात् तादृशप्रतिबिम्बमादाय चैत्रज्ञानव्यवहारापत्तिः । बिम्बविधया प्रयोजकत्वस्योक्तत्वात् सुखं जानाति घटं जानातीत्यादौ स्वाश्रितत्वं स्वाकारवृत्तिनिष्ठत्वादिकं चेत्यन्यतमसम्बन्धेन जानात्यर्थैकदेशे प्रतिबिम्बरूपे सुखघटादेरन्वयः । सुखत्वं

जानामीत्यादौ वृत्तेः प्रतिबिम्बस्यास्वीकारेऽपि स्वाश्रयसुखादिनिष्ठत्वादिसम्बन्धेन सुखत्वादेरन्वयः । घटं न जानामीत्यादौ च तादृशज्ञानाद्यभावबोधः । घटाद्यवच्छिन्नचिति भावरूपाज्ञानस्वीकारेण तद्बोधसम्भवात् मूलाज्ञानस्यैव परिणामः शुक्तिरूप्यादीति ब्रह्मज्ञानं विना न तस्य बाधः । किं तु निवृत्तिमात्रम् । यदि तु घटं न जानामीत्यादौ भावरूपाज्ञानं भातीत्याग्रहस्तदा वृत्तिविषयत्वाभावसमानाधिकरणमेव विषयत्वं तत्र द्वितीयार्थः । तथा च घटादिनिष्ठतादृशविषयताकस्य मूलाज्ञानस्यैव तत्र भानात् घटाद्याकारवृत्तिकाले न घटं न जानामीति धीः । सुखादौ वृत्तिस्वीकारे तु स्वाकारवृत्तिनिष्ठत्वसम्बन्धेनैव प्रतिबिम्बे सुखादेरन्वयः । साक्षात्कारस्तु विषयविशिष्टं यत्प्रतिबिम्बं तत्प्रयोजकप्रयोज्यविशिष्टचिदेव । स्वावच्छिन्नवृत्तिनिष्ठत्वनिष्ठचैतन्याद्यन्यतमसम्बन्धेन विषयविशिष्टत्वं बोध्यम् । वस्तुतस्तु वृत्त्युपरक्तघटादावेव प्रतिबिम्बोत्पत्तेः प्रतिकर्मव्यवस्थायां वाच्यत्वात् सुखत्वादावपि तस्यास्सम्भवाच्च विषयनिष्ठप्रतिबिम्बमेव निवेश्यम् । सैव चित् साक्षात्करोत्यर्थः । न च जानात्यर्थ एव साक्षात्करोत्यर्थोऽस्तु । किमुक्तान्यतमसम्बन्धेन । घटादेः प्रतिबिम्बे अन्वयात् परोक्षधीस्थले घटं साक्षात्करोमीति न व्यवहार इति वाच्यम् । जानामि साक्षात्करोमि इत्येतयोर्भिन्नार्थत्वानुभवात् । घटं साक्षात्करोमीत्यादौ तदेकदेशविषये तादात्म्येन घटादेरन्वयः । घटं न साक्षात्करोमीत्यादौ तादृशसाक्षात्काराभावबोधः पूर्ववत् । वृत्तेरावरणभङ्गार्थत्वरूपे द्वितीयपक्षे अज्ञानाविषयत्वप्रयोजकाविशिष्टचिदेव साक्षात्करोत्यर्थः । तस्मात् यथोक्तज्ञानत्वघटितप्रमात्वं नानुपपन्नम् । भ्रमवारणाय व्यव्यवहारकालाबाधितत्वं विशेषणम् । तच्च तत्प्रमात्वनिरूपितमूलाज्ञानकालावच्छिन्नं मिथ्यात्वनिश्चयाविषयत्वम् । घटादौ चोक्तकाले मिथ्यात्वानिश्चयात् तज्ज्ञाने प्रमात्वमक्षतम् । विषयभेदेनैव प्रमात्वभेदेनापि प्रमात्वभेदेऽपि न क्षतिः । न च भ्रमविषयस्य प्रातिभासिकत्वेन अज्ञातत्वाभावादेव न भ्रमे अतिव्याप्तिरिति वाच्यम् । तस्य विद्यमानकाले ज्ञातत्वाभावेऽपि भाविव्यकाले ज्ञातत्वासम्भवात् शङ्खे कदाप्यनुत्पन्नपीतत्वभ्रमस्य पुंसः मम भावी यः शङ्खे पीतत्वभ्रमस्ताद्विषयं पीतत्वं न जानामीति प्रत्ययात् एतत् हरिद्रापीतत्वजातीयं स्वर्णपीतत्वजातीयं वेति संशयाच्च । तस्मात् स्वोत्पत्त्यव्यवहितपूर्वक्षणे स्वकरणक्षणे च यदज्ञातमुक्तका-

प्रामाण्यात् । अन्यथा स्मृतेरपि तदापत्तिरिति । एवं वेदान्तेषु सर्वत्रैवंविध-विरोधे अयमेव परिहारः । तदाहुर्वार्तिककारपादाः—'यया यया भवेत्पुंसो व्युत्पत्तिः प्रत्यगात्मनि । सा सैव प्रक्रिया ज्ञेया साध्वी सा चानवस्थिते'ति। श्रुतितात्पर्यविषयीभूतार्थविरुद्धं च हेयमेवेति शतश उद्घोषितमस्माभिः । तस्मान्न किञ्चिदेतत् । तदेवं जीवस्योपाधिनाभिभूतत्वात्संसारोपलब्धिः ।

लाच्छेदेन अबाधितं च तद्विषयकज्ञानत्वं प्रमात्वमिति सिद्धम् । किं च स्मृतौ प्रमात्वमुक्तरीत्या प्रमितिविषयकत्वरूपलिङ्गेनैवमनुमीयत इत्यनुभवानुरोधेन संस्कारजन्यत्वस्य प्रमात्वनिष्ठसाक्षिग्राह्यताविरोधिदोषताकल्पनात् स्वतःप्रमात्वग्रहणरूपां प्रमासामान्यमर्यादामतिक्रान्तस्य स्मृतिसामान्यस्य प्रमालक्षणसङ्गतो न युक्त इत्यतोऽपि तद्व्यावृत्तं प्रमालक्षणम् । ननूक्तलिङ्गेनैव स्मृतौ प्रमात्वमनुमीयते । न तु साक्षिणा गृह्यत इति कथं निर्णीतम् । उच्यते । स्मृत्या नाव्यवहितोत्तरक्षणे प्रवृत्तिनियमः । किं तु द्वितीयक्षणे तत्प्रमात्वेऽनुमिते सत्येव प्रवृत्तिः । तत्समानविषयत्वेनानुमीयमानप्रमातृकात् स्मृत्यन्तराद्वा सेति सर्वानुभाविकम् । अत एव या स्मृतिः स्वसमानविषयकभ्रममूलकत्वेन गृह्यते, तस्याः भ्रमत्वेनैव निश्चयात् न ततः प्रवृत्तिः । तथा च संस्कारजन्यत्वरूपदोषसहितत्वेन स्मृतिगतप्रमात्वस्याबृतत्वस्वीकारेणानावृतसाक्षितादात्म्यरूपस्य साक्षिभास्यत्वस्य तत्राभावात् न स्मृत्युत्पत्तिद्वितीयक्षणादौ प्रवृत्तिः । उक्तलिङ्गकानुमितौ तादृशाबृतत्वविरोधिन्यां सत्यां तत्क्षणे तादृशसाक्षिभास्यत्वविशिष्टप्रमातृकया स्मृत्या स्वोत्पत्तितृतीयक्षणे स्मृत्यन्तरोत्पत्तिद्वितीयक्षणे वा प्रवृत्तिरुत्पद्यते । ननु, जीवेश्वरादिबोधकवाक्ये पौरुषनानाविधकल्पनानुवादकत्वमास्ताम् । 'यस्मिन् पञ्च पञ्चजना' इत्यादिब्रह्मबोधकवाक्ये भाष्यकारैरेव शारीरकभाष्ये प्राणचक्षुश्श्रोत्रान्नमनोरूपपञ्चकम्, उपनिषद्भाष्ये तु ब्राह्मणक्षत्रियवैश्यशूद्रनिषादरूपजातिपञ्चकं पञ्चजनशब्दार्थत्वेनोक्तम् । तत्त्वमस्यादिवाक्येऽपि जहदजहल्लक्षणादिकं मतभेदेनोक्तम् । तत्कथम् । तत्राह—एवं वेदान्तेष्विति । एवंविधविरोधे परमतात्पर्यविषयीभूतब्रह्मप्रतिपादनार्थमुच्यमानांशे विरोधे । अस्माभिर्माटशैराचार्यैः। जीवेशादिव्यवस्थामुक्तामुपसंहरति—तदेवमिति । उपाधिनाभिभूतत्वात् यं प्रत्यज्ञानाद्युपाधिनिमित्तप्रयुक्तं स्वरूपाव-

परमेश्वरस्य तूपाधिवशित्वात् सर्वज्ञत्वादिकमिति सम्यगुपपद्यते व्यवस्था । ननु, भवत्वविद्यावशाज्जीवेश्वराविभागव्यवस्था । मानमेयादिप्रतिकर्मव्यवस्था तु कथमिति चेत्, उच्यते । दृश्यत्वाज्जडत्वाद्विनाशित्वाच्च परिच्छिन्नाप्यविद्या अनिर्वचनीयत्वेन विचारासहा आवरणविक्षेपशक्तिद्वयवती सर्वगतं चिदा-

---

रणं तत्त्वात् । संसारोपलब्धिः सत्यत्वेन प्रपञ्चोपलब्धिः । उपाधिवशित्वात् श्रुत्यादिसिद्धेनोक्ताभिभूतत्वाभावेन विशिष्टत्वात् । सर्वज्ञत्वादिकमित्यादिपदेन मिथ्यात्वेन प्रपञ्चोपलम्भादिग्रहणम् । ननु, न प्रतिबिम्बस्य जीवत्वं युक्तम् । सन्निहितस्यैव चैतन्यस्य उपाधौ प्रतिबिम्बितत्वेन सन्निहितरूपबिम्बभेदेन प्रतिबिम्बभेदापत्त्या इहलोकगतजीवात् कर्तुः परलोकगतजीवस्य भोक्तुर्भेदेन कृतहान्यकृताभ्यागमयोरापत्तेः । नाप्यवच्छिन्नस्य तद्युक्तम् । उपाध्यधिकरणगृहादिप्रवेशभेदेनावच्छिन्नानाम् आकाशादीनामिव इहलोकपरलोकगतमनोवच्छिन्नचितामपि भेदेनोक्तदोषापत्तिरिति चेन्न । 'रूपं रूपं प्रतिरूपस्सएष इह प्रविष्ट' इत्यादिश्रुतिषु ब्रह्मचित एव प्रतिबिम्बभावोक्त्या उपाधिसन्निहितभागजस्य बिम्बत्वे मानाभावात् । तथा च उपाधेर्मनआदेस्तत्तद्देशसम्बन्धरूपावस्थाभेदेऽपि स्वरूपैक्यम् । 'तद्धेदं तर्ह्यव्याकृत' मित्यादिश्रुतेः 'तदापीतेः संसारव्यपदेशादि'ति न्यायाच्च तथा तदवच्छिन्नचितां तदवस्थाभेदेन भेदेऽपि तदवच्छिन्नचिद्रूपैक्यम् । अत एव एककनकपरिणामानां क्रमोत्पन्नानां कटककुण्डलादीनां कटकादीनां कटकत्वरूपैर्भेदेऽपि तत्कनकरूपेणैक्यम् । किं च गृहप्राङ्गणादिभेदेऽपि एकघटावच्छिन्नमाकाशमेकमेव । देशभेदेन तस्य नाशकोत्पादकल्पने गौरवात् । उपाध्युत्पादकनाशकयोरेवोपहितोत्पादनाशकत्वकल्पनात् । भेदप्रतीतेरुपाध्याश्रयोपाधिभेदप्रयुक्तत्वात् । अन्यथा घटादिव्यक्तिभेदेन घटत्वादेरपि स्वाभाविकभेदापत्तेः । तस्मात् मतिमान्द्यादेवेदृग्दूषणोद्भावकत्वम् । **मेयादीति** । मेयादिघटितेत्यर्थः । **प्रतिकर्मेत्यादि** । कदाचिदेव केनचिदेव किञ्चिदेव प्रमीयत इति कालविशेषादिप्रतिनियतस्य ज्ञानकर्मणो व्यवस्थानियामकोक्तिरित्यर्थः । परिच्छिन्ना असर्वगता । जीवेशभेदाद्यनादिपदार्थेषु चित्तादात्म्यवत्स्वपि तादात्म्येन असम्बन्धेति यावत् । **आवरणेत्यादि** । आवरणं नास्ति न भातीति व्यवहारः । विक्षेपश्चाकाशादिकार्यं तयोरनुकूलशक्तिद्वयवतीत्यर्थः । तथा च असर्वगतस्यापि सर्वगतावरणोत्पादकत्वं तदनुकूलशक्तिमत्त्वादिति भावः । नन्वावारकस्यावरणीयापेक्षया परिच्छिन्नत्वेनांगुलिर्न दृष्टान्तः । तदावरणीयस्य

त्मानमावृणोति अंगुलिरिव नयनसन्निहिता सूर्यमण्डलम् । तत्र चक्षुष एवावरणे अंगुलेरप्यभानप्रसङ्गात् । अधिष्ठानावरणमन्तरेण विक्षेपानुपपत्तेश्च । ततः सा पूर्वपूर्वसंस्कारजीवकर्मप्रयुक्ता सती निखिलजगदाकारेण परिणमते । सा च स्वगतचिदाभासद्वारा चित्तादात्म्यापन्नेति तत्कार्यमपि सर्वमाभासद्वारा चिदनुस्यूतमेव । तथा च चैतन्यस्य दीपवत्स्वसम्बद्धसर्वभासकत्वात् जगदुपादानचैतन्यं प्रमाणापेक्षामन्तरेणैव सर्वदा सर्वभासयत् सर्वज्ञं भवति । तेन तत्र न मानमेयादिव्यवस्था । किं तु जीवे । तस्य बुद्ध्यवच्छिन्नत्वेन परिच्छिन्नत्वात् । तेन चिदभिव्यक्तियोग्येन येनान्तःकरणेन यदा यत्सम्बद्धं भवति, तदेव तदा तदवच्छिन्नो जीवोऽनुभवतीति

चक्षुर्निर्गमद्वारस्य तदपेक्षया परिच्छिन्नत्वात् । तत्राह—**चक्षुष** इति । चक्षुर्निर्गमद्वारस्येत्यर्थः । **अभानेति** । गोलकादनिर्गतस्य चक्षुषो न ग्राहकत्वं ग्राह्यासम्बन्धादिति भावः । सर्वगतमावृणोतीत्यत्र हेत्वन्तरमाह—**अधिष्ठानेति** । अनुपपत्तेः । **संस्कारेति** । सकलकार्यसूक्ष्मावस्थेत्यर्थः । प्रयुक्ता सहकृता । **चिदाभासद्वारा चित्तादात्म्येति** । चित्तादात्म्यवत् आभासतादात्म्यवतीत्यर्थः । वार्तिकमते पक्षद्वयम् । तत्र चिदाभासस्यैव जगदधिष्ठानत्वपक्षे तस्या एव सर्वभासकत्वेन अविद्यातादात्म्यस्य वाच्यत्वात् चिदाभासद्वारेत्यादेः चिदाभासतादात्म्यवत्त्वात् चिता तादात्म्यवतीत्यर्थः । तत्कार्यं कार्यरूपापन्ना सा । सर्वभासकत्वात् सर्वस्मिन्नस्ति भातीति प्रयोजकत्वात् । भासयदुक्तव्यवहारविषययोग्यं कुर्वत् । तथा च जीवस्य सुखादाविव ईश्वरस्य दृश्यमात्रे आभासरूपप्रतिबिम्बद्वारा साक्षात्कारः । अनादिष्वपि दृश्येषु सर्वेष्वाभासस्वीकारात् । विवरणकारमते तु विद्यमानेषु प्रत्यक्षरूपा भाविषु अनुमितिरूपा अतीतेषु स्मृतिरूपा मायावृत्तिः स्वीक्रियत इति ताभिरेव ईश्वरस्य सर्वज्ञत्वं सदेति तत्रोक्तम् । वाचस्पतिमते तु प्रतिबिम्बमायावृत्त्योरीश्वरस्यास्वीकारेऽपि वक्ष्यमाणं वृत्तेरभेदाभिव्यक्त्यर्थपक्षमनुसृत्य तदनुसारिसर्वज्ञत्वं सर्वदृश्यचिदभिन्नचिद्रूपत्वं बोध्यम् । सुषुप्तादौ जीवस्येव, सर्वदृश्येषु ईशस्याज्ञानाविषयत्वघटितं वा तद्वाच्यम् । तत्पक्षे तस्यैव साक्षित्वेन अविद्यादिभासकत्वम् । तच्च चिदाभासस्य मिथ्यात्वेऽपि चित्तादात्म्यादुपपद्यते । आभासाविविक्तचित एव जगदधिष्ठानत्वपक्षे तस्या एव सर्वभासकत्वेन अविद्यादितादात्म्यस्य वाच्यत्वात् चिदाभासद्वारेत्यादेरिति भावः । ननु, चिदभिव्यक्तियोग्यत्वादिकं कीदृशम् । तत्राह—

न साङ्कर्यप्रसङ्गः । एवमत्र प्रक्रिया । शरीरमध्ये स्थितः सर्वशरीरव्यापकः सत्त्वप्राधान्येन सूक्ष्मपञ्चभूतारब्धः अन्तःकरणाख्यः अविद्याविवर्तो दर्पणादिवदतिस्वच्छः नेत्रादिद्वारा निर्गत्य योग्यान् घटादीन् विषयान् व्याप्य तत्तदाकारो भवति द्रुतताम्रादिवत् । तस्य च सौरालोकादिवत् झ-

---

एवमित्यादि । शारीरमध्यस्थसुखादिरूपेण परिणममानत्वात् शारीरमध्यस्थः युगपद्धस्तपादाद्यवच्छिन्नसुखदुःखादिरूपेण परिणममानत्वात् शरीराद्यवयवेषु सर्वेषु व्यापकः । सात्त्विकज्ञानसुखादिपरिणामवत्त्वादाह—सत्त्वप्राधान्येनेति । उत्क्रमणसमये गतिविघातामावादाह—सूक्ष्मेति । पञ्चभूतगुणानां ग्राहकत्वादाह—पञ्चभूतेति । आरब्धेति । परिणामेत्यर्थः । सत्त्वांशाधिक्ययुक्तापञ्चीकृतपञ्चभूतपरिणाम इति समुदायार्थः । विवर्तः परिणामः । भूतानां विशेषपरिणामित्वेऽपि सामान्यपरिणामिन्यविद्येत्यर्थः । अतिस्वच्छः स्वसम्बन्धिनः प्रतिबिम्बोत्पत्तियोग्यः । नेत्रादीति । नेत्रादिद्वारा बहिरिन्द्रियेण संयुक्तो भूत्वा तेनैव रूपेण घटादिभिस्संयुक्तो भूत्वा घटादिविषयकचाक्षुषादिरूपेण परिणमत इत्यर्थः । मनस्संयुक्तेन्द्रियविषयसन्निकर्षस्य चाक्षुषादिहेतुत्वज्ञापनाय व्याप्यतत्तदाकारो भवतीत्युक्तम् । मनस इन्द्रियमिश्रितत्वेन मनोव्याप्तिकथनेनैव इन्द्रियव्याप्तिलाभात् । तावता च चाक्षुषादिमनोवृत्तेः घटादिस्वविषयसंयुक्तत्वमावश्यकम् । मनसश्चक्षुरादीन्द्रियसंयोगकाले चाक्षुषानुत्पत्तावपि चक्षुरादिमनोयोगचक्षुरादिविषयसंयोगयोः न पार्थक्येन कारणत्वम् । किं तु शक्तिविशेषरूपेण एकमेव कारणत्वम् । मनोसंयुक्तचक्षुर्विषयसंयोगे तादृशशक्तिविशेषास्वीकारेणातिप्रसङ्गभङ्गादित्यपि ज्ञापितम् । द्रुतताम्रादिवदिति । यथा द्रवीभूतताम्रादि मूषापात्रादौ क्षिप्तं पश्चाद्वाय्वाद्यपसारिततेजोभागं सत् कठिनीभवति, तथा मनो घटादिसन्निकृष्टेन्द्रियसंयुक्तं तदाकाराख्यविषयतासम्बन्धेन घटादिसम्बद्धचाक्षुषादिरूपं भवतीत्यर्थः । ननु, कथमतिशीघ्रमेव मनसस्सूर्यमण्डलादिसंयोगः तत्राह—तस्येति । ननु, मनस इन्द्रियसंयुक्तत्वेऽपि घटादिसंयोगे मानाभावः । घटादिसंयुक्तभागावच्छेदेनैव इन्द्रिये तत्संयोगसंभवात् । न च विषये मनस्संयोगं विना विषयचैतन्याभिन्नप्रमातृचैतन्यरूपस्य विषयसाक्षात्कारस्यानुपपत्तिरिति वाच्यम् । विषयाकाराया अनिर्गताया अपि इन्द्रियजन्याया मनोवृत्तेर्विषयसाक्षात्कारसम्भवात् आत्मसुखादौ मनःकरणकस्यैव साक्षात्कारस्य वाचस्पतिमते स्वीकारात् । अ-

टित्येव सङ्कोचविकासावुपपद्येते । स च सावयवत्वात् परिणममानो देहाभ्यन्तरे घटादौ च सम्यग्व्याप्य देहघटयोर्मध्येऽपि चक्षुर्वदविच्छिन्नोऽप्यवतिष्ठते । तत्र देहेऽन्तःकरणभागोऽहङ्काराख्यः कर्तेत्युच्यते । देहविषयमध्यवृत्तिदण्डायमानस्तद्भागः वृत्तिज्ञानाख्यः क्रियेत्युच्यते । विषयव्यापकस्तद्भागो विषयस्य ज्ञानकर्मत्वसम्पादकमभिव्यक्तियोग्यत्वमित्युच्यते । तस्य च त्रिभागस्यान्तःकरणस्यातिस्वच्छत्वात् चैतन्यं तत्राभिव्यज्यते । तस्य चाभिव्यक्तस्य चैतन्यस्य एकत्वेऽप्यभिव्यञ्जकान्तःकरणभागभेदात् त्रिधा

थ विनिगमकाभावादिन्द्रियघटादिसंयुक्तभागावच्छेदेनापि मनःसंयुज्यते । सावयवत्वाच्च युगपत्पादहस्ताद्यवच्छिन्नसुखादिपरिणामवत् । किं च इन्द्रियसन्निकर्षं प्रति चाक्षुषादेः घटादिनिष्ठेन विषयतासम्बन्धेनेवावच्छेदकतासम्बन्धेनापि विनिगमकाभावेन कार्यतासम्भवात् । चाक्षुषादिमनोवृत्तेस्स्वविषयावच्छिन्नत्वसिद्ध्या बहिर्निर्गमस्यावश्यवाच्यत्वेन घटादिसंयोगस्यापि सम्भवः । न च चक्षुरादेर्घटादिनिष्ठविषयताकत्वसिद्धौ विषयतासम्बन्धेनेन्द्रियसन्निकर्षकार्यत्वस्यावश्यकतया सैव तत्र विनिगमिकेति वाच्यम् । विशिष्टविषयकबुद्धित्वेन बाधाभावादिकार्यत्वस्यावश्यकतया तत एवोक्तसिद्धिसम्भवात् । उक्तकार्यत्वस्यानावश्यकत्वात् । न च निर्विकल्पकप्रत्यक्षस्य उक्तसिद्धौ तादृशमिन्द्रियसन्निकर्षकार्यत्वमावश्यकमिति वाच्यम् । उक्तप्रत्यक्षे मानाभावात् । न च 'जातिमान् घट' इत्यादौ शुद्धघटत्वादिप्रकारताप्रयोजकत्वेन घटत्वादिनिर्विकल्पक इति वाच्यम् । विजातीयसन्निकर्षत्वेनैव उक्तविषयताकधीहेतुत्वसम्भवात् । अनन्तकोटिनिर्विकल्पककल्पने गौरवादिति चेन्न । तथा हि—घटादिसंपृष्टस्य मनसश्शरीरसंसर्गे मानाभावेन शरीरावच्छिन्नमनोभागावच्छिन्नचित्तश्चाक्षुषादिकालेऽपि प्रमात्वसिद्धान्तानुपपत्तेः । तत्राह—**स चेत्यादि** । अवच्छिन्नः शरीरघटादितदन्तरालदेशेषु युगपत्संयुक्तः । तत्र हेतुगर्भविशेषणमाह—**चक्षुर्वदिति** । चक्षुरादीन्द्रियस्य यथा जीवनदशायां न शरीरत्यागः । जीवनादृष्टस्य तत्र प्रतिबन्धकत्वात् तथा मनसोऽपीत्यर्थः । **कर्तेति** । क्रियानुकूलेन्द्रियसंयोगादिव्यापारवत्त्वादिति शेषः । ज्ञानकर्मत्वसम्पादकम् आवरणनिवृत्त्यादिरूपस्य ज्ञानक्रियाजन्यफलस्य सम्पादकम् । तत्र हेतुः—**अभिव्यक्तियोग्यत्वमिति** । आवरणनिवृत्त्यादिरूपाभिव्यक्तिं प्रति कारणीभूताया वृत्तिज्ञानरूपक्रियाया योग्य-

व्यपदेशो भवति । कर्तृभागावच्छिन्नचिदंशः प्रमाता । क्रियाभागावच्छिन्नचिदंशः प्रमाणम् । विषयगतोऽभिव्यक्तियोग्यत्वभागावच्छिन्नचिदंशः प्रमितिरिति । प्रमेयं तु विषयगतं ब्रह्मचैतन्यमेव अज्ञातम् । तदेव च ज्ञातं

तारूपमित्यर्थः । विषयसंसृष्टस्वभागावच्छिन्नक्रिया विषयनिष्ठाभिव्यक्तिजननयोग्या भवतीति भावः । प्रमातेति । प्रमानुकूलव्यापारवत्त्वादिति शेषः । प्रमाणमिति । विषयसंसृष्टभागरूपप्रमासिद्ध्यर्थं प्रमातृव्यापाराविशिष्टत्वात् तादृशप्रमां प्रति अयोगव्यवच्छेदेन कारणत्वाच्चेति शेषः । प्रमात्रा व्याप्ता हि वृत्तिर्विषयेण संसृज्यते । विषयसंसृष्टभागाऽयोगशून्या चेति भावः । प्रमितिरिति । अज्ञातविषयभागत्वादिति शेषः । तदव्यवधानेन अज्ञातविषयाभिव्यक्तिरूपफलदर्शनेन तस्यैवाज्ञातविषयकत्वमिति भावः । ब्रह्मेति । जीवचैतन्यस्य स्वत एवाभिव्यक्तत्वात् । प्रमाभिव्यज्यमानं ब्रह्मचैतन्यमेव प्रमेयमिति भावः । वस्तुतो ब्रह्म बृहत् जगदुपादानमिति यावत् । तथा च जीवस्य जगदुपादानत्वपक्षे विषयावच्छिन्नस्य तस्यैव प्रमेयत्वमिति ध्येयम् । ज्ञातम् अभिव्यक्तम् । ननु, चक्षुरादीनामपि प्रमाणत्वसम्भवात् दर्शनान्तरेषु उक्तत्वाच्च तदनुक्त्या न्यूनत्वमिति चेन्न । वृत्तिज्ञानस्य चक्षुरादिमिश्रितत्वेन तत्प्रमाणत्वोक्त्या चक्षुरादेरपि तल्लाभात् प्रमासामान्यं प्रति करणस्य प्रकृते वाच्यत्वात् । मनसः प्रमासामान्यकरणत्वस्य दर्शनान्तरेषु उक्तत्वाच्च तदुक्तेरेव प्रकृते युक्तत्वाच्च। अत्र मनसोऽचेतनत्वेन स्वेतरसकलकारकप्रयोक्तृत्वरूपस्वातन्त्र्यात्मककर्तृत्वासम्भवात् मनोवच्छिन्नचितः प्रमातृत्वमुक्तम् । 'जानामि घटं जानामि पट'मित्याद्यनुगताकारधीषु चिद्रूपस्यैकज्ञानस्य विषयत्वात् । सुखादौ वृत्त्यस्वीकारेण तदवच्छिन्नचित एव तज्ज्ञानत्वाच्च विषयसंसृष्टवृत्तिभागस्य ज्ञानत्वाभावेन प्रमितित्वस्याप्यसम्भवात् तदवच्छिन्नचितः तदुक्तम् । सा च वृत्त्यवच्छिन्नचितः विषयसंसृष्टात्मकं विशिष्टरूपमिति विशिष्टरूपे केवलरूपस्य हेतुत्वात्। वृत्त्यवच्छिन्नचिदेव प्रमाणमुक्तम् । तथा च विषयसंसृष्टवृत्त्यवच्छिन्नरूपेण प्रमात्वम् । प्रमाणत्वं तु विषयासंसृष्टवृत्त्यवच्छिन्नरूपेणेव शरीरासंसृष्टवृत्त्यवच्छिन्नरूपेणापि शरीरसंसृष्टवृत्त्यवच्छिन्नचिद्रूपप्रमातुः प्रयत्नेन हि शरीरासंसृष्टवृत्त्यवच्छिन्नं व्याप्रियते प्रमानिष्पत्तये । अत एव शरीरसंसृष्टवृत्त्यवच्छिन्नचिद्रूपस्यैव प्रमातृत्वमुक्तम् । ननु केयं प्रमेयचितः प्रमाधीनाभिव्यक्तिः। न तावत् प्रमातृचिदभेदः । अवि-

सत् फलम् । अत्र च यस्मिन्पक्षे अन्तःकरणावच्छिन्नो जीवः यस्मिंश्च पक्षे सर्वगतोऽसङ्गोऽविद्याप्रतिबिम्बो जीवः, तत्रोभयत्रापि प्रमातृचैतन्योपरागा-

द्यावच्छिन्नचिद्रूपजीवस्य जगदुपादानत्वपक्षे घटाद्यवच्छिन्नायाः प्रमेयचितः अविद्यावच्छिन्नजीवचिद्रूपत्वेन जीवं प्रति घटादेः भानसम्भवेन घटादिचितः प्रमात्रभेदस्य व्यर्थत्वात् । न हि सुषुप्तौ प्रमात्रभावेऽपि अविद्यादिकं जीवं प्रति न भाति। न वा तेन भानेन जागरे न स्मर्यते । नाप्यावरणभङ्गः । मनोवच्छिन्नचितः जगदुपादानस्य अविद्याप्रतिबिम्बितचैतन्यस्य जीवत्वपक्षे तत्तादात्म्याभावादेव घटादीनाम् अभानसिद्धेः । घटाद्याकारवृत्त्यभावकाले घटाद्यवच्छिन्नचित्यावरणस्वीकारस्य व्यर्थत्वात् । तद्भङ्गस्य प्रमाफलत्वासम्भवात् । तत्राह—**अत्र चेत्यादि** । अत्र प्रमात्रादिषु त्रिषु मध्ये अन्तःकरणवृत्तिः प्रमा । उभयत्रापि प्रामातृचिदुपरागार्थावरणभङ्गार्था चेति योजना । सर्वगतः सर्वकार्यतादात्म्यवदविद्योपाधिकः । **असङ्ग** इति । घटादितादात्म्यशून्य इत्यर्थः । जीवान्यचित एव जगदुपादानत्वात् जीवस्य तदभावेन घटादितादात्म्यशून्यो जीवः शुद्धचित् अविद्याबिम्बत्वोपहितचिद्वा जगदुपादानमिति विवरणे उक्तम् । अविद्यागताभासाविविक्तचिद्रूप ईशस्तथेति वार्त्तिक उक्तम् । तत्र आद्याया अविद्याप्रतिबिम्बरूपविवरणोक्तजीवेशानुस्यूतत्वेन द्वितीयाया अविद्यामनःप्रतिबिम्बरूपसंक्षेपशारीरकोक्तेशजीवानुस्यूतत्वेन तृतीयायाः स्वस्मिन् स्वोपधेये मनोगतचिदाभासरूपे वार्तिकोक्तजीवेशानुस्यूतत्वेन सर्वदृश्येषु भासकत्वरूपसाक्षित्वसत्त्वात् तदधिष्ठानत्वप्रयोजकं तादात्म्यमावश्यकम् । अन्नादिदृश्येष्वपि तासामधिष्ठानत्वात् । जीवस्य तु न तेषु कथमपि तादात्म्यमिति भावः । **प्रमातृचैतन्येति** । जीवेत्यर्थः । स्वप्नेऽप्यविद्यावृत्तेः स्वाप्नविषयजीवयोरुपरागार्थत्वात् स्वाप्नगजादेरस्वच्छत्वेन तत्र प्रतिबिम्बघटितोपरागस्य तत्साक्षात्कारार्थशुक्तिरूप्यादाविव आवश्यकत्वात् स्वप्ने प्रमात्रभावस्य प्रमाणवृत्त्यभावप्रयुक्तस्य मूल एवाग्रे वृत्तिकान्तःकरणावच्छिन्नचैतन्यस्यैव प्रमातृत्वादित्यादिना वक्ष्यमाणत्वात् । अहं घटं साक्षात्करोमीति व्यवहारार्थं तु प्रमात्रुपरागोऽपेक्ष्यत एव । घटादिव्यावहारिकसाक्षात्कारस्य मनोवृत्तिघटितत्वेन तत्र प्रमात्रुपरागस्य आवश्यकत्वात् । **उपरागेति** । प्रतिबिम्बाश्रयप्रमावच्छेदकत्वं घटादिनिष्ठं प्रत्यक्षस्थले सम्बन्धः । तेनैव घटं साक्षात्करोमीति व्यवहारसम्भवात् । प्रतिबिम्बाश्रयप्रमाविषयत्वं परोक्षस्थले तेनैव घटमनुमिनोमि घटं जानामीत्यादिव्य-

र्थो विषयगतचैतन्यावरणभङ्गार्था चान्तःकरणवृत्तिः । यस्मिंश्च पक्षेऽविद्या

व्यवहारसम्भवात् । ननु सुखादिषु जीवस्य तादात्म्यसम्बन्ध एव साक्षात्कारव्यवहारे नियामकः । घटादिषु तूक्तरूपवैरूप्यमिति चेन्न । ब्रह्मण एव जगदुपादानत्वपक्षे जीवस्य मनःसुखादौ प्रतिबिम्बद्वारैव सम्बन्धस्य वाच्यत्वेन मनस्सुखाद्यवच्छिन्नचिद्रूपस्य मनआदिसाक्षात्कारस्यापि जीवप्रतिबिम्बाश्रयत्वेन जीवस्य प्रतिबिम्बाश्रयसाक्षात्कारावच्छेदकत्वरूपसम्बन्धस्यैव मनस्सुखादिसाक्षात्कारनियामकत्वेन वैरूप्यात् । न च मनोऽवच्छिन्नचितः जीवत्वे मनोऽवच्छिन्नरूपेणैकेन बिम्बत्वं प्रतिबिम्बाधारत्वं च अनुपपन्नमिति वाच्यम् । मनोविशिष्टरूपेण द्वितीयस्य मनउपहितरूपेण आद्यस्य स्वीकारात् । मनसोऽपि स्वच्छत्वेन प्रतिबिम्बाधारत्वे विशेषणत्वम् । भोक्तृत्वरूपजीवकोटौ निवेशासम्भवेन जीवोपाधित्वेन तन्निष्ठे बिम्बत्वे उपाधित्वमेव । न च मनोविशिष्टचिद्रूपप्रतिबिम्बाश्रयं प्रति मनसोऽवच्छेदकत्वे मानाभाव इति वाच्यम् । चिति जायमानं प्रतिबिम्बं प्रति मनसोऽवच्छेदकत्वेन सप्रतिबिम्बविशिष्टं प्रत्यवच्छेदकत्वात् । विशेषणं प्रत्यवच्छेदकस्य विशिष्टं प्रत्यवच्छेदकत्वनियमात् । एवं सुखादेरवच्छेदकत्वं बोध्यम् । तस्मात् स्वप्रतिबिम्बाश्रयसाक्षात्कारावच्छेदकत्वमेव सर्वत्र विषये जीवस्य सम्बन्धः । वस्तुतस्तु स्वप्रतिबिम्बाश्रयावच्छेदकत्वं सर्वत्र सम्बन्धः । तत्र घटादौ प्रतिबिम्बाश्रयवृत्त्यवच्छेदकत्वमिन्द्रियसन्निकर्षनियम्यम् । मनस्सुखादौ प्रतिबिम्बाश्रयमनस्सुखाद्यवच्छेदकत्वं प्रतिबिम्बोत्पादकसामग्रीनियम्यं मनस्सुखाद्युत्पादकसामग्रीनियम्यं वा । केवलमनस्सुखाद्यवच्छेदेन चिति प्रतिबिम्बविशिष्टमनस्सुखादेरध्यासादिति भावः । ननु, जीवोपरागार्था वृत्तिरिति न युक्तम् । साक्षिचैतन्यं हि विषयभासकम् । तस्य च पूर्वोक्तत्रिविधस्यापि जगदुपादानत्वात् विषयोपरागवृत्तिं विनापीति चेन्न । साक्षिणि जीवस्य तादात्म्यादिसम्बन्धान्तरसत्त्वेऽपि वृत्तिं विना घटादेर्जीवं प्रत्यभानेन घटाद्यवच्छिन्नवृत्तिविशिष्टजीवात्मकत्वरूपस्य साक्षिणि जीवोपरागस्य चावश्यकत्वात् । अत एवाद्वैतसिद्धावुक्तम्— 'अधिष्ठानाचिदेव प्रकाशमाना वृत्तिद्वारा जीवोपरक्ता जीवं प्रति विषयप्रकाशिके' ति । ननु, ब्रह्मण्युक्तावच्छेदकत्वे मानाभावः । न हि सर्वव्यापकं वस्तु कस्यचिदवच्छेदकम् । न चावच्छेदकत्वे नियामकमिन्द्रियसन्निकर्षादिकं ब्रह्मण्यस्ति । तथा च 'ब्रह्मसाक्षात्करोमी' ति व्यवहारानुपपत्तिः । तत्राह—**विषयगतेत्यादि** । विषयसंसृष्टं यत् प्रमातृचैतन्यं प्रत्यावरणं, तद्भङ्गादेरित्यर्थः । तथा च ब्रह्मविषयकाज्ञानशून्यसाक्षिविषयकोक्तव्यवहारः । न च 'घटं साक्षात्करोमी' त्यादेरुक्तावच्छेद-

च्छिन्नः सर्वगतो जीवः आवृतः, तस्मिन्पक्षे जीवस्यैव जगदुपादानत्वेन सर्वसम्बद्धत्वात् आवरणभङ्गार्था वृत्तिरिति विवेकः । ननु चिदुपरागार्था वृत्तिरिति पक्षे स्वतोऽन्तःकरणसम्बद्धानां धर्माधर्मादीनां ब्रह्मणश्च वृत्ति-

---

कत्वविषयकत्वेन वैरूप्यमिति वाच्यम् । वक्ष्यमाणपक्षेऽप्येतादृशवैरूप्यसत्त्वात् । तत्र हि 'घटं साक्षात्करोमी' त्यादौ घटादिनिष्ठो योऽज्ञानविषयतावच्छेदकाभावस्तत्प्रयोजकविशिष्टचैतन्यरूपस्साक्षात्कारो विषय इति 'ब्रह्म साक्षात्करोमी' त्यत्र ब्रह्मविषयकाज्ञानशून्यसाक्षाकारो विषय इत्येव वाच्यमिति भावः । सर्वगतः सता तादात्म्येन सर्वदृश्यसम्बद्धः । **आवृत इति** । घटाद्यवच्छेदेनाज्ञानविषयतावान् । ननु, सर्वगतत्वे आवृतत्वे वा मानाभावात् कथं तत्पक्षे आवरणभङ्गार्था वृत्तिः । तत्राह—**जीवस्येत्यादि । सर्वसम्बद्धत्वादिति** । आवृतत्वेनेति शेषः । घटाद्याकारवृत्तिं विनापि घटाद्याकारसाक्षात्कारव्यवहारापत्त्या ब्रह्मणीव घटाद्यवच्छिन्नचितस्तादात्म्यस्य स्वाभाविकत्वेन तस्यैव भासकतानियामकत्वसम्भवेन च न पूर्वोक्तोपरागार्थत्वं वृत्तेरिति भावः । ननु, जीवस्य आवृतत्वं यदुक्तं, तदयुक्तम् । सर्वदृश्यभासकं हि चैतन्यं साक्षी । वाचस्पतिमते जीवेशानुस्यूतशुद्धचिदेव तथा वाच्यम् । तथा च तस्यैवावृतत्वं युक्तमिति चेन्न । तथा हि—वार्तिकमते ईशस्य स्वं जीवं च प्रति सर्वदृश्यभासकत्वम् । सर्वदृश्याधिष्ठानत्वात् । तथा वाचस्पतिमते जीवस्यैव तत एव स्वमीशञ्च प्रति तत्कामनाकृत्योर्जीवाधिष्ठानकत्वमेव । जीवाश्रिताविद्यापरिणामत्वात् । 'सोऽकामयते' त्यादिश्रुतिस्तु ब्रह्मणो जगदुपादानत्वश्रुतिवत् परिणाम्यविद्याविषयबोधिका । तथा च वार्तिकमते जीव ईशतादात्म्यवान् तदुपादानकत्वात् । तथा वाचस्पतिमते ईशविषयकविद्यावान् द्रव्यतादात्म्यवान् घट इव ईशातादात्म्यवान्वेति । तस्य तु प्रतिभासकत्वसम्भवः । यथा च तन्मते सुखादिभासकत्वेन ईशस्य वृत्त्यपेक्षा, तथा वाचस्पतिमते जीवस्येशं प्रति सर्वभासकत्वे तं प्रति विषयाणामनावृतत्वात् । **स्वत इति** । वृत्तिं विनापीत्यर्थः । अन्तःकरणसम्बद्धानां जीवप्रतिबिम्बाश्रयमनोऽवच्छिन्नत्वादिसम्बन्धवताम् । ईशप्रसादकोपरूपधर्माधर्मयोरीशोपाधिमायापरिणामयोरपि तत्कारणयागादिक्रियावत् मनोऽवच्छिन्नत्वं स्वीक्रियते । तादृशमनोगतसुखादिजनकत्वादिति भावः । अधर्मादीनामित्या-

मन्तरेणैव सर्वदा भानं स्यात् । न स्यात् चैतन्यस्य तत्तदाकारत्वाभावात् तदभावश्च स्वच्छेऽपि ब्रह्मचैतन्य आवरणात् अनावृतेऽपि शुक्तिरजतादा

दिपदेन शुक्तिरूप्यादिसङ्ग्रहः । **भानं स्यादिति** । तथा च प्रतिबिम्बाश्रयमनस्तादात्म्यादिसम्बन्धेन सुखादिसम्बद्धजीवस्य 'सुखं साक्षात्करोमी'त्यादौ विषयत्वात् वृत्तिं विनापि ब्रह्मणि धर्मादावपि तथा सम्बद्धजीवेन तत्तत्साक्षात्कारव्यवहारः स्यात् । शुक्तिरूप्यादावपि इदमाकारवृत्तिनिर्गमेन तादृशमनोऽवच्छिन्नचित्तादात्म्यमेव भासकतानियामकः सम्बन्धोऽस्तीति तत्राविद्यावृत्तिस्वीकारः सिद्धान्ते वृथेति भावः । स्वप्रतिबिम्बाश्रयावच्छेदकसम्बन्धेन सुखादिसम्बद्धो जीवः । तत्साक्षात्कारो धर्मादौ तु प्रतिबिम्बाभावे । ननु जीवस्य तत्सम्बन्धेन धर्मादिसम्बद्धतेत्याशयेनाह—**न स्यादित्यादि**-। चैतन्यस्य जीवस्य । तत्तदाकारत्वाभावात् स्वप्रतिबिम्बेत्यादिसम्बन्धेन धर्मादिसम्बद्धत्वाभावात् । ननु, घटाद्याकारायामिव ब्रह्माकारायामपि श्रवणमननादिपूर्वकालीनवृत्तौ जीवस्य प्रतिबिम्बसम्भवात् घटादाविव ब्रह्मण्युक्तरूपप्रतिबिम्बाश्रयावच्छेदकत्वसम्भवात् कथं ब्रह्माद्याकारत्वाभावः । एवमविद्यावृत्त्यभावेऽपि शुक्तिरूप्यादौ वृत्तिसामान्याभावेऽपि सुखादाविव धर्मादौ तत्प्रतिबिम्बसम्भवात् कथं तदाकारत्वाभावः । तत्राह—**तदभावश्चेति** । स्वच्छे जीवप्रतिबिम्बयोग्यापातज्ञानरूपवृत्तिविषये । आवरणात् आवरणयोग्यापरिच्छिन्नानन्दरूपत्वात् । तथा च परिच्छिन्नत्वेन ब्रह्मणो न प्रतिबिम्बाश्रयवृत्तावच्छेदकत्वसम्भव इति भावः । यथाश्रुतं तु स्वच्छादिपदं न सङ्गच्छते । अनावृतेऽपि ब्रह्मणि प्रतिबिम्बाधारतावच्छेदकत्वाभावेनावरणस्य तत्र प्रयोजकत्वात् । अथवा स्वच्छावरणपदयोः यथाश्रुत एवास्तामर्थः । ब्रह्मणि स्वच्छेऽप्यावृतत्वात् न जीवप्रतिबिम्बवत्त्वम् । चरमवृत्तौ सत्यां त्वावरणनाशेन तद्वत्त्वसम्भवाद्ब्रह्माकारता । तथा च घटादौ भासकतया कल्पितस्य प्रतिबिम्बाश्रयावच्छेदकत्वस्याभावेऽपि ब्रह्मनस्सुखादौ प्रतिबिम्बवत्त्वमेव भासकतानियामकसम्बन्धः । यथा च ब्रह्मण्यज्ञानविषयत्वमावरणम् । घटादौ तु तदवच्छेदकत्वमज्ञानविषयचित्तादात्म्यं वा, तथा ब्रह्मनआदौ साक्षात्कारो जीवप्रतिबिम्बवत्त्वम् । घटादौ तु तदवच्छेदकत्वं तद्वृत्त्यवच्छेदकत्वं वा । एवं च साक्षात्करोमीत्याकारकसर्वप्रत्ययेषु प्रतिबिम्बघटितविषयकत्वेनैकरूप्यम् । वस्तुतस्तु प्रतिबिम्बवत्त्वमेव सम्बन्धः । घटादावपि वृत्त्यवच्छेदककाले तत्सम्भवात् । अ-

नुभूयते च जलाद्युपरक्ते मृदादिपात्रे सूर्यादेः प्रतिबिम्बम् । ननु, प्रतिबिम्बवत्त्वसम्बन्धेन स्वावच्छिन्नमनोवृत्त्यादिप्रतिबिम्बितत्वसम्बन्धेन वा घटादिविशिष्टस्य जीवस्य घटं साक्षात्करोमीत्यादिप्रत्यये विषयत्वं पूर्वोक्तमयुक्तम् । साक्षात्करोत्यर्थ एव हि तत्र विषयः । स च विषयविशिष्टप्रतिबिम्बस्य प्रयोजकं मनोऽवच्छिन्नं चैतन्यम् । अन्यथा फलघटितार्थावाचकत्वेन साक्षात्करोतेरकर्मकत्वं स्यादित्युक्तं जानातिसाक्षात्करोत्यर्थविषयविवेचनप्रस्तावे । घटादिविशेषितस्य तदर्थत्वे च तस्य नानार्थत्वापत्तिरिति चेन्न । वस्तुगत्या घटादिविशिष्टं मनोऽवच्छिन्नं चैतन्यं तद्विषय इत्युक्तम् । न तु घटादिविशिष्टमनोऽवच्छिन्नचित्त्वेन चितो विषयत्वम् । तच्च विषयविशिष्टप्रतिबिम्बप्रयोजकमनोऽवच्छिन्नत्वेन घटादिविशिष्टचितः विषयत्वेऽपि न क्षतम् । मनोऽवच्छिन्नचित्तादाम्यं च सुषुप्तजीवेऽप्यस्त्येव । मनस्त्वाश्रयस्य हि तादात्म्यं साक्षात्कारघटकम् । न तु तद्विशिष्टस्य । तथा च सौषुप्तमनोऽवस्थायां मनोजात्यभावेऽपि सकलमनोवस्थानुगतव्यक्तौ जागरस्वप्नकालयोः मनस्त्वसत्त्वेन तद्व्यक्तेरेव सौषुप्तमनोऽवस्थानुगतत्वात् सुषुप्तावपि मनस्त्वाश्रयोपहितचिदक्षता । ननु उक्तचिदपि न साक्षात्करोत्यर्थः । ज्ञानविशेषो हि सः । ज्ञानं च साक्ष्येव । तस्यैव सर्वदृश्यानुगतत्वेन ज्ञानत्वात् । न हि ज्ञानं सिद्धान्ते प्रतिज्ञेयं भिन्नम् । उक्तं हि मूल एव विषयविशेषोपरक्ततया ज्ञानं नाना । स्वतस्तु ज्ञानमित्येकं प्रतीयत इति चेन्न । अधिष्ठानीभूतसाक्षिण्येव मनोऽवच्छिन्नत्वरूपेण ज्ञानत्वात् । तदुक्तमद्वैतसिद्धौ—'यत्र दृश्याध्यासस्तत्र ज्ञानत्वम् । न तु ज्ञानत्वविशिष्टेऽध्यास' इति । अत एव प्रतिकर्मव्यवस्थायामद्वैतसिद्धावुक्तम्— 'अविद्योपहितचिद्रूपस्य जीवस्य जगदुपादानत्वपक्षे घटाद्यवच्छेदेन आवृतत्वादावरणभङ्गार्था वृत्तिः । जगदनुपादानत्वपक्षे तु जीवस्य विषयेषु सम्बन्धस्याभावात् तदर्थापत्तिः । पक्षद्वयेऽपि जीवस्यैव विषयावभासकत्वम् । मनोऽवच्छिन्नचितः जीवत्वे तु जीवस्य जगदुपादानब्रह्मचिदभेदाभिव्यक्त्यार्थापत्तिः ब्रह्मचिदेव विषयावभासिकेति चरमपक्षे अभेदाभिव्यक्त्यर्थत्वस्य जीवोपरागार्थत्वे पर्यवसानात् अत्र मूले तथोक्तमिति ध्येयम् । यदि च साक्षिरूपस्य ज्ञानत्वमित्याग्रहः, तदा तादृशमनेऽवच्छिन्नचित्तादात्म्यविशिष्टसाक्ष्येव साक्षात्करोत्यर्थोऽस्तु । प्रतिबिम्बप्रयोजकसाक्ष्येव सोऽस्त्विति वाच्यम् । चैत्रीयमनोवृत्तिमादाय मैत्रस्यापि 'घटं साक्षात्करोमी' ति व्यवहारापत्तेः । प्रयोजकत्वं हि

बिम्बविषया प्रकृते निवेशितम् । तथा च घटावच्छिन्ने चैत्रीयमनोवृत्तिप्रतिबिम्बितसाक्षिणो मैत्रीयमनोवच्छिन्नचिद्रूपे अहमर्थेऽपि सत्त्वादुक्तापत्तिः स्यादेव । मनोऽवच्छिन्नचितः निवेशे तु तादृशवृत्तिनिष्ठप्रतिबिम्बप्रयोजकचैत्रमनोऽवच्छिन्नचितः मैत्रीयाहमर्थे तादात्म्याभावेन नोक्तापत्तिः । उक्तमनोऽवच्छिन्नचितो हि साक्षिणि विशेषणतया भानस्वीकारात् साक्षिविशेषेऽपि तादात्म्येन प्रकारत्वम् । यदि च विषयसाक्षात्कारशरीरे भासमाने साक्षात्कारे विषयस्याध्यासिकस्य तादात्म्यस्य भानमावश्यकम् । तस्य भासकतानियामकत्वात्, तदा 'घटं साक्षात्करोमी'त्यादौ साक्षात्कारैकदेशे विषय इव साक्षिण्यपि घटादेस्तादात्म्यं द्वितीयाविभक्त्युपस्थापितं विशेषणतया भातीति स्वीक्रियताम् । एवं जानात्यर्थोऽपि पूर्वोक्तरीत्या प्रतिबिम्बप्रयोजकमनोऽवच्छिन्नचित्तादात्म्यविशिष्टः साक्ष्येवोच्यताम् । उच्यतां च 'घटं जानामी'त्यादौ जानात्येकदेशे प्रतिबिम्बे स्वाकारवृत्तिनिष्ठत्वाद्यन्यतमसम्बन्धाद्यवच्छिन्नं घटादेराधेयत्वमिव साक्षिणि घटादेस्तादात्म्यमपि द्वितीयाविभक्त्युपस्थापितं विशेषणमिति । एवं वृत्तेरावरणभङ्गार्थत्वपक्षे अज्ञानाविषयत्वप्रयोजकमनोऽवच्छिन्नचिद्विशिष्टसाक्षी साक्षात्करोतेरसत्त्वापादकाज्ञानाविषयत्वप्रयोजकमनोऽवच्छिन्नचिद्विशिष्टसाक्षी जानातेरर्थः । तदाप्युक्तरीत्या घटादेरज्ञानविषयत्वे आधेयत्वस्यैव साक्षिणि तादात्म्यस्य द्वितीयाविभक्त्यर्थस्य विशेषणत्वम् । मनोऽवच्छिन्नचिति तादृशप्रयोजकत्वं च स्वनिरूपितं यदज्ञानं, तद्विषयत्वाभावस्य समानकालीनकारणं या अविद्या तत्तादात्म्यम् । कारणत्वं क्षेमसाधारणं प्रयोजकत्वरूपोऽखण्डधर्मो वा तत्स्थाने वाच्य इत्यादि साक्षात्करोत्यर्थविवचने पूर्वोक्तं बोध्यम् । यदि च चिदुपरागार्थत्वपक्षात् वृत्तेर्जीवचितो विषयावच्छिन्नचिदभेदाभिव्यक्त्यर्थत्वपक्षे भिन्नो वाच्यः, तदा विषयत्वाभावान्तस्थले स्वप्रतियोगिकभेदस्य चिन्निष्ठोऽभावः तस्यैव निवेशेन साक्षात्करोत्यर्थो वाच्यः । तदेकदेशे साक्षिणि घटाद्यन्वितस्य तादात्म्यस्य द्वितीयाविभक्त्यर्थस्यान्वयः । स्वपदार्थोऽत्र पूर्वत्र च मनोऽवच्छिन्नचिदेव । जानात्यर्थस्तु पूर्ववदेव । वृत्तिसुखादौ प्रतिबिम्बास्वीकारादेवाभेदाभिव्यक्त्यर्थपक्ष इति स्वीकारे तु स्वतादात्म्यप्रयोजकत्वमेव मनोऽवच्छिन्नचिति विशेषणं वाच्यम् । तादात्म्ये च घटाद्याकारवृत्तिप्रतियोगिकत्वं घटं जानामीत्यादौ सुखादिनिष्ठत्वं सुखं जानामीत्यादौ द्वितीयया बोध्यते । यद्वा स्वीयाकारास्यविषयता स्वता-

वस्वच्छत्वात् । धर्माधर्मादौ तु अस्वच्छत्वादावृतत्वाद्वा । तेन स्वच्छेऽप्यावृते प्रमाणवृत्त्या तदाकारता । अनावृतेऽप्यस्वच्छे शुक्तिरजतादौ अवि-

दात्म्यं स्वतादात्म्याश्रयतादात्म्यं चेत्याद्यन्यतमप्रयोजकं यन्मनः तद्विशिष्टसाक्ष्येव तत्पक्षे जानात्यर्थः । इच्छाद्वेषादिपरिणामस्यापि मनस्त्वात्तदीयविषयत्वमपि मनोविषयत्वम् । द्वेषादिकमादाय घटादौ ज्ञानव्यवहार इष्ट एव । इदं तु बोध्यम् । ज्ञाने साक्षात्कारे च पूर्वोक्ते सर्वत्र मनसो न मनस्त्वेनैव निवेशः । 'ईशो जानाती' त्यादावीशस्य जगदनुपादानत्वपक्षे मनोविशिष्टतादात्म्यबाधात् । किं त्वीशोपाधिमनोन्यतरत्वादिना निवेशेः । ईशो मनोऽवच्छिन्नचित्त्वेत्यान्यतरविशिष्टसाक्षिणो वेति । नन्वेवं वृत्तेश्चिदुपरागार्थत्वपेक्षऽपि ब्रह्मणि चिदुपरागावरणभङ्गोभयार्थकत्वात् केवलचिदुपरागार्थकत्वमद्वैतसिद्ध्युक्तमयुक्तमिति चेन्न । तस्य घटादिब्रह्मसाधारणं चिदुपरागमात्रं वृत्तेः प्रयोजकमित्यर्थकत्वात् मुख्यफलं चिदुपराग एवेत्यर्थकत्वाद्वा । यत्तु द्रव्ये प्रतिबिम्बवद्वृत्तिसंयोगः । गुणादौ तु तस्यास्संयुक्तसमवायादिरिति, तदद्वैतसिद्ध्यादावुक्तमपि अननुगतत्वादुपेक्षितम् । अस्वच्छत्वात् प्रतिबिम्बायोग्यत्वात् । नन्वीश्वरप्रसादकोपयोः सिद्धान्ते धर्माधर्मत्वस्वीकारात् जीवप्रसादकोपयोरिव तयोस्स्वच्छत्वमेव । तत्राह—**आवृतत्वाद्वेति** । ईशं प्रति तयोरनावृतत्वेऽपि जीवं प्रत्यावृतत्वमिति भावः । ते न स्वाभाविकेन ब्रह्माद्याकारत्वाभावेन स्वच्छेऽप्यावृत इति पूर्ववदर्थः । ब्रह्मणीति शेषः । प्रमाणवृत्त्या श्रवणाद्युत्तरब्रह्मास्मीतिवृत्त्या । स्वच्छावृतब्रह्मविषयकतादृशवृत्त्येति समुदायार्थः । तदाकारता साक्षिणो ब्रह्मविषयकाज्ञानताशून्यता । अथवेत्यादिव्याख्यानपक्षे ब्रह्मप्रतिबिम्बिततेत्यर्थः । अनावृते प्रातीतिकत्वात् अज्ञानविषयतानवच्छेदके अविद्यावृत्त्या तदाकारता शुक्तिरूप्याद्यवच्छिन्नाविद्यावृत्तिप्रतिबिम्बितत्वरूपसाक्षिणः शुक्तिरूप्याद्याकारता । ननु, यद्यपि विवरणादौ शुक्तिरूप्याद्याकाराविद्यावृत्तिरुक्ता, तथापि न युक्ता । प्रातीतिकरूप्यादेस्स्वच्छत्वसम्भवादिति चेन्न । व्यावहारिकरजतादेः चित्प्रतिबिम्बयोग्यत्वरूपस्वच्छत्वादर्शनेन तज्जातीयप्रातीतिकरूप्यादेः तदसम्भवात् । सत्त्वांशाधिकभूतपरिणामस्य मन आदेरेव स्वच्छत्वसम्भवेन तमोंशाधिकाविद्याया व्यावहारिकसाधारणरजतत्वविशिष्टहेतुतया कल्प्तायाः परिणामस्य प्रातीतिकव्यवहारादेः स्वच्छत्वासम्भवाच्च सत्त्वांशाधिकाविद्यापरिणामस्य तदाकारवृत्तिज्ञानस्य

द्यावृत्त्या तदाकारता । अनावृते स्वच्छे तु सुखदुःखादौ स्वत इति नान्तःकरणसम्बन्धमात्रेण भानप्रसङ्गः । ननु, ब्रह्मणः कथमावरणम् । निरवद्यस्वप्रकाशत्वेन सर्वज्ञत्वात् । सत्यम् । स्वसम्बद्धसर्वभासकतया सर्व-

---

चिन्निष्ठतदाकारतासम्पादकत्वेनावश्यकत्वात् तमोंशाधिकाविद्याकार्यतावच्छेदके । प्रातीतिकान्यत्वनिवेशे तु गौरवम् । आवश्यकी च प्रातीतिकाविद्यावृत्तिः । तत्तांशस्यैव संस्कारत्वात् । अनुमित्यादिवृत्तिनाश्यस्य रजताद्याकारत्वेन स्मृतिहेतुतायाः क्लृप्तत्वात् । रजताद्यवच्छिन्नचैतन्यनाशस्य रजतादितादात्म्यसम्भवेऽपि रजतादिसम्बन्ध्याकारारूयविषयत्वाभावात् । विद्यमानसुखादौ त्वगत्या तदवच्छिन्नचैतन्यनाशस्यैव संस्कारत्वं कल्प्यते । अन्यथा मनःपरिणामे वृत्तिकल्पने वृत्तावपि तत्कल्पनापत्तेः । अतोऽनावृतस्य मनः परिणामारूयस्मृतौ तदवच्छिन्नस्य चिन्नाशस्य तत्तादात्म्यापन्नचिन्नाशत्वेनैव हेतुत्वं कल्प्यते । अनावृतत्वं च स्वकाले बोध्यम् । तेन सुखादेः स्वनाशकाले आवृतत्वेऽपि न क्षतिः । अविद्यातत्सम्बद्धशुद्धचिज्जीवादेः स्मृतौ व्यभिचारात् मनः परिणामत्वनिवेशः । अनावृते साक्षिमात्रभास्यत्वात् अज्ञानविषयत्वानवच्छेदके । स्वच्छे स्वच्छमनःपरिणामत्वेन स्वच्छे । **सम्बन्धमात्रेणेति** । मनसो ब्रह्मणि तादात्म्यं शुक्तिरूप्यादौ सामानाधिकरण्यम् । ईशप्रसादधर्माधर्मादौ स्वावच्छिन्नत्वसम्बन्धो यत्र हि मनसि यागादिप्रयत्नः, तदवच्छेदेन ईश्वरोपाधिः प्रसादरूपेण परिणमते । तथा च नानाविधानां मनस्सम्बन्धानां विषयसाक्षात्कारघटकत्वेननानुगमोऽपीति भावः । स्वं प्रत्यनावृतत्वेऽपि जीवं प्रत्यावृतं ब्रह्मेत्याशयेन समाधत्ते—**सत्यमिति** । अन्तःकरणावच्छिन्नेनेत्यनेन मनोऽवच्छिन्नाचित् अविद्याप्रतिबिम्बो वा जीव इत्यादि सर्वपक्षेषु मनोवृत्तिसापेक्षं घटादिकिञ्चिज्ज्ञत्वमेव जीवस्येति सूचितम् । जीवाज्ञानविषयतया जीवं प्रत्यावारकं यदज्ञानं तद्विषयतया । तस्मात् ब्रह्मण्यावृतत्वसम्भवात् । ननु, घटाद्यवच्छिन्नमनोवृत्तेरुत्पत्तिक्षणे तत्र प्रतिबिम्बोत्पत्तिः तदुत्तरक्षणे वा । आद्ये प्रतिबिम्बघटितचिदुपरागस्य उक्तवृत्तिफलत्वासम्भवः । ब्रह्माकारवृत्तौ तदुत्पत्तिक्षणद्वितीयक्षण एव ब्रह्मण्यावरणोच्छेदकत्वेन प्रतिबिम्बसम्पादकतया वैरूप्यापातश्च । द्वितीये मनस्सुखादावपि तदुत्पत्तिक्षणे प्रतिबिम्बाभावस्य तुल्यत्वेन भानाभावापत्तिः । न चेष्टापत्तिः । साक्षिमात्रवेद्यस्याभासमानतया विद्यमानत्वास्वीकारात् दर्पणाद्युपाधेः

ज्ञमपि अन्तःकरणावच्छिन्नजीवाज्ञानविषयतया आवृतमिति व्यपदेशात् । तस्मात् ब्रह्म जगदुपादानमिति पक्षे चिदुपरागार्था आवरणभङ्गार्था च वृत्तिः । जीवोपादानत्वपक्षे तु आवरणभङ्गार्थैवेति । नन्वेकेनैव घटादिज्ञाने

मुखादिसान्निधानस्य प्रतिबिम्बोत्पत्तिहेतुत्वेन तदुत्पत्तिद्वितीयक्षण एव तत्स्वीकारेऽपि सप्रतिबिम्बस्य मनसः परिणामे सुखादौ वृत्तिज्ञाने च सप्रतिबिम्बत्वस्य स्वाभाविकत्वेन तदुत्पत्तिक्षण एव सम्भवादिति चेत् अत्रोच्यते । आद्यपक्ष एव युक्तः । अज्ञातं चैतन्यं प्रमेयं, ज्ञातं फलमित्यनेन मूलेन हि चिदुपरागक्षणे फलत्वं, तत्पूर्वं प्रमेयत्वं चोक्तम् । तत्र घटादौ वृत्तेरुपरागघटकत्वमेव उपरागफलकत्वम् । ब्रह्मणि तु आवरणभङ्गक्षणे प्रतिबिम्बोत्पादकत्वेन तद्घटितोपरागफलकत्वं मुख्यमेव । वृत्तेरावरणभङ्गार्थत्वं तु आवरणविरोधित्वं वृत्त्यधिकरणक्षणत्वम् आवरणकालपूर्वत्वाभावव्याप्यमिति यावत् । वस्तुतस्तु वृत्त्युत्पत्तिक्षणे नाशस्य युक्तत्वात् आवरणकालपूर्वत्वानधिकरणक्षणाव्यवहितोत्तरत्वमेवावरणविरोधित्वम् । एवं च ब्रह्मण्यपि वृत्तेरुपरागफलकत्वं न मुख्यम् । एवं चोपरागसम्पादकसामग्रीविशिष्टमज्ञानशब्देनोच्यते । प्रमोत्पत्तियोग्यमेव प्रमेयशब्देनोच्यते । प्रमाविषयत्वं तु प्रमाकाल एव । यत्तु वृत्तेश्चिदुपरागार्थत्वपक्षेऽपि घटाद्यवच्छिन्ने ब्रह्मचैतन्ये अज्ञानविषयत्वं स्वीक्रियते । तद्विशिष्टमज्ञातशब्देनोच्यते । तथा च प्रमावृत्त्या ज्ञानविषयत्वमेव प्रमेयत्वम् । एवं च घटाद्यवच्छिन्नचैतन्येऽपि आवरणोच्छेदक्षणे प्रतिबिम्बोत्पादिका वृत्तिः । अन्यथा ब्रह्मचैतन्येऽपि आवरणस्वीकारस्य वैयर्थ्यापत्तेः । अत एव स्वच्छेऽप्यावृते प्रमावृत्त्या तदाकारेत्यत्र मूले ब्रह्मणीति विशेष्यवचनं नोक्तम् । तस्मात् सर्वस्याः प्रमाणवृत्तेरावरणोच्छेदक्षणे प्रतिबिम्बोत्पादकत्वमित्यापाततः प्रतिभाति, तन्न रम्यम् । श्रवणादिपूर्वकालीनवृत्तिगतप्रतिबिम्बेन 'ब्रह्म साक्षात्करोमी'ति व्यवहाराभावेन ब्रह्मण्यावरणस्वीकारेऽपि घटाद्यवच्छिन्नब्रह्मचैतन्ये तत्स्वीकारे मानाभावात् । अथानभ्यासदशोत्पन्ने घटाद्याकारवृत्तिज्ञाने सत्प्रतिबिम्बे सत्यपि 'घटं साक्षात्करोमी'त्यादेरभावः तत्रापि तत्स्वीकारे मानमिति चेन्न । तावताप्यभ्यासदशोत्पन्नवृत्तेः पूर्वं तद्विषये आवरणे मानाभावेन सर्वस्या घटाकारवृत्तेर्घटाद्यवच्छिन्ननिष्ठावरणभङ्गार्थत्वे मानाभावात् । तस्माच्छुक्तिरूप्याकाराया इव घटाद्याकाराया अपि अनभ्यासदशानुत्पन्नवृत्तेः प्रतिबिम्बाश्रयत्वेनैव चिदुपरागार्थकत्वम् । न तु चैतन्या-

नावरणस्य भङ्गे सद्यो मोक्षप्रसङ्गः। अज्ञानस्यैकत्वात्। नानाज्ञानपक्षेऽप्येकस्य जीवस्यैकाज्ञानोपाधित्वात्। न। उत्तेजकेन मणेरिव वृत्त्या आवरणस्याभिभवाङ्गीकारात्। तथा च प्रमाणजन्यान्तःकरणवृत्त्यभावसहकृतमज्ञानं सति भात्यपि वस्तुनि नास्ति न भातीति प्रतीतिजननसमर्थमावरणमित्युच्यते। वृत्तौ जातायां तु अवच्छेदकाभावाद्विद्यमानमप्यविद्यमानसममेवेति न स्वकार्यसमर्थमज्ञानं तेनाभिभूतमित्युच्यते। नन्वेवं सति ब्रह्मज्ञानेनाप्यविद्याया अ-

---

वरणनिवृत्त्यधीनचैतन्यनिष्ठप्रतिबिम्बोत्पादनद्वारा गौरवादिति ध्येयम्। वृत्तेरावरणभङ्गमात्रत्वपक्षे तु प्रमोत्पत्तिक्षणे चैतन्यं नावरणविशिष्टम् आवरणोच्छेदविशिष्टं वा। प्रमाविषयत्वादेव प्रमेयमित्युच्यते। तदुत्तरक्षणे तु फलीभूतस्य साक्षात्करोमीति व्यवहारस्य सम्भवात् फलमित्युच्यत इति दिक्। आवरणस्याज्ञानस्य। नानाज्ञानपक्षे जीवभेदेनाज्ञानभेदपक्षे। अभिभवं प्रकटयति—**तथा चेत्यादि**। सहकृतं विशिष्टम्। **जननेति**। अस्तिभातीतिव्यवहाराभावप्रयोजकमित्यपि बोध्यम्। अवच्छेदकाभावात् जनकताप्रतिबन्धकतयोरवच्छेदकस्य वृत्त्यभावात्। **स्वकार्येति**। अस्तीत्यादिव्यवहाराभावस्य क्षेमसाधारणकार्यत्वाश्रयस्य नास्तीत्यादिव्यवहाररूपकार्यस्य जननसमर्थमित्यर्थः। तथा चोत्तेजकीभूतमन्त्रविशेषाद्यभावविशिष्टमणित्वेन दाहाभावं प्रति कारणता यथा, तथा वृत्त्यभावविशिष्टाज्ञानत्वेन अस्तीत्यादिव्यवहाराभावं नास्ति न भातीति व्यवहारं च प्रति कारणता। तत्रापि प्रमाविषयत्वसमानाधिकरणमज्ञानविषयत्वमस्तीतिव्यवहाराभावे नास्तीति व्यवहारे च कारणम्। प्रमावच्छेदकत्वाभावसमानाधिकरणमज्ञानविषयत्वं भातीति व्यवहाराभावे न भातीति व्यवहारे च कारणम्। साक्षात्कारप्रमाया अवच्छेदकत्वस्य सद्विषये स्वीकारात् तस्यावच्छेदकत्वस्य घटादौ पूर्वं सत्त्वेन उक्ताकारोत्पत्तिः। ब्रह्मणि तु विश्वव्यापकत्वेनावच्छेदकत्वस्य सर्वदाभावेऽपि श्रवणाद्युत्तरसाक्षात्कारस्य सत्त्वे अज्ञानविषयत्वासत्त्वात् विशेष्याभावादेव तादृशाज्ञानविषयत्वाभावरूपस्य सत्त्वान्नोक्तकार्योत्पत्तिः। वस्तुतस्तु विदेहकैवल्यपर्यन्तं अज्ञानविषयत्वं न निवर्तत इति वक्ष्यमाणपक्षे श्रवणाद्युत्तरस्यात्मसाक्षात्कारस्य सत्त्वे भातीतिव्यवहारसिद्धये लौकिकविषयत्वमेवावच्छेदकस्थाने वाच्यम्। लौकिकेन्द्रियसन्निकर्षादीनामिव विद्यमानसुखात्मादिविषयाणामपि तादात्म्येन प्रयोजकत्वे तद्विषयकशाब्दधीवृत्तीनामपि तन्निष्ठलौकिकविषयताकत्वसिद्धिः। आस्तां वक्ष्यमाणाया अवि-

निवृत्तेरानिर्मोक्षप्रसङ्गः । न । तत्त्वमस्यादिवाक्यार्थज्ञानादविद्यानिवृत्त्यभ्यु-

द्यावृत्तेः विद्यमानसुखादिष्विव तत्रापि तत्काले भातीत्यादिव्यवहारः स्वीक्रियतां वा । ब्रह्मणोऽपि शारीराद्यवच्छिन्नभवच्छेदकत्वम् । न हि शाखादेरवच्छेदकत्वमनवच्छिन्नम् । किं तु अग्राद्यवयवावच्छिन्नम् । प्रयोजकं तु तत्र पूर्ववल्लौकिकसन्निकर्षादिकम् । घटादौ तृष्णाज्ञानविषयत्वाश्रयचित्तादात्म्यान्नोक्ताकारोत्पत्तिः । प्रमावच्छेदकेत्यत्र प्रमापदेनापरोक्षत्वेन प्रमात्वेन च निश्चीयमाना वृत्तिर्बोध्यते । तेनानभ्यासदशापन्ने घटादिज्ञाने आपातब्रह्मज्ञाने च सत्यपि तादृशाकारोत्पत्तिः । प्रमाविषयेत्यादौ तु प्रमात्वेन निश्चीयमाना वृत्तिर्बोध्या । तेनातादृशे परोक्षज्ञाने सत्यपि उक्ताकारोत्पत्तिः । अत्रेदं बोध्यम् । सुखादौ वृत्त्यस्वीकारे तस्मिन् विद्यमानेऽपि नास्ति नभातीति व्यवहारापत्तिः । अज्ञानाविषयचित्तादात्म्यस्य तत्र सत्त्वात् न च सुखाद्यवच्छिन्नचिद्भिन्नमनवच्छिन्नं घटाद्यवच्छिन्नं च चैतन्यमज्ञानाविषय इति वाच्यम् । अज्ञानविषयत्वस्यावच्छिन्नावच्छिन्ननिष्ठस्य एकत्वे ब्रह्मणि साक्षात्कृते घटादौ नास्तीत्यादिव्यवहारानुपपत्तेः । नानात्वेऽपि ब्रह्माज्ञाने नष्टे तद्विषयत्वसत्त्वानुपपत्त्या तद्दोषतादवस्थ्यात् । अनवच्छिन्ननिष्ठविषयत्वं प्रथमेन तत्त्वज्ञानेन नश्यति । अज्ञानं तु चरमेणैवेति स्वीकारे जीवन्मुक्तस्याज्ञाननाशानुपपत्तिः । अथ ब्रह्माज्ञानं नष्टमित्यनुभवस्य किमुक्तकल्पनागौरवेण । तस्मात् ब्रह्मसाक्षात्कारोत्तरं घटादौ नास्तीतिव्यवहारानुपपत्तिवारणाय विदेहकैवल्यपर्यन्तमज्ञानविषयत्वं न निवर्तते । एकाज्ञानपक्ष इत्येव वाच्यम् । तथा च घटाद्यवच्छिन्नचैतन्येष्वज्ञानविषयत्वस्वीकारे मानाभावात् शुद्धचिन्निष्ठेनैवाज्ञानावेषयत्वेन घटादिकं नास्तीत्यादिव्यवहारादिकम् । तथा च सुखादावपि तदापत्तिर्दुर्वारा । तस्मात् घटाद्याकारवृत्तीनामिव मनस्त्वस्य मनोधर्मत्वस्य च उत्तेजकत्वं वा मनस्सुखादिविद्यमानेष्वेकैकाविद्यावृत्तिर्वा स्वीक्रियते । सृष्ट्यारम्भकालोत्पन्नाविद्यावृत्तौ मनस्सुखादीनामवच्छिन्नत्वसम्बन्धेन विषयत्वसम्बन्धेन चोत्पत्तिः स्वीक्रियते । तथा च धीत्वज्ञानरूपेण वृत्तित्वेनोत्तेजकत्वस्वीकारान्नानुपपत्तिः । अत एव शुक्तिरूप्यादेरपि तद्वृत्तिविषयत्वमेव स्वीक्रियते । न तु वृत्त्यन्तरविषयत्वम् । प्रतिभासव्याप्यस्थितिकत्वरूपेण विषयतासम्बन्धेनोत्पत्तिं प्रति तद्वृत्तिव्यक्तेर्हेतुत्वस्वीकारात् । एवं च तद्वृत्तेः सृष्टिकाले नाशाभावेऽपि प्रतिभासव्याप्यसुखशुक्तिरूप्यादेः स्मृतौ तदवच्छिन्नाचिन्नाशस्यैव संस्कारविषया हेतुत्वमिति दिक् । एवं सति घटाद्याकारवृत्तेरज्ञानानुच्छेदकत्वे । **अनिवृत्तेरिति** । या या प्रमा

पगमात् स्वविषयविषयप्रमात्वेनैव अविद्यानिवर्तकत्वाभ्युपगमात् महावाक्यार्थज्ञानस्यैव अबाधितविषयतया प्रमात्वात् प्रत्यक्षादीनां तु बाधितविषयतया भ्रमत्वेऽपि व्यवहारसामर्थ्येन प्रामाण्याभिमानात् ज्ञानादज्ञाननिवृत्तेरन्यत्रादर्शनञ्चाकिञ्चित्करम्। स्वानुभवसिद्धत्वादन्यथानुपपत्तेश्च सर्वतो बलवत्त्वात्। तदुक्तं—'अन्यथानुपपत्तिश्चेदस्ति वस्तुप्रसाधिका। पिनष्ट्यदृष्टिवैमत्यं सैव सर्वबलाधिका॥' इति। अथवा मूलाज्ञानस्यैवावस्थाज्ञानानि घटादिविषयावरणानि। अज्ञानस्य ज्ञानप्रागभावस्थानीयत्वेन यावन्ति ज्ञानानि तावन्त्यज्ञानानीत्यभ्युपगमात् एकेन ज्ञानेन एकाज्ञानस्यैव नाशात् घटादिज्ञानेन आवरणनाशे न काचिदनुपपत्तिः। नन्वनुमानादिभिरावरणं निवर्तते न वा। आद्ये साक्षात्कारिभ्रमस्यापि शङ्खपीतत्वादेर्दिङ्मोहादेश्च श्वेतत्वाद्यनुमानादिना निवृत्तिप्रसङ्गः। अधिष्ठानाज्ञानोपा-

---

सा सा स्वसमानविषयकाज्ञानतत्प्रयुक्तोच्छेदिकेति व्याप्तिग्रहात् ब्रह्मप्रमाया अज्ञानोच्छेदकत्वं स्वीक्रियते। उक्तव्याप्तिश्च घटादिप्रमायां साध्यसाधनयोः सहचारदर्शनेन ग्राह्या। तच्च न सम्भवतीति भावः। अविद्यानिवृत्त्यभ्युपगमात् नानाविद्योच्छेदाभ्युपगमात्। अयं च निवर्तकत्वादित्यत्र हेतुः। स्वविषयविषयकप्रमात्वेनैवाविद्यानिवर्तकत्वादिति या अज्ञानविषयविषयिका प्रमा सा तदज्ञानतत्प्रयुक्तोच्छेदिकेति व्याप्तेः पुरुषान्तरीयब्रह्मज्ञानेषु सहचारदर्शनेन ब्रह्मादज्ञानसमानविषयकप्रमात्वव्यापकमज्ञानतत्प्रयुक्तोच्छेदकत्वमित्यस्य नियमयस्यसम्भवादित्यर्थः। प्रमात्वमसम्भावनादिप्रयुक्ताप्रामाण्यबुद्ध्यविषयत्वे सत्यबाधितविषयकत्वम्। तदनुक्तावापातब्रह्मज्ञाने घटादिज्ञाने च व्यभिचारः। अतो विशिष्टरूपेण व्याप्यता। प्रमात्वाद्युक्ताविशिष्टप्रमात्वात्। तथा चाज्ञानसमानविषयकत्वं ब्रह्मज्ञानस्यैवेति तत्रैव सहचारस्य वाच्यतया घटादिज्ञाने तदभावेऽपि न क्षतिरिति भावः। ननु तर्हि घटादिज्ञानस्य प्रमात्वव्यवहारः कथम्। तत्राह—**प्रत्यक्षेत्यादि**। नन्वेकजीववादे कथमुक्तव्याप्तिग्रहः। तत्राह—**ज्ञानादिति**। अन्यथानुपपत्तेः 'विद्वान्नामरूपाद्विमुक्त' इत्यादिश्रुत्यन्यथानुपपत्तेः। अदृष्टिवैमत्यम् अन्यत्रादर्शनेन विवादम्। विषयावरणानि विषयावच्छिन्नचिदावरणानि। **एकाज्ञानस्येति**। तद्ज्ञानाव्यवहितपूर्वतद्ज्ञानविषयावारकं यदज्ञानं, तस्यैव तज्ज्ञानमुच्छेदकम्। सर्वज्ञाज्ञानं न सर्वदा आवृणोतीति भावः। अनुमानादिभिः अनुमित्यादिभिः। तन्निवृत्तौ अधिष्ठानाज्ञाननिवृत्तौ। यौक्तिकज्ञानेन वाचस्पत्यभ्युपगतेनाहं ब्रह्मा-

दानकत्वेन भ्रमस्य तन्निवृत्तौ निवृत्तेः । यौक्तिकज्ञानेन च ब्रह्मणः अविद्यानिवृत्तेः साक्षात्कारार्थं श्रवणमननापेक्षा न स्यात् । द्वितीये च वह्न्यादिव्यवहारो न स्यात् । प्रतिबन्धकस्य विद्यमानत्वात् । उच्यते । द्विविधमावरणम् । एकमसत्त्वापादकमन्तःकरणावच्छिन्नसाक्षिनिष्ठम् । अन्यदभानापादकं विषयावच्छिन्नब्रह्मचैतन्यनिष्ठम् । घटमहं न जानामीत्युभयावच्छेदानुभवात् । तत्राद्यं परोक्षापरोक्षसाधारणप्रमाणज्ञानमात्रेण निवर्तते । अनुमितेऽपि वह्न्यादौ नास्तीति प्रतीत्यनुदयात् । द्वितीयं तु साक्षात्कारेणैव निवर्तते । यदाश्रयं यदाकारं ज्ञानं तदाश्रयं तदाकारमज्ञानं नाशयतीति नियमात् । परोक्षज्ञानस्य इन्द्रियविषयसन्निकर्षाभावेन ज्ञानस्यान्तः

स्मीति परोक्षज्ञानेन । एतेन विवरणादिमते श्रवणादिपूर्वज्ञानस्यापि अपरोक्षत्वादिदमयुक्तमित्यपास्तम् । अथवा । यौक्तिकेति । अपरोक्षत्वेनाज्ञायमानेनेत्यर्थः । आत्माविषयकशाब्दज्ञानस्य अपरोक्षस्यापि अपरोक्षत्वेनाज्ञायमानस्य नापरोक्षाध्यासमूलाज्ञानोच्छेदकत्वमिति भावः । वह्न्यादिव्यवहारः वह्निरस्तीतिव्यवहारः । द्विविधं परस्परासङ्कीर्णधर्मद्वयविशिष्टम् । असत्त्वापादकं नास्तीति धीप्रयोजकतावच्छेदकाखण्डधर्मवत् । अन्तःकरणावच्छिन्नसाक्षिनिष्ठं मनोवच्छिन्ना साक्षिनिष्ठाश्रयता यस्य तादृशम् । विषयावच्छिन्नब्रह्मचैतन्यनिष्ठं घटाद्यवच्छिन्ना ब्रह्मनिष्ठाश्रयता यस्य तादृशम् । उभयावच्छेदानुभवात् उभयोरेकैकावच्छिन्नाश्रयताकाज्ञानयोरुक्ताश्रयत्वानुभवात् । एकाज्ञानपक्षे अज्ञानस्य घटावच्छिन्ननानाविषयताकत्ववत् मनोघटाद्यवच्छिन्नाश्रयताकत्वं सम्भवत्येवेति तत्पक्षेऽपि 'घटं न जानामी'त्युभयावच्छेदेनानुभवोपपत्तिः । यदि च तत्पक्षे घटाद्यवच्छिन्नान्यज्ञानविषयत्वानि न स्वीक्रियन्ते, घटज्ञानेन 'घटाज्ञानं नष्ट'मित्यादिप्रत्ययस्य उक्तविषयतानाशविषयकत्वानुरोधात् तत्स्वीकारः । तादृशप्रत्ययस्य नोक्तनाशो विषयः । अनन्तानामवच्छिन्नविषयतानां कल्पने गौरवात् । किं तु वृत्त्यविषयत्वसमानाधिकरणं यत् घटाद्यात्मकचिद्वृत्त्यज्ञानविषयत्वं, तदत्यन्ताभावो विषय इति तत्स्वीकारो व्यर्थ इति चिन्त्यते, तदा पक्षेवाज्ञानानामेवोक्ताश्रयताकत्वम् । एकाज्ञानपक्षे घटं न जानामी'ति धीस्तु घटात्मकचिद्वृत्तितादृशाविषयत्वसमानाधिकरणविषयताकाज्ञानतावानहमित्याकारेति भावः ।यदाकारं यादृशविषयताकं तन्निष्ठं तन्मात्रनिष्ठमेव । आलोकतमसोस्तथा नियमस्य दृष्टत्वात् ज्ञानाज्ञानयोरपि स कल्प्यते ।

करणमात्राश्रयत्वात् अपरोक्षज्ञानस्यैव विषयव्यापारजन्यत्वेन विषयान्तःकरणोभयजन्यत्वेन तदुभयनिष्ठत्वात् । तदुक्तं—'परोक्षज्ञानतो नश्येदसत्त्वा वृत्तिहेतुता । अपरोक्षधिया नश्येदभाना वृत्तिहेतुता ॥' इति । तेनानुभानादावसत्त्वावरणनाशात् तत्र तद्व्यवहारः । अभानावरणनिवृत्त्या च सो-

---

आलोकमनोवृत्त्योरस्ति भातीतिव्यवहारप्रयोजकत्वरूपस्य प्रकाशत्वस्य तमोऽज्ञानयोर्नास्ति न भातीति व्यवहारप्रयोजकत्वस्य चाविशिष्टत्वात् । असत्त्वावृत्तिहेतुता नास्तीति व्यवहारप्रयोजिकाविद्या । अभानावृत्तिहेतुता न भातीति व्यवहारप्रयोजिकाविद्या । असत्त्वरूपायां सत्त्वविरोधिन्यां नास्तीति व्यवहाररूपायां वा वृत्तौ हेतुता यस्या इत्यादि व्युत्पत्तेः । व्यवहारः अस्तीति व्यवहारः । अत्रेदं विभावनीयम् । असत्त्वापादकाज्ञानस्यापि विषयावच्छिन्नाचिदाश्रयताकत्वम् । अन्यथा हूदो वह्निमानिति ज्ञानस्य हूदविशेष्यतावच्छिन्नवह्निप्रकारताकत्वं न स्यात् । हूदवह्निभ्यां ये चितस्तादात्म्ये तयोर्विशेष्यताप्रकारतारूपयोर्मिथोऽवच्छेद्यावच्छेदकभावस्य वाच्यत्वेन हूदचित्तादात्म्यावच्छेदेन चिति तादात्म्येन वह्न्युत्पत्तेरावश्यकत्वात् । न च तद्घटध्वंसवानयमित्यादौ भिन्नकालीनानां तद्घटध्वंसयोः चित्तात्म्यानां तद्घटात्यन्ताभाववदिदमित्यादौ तद्घटितदत्यन्ताभावयोः चित्तादात्म्यानां भिन्नदेशावच्छिन्नानां चावच्छेद्यावच्छेदकभाववत् मनोवच्छिन्नवह्निचित्तादात्म्यस्य हूदचित्तादात्म्येन भिन्नदेशेनावच्छिन्नत्वमिति वाच्यम् । यद्यप्यनिर्वचनीयवादे प्रतीत्यनुरोधे क्वचित्किञ्चिदनुपपन्नं स्वीक्रियते । तार्किकादिमते भिन्नकालीनयोर्विषयविषयित्वादिवत् । घटाभावादौ तदाधारत्वादिवच्च, तथाऽपि तत्परिहारसम्भवे तत्स्वीकारस्यान्याय्यत्वात् । अत एव परोक्षभ्रमस्यान्यथाख्यातित्ववादिनो निरस्ताः । विशेष्यतावच्छिन्नप्रकारत्वासम्भवात् । तस्माद्द्विविधमप्यज्ञानमुभयावच्छिन्नाश्रयताकं विषयावच्छिन्नाश्रयताकमेव वा । यथा हि 'आश्रयत्वविषयत्वभागिनी निर्विभागचितिरेव केवले'त्यनेन मूलाज्ञानाश्रयतानवच्छिन्नत्वेनोक्ता तथापि 'ब्रह्म न जानामी'त्यत्र प्रमातृविशेषनिरूपितत्वेनाज्ञानं भाति, तथा प्रमातृविशेषानाश्रितमप्यज्ञानं प्रमातृविशेषनिरूपितत्वेन 'घटमहं न जानामी'त्यादौ भाति, तत्पुरुषीयब्रह्मप्रमया पुरुषान्तरीयब्रह्माज्ञाननिवृत्त्या प्रमातृनिरूपितत्वसम्बन्धस्य मूलाज्ञाने क्लृप्तत्वेन पञ्चवाज्ञानेऽपि तस्यैव व्यवस्थापकतया कल्पनाया युक्तत्वात् । तथा चासत्त्वापादकाज्ञाननिवर्तकत्वं प्रमामात्रस्य तत्समा-

पाधिकसाक्षात्कारभ्रमनिवृत्तिरिति । तस्मान्निर्धर्मकस्याप्यात्मनोऽविद्ययान्तः करणतादात्म्याध्यासात् तद्धर्मकर्तृत्वभोक्तृत्वाद्यध्यास उपपद्यते । ननु त्वन्मतेऽनिर्वचनीयख्यात्यभ्युपगमात् ये कर्तृत्वादयोऽन्तःकरणधर्मा आत्मन्यध्यस्यन्ते ते अनिर्वचनीयास्तत्रोत्पद्यन्त इति वाच्यम् । तथा च व्यावहारिकप्रातीतिकभेदेन कर्तृत्वभोक्तृत्वादीनां द्वैधाऽवभासः स्यात् । न स्यात्तादात्म्याभिमानेनाविवेकात् । सकलधर्मविशिष्टस्यैवान्तःकरणस्यात्मन्य-

---

नविषयत्वेनैव अभानापादकाज्ञाननिवर्तकं तदवच्छेदकावच्छिन्नप्रमात्वेनेति तादृशप्रमाया विषयावच्छिन्नत्वं विषयेन्द्रियसन्निकर्षाद्यधीनं स्वीक्रियते । तदवच्छेदकावच्छिन्नत्वं प्रमायां स्वानवच्छेदकावच्छिन्नाज्ञानकत्वम् । तेन ब्रह्माज्ञाने स्वावच्छेदकाभावेऽपि न क्षतिः । नन्वास्ति भातीति व्यवहारप्रतिबन्धकत्वस्य नास्ति न भातीति व्यवहारजनकत्वस्य तदाश्रयानन्ताज्ञानानां कल्पनामपेक्ष्य सुखादिसाधारण्येन प्रमापरोक्ष एवास्ति भातीतिव्यवहारनियामकत्वम् । तद्विषयत्वयोरस्तित्वभानत्वरूपत्वादिति चेन्न । असत्त्वापादकाज्ञानशून्या चिदस्तित्वम् । अभानापादकाज्ञानशून्या चिद्भानं । असत्त्वाभाने ताद्दशाज्ञानाभ्यां विशिष्टचितौ । तथा च प्रमाकाले विषयसत्त्वात् अस्ति भातीतिव्यवहारेऽपि तदन्यकाले विषयासत्त्वादेव तदभावः । विषयासत्त्वादेव च नास्ति न भातीति व्यवहार इति मन्मते नाज्ञानस्य प्रतिबन्धकत्वं जनकत्वं च स्वीक्रियते । व्यवहार्यविधया व्यवहारे परं भानाभानसत्त्वासत्त्वानां प्रयोजकत्वम् । तच्च परैरपि वाच्यम् । अज्ञानाश्रयतायां देशेनेव कालेनाप्यवच्छिन्नत्वात् इदमिदानीमिह नास्तीत्यादिधीः । इदमिदानीमिहास्तीत्यत्राप्यस्तित्ववटककालज्ञाने कालाद्यवच्छिन्नाश्रयताकत्वधीः । अत्यन्ताभावस्येवाज्ञानस्यानादेरेऽप्याश्रयतायाः कालाद्यवच्छिन्नत्वमिति दिक् । तस्मात् अध्यासे दोषासम्भवात् । **व्यावहारिकेत्यादि** । व्यवहारिककर्तृत्वादेः मनसि स्वाभाविकधर्मत्वात् मनोनिष्ठं तद्व्यावहारिकम् । आत्मनि तस्यास्वाभाविकधर्मत्वात् गगननैल्यादिवत् प्रातीतिकमित्यर्थः । यद्यपि मनोनिष्ठस्यैव कर्तृत्वादेरात्मनि संसर्गमात्रमध्यस्यते न तु स्वरूपान्तरं, तथाप्यात्ममनस्संसृष्टाभ्यामेकस्यापि कर्तृत्वादेर्भेदस्वीकारमते समाधत्ते—**न स्यादिति** । तादात्म्याभिमानेन आत्ममनसोर्भेदाग्रहेण । अविवेकात् आत्ममनोधर्मयोर्भेदाग्रहात् । उक्तरूपाभ्यामेकमेव कर्तृत्वादिकं भाति । न तु तद्भिन्ने रूपे स्वीक्रियत इति मतमाश्रित्य समाधत्ते—**सकलेत्यादि** । वस्तुतः प्रातीतिकस्यात्मनि कर्तृत्वादिसंसर्गस्योत्पत्त्यस्वीकारान्न तद्विशिष्टरूपेण भेदप्रसक्तिः ।

व्यस्तत्वेन द्वयाभावाद्वा । तस्मादेकस्यात्मन उपाधिभेदेन प्रमात्रादिव्यवस्थोपपत्तेर्न सौगतमतापत्तिर्न वा विरोधः । अन्या अपि व्यवस्थाः स्पष्टतरमुपरिष्टादुपपादयिष्यन्ते । तस्मात् ज्ञानरूपस्यात्मनः सुषुप्तावव्यभिचारित्वादेहेन्द्रियादीनां च व्यभिचारित्वात् दृश्यत्वाच्च तत्र तत्रात्मबुद्धिस्तेषां तेषां वादिनां भ्रान्तिरित्यौपनिषदं मतं प्रामाणिकमिति सिद्धम् ॥ १ ॥

स्यादेतदात्मनो निर्धर्मकत्वे प्रमात्रादिव्यवहारस्याध्यासमूलत्वेन 'ब्राह्मणो यजेते'त्येवमादीनां शास्त्राणामप्रामाण्यप्रसङ्गः । अकर्तुरभोक्तुश्चात्मनः प्रवृत्त्यनुपपत्तेः । वेदाप्रामाण्ये कुतो ब्रह्मसिद्धिरपि । तस्य तन्मात्रगम्यत्वात् । शास्त्रयोनित्वादिति न्यायात् । तथा च वेदप्रामाण्यार्थं प्रमातृत्वादिव्यवहारस्य सत्यत्वमभ्युपेयमित्याशङ्क्य किं तत्त्वज्ञानात्पूर्वमप्रामाण्यमापाद्यते ऊर्ध्वं वा । तत्राद्ये सर्वेषां प्रमाणानामविद्यावद्विषयत्वेन तदशायां बाधा-

---

परं तु यदेव मनसस्तादात्म्यं स्वीक्रियते तदेव कर्तृत्वादेरप्यात्मनि धर्मितानियामकसम्बन्धः । धर्मधर्मिणोरपि तादात्म्यस्यैकस्यैव स्वीकारात् । अथवा कर्तृत्वादेर्यदेव मनसि आधारत्वं तदेवात्मन्यपि युगपदेवोभयत्र प्रतीयमानत्वात् उभयोरैक्यापन्नत्वाच्च । इदन्त्वादेराधारत्वं तु रजतप्रतीतिपूर्वमपि इदमादौ प्रतीयत इति इदमादिरजतयोर्नैकं तद्वक्तुं शक्यते । तस्य च तादात्म्यस्याधारत्वस्य वा व्यावहारिकमात्रत्वादात्ममनोऽनुयोगिकविशिष्टरूपाभ्यां कर्तृत्वादेर्भेदस्वीकारेऽपि तादात्म्याभिमानेनेत्यादिरीत्या न तदवभासः । प्रातीतिकरूपान्तरं तु कर्तृत्वादेर्न सम्भाव्यत इत्याशयेनाह—**सकलेत्यादि** । **आत्मनीति** । एकैकतादात्म्येनाधारत्वेन वेति शेषः । द्वयाभावात् कर्तृत्वादिव्यावहारिकप्रातीतिकभेदेन रूपद्वयाभावात् । सुषुप्त्येकसिद्ध इति पदव्याख्यानोपसंहारपूर्वकं श्लोकव्याख्यामुपसंहरति—**तस्मादित्यादि** ॥ ॥ १ ॥

द्वितीयं पद्यमवतारयति—**स्यादेतदिति** । यत् उक्तं तदास्तामित्यर्थः । प्रमात्रादीत्यादिपदेन ब्राह्मणादिसङ्ग्रहः । तस्य ब्रह्मणः । तन्मात्रगम्यत्वात् वेदमात्रगम्यत्वात् । ननु, कार्यत्वहेतुकसकर्तृकत्वानुमानेन ब्रह्मसिद्धिस्सम्भवतीत्यत आह—**शास्त्रेति** । ब्रह्म विचार्यमाणवेदान्तैकगम्यम् । वेदान्यमानगम्यत्वाभावात् सकर्तृकत्वानुमानस्याप्रयोजकत्वात् सत्यज्ञानानन्दशुद्धरूपेणानुमानाद्यगम्यत्वादिति सूत्रार्थः । अविद्यावद्विषयत्वेन अविद्याकालपरमार्थत्वेन गृह्यमाणप्रमेयकत्वेन ।

भावान्निष्प्रत्यूहं प्रामाण्यम् । द्वितीये त्विष्टापत्तिरेवेत्याह—

न वर्णा न वर्णाश्रमाचारधर्मा
न मे धारणाध्यानयोगादयोऽपि ।
अनात्माश्रयाहं ममाध्यासहाना-
त्तदेकोऽवशिष्टः शिवः केवलोऽहम् ॥२॥

वर्णाः ब्राह्मणत्वादयः । आश्रमाः ब्रह्मचर्यादयः । आचाराः स्नानशौचादयः । धर्माः ब्रह्मचर्यगुरुसेवादयः । अत्र द्वन्द्वद्वयगर्भषष्ठीतत्पुरुषेण वर्णानामाचारधर्माश्च आश्रमाणामप्याचारधर्माश्च लभ्यन्ते । धारणाब्रह्मणि बाह्यविषयत्यागेन मनसस्स्थैर्यम् । ध्यानं परमात्मचिन्तनम् । योगश्चित्तवृत्तिनिरोधः । आदिशब्देन श्रवणमननादयो गृह्यन्ते । सर्वेषां

तद्दशायां प्रमाविषयाणामबाध्यत्वग्रहदशायाम् । निष्प्रत्यूहमिति । दशायामित्यनेनानुषक्तेनान्वितं प्रामाण्यमबाध्यविषयकत्वम् । इष्टापत्तिरेवेत्यत्र पद्येनैव हेतुमाह—न वर्णा इत्यादि । योगादयोऽपीत्यपिशब्देन हेतुत्वमुच्यते । तथा च यतो मयि वर्णाद्यभावः, अतोऽद्वितीये इष्टापत्तिरित्यर्थः । वर्णाद्यभावे हानादित्यन्तं हेतुः । ननु, वर्णाश्रमेत्यादौ वर्णाश्रमयोराचारधर्मनिषेधे आश्रमनिषेधो न लभ्यते । तत्राह—द्वन्द्वेत्यादि । आश्रमाश्चाचारधर्माश्चेति द्वन्द्वोत्तरं षष्ठीतत्पुरुषेत्यर्थः । वर्णसम्बन्धिन आश्रमाचारादयो लभ्यन्ते । तेषां मध्ये आश्रमपुरस्कारेण विहिताचारधर्मा अपि लभ्यन्ते । वर्णसम्बन्धित्वादित्याशयेनाह—वर्णानामित्यादि । आश्रमाणामपीत्यादिशब्दादाश्रमा अपि लभ्यन्त इत्यर्थः । लभ्यन्ते निषेध्यत्वेन ज्ञायन्ते । द्वन्द्वद्वयेति पाठे तु धर्मपदेनैवाश्रमा ग्राह्याः । तेषामपि वर्णधर्मत्वसम्भवात् । धारणाध्यानशब्दयोर्बाह्यविषयसाधारण्ये न धारणादिबोधकत्वसम्भवेऽपि प्रकृतपद्यस्य तत्त्वनिष्ठपुरुषकर्तृकत्वेनात्मधारणाध्यानयोरेव उक्तपुरुषे प्रसक्तेः तत्पुरुषत्वमेवाह—धारणेत्यादि । आत्म-

ज्ञानोत्तरकाले असत्त्वे हेतुमाह—अनात्माश्रयाहंममाध्यासहानादिति । अनात्मा आत्मविरोधिनी अविद्या तदाश्रयस्तदुपादानो योऽहङ्काराहंममकाराध्यासस्तस्य मूलस्यापि तत्त्वज्ञानेन हानात् तत्प्रयुक्तवर्णाश्रमादिव्यवहारो नास्तीत्यर्थः ॥ २ ॥

वर्णाश्रमादिव्यवहारस्य मिथ्याज्ञानमात्रमूलत्वेन मिथ्यात्वं द्रढयितुं तद्व्यतिरेके सुषुप्तौ तद्व्यतिरेकमाह—

न माता पिता वा न देवा न लोका
न वेदा न यज्ञा नतीर्थं ब्रुवन्ति ।
सुषुप्तौ, निरस्तातिशून्यात्मकत्वा-
त्तदेकोऽवशिष्टः शिवः केवलोहम् ॥३॥

माता जनकस्त्री । पिता जनकः पुमान् । देवा इन्द्रादयः आराध्याः । लोकास्तदाराधनफलानि स्वर्गादीनि । वेदाः अलौकिकहिताहितसाधनताप्रतिपादकानि ब्रह्मप्रतिपादकानि च प्रमाणवाक्यानि । यज्ञाः स्वर्गादिसाधनीभूता ज्योतिष्टोमादयः । तीर्थं यज्ञसाधनीभूतः कुरुक्षेत्रादिदेशः । एवं पापकर्मसाधनान्यप्युपलक्षणीयानि । सर्वेषां देहाभिमानमूलकत्वात् तदभावे

विरोधिनी पूर्णानन्दोऽहमित्यादिव्यवहारविरोधिनी ॥२॥

तृतीयपद्यमवतारयति—**वर्णेत्यादि** । व्यवहारस्याभिलापप्रवृत्त्यादेः मिथ्याज्ञानमूलकत्वेन अहं ब्राह्मण इत्यादिभ्रमनिमित्तकत्वेन । मिथ्यात्वं मिथ्याविषयकत्वम् । तद्व्यतिरेके मिथ्याज्ञानव्यतिरेके सति । तद्व्यतिरेकं वर्णाश्रमादिव्यवहारव्यतिरेकम् । **न मातेत्यादि** । पूर्वपद्यात् मे इत्यस्यानुषङ्गात् । न मे मातेत्यादिसुषुप्तौ न ब्रुवन्ति । तत्तस्मादेकोऽहमित्यर्थः । ननु, देहादिव्यवहारस्य कथं देहाभिमानमूलकत्वम् । तत्राह — सर्वेषामिति । मत्सेव्यत्वादिरूपममत्वाध्यासविशिष्टानां सर्वेषामित्यर्थः । स्वतो देहाभिमानं विना । सम्बन्धाभावात् ममत्वाध्याससम्बन्धाभावात् । अविद्यमानता ममत्वविशिष्टरूपेण व्यवहारस्य सामान्यस्याभावो युक्त इति भावः । वस्तुतस्तु वर्णाश्रमादिव्यवहारस्य मिथ्याज्ञानमूलकत्वेनेति विवरणादिव्यवहारस्य

स्वतस्सम्बन्धाभावादविद्यमानतेत्यर्थः । तथा च सुषुप्तिं प्रकृत्य श्रुतिः— अत्र पिताऽपिता भवति माताऽमाता देवा अदेवा वेदा अवेदा यज्ञा अयज्ञास्तेनोऽस्तेनो भवति भ्रूणहाऽभ्रूणहा चाण्डालोऽचाण्डालः पौल्कसोऽपौल्कसश्श्रमणोऽश्रमणस्तापसोऽतापसोऽनन्वागतं पुण्येनानन्वागतं पापेन तीर्णो हि तदा सर्वाँच्छोकान् हृदयस्य भवती'त्याद्या अभिमानाभावे सर्वानर्थनिवृत्तिमनुवदन्ति । ननु, सर्वव्यवहाराभावे शून्यतैव स्यात् । नेत्याह—निरस्तातिशून्यात्मकत्वादिति । निरस्तम् अतिशून्यात्मकत्वं यस्मात्तत्तथा । भावप्रधानो निर्देशः । तस्य सुषुप्तिसाधकत्वात्पुनरुत्थानानुपपत्तेश्च 'अविनाशी वा अरे अयमात्माऽनुच्छित्तिधर्मा मात्रासंसर्गस्त्वस्य भवति यद्वैतन्न पश्यति पश्यन्वैतन्न पश्यति । न हि द्रष्टुर्दृष्टेर्विपरिलोपो विद्यते अविनाशित्वात् न तु तद्द्वितीयमस्ति । ततोऽन्यद्विभक्तं यत्पश्येदि'त्यादिश्रुतिभ्यश्चात्मचैतन्यस्य न सुषुप्तौ शून्यतेत्यर्थः । निराकृतमप्येतत्पुनरपि स्थूणानिखनन्यायेन निराक्रियते । यद्वा निरस्तमशनायाद्यतीतम् अद्वितीयमतिशून्यं यद्ब्रह्म तदात्मकत्वात् । तथा च श्रुतिः—'यदा वै पुरुषः स्वपिति नाम सता सोम्य

सर्वस्य मनोऽवच्छिन्नचिन्निष्ठत्वेन अहमितिमिथ्याज्ञानमूलत्वेनेत्यर्थः । एवं च मे इत्यस्याननुषङ्गेऽपि न क्षतिः । सर्वेषामित्यादि । सर्वव्यवहाराणाम् अहङ्काराध्यासमूलकत्वादित्यर्थः । तदभावे अहङ्काराध्यासाभावेऽतः अहङ्कारानवच्छिन्नचितिसम्बन्धाभावात् सर्वव्यवहारसम्बन्धाभावात् । अत्र सुषुप्तौ । अपिता ममत्वविशिष्टपितृत्वादिरूपेणाव्यवहार्यः । एवमग्रेऽपि । चाण्डालो ब्राह्मण्यां शूद्रेणोत्पन्नः । पौल्कसः क्षत्रियायां जातः । श्रमणः परिव्राट् । पुण्यपापयोर्व्यवहारहेतूत्पादकत्वात् उपाधिप्रयुक्तभेदस्य मिथ्यात्वेन तच्छून्यत्वाद्व्यवहाराभाव इत्याह—अनन्वागतं पुण्येनेति । सुषुप्तौ पुण्येनानन्वागमः असम्बन्धो जीवेष्वित्यर्थः । अत्र हेतुमाह—तीर्णो हीत्यादि । तदा सुषुप्तिकाले । शोकान् व्यवहारविषयतत्साधनीभूतार्थान् संस्कारान्यकार्यरूपार्थानिति यावत् । धर्मिणो हेतुत्वास्वीकारमते धर्मस्य हेतुत्वलाभायाह—भावप्रधान इति । शून्यात्मकतानिरासे हेतुमाह—सुषुप्तीत्यादि । मात्रासंसर्गः स्थूलकार्यासम्बन्धः।अस्य सुषुप्तात्मनः । यद्वा इत्यादि । तत् तदा सुषुप्तिकाले । पश्यति नेति । यद्वै प्रसिद्धं पश्यन् चाक्षुषवृत्त्युपलक्षितचिद्रूपेण प्रकाशान एव तादृशचाक्षुषवृत्त्यभाववान् । उक्तप्रकाशमानत्वे हेतुमाह—न हीत्यादि । उक्ताभावहेतुत्वे मानमाह—न तु तदित्यादि । ततश्चिद्रूपात् विभक्तं स्थूलरूपापत्तिप्रयुक्तभेदविशिष्टम् । तत् तदा न त्वस्ति । यदित्यव्ययम् । येनेत्यर्थः ।

तदा सम्पन्नो भवति' 'तद्यथा प्रियया स्त्रिया सम्परिष्वक्तो न बाह्यं किञ्चन वेद नान्तर'मिति । तेन जगत्कारणीभूतसर्वज्ञसर्वशक्तिपरिपूर्णानन्दबोधरूपेण ब्रह्मणा सहैकत्वादसंसार्येव जीव इति सिद्धम् ॥ ३ ॥

एवं तावत् त्रिभिः श्लोकैः वादिविप्रतिपत्तिनिराकरणपूर्वकं त्वम्पदार्थो निर्धारितः । सम्प्रति तत्पदार्थस्तथैव निर्धारणीयः । तत्र निराकार्या वादिविप्रतिपत्तयः प्रदर्श्यन्ते । ननु न ब्रह्मणा सह जीवस्यैक्यमुपपद्यते। तथा हि सच्छब्दवाच्यं जगत्कारणं ब्रह्म 'सदेव सोम्येदमग्र आसीदि'त्यादिवाक्येन प्रतिपादितम् । जगत्कारणं च प्रधानमचेतनमिति साङ्ख्याः । पशुपतिरेव जगत्कारणम्, स च चेतनोऽपि जीवाद्भिन्नस्तमेवोपास्य एवेति पाशुपताः । भगवान्वासुदेव ईश्वरो जगत्कारणम् । तस्मादुत्पद्यते सङ्कर्षणाख्यो जीवः । तस्मान्मनः प्रद्युम्नः । ततोऽहङ्कारोऽनिरुद्धः । तेन कार्यत्वाज्जीवस्य तेन सह ब्रह्मणो वासुदेवस्यात्यन्तभेद इति पाञ्चरात्रिकाः । परिणामिनित्यः सर्वज्ञो भिन्नाभिन्न इति जैनाः लिदण्डिनश्च । नास्ति स-

---

उत्तरवाक्यस्थो यच्छब्दो न तच्छब्दापेक्षः । स्वपिति सुषुप्तः । सता ब्रह्मणा सम्पन्नः एकीभूतः । मनआद्यभिमानप्रयुक्तभेदशून्य इति यावत् । प्राज्ञेन ब्रह्मणा सम्परिष्वक्तः उक्तभेदशून्यः । एकत्वादुपाधिप्रयुक्तभेदस्य मिथ्यात्वेन तच्छून्यत्वात् ॥ ३ ॥

चतुर्थपद्यमवतारयति—**ननु न ब्रह्मणेत्यादि** । प्रधानं साम्यावस्थापन्नं सत्त्वादिगुणत्रयम् । पृथिव्यादिकार्यं सुखदुःखमोहात्मकम् । पुरुषविशेषान्प्रति तथा भासमानत्वात् । तथा च सुखादिपरिणामयोग्यं गुणत्रयं पृथिव्याद्युपादानं कल्प्यते । न तु ब्रह्म । तस्यापरिणामित्वात् एकस्वभावस्य त्रिविधस्वभावकार्यजनकत्वानुपपत्तेरिति भावः । जीवः सर्वजीवाभिमानी । मनः सर्वमनोऽभिमानी । अहङ्कारः सर्वाहङ्काराभिमानी । तेन ब्रह्मणा जीवादिरूपजगत्कारणत्वेनात्यन्ताभेद इति । भेदाभेदौ तु कालभेदेन स्तः । यदाहुः—आमुक्तेर्भेद एव स्याज्जीवस्य च परस्य च । मुक्तस्य तु न भेदोऽस्ति भेदहेतोरभावतः ॥' इति । परिणामिनित्यः । अन्यथान्यथा च परिणममानोऽपि अनुच्छिन्नस्वभावो जगतः ब्रह्मपरिणामत्वादेव सत्यत्वम् । कारणसमानसत्ताकं कार्यं तात्त्विकोऽन्यथाभावो वा परिणाम इति लक्षणात् । भिन्नाभिन्न इति । जीवेन जगता च सह तस्य भेदाभेदौ । तथा चाभेदमादाय 'तत्त्वमसि इदं सर्वं यदयमात्मा' इत्यादिश्रुतयः भेदमादाय 'यो विज्ञाने ति-

वेज्ञत्वाद्युपेतं ब्रह्म । आम्नायस्य क्रियार्थपरत्वेन तत्र तात्पर्याभावात् । किं तु वाग्धेन्वादिवत्सर्वज्ञत्वादिदृष्ट्या जगत्कारणं परमाण्वादि जीवो वा उपास्य इति मीमांसकाः । अस्ति नित्यज्ञानादिमानीश्वरः सर्वज्ञः पृथिव्यादिकार्यलिङ्गानुमितः । स च जीवाद्भिन्न एवेति तार्किकाः । क्षणिकस्सर्वज्ञ इति सौगताः । क्लेशकर्मविपाकाशयैरपरामृष्टो नित्यज्ञानरूपः प्रधानांशसत्त्वगुणप्रतिफलिततया सर्वज्ञः संसारिविलक्षण एवेति पातञ्जलाः । अद्वितीयपरमानन्द एव ब्रह्म । तच्च जीवस्य वास्तवं स्वरूपं मायया च सर्वज्ञत्वा-

---

ष्ठन् यः पृथिव्यां तिष्ठन्' इत्यादिश्रुतयः प्रवर्तन्ते । तत्त्वज्ञानकर्मभ्यां भेदस्य लिङ्गशरीरस्य च निवृत्तिर्मोक्ष इति भावः । **सर्वज्ञत्वादीति** । सर्वज्ञत्वजगत्कारणत्वादीत्यर्थः । आम्नायस्य यतो वेत्यादिश्रुतेः । क्रियार्थपरत्वेन उपासनाविधिपरत्वेन । तत्र सर्वज्ञत्वादिमति । तात्पर्याभावात् अवान्तरतात्पर्यस्याभावात् । वाग्धेन्वादिवत् धेन्वादिदृष्ट्या वागादिरिव । जगत्कारणं सर्वकार्यप्रयोजकम्। अथ परमाण्वादौ ज्ञानं तत्र सर्वविषयत्वमित्यारोपद्वये गौरवादाह—**जीवो वेति**। जगत्कारणमित्यनुषज्यते । अदृष्टजननद्वारा जगत्प्रयोजक इत्यर्थः । **उपास्य इति** । तथा च 'यतो वेत्यादिश्रुतेः यतः परमाण्वदृष्टादेर्जीवाद्वा जगदुत्पत्त्यादिकं, तत् सर्वज्ञत्वादिदृष्ट्या उपासीतेत्यर्थ इति भावः।**अस्तीत्यादि**। आद्यकार्यं स्वोपादानादिविषयकापरोक्षज्ञानेच्छाकृतिमज्ज्ञन्यम् । कार्यत्वात् । घटवत् । इत्यनुमानात् ज्ञानादेर्नित्यत्वे ज्ञानादिमत एकत्वनित्यत्वयोश्च लाघवमिति धीसहकृतादीश्वरसिद्धिरित्यर्थः। **जीवाद्भिन्न इति** । जीवस्य परमाण्वादिप्रत्यक्षासम्भवेन तादृशज्ञानादिमतो न जीवत्वमिति भावः। **क्षणिक इत्यादि** । जगत्सर्वं क्षणिकं दुःखं मिथ्येत्याकारकं रागद्वेषाद्यनुपरक्तं सर्वविषयकं यत् क्षणिकं ज्ञानं तत्प्रवाहरूपमित्यर्थः । जीवात्मकज्ञानप्रवाहहेतुज्ञानं क्षणिकमपि न तादृशमिति भावः । **क्लेशेत्यादि** : अविद्यास्मितारागद्वेषाभिनिवेशाः क्लेशाः । अनित्याशुचिदुःखानात्मसु नित्यशुचिसुखात्मख्यातिरविद्या । दृग्दर्शनशक्त्योरेकात्मतैवास्मिता । आत्मबुद्ध्योर्भेदाग्रहोऽस्मितेत्यर्थः । कर्म पुण्यपापे । विपाकः कर्मफलम् । जन्मायुर्भोगाः । आशया वासनाः । अपरामृष्टः अव्यवह्रियमाणः । जीवस्तु निर्लेपत्वेन तैश्शून्योऽपि तदाश्रयबुद्ध्या विवेकेनागृह्यमाणत्वात् तद्विशिष्टरूपेण व्यवह्रियमाणः । ज्ञानरूपः नित्यचिद्रूपः । प्रधानांशसत्त्वगुणप्रतिफलिततया प्रधाने तदंशेषु तत्कार्येषु त्रिगुणात्मकेषु सत्त्वांशे

दिविशिष्टं जगत उपादानं निमित्तं चेति औपनिषदाः । एवं वादिविप्रतिपत्तिभिः सन्दिग्धे तत्पदार्थे औपनिषदपक्षस्य परिशेषेण तन्निर्णयायाह भगवान्—

न साङ्ख्यं न शैवं न तत्पाञ्चरात्रं
न जैनं न मीमांसकादेर्मतं वा ।
विशिष्टानुभूत्या विशुद्धात्मकत्वा-
त्तदेकोऽवशिष्टश्शिवः केवलोऽहम् ॥ ४ ॥

आदिशब्देनानुक्तानां सङ्ग्रहः । न तावदचेतनं जगदुपादानम् । 'तदैक्षत बहु स्यां प्रजायेये'ति ईक्षणपूर्वकसृष्टिश्रवणात् । 'अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणीति च जीवात्मत्वव्यपदेशात् 'यस्मिन्विज्ञाते सर्वमिदं विज्ञातं भवती'ति चैकविज्ञानेन सर्वविज्ञानप्रतिज्ञानात् प्रधानज्ञानेन च तदप्रकृतिकानां पुरुषाणां ज्ञातुमशक्यत्वात् ऐतदात्म्यमिदं सर्वं तत्सत्यं स आत्मा तत्त्वमसीति च तदभेदस्य नवकृत्व उपदेशात् तस्माद्वा एतस्मादात्मन आकाशस्सम्भूत इति च श्रुत्यन्तरादचेतनस्य जगत्कारणत्वे विचित्ररचनानुपपत्तेः प्रधानमहदादेरप्रामाणिकत्वाच्च न साङ्ख्यमतं साधु ।

प्रतिबिम्बिततया । व्याकरवाणीति चेति । ब्रह्मण इति शेषः । यस्मिन्विज्ञात इत्यादि । यस्मिन् ज्ञाते सर्वं ज्ञातं भवति, तद्ब्रह्मेत्येव प्रतिज्ञानादित्यर्थः । सर्वेषां दृश्यानां ब्रह्मैव स्वरूपम् । तस्यैव हि अतात्त्विकोऽन्यथाभावः प्रपञ्चः । अतः तस्य ज्ञानं सर्वस्य स्वरूपज्ञानमिति भावः । ननु, प्रधानस्य प्रपञ्चप्रकृतित्वेन प्रपञ्चाभिन्नत्वात् प्रधानज्ञानं प्रपञ्चाभिन्नस्वरूपज्ञानम् । तत्राह—प्रधानज्ञानेनेति । अशक्यत्वादिति । तथा च सर्वपदसङ्कोचापत्त्या नोक्तरूपश्रुत्यर्थ इति भावः । विचित्रेति । यद्यत् विचित्रकार्यं तच्चेतनकर्तृकम् । यथा घटरथादिकम् । विचित्रत्वं प्रकृते सावयवत्वम् । वायुक्रियादेश्चेतनाकर्तृकत्वेन निश्चयात् तद्विशेषणम् । प्रधानमहदादेः ईश्वरानधिष्ठितस्य साङ्ख्याभिमतप्रधानादेः । पुराणभारतादावुक्तं प्रधानादिकं त्वीश्वराधिष्ठितं मिथ्याभूतं श्रुत्यादिसिद्धत्वात् प्रामाणिकमेव । 'मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्व-

एवं पाशुपतमतं पाञ्चरात्रिकं जैनं च मतं श्रुतियुक्तिबाधितत्वादयुक्तम् । न च विधिशेषत्वाच्छ्रुतिर्न ब्रह्म प्रतिपादयतीति मीमांसकमतं युक्तम् । असिद्धत्वाद्विधिशेषत्वस्य । न चार्थवादाधिकरणन्यायाद्विधिशेषत्वम् । वैषम्यात् । स्वतःप्रयोजनवदर्थाप्रतिपादकानां 'वायुर्वै क्षेपिष्ठा देवते' त्येवमादीनां स्वाध्यायविधिग्रहणान्यथानुपपत्त्या प्रयोजनवदर्थपरत्वे कल्पनीये शब्दभावनेतिकर्तव्यतांशसाकांक्षस्य विधेः सम्प्रदानभूतदेवतादिस्तुतिद्वारेण तदंशपूरकत्वान्न-

---

रम् । तदैक्षत बहुस्यां प्रजायेयेति । सोऽकामयते'त्यादिश्रुत्युक्तमायेक्षणकामानामीश्वरीयाणां प्रधानमहदहङ्कारशब्दैः पुराणादावुक्तत्वात् अपञ्चीकृतभूतानामेव तन्मात्रत्वेनोक्तत्वाच्च । महदादेरित्यादिपदेन पृथिव्यादीनां सुखाद्यात्मकत्वेन हेतुना सुखादिपरिणामयोग्यस्य त्रिगुणात्मककारणस्यानुमानमप्यप्रामाणिकम् । हेत्वसिद्धेः । आन्तरं हि सुखादिकं न पृथिव्यादिरूपम् । **एवमित्यादि** । पाशुपतमतं तत्त्वमस्यादिश्रुत्या औपाधिकभेदेन व्यवहारभेदासिद्धेः वास्तवभेदो व्यर्थ इत्यादियुक्त्या च बाधितम् । पाञ्चरात्रमतेऽपि जीवानां जन्मादिकं 'अजो नित्य' इत्यादिश्रुत्या कृतहानाकृताभ्यागमप्रसङ्गादियुक्त्या च बाधितम् । जैनत्रिदण्डिनोर्मतं 'कूटस्थमक्षरं तद्वेतदक्षर'मित्यादिश्रुत्या परिणामित्वे जन्मनाशाद्यापत्तियुक्त्या च बाधितमित्यर्थः । साङ्ख्यादिमतेषु श्रुत्यादिबाधितत्वोक्त्या मीमांसकमतेऽपि तदुक्तमेव । तथापि तत्राधिकांशमाशङ्क्य निषेधति—**न चेत्यादि** । तत्त्वमस्यादिश्रुतिः विहितक्रियाकर्तुस्तुतिपरत्वात् न ब्रह्मजीवैक्यपरेत्यर्थः । असिद्धत्वात् तत्त्वमस्यादिश्रुत्यवृत्तित्वात् । विधिशेषत्वस्य विहितक्रियाकर्तृस्तुतिपरत्वस्य । स्वतः विधिवाक्यैकवाक्यतां विना । **प्रयोजनवदर्थेति** । पुरुषाभिलषितस्वर्गादिसंसृष्टार्थेत्यर्थः । **स्वाध्यायविधिग्रहणेति** । 'स्वाध्यायोऽध्येतव्य' इति प्रयोजनवदर्थज्ञानमुद्दिश्य स्ववेदाध्ययनस्य विधायकं यद्वाक्यं तद्विषयत्वेत्यर्थः । **शब्दभावनेतिकर्तव्यतांशसाकांक्षस्येति** । अंशत्रयविशिष्टार्थभावनारूपसाध्यस्य विधिपदे शब्दभावनावाचकत्वधीरूपस्य साधनस्य च लब्धत्वेन साध्यसाधननिराकांक्षशब्दभावनाया इतिकर्तव्यतासाकांक्षत्वात् अबोधकत्वेन तत्साकांक्षस्येत्यर्थः । विधेः विधिवाक्यस्य । विहितार्थे पुरुषं प्रवर्तयन्ती प्रवर्तनारूपा शब्दभावना पुरुषस्य प्राशस्त्यधीरूपां स्वस्येतिकर्तव्यतां आकांक्षत इति भावः । **सम्प्रदानभूतदेवतास्तुतिद्वारेणेति** । त्यागकालोच्चार्यमाणचतुर्थ्यन्तपदार्थस्य प्रजननद्वारेत्यर्थः । तदंशपूरकत्वात् शब्दभावनायामुक्तधीरूपेतिकर्तव्यताय

बोधकत्वात् । अर्थवादानां प्रयोजनवदर्थवत्त्वस्य आवश्यकत्वात् विधिवाक्यापेक्षित-प्राशस्त्ये लक्षणास्वीकारात् प्रयोजनवद्देवताप्राशस्त्यादिबोधनद्वारा तत्र प्राशस्त्यादि-बोधकत्वं प्रशस्तदेवताकत्वात् प्रशस्तं कर्मेतिबोधोत्पत्त्या तादृशबोधस्यशब्दभावनायां अन्वयबोधकत्वमिति समुदितोऽर्थः। ननु शाब्दभावनायामितिकर्तव्यतात्वेन प्राशस्त्य-ज्ञानस्यान्वयबोध इति यदुक्तं, तन्न युक्तम् । प्रवृत्तिभावनात्वेन रूपेणाख्याता-दुपस्थापितशब्दभावना नेतिकर्तव्यतामाकांक्षते । कर्तव्यत्वेनावगतस्य व्यापारस्यैव तथात्वात् । अत एव पचतीत्यादौ नार्थभावनापीतिकर्तव्यतापेक्षा । शब्दभावनावत्त्वेन तस्य कर्तव्यत्वज्ञानात्। अत एव अध्ययनविधिकरुप्ये लिङ् पुरुषं प्रवर्तयेदिति विधौ लिङ्निष्ठव्यापारस्य शब्दभावनारूपस्य शब्दभावनान्तरविषयत्वेन ज्ञेयत्वात् कर्तव्य-त्वेन ज्ञानादितिकर्तव्यतात्वेन तत्र न प्राशस्त्यज्ञानस्यान्वयः । तत्रापि पदसा-धुत्वेन अर्थवादानां विनियोगः । किं च स्वर्गकामो यजेतेत्यादौ प्राशस्त्यज्ञान-स्य लिङादिपदशक्तिज्ञानस्य पदानुपस्थितस्य कथं शब्दभावनायामितिकर्तव्य-तात्वेन करणत्वेन चान्वय इति चेदत्रोच्यते । प्रवृत्तिभावनात्वेनेत्यादिकं यदुक्तं, तत्किं वार्तिकादिमूलग्रन्थमूलकं, युक्तिमात्रमूलकं वा । नान्त्यः । भावनात्वेन रूपे-णाख्यातोपस्थाप्यस्य शब्दभावनान्वयेऽपि तुल्यत्वेनांशत्रयाकांक्षाया युक्तिसिद्ध-त्वात् । न च प्रवर्तनात्वेनोपस्थितभावनायाः प्रवृत्तिभवनानुकूलव्यापारत्वरूपप्रव-र्तनात्वस्य ज्ञातत्वेन न भाव्याकांक्षेति वाच्यम् । प्रवृत्तिमात्रस्य भाव्यत्वेनान्विते पुरुषार्थविशेषरूपभाव्यादिविशेषितरूपेण प्रवृत्तेर्भाव्यतयाकांक्षासम्भवात् । विध्य-र्थं प्रवर्तयतीति । तथा च भावनाया भवितरीव करणेऽप्याकांक्षायास्त्वारसिकत्वात् करणविशेषस्य उपकारकविशेषसाकांक्षत्वादितिकर्तव्यताकांक्षायाः पचतीत्यादावपि आवश्यकत्वात् तस्याः कर्तृत्वेन धीर्न प्रयोजिका । अत एव भावार्थाधिकरणे 'अस्त्यादावपि कर्त्रंशे भाव्येऽस्त्येव हि भावना ।' इत्यादिवार्तिकग्रन्थे 'पटो भविष्यती-त्यादावपि भावना प्रतीयते । तस्याश्चांशत्रयं भवनेनैव प्रपूर्यते । घटस्य भवनं भा-व्यं, कपालस्य तत्करणत्वं, कपालावयवस्य तदितिकर्तृतात्व'मित्युक्तम् । न्यायसु-धायां च 'अंशत्रयं विना भावनाया नैराकांक्ष्याभावात् भवनेनैव तत्पूर्यत' इत्युक्तम् । नाद्यः । अर्थवादाधिकरणीयवार्तिकादौ भवत्प्रतिकूलस्यैवोक्तत्वात् । तथा हि—तेन सर्वेषां मन्त्रादीनां भावनान्तर्गतिरुपपन्ना । यत्तु अर्थवादानां भावनांशत्रयानन्तः-पातित्वात् अग्रहणमित्युक्तम्, अत्रोच्यते । सत्यमनन्तर्गतं न गृह्यते । अस्ति त्व-

न्तर्गतिः कथं लिङादियुक्तेषु वाक्येषु, द्वे भावने प्रतीयेते । तत्रार्थात्मिकयार्थवादा न गृह्यन्ते । शब्दात्मिकया तु ग्रहीष्यन्ते । सा ह्येवं प्रवर्तते । लिङ् पुरुषं प्रवर्तयेदिति । केनेत्यपेक्षायां प्रेरणाज्ञानेन प्रेरणायां लिङ्पदशक्तिज्ञानं वा कथमिति प्राशस्त्यज्ञानोपकृतेन तेनैव प्राशस्त्यज्ञाने साधनापेक्षायां अर्थवादेनेतिधीः। कुत एतत् बुद्धिपूर्वकारिणो हि यावत् प्रशस्तोऽयमिति नावबुध्यन्ते, तावत् न प्रवर्तन्त इति न्यायसुधानुसारिणी तत्र व्याख्या । भावनान्तर्गतिः भावनापेक्षितांशत्रयसमर्थत्वम् । अनन्तःपातित्वात् अनन्तःपातिप्राशस्त्यबोधकत्वात् । अग्रहणं विधिवाक्यैकवाक्यत्वाभावः । अनन्तर्गतं भावनांशत्रयानन्तर्गतबोधकम् । न गृह्यते न विधिवाक्यैकवाक्यतापन्नम् । अन्तर्गतिः अर्थवादानां भावनांशत्रयान्तर्गतबोधकत्वम्। लिङादीति । लिङ्लोटावित्यर्थः । तत्र लिङादियुक्तसर्ववाक्यप्रतीयमानभावनयोर्मध्ये । अर्थात्मिकया पुरुषनिष्ठभावनासामान्येन । शब्दात्मिकया लिङादिनिष्ठभावनासामान्येन। ग्रहीष्यन्ते स्वांशबोधकतया अपेक्षिष्यन्ते । अर्थयते कामयते फलमित्यर्थः पुरुषः, तदात्मिका भावना । भट्टमते धर्मधर्मिणोः समवायास्वीकारेण तादात्म्यस्वीकारात् । एवं शब्दात्मिका लिङ्शब्दधर्मत्वात् । अर्थवादानां तादृशापेक्षणीयत्वे अध्ययनविधिना शब्दभावनांशप्राशस्त्यज्ञाने साधनतया विनियुक्तत्वं हेतुमाह—सा हीत्यादि। सा शब्दभावनामात्रम् । हि यस्मादेव प्रवर्तते वक्ष्यमाणरीत्या अर्थवादसाधितप्राशस्त्यज्ञानरूपेतिकर्तव्यताविशिष्टरूपेण प्रेरणाविषयत्वेन कर्तव्यताया अध्ययनविधिकल्प्यविधिना ज्ञायते । कुत एतदिति । न शब्दभावनायामितिकर्तव्यताकांक्षा । तदविषयत्वेन करणेतिकर्तव्यताविशिष्टार्थभावनयैव प्रवृत्तिसिद्धेः । अथवा भावनान्तरदृष्टान्तेन तस्या अपि सा । तथापि प्रेरणाज्ञानं करणं, प्रेरणाशक्तिज्ञानमितिकर्तव्यतास्त्विति । तावत् न प्रवर्तन्त इति । तथाचोक्तविधिना कर्तव्यत्वेन ज्ञायमानासु करणेतिकर्तव्यताविशिष्टसर्वशब्दभावनासु करणांशेन साधनाकांक्षायां लिङादिपदस्येतिकर्तव्यांशेन साधनाकांक्षायामर्थवादमात्रस्य विनियोगात् सर्वेषु विधिवाक्येषु सर्वशब्दभावनान्वितं प्राशस्त्यज्ञानम् अर्थवादेन कर्तव्यमिति भावः । एवं च फलस्याविधेयत्वेन साधनेतिकर्तव्यताविशिष्टार्थभावनायामेव विध्यन्वयात् अनुष्ठेयत्वेन प्राशस्त्यज्ञानापेक्षणात् तस्यामेव अर्थवादेन प्रथमं प्राशस्त्यान्वयधीः । ततः पदानुपस्थितायास्तस्याः वाक्यार्थबोधे भानासम्भवादर्थवादस्यैव ज्ञाने लक्षणास्वीकारात् प्राशस्त्यान्वितायाः तादृशभावनायाः अर्थवादार्थ-

ज्ञाने विषयितासम्बन्धेनान्वयात् तादृशभावनाविशेष्यकप्राशस्त्यप्रकारकज्ञानस्य लाभः । नीलस्य वस्त्रविशिष्टचैत्रस्य ज्ञानमित्यादौ वस्त्रविशिष्टचैत्रविशेष्यकनीलप्रकारकज्ञानलाभवत्तस्य ज्ञानस्येतिकर्तव्यतात्वेन प्रेरणायामन्वयः । एवमर्थस्य लिङादेर्वा लाक्षणिकार्थज्ञाने लिङाद्यर्थप्रेरणार्थान्वयात् प्रेरणाज्ञानस्य करणत्वेन तस्यामन्वयः । प्रेरणाशक्तत्वज्ञानस्य करणत्वपक्षे तु प्रेरणायास्तच्छक्तिविषयकत्वसम्बन्धेन ज्ञानेऽन्वयः । अन्यथा शक्त्यंशे लक्षणापत्तेः । गीताटिप्पण्यां तु पदानुपस्थितस्यापि ज्ञानादेर्वाक्यार्थस्य भानमध्ययनविधिगृहीततात्पर्यानुरोधात् । उक्तं हि वार्तिके उद्भिदधिकरणे—'पदानुपस्थितस्यापि नामधेयस्यान्वयधीरनुपस्थितविशेषणविशिष्टधीः न जायते । नत्वनभिहितविशेषणेत्युक्तम् । ननु, प्राशस्त्यज्ञानस्य नेतिकर्तव्यतात्वेन यजेतेत्यादौ प्रेरणास्वन्वयः । किं तु जनकत्वेनार्थभावनायाम् । जनकत्वेन तद्विशिष्टप्रेरणायां जनकत्वसम्भवात् । गुणवादस्त्विति सूत्रस्थवार्तिके आलभेत प्रशस्तत्वादित्यन्वयधीप्रकारस्य दर्शितत्वादिति चेन्न । तत्र हि वार्तिके पञ्चम्या न जनकत्वमर्थः । 'सत्यमनन्तर्गतं न गृह्यते । अस्ति त्वान्तर्गति'रित्याद्युक्तवार्तिके भावनांशप्रतिपादकत्वेनैवार्थवादानां प्रामाण्योक्तेः विध्यर्थवादद्दूषणवार्तिकानां प्रशस्तत्वादित्यस्य शब्दभावनेतिकर्तव्यतापरत्वस्य दर्शितत्वात् कुतएतदित्युक्तवार्तिकव्याख्याने हेत्वधिकरणीये याप्यर्थवादाकांक्षेत्यादिवार्तिकव्याख्याने च न्यायसुधायामितिकर्तव्यतात्वेनान्वयस्य स्पष्टमुक्तत्वाच्च । किं तु प्राशस्त्यज्ञानज्ञाप्यत्वमेकप्रेरणानिष्ठम् । तथा च प्रेरणाज्ञानस्य प्राशस्त्यज्ञानोपकार्यत्वलाभात् प्रेरणां प्रति करणोपकारकत्वमितिकर्तव्यतात्वं लब्धमिति सिद्धं नस्समीहितम् । न च व्याप्यतया ज्ञापकत्वमेव पञ्चम्यर्थः । प्राशस्त्यं च व्याप्यतया न ज्ञापकम् । न वा तथा ज्ञापकतया बोधने समीहितसिद्धिरिति वाच्यम् । प्रेरणाभानं प्रत्युपकारकत्वरूपं प्रेरणेतिकर्तव्यतात्वं बोद्धव्यमिति प्रकृते समीहितम् । तदुपकारकत्वं च तत्फलप्रवृत्त्युत्पादकत्वम् । तथा चैकस्मिन् प्रवृत्तिरूपे फले प्रेरणाज्ञानप्राशस्त्यज्ञानयोः हेतुत्वात् स्वज्ञानजन्यत्वरूपस्वप्रयोज्यत्वसम्बन्धेन प्रवृत्तयोस्सत्त्वात् प्रवृत्तिनिष्ठेन तादृशसम्बन्धेन व्याप्यव्यापकभावस्य प्राशस्त्यप्रेरणयोस्सम्भवात् प्रेरणां प्रति तादृशव्याप्यतया ज्ञापकत्वस्येतिकर्तव्यतात्वपर्यवसितत्वात् तत्प्रतिपादनमस्मत्समीहितम् । किं च अस्माच्छब्दादयमर्थः । न तु मानान्तरादित्यादिप्रयोगे प्रमाणान्तरादिविधया ज्ञापकत्वस्यापि पञ्चम्या बोधनात्

व्याप्यविधयैव ज्ञापकत्वं तदर्थ इति न नियमः । तथा प्रेरणां प्रति तज्ज्ञानम् । सहकारिज्ञानविषयत्वरूपज्ञापकत्वमपि प्राशस्त्यनिष्ठं पञ्चम्यर्थः । तस्माद्विधिवाक्यमात्रे प्राशस्त्यज्ञानस्य प्रेरणायामितिकर्तव्यतात्वेनान्वय इति वार्तिकादिमूलसिद्धं भवत्येव । उपाध्यायादिप्राचीनग्रन्थेषु चार्थवादाधिकरणे तथैवोक्तम् । ननु, शब्दभावना मुख्यविशेष्यतया विधिवाक्यार्थबोधे भाति, अर्थभावना वा । आद्ये 'भावनैव हि वाक्यार्थः सर्वत्राख्यातवत्तया । अनेकगुणजात्यादिवाक्यार्थानुरञ्जिता ।' इति उद्भिदधिकरणीयवार्तिकविरोधः । तत्र हि आख्यातसामान्यार्थभूताया नानागुणजात्यादिकारकविशिष्टाया वाक्यजन्यधीमुख्यविशेष्यत्वमुक्तम् । न तु शब्दभावना आख्यातसामान्यार्थः । न वा जात्यादिकारकविशिष्टा । नान्त्यः । अर्थभावनादिकारकेषु शब्दभावनाया विशेष्यत्वस्यैवोचितत्वादिति चेत्, अत्रोच्यते । आद्य एव पक्षो युज्यते । न चोक्तवार्तिकविरोधः । अर्थभावनायाः शब्दभावनां प्रति कर्मत्वेन विशेषणत्वेऽपि स्वकारकाणि प्रति विशेष्यत्वस्य वार्तिकोक्तस्यानपायात् । अत एव प्रधानभावनायामङ्गभावनानामितिकर्तव्यतात्वेनेति तन्त्ररत्ने एकादशे उक्तम् । अत एव पश्य मृगो धावतीत्यादौ मृगा धावन्तीति वाक्यार्थस्य दर्शनकर्मतया विशेषणत्वमिति महाभाष्ये उक्तम् । वार्तिकादिभिरपि तादृशविशेषणत्वं स्वीक्रियते एव । एतावांस्तु विशेषः । यद्वैयाकरणमते धावनादिधात्वर्थ एव मृगादिविशेषित उक्तवाक्यार्थः । तार्किकादिमते धावनभावनाविशिष्टप्रथमान्तनामार्थो मृगादिरेव । मीमांसकमते तु धावनकरणत्वादिविशिष्टभावनैव दर्शनकरणकभावनायामेव तस्यां कर्मत्वेन विशेषणम् । यत्तु प्रेरणायां कर्तव्यताधीर्न सर्वानुभवसिद्धेति, तन्न । प्रवर्तकं ज्ञानं विधिवाक्यजन्यमिति हि सर्ववादिसिद्धम् । तच्च ज्ञानं मीमांसकमते यागादेः आप्तप्रेरणाविषयत्वं इष्टसाधनतां विना अनुपपन्नमित्येवंरीत्या इष्टसाधनताक्षेपद्वारा प्रवर्तकं प्रेरणाविषयकम् । लोके राजगुर्वादिप्रेरणाज्ञानस्य तादृशप्रवर्तकतायाः कल्पत्वात् । इष्टसाधनतैव विध्यर्थः, न तु प्रेरणेतिवादिनां तत्र सम्मतिस्तु नोपयुज्यते । न हि सर्ववादिसम्मतो विध्यर्थोऽस्त्येकः । तथा च प्रवृत्तिभावनारूपप्रेरणायाः भावनास्वाभाव्येन अंशत्रयान्वयित्वं तन्मते अनुभवारूढमेव । भावनात्वेनोपस्थिते अंशत्रयान्वयित्वमिति हि वार्तिकादौ प्रदर्शितम् । तस्मात्साधूक्तं शब्दभावनेतिकर्तव्यतांशसाकांक्षेति । ननु, किमिदं प्राशस्त्यम् ? सगुणत्वं चेत, तस्य एकरूपस्य दुर्वचत्वेन अर्थवादानां नानार्थत्वापत्तेः तज्ज्ञानस्य प्रवृत्तावनुपयोगाच्चेति चेन्न । बलवदनिष्टाजनकत्वस्यैव प्राशस्त्यरूपत्वात् । ननु, अनुष्ठानश्रमरूपानिष्ट-

ष्टाश्वदग्धरथन्यायेन तदुभयैकवाक्यतेत्यर्थवादाधिकरणे निर्णीतम् । वेदान्तवाक्यजन्यज्ञानाच्च साक्षादेव परमानन्दप्राप्तिर्निश्शेषदुःखनिवृत्तिश्च पुरुषार्थो लभ्यत इति निराकांक्षत्वान्नान्यशेषत्वसम्भावना । प्रत्युत विधय एव अन्तःकरणशुद्धिद्वारा तच्छेषतां भजन्त इति । तस्मात्प्रयोजनवदबाधितज्ञातज्ञापकत्वेन वेदान्तानां स्वत एव प्रामाण्यादस्त्येव ब्रह्मेति न मीमांसकमतसिद्धिः । तार्किकादीनां च मतं तत्त्वमस्यहं ब्रह्मास्मि अयमात्मा ब्रह्म सत्यं ज्ञानमनन्तं ब्रह्मेत्यादिश्रुतिबाधितम् एकमेवाद्वितीयं ब्रह्म नेह नानास्ति किञ्चनेत्यादिश्रुतिबाधितं च भिन्नाभिन्नत्वं क्षणिकत्वं च आकाशवत्सर्वगतश्च

जनकत्वात् यागादौ तद्बोधनासम्भवः । पापरूपानिष्टजनकत्वाभावस्य तद्रूपत्वे तद्बोधनस्य अप्रसक्तप्रतिषेधापत्तेः । न हि यागादेः पापजनकत्वं प्रसक्तम् । 'नैव सर्पं स्पृशेदि'ति लौकिकनिषेधशेषस्य मृत्युरयमित्यादिनिन्दार्थवादविशेषस्य अप्रामाण्यापत्तेः तेन पापजनकत्वबोधस्यावाच्यत्वादिति चेन्न । यत्र प्राशस्त्यं बोध्यं, तज्जन्येष्टादधिकं यदनिष्टं, तदजनकत्वस्य प्राशस्त्यरूपत्वात् । न चैवमपि अप्रसक्तप्रतिषेधापत्तिः । श्रमादिरूपानिष्टजनके यागादौ उक्ताजनकत्वरूपस्य विशिष्टाभावस्य श्रमादिनिष्ठे उक्ताधिकत्वाभावे पर्यवसानात् । घटवति नीलघटो नास्तीत्यभावस्य घटनिष्ठनैल्याभावे पर्यवसानात् । उक्ताधिकत्वं च यागादिजन्येष्टापेक्षया बहुत्वं बहुकालव्यापकत्वं तादृशेष्टसाक्षात्कारविरोधिजातिविशेषवत्त्वादिरूपं च । तदाश्रय जनकत्वज्ञानस्य प्रवृत्तिप्रतिबन्धकत्वात् तदभावकूटमर्थवादेन बोध्यत इति दिक् । अर्थवादेभ्यः 'तत्त्वमसी'त्यादिश्रुतेः वैषम्यमाह—वेदान्तेति । विधयः दर्शादिविधायकवाक्यानि । शुद्धिद्वारा 'विविदिषन्ति यज्ञेने'त्यादिश्रुत्या तत्त्वज्ञानप्रतिबन्धकपापनाशनद्वारा तत्त्वज्ञानसाधनत्वेन विदितानां कर्मणामुत्पत्तिप्रयोगविधानद्वारा । तच्छेषतां वेदान्तवाक्योपकारकताम् । स्वत एव अन्यशेषतां विना । ब्रह्म जीवाभिन्नं ब्रह्म । अथवा मास्तु 'तत्त्वमस्यादिश्रुतेः कर्तृस्तुतिपरत्वम् । ब्रह्माभिन्नत्वेन जीवोपासनापरत्वं तु स्यात । तत्राह—तस्मादिति । यथाश्रुतवाक्यार्थज्ञानादेव परमपुरुषार्थलाभादित्यर्थः । स्वत एवेति । इत्युपास्येति पदयोः कल्पनां विनैव । प्रामाण्यात् प्रामाण्यसम्भवात् । श्रुतहान्यश्रुतकल्पनापत्तेः दृष्टद्वारकपुरुषार्थसाधनधीपरत्वसम्भवे अदृष्टद्वारा तादृशधीपरत्वकल्पने गौरवाच्च नोपासनापरत्वमिति भावः । इत्यादिश्रुतीत्यादिना प्रपञ्चमिथ्यात्वबोधकश्रुतिसङ्ग्रहः भिन्नाभिन्नत्वं प्रपञ्चब्रह्मणोः सत्यभेदाभेदौ । क्षणिकत्वं क्षणमात्रस्थायिज्ञानरूपत्वम् । ब्रह्मण इति शेषः । 'ऐत-

नित्य इत्यादिश्रुतिबाधितम् । अत्र सर्वेषां मतस्यासत्त्वे प्रतिज्ञाते विशुद्धात्मकत्वादिति हेतुः । निर्विकल्पाद्वितीयचैतन्यरूपत्वादित्यर्थः । अत्र हेतुः—विशिष्टानुभूत्यति । विशिष्टा सविकल्पकानुभूतिभ्यो व्यावृत्ता या तत्त्वमस्यादिवाक्यजन्याखण्डानुभूतिस्तयेत्यर्थः तेन सर्वव्यापकमद्वितीयं परमानन्दबोधरूपं च ब्रह्मेति सिद्धम् ॥ ४ ॥

ननु, 'स य एषोऽणिमा'अणोरणीयानि'ति ब्रह्मणोऽणुत्वश्रुतेः 'अंगुष्ठमात्रः पुरुषः'आराग्रमात्रो ह्यवरोऽपि दृष्ट' इत्यादिश्रुतिप्रतिपादिताणुजीवाभिन्नत्वाच्च न ब्रह्मणः सर्वव्यापकत्वमित्याशङ्क्य 'ब्रह्मैवेदममृतं पुरस्तात् ब्रह्म पश्माद्ब्रह्म दक्षिणतश्चोत्तरेण अधश्चोर्ध्वं च प्रसृतं ब्रह्मैवेदं विश्वमिदं वरिष्ठ'तदेतद्ब्रह्मापूर्वमनपरमनन्तरमबाह्य'मित्याद्याः श्रुतयो निर्विशेषमेव ब्रह्म प्रतिपादयन्तीति पूर्वोक्तमेव द्रढयन्नाह—

न चोर्ध्वं न चाधो न चान्तर्न बाह्यं
न मध्यं न तिर्यङ्न पूर्वापरा दिक् ।
वियद्व्यापकत्वादखण्डैकरूप-
स्तदेकोऽवशिष्टश्शिवः केवलोहम् ॥ ५ ॥

दात्म्यमिदं सर्व'मिति श्रुतौ एतत्सदृपं ब्रह्मैव आत्मा स्वरूपं यस्य, तादृशम् । स्वार्थे ष्यङ्प्रत्ययः । तथा च ब्रह्मैव प्रपञ्चस्य स्वरूपं, तदन्यन्मिथ्यैवेति बोधनात् कुत उक्तभेदाभेदाविति भावः । मतस्य सम्मतस्य । असत्त्वे ब्रह्मनिष्ठाभावे । ब्रह्मणि पक्षे सर्वसम्मतरूपत्वाभावे साध्ये इति यावत् । तत्त्वमस्यादीत्यादिपदेन 'एकमेवाद्वितीयमित्या'दिवाक्यस्य द्वितीयाभावादिविशिष्टे ब्रह्मण्यवान्तरतात्पर्यस्वीकारादद्वितीयेत्यादिसिद्धिरिति भावः ॥ ४ ॥

अंगुष्ठेत्यादि । ' अंगुष्ठमात्रः पुरुषो मध्य आत्मनि तिष्ठति । ईशानो भूभव्यस्ये 'ति श्रुत्यांगुष्ठमात्रशब्दितजीवस्य सर्वेश्वरत्वं ' आराग्रमात्रो ह्यवरोऽपि दृष्ट' इति श्रुतौ नास्ति परो महान् यस्मात्तादृशत्वमाराग्रपरिमितस्य जीवस्योक्तम् । आरा लोहशलाका, अपूर्वं कारणभूतादिशून्यं, अनपरं कार्यभूताकाशादिशून्यम् । अनन्तरमबाह्यम् अन्तरबाह्यशून्यम् । अपरिच्छिन्नमिति यावत् । न चोर्ध्वमित्यादि । मयि ऊर्ध्वादिकं येन सम्बन्धेन प्रसक्तं, तेन सम्बन्धेन नास्ति । वियद्व्यापकत्वात् येन केनापि सम्बन्धेन वियद्यथा सर्वस्य व्यापकं, तथा

वियद्व्यापकत्वात् 'आकाशवत्सर्वगतश्च नित्य' इति श्रुतेः वियतो व्यापकत्वादिति वा 'ज्यायानाकाशान्महतो महीया'नित्यादिश्रुतेः जीवस्यापि सकलदेहव्यापिचैतन्योपलब्ध्या महत्त्वेऽपि उपाधिधर्मध्यासेनाराग्रमात्रत्वाभिधानात् 'बुद्धेर्गुणेनात्मगुणेन चैव ह्याराग्रमात्रो ह्यवरोऽपि दृष्ट' इति श्रुतेः ब्रह्मणश्च सूक्ष्मत्वाभिप्रायेण अणुत्वव्यपदेशात् । शेषमतिरोहितार्थम् ॥ ९ ॥

ननु, ब्रह्मणो जगदुपादानत्वादुपादानोपादेययोश्चाभेदाद्विचित्रजगदभिन्नत्वेन ब्रह्मणः दुःखरूपत्वात् न तदभिन्नत्वेन जीवस्य परमपुरुषार्थप्राप्तिरित्याशङ्क्य ब्रह्मणः स्वप्रकाशपरमानन्दरूपत्वान्निखिलजगद्भ्रमाधिष्ठानत्वेन कारणत्वव्यपदेशादध्यस्तेन च सर्वं सम्बन्धाभावान्न तत्रानर्थलेशोऽप्यस्तीत्याह—

न शुक्लं न कृष्णं न रक्तं न पीतं
न कुब्जं न पीनं न ह्रस्वं न दीर्घम् ।

कुब्जम् अणु । पीनं महत् । तेनाणु महत् ह्रस्वं दीर्घमिति चतुर्विधपरिमा-

---

तादात्म्येनात्मा । चकाराः विजातीयान्तरस्य सजातीयधर्मस्य च समुच्चायकाः । तस्मादेकोऽहमित्यर्थः । येन केनापि सम्बन्धेन व्यापकत्वमादाय दृष्टान्तत्वे पृथिव्यादेरपि दृष्टान्तत्वसम्भवात् असामञ्जस्यम् । संयोगेन वियद्यथा सर्वव्यापकं, तथा तादात्म्येनात्मापीत्युक्तेऽपि दृष्टान्तासङ्गतिः । सर्वप्रपञ्चनिषेधरूपस्य साध्यस्य वियति परेणास्वीकारात् ऊर्ध्वादिनिषेधमात्रे साध्ये तदेकः केवलोऽहमिति उपसंहारानुपपत्तिः । अत आह—**वियतो व्यापकत्वादिति** । अपरिच्छिन्नत्वादित्यर्थः । तथा च भेदादिरूपसर्वपरिच्छेदाभावस्य सर्वभेदाद्यभावं प्रति हेतुत्वं युक्तमेवेति भावः । **सकलदेहव्यापिचैतन्येति** । हस्तपादाद्यवच्छेदेन युगपज्ज्ञायमाननानासुखदुःखादिव्यक्तितादात्म्यापन्नचैतन्येत्यर्थः । **उपाधिधर्मेति** । मनोनिष्ठाराग्रमात्रत्वेत्यर्थः । मनसस्सङ्कोचविकासशालित्वेन कदाचित्तदस्तीत्यर्थः । **बुद्धेरित्यादि** । आत्मगुणत्वेन अवरः अपरिच्छिन्नोऽपि बुद्धिगुणेनाराग्रमात्र इत्यर्थः । **सूक्ष्मत्वेति** । दुर्विज्ञेयत्वेत्यर्थः ॥ ९ ॥

महदादिवाचकशब्दपूर्ववृत्तित्वेन कुब्जशब्दस्याणुपरिमाणवाचकत्वमित्याशयेनाह—**कुब्जमणविति** । रूपतादात्म्यस्य रूपाधारत्वस्य च न श-

अरूपं तथा ज्योतिराकारकत्वा-
त्तदेकोऽवशिष्टः शिवः केवलोऽहम् ॥६॥

णनिषेधात् द्रव्यत्वप्रतिषेधः । रूप्यत इति रूपं प्रमेयम् । न प्रमेयं अरूपम् । तेन सर्वेषामेव द्रव्यगुणकर्मादिपदार्थानां तत्तद्वाद्यभ्युपगतानां निषेधः । तथा च श्रुतयः—'अस्थूलमनण्वह्रस्वमदीर्घमलोहित'मित्याद्या 'अशब्दमस्पर्शमरूपमव्ययं तथारसं नित्यमगन्धवच्च यदि'त्याद्याश्च सर्वानर्थशून्यं परमात्मस्वरूपं प्रतिपादयन्ति । श्रौतस्याप्यर्थस्य न्यायेन निर्णयाय हेतुमाह—ज्योतिराकारकत्वादिति । स्वप्रकाशज्ञानरूपत्वेनाप्रमेयत्वात्प्रमेयत्वे घटादिवज्जडत्वापत्तेः । 'एतदप्रमेयं ध्रुव'मित्यादिश्रुतेरित्यर्थः ॥ ६ ॥

नन्, कस्य ब्रह्मभाव उपदिश्यते । ब्रह्मणोऽब्रह्मणो वा । नान्त्यः । तस्य जडत्वादसत्त्वाच्च । न प्रथमः । उपदेशानर्थक्यात् ब्रह्मभावस्य स्वत एव सिद्धत्वात् । जीवस्य स्वतो ब्रह्मभावेऽप्यविद्याव्यवधानं ज्ञानेन निवर्त्यत इति चेन्न । अविद्यानिवृत्तेरात्मरूपत्वे द्वैतापत्तेर्ब्रह्मणोऽसिद्धिप्रसङ्गात् । तदुक्तं वार्तिके—'अव्यावृत्ताननुगतं वस्तु ब्रह्मेति भण्यते । ब्रह्मार्थो दुर्लभोऽत्र स्या-

---

क्यमित्यादिनैव निषेधसम्भवादाकांक्षिताद्वितीयत्वप्रतिपादनस्य युक्तत्वाच्चाह—रूप्यत इत्यादि । रूप्यते चिता भास्यते । प्रमेयं चिद्भास्यम् । द्रव्यादेरिव तद्विशिष्टस्यापि प्रमेयत्वात् प्रमेयभेदोक्त्या द्रव्यादिवैशिष्ट्यात्यन्ताभावोऽपि लभ्यत इत्याशयेनाह—नेत्यादि । निषेधः भेदात्यन्ताभावयोर्लाभः । अस्थूलमित्यादौ स्थूलादेर्भेद इवात्यन्ताभावोऽपि बोध्यत इति वक्तुं शक्यते । अस्नेहमित्यादिवाक्यशेषस्य भेदबोधपरत्वे तत्पुरुषत्वेन नपुंसकत्वानुपपत्तेर्बहुव्रीह्यावश्यकत्वेन तत्समभिव्याहारात् अत्यन्ताभावमात्रबोधकत्वम् । अशब्दमित्यादौ तु नपुंसकत्वात् बहुव्रीहित्वनिर्णयेनात्यन्ताभावबोधकत्वमेवेत्याशयेनाह—अशब्दमित्यादि । अप्रमेयत्वात् चिदभास्यत्वात् ॥ ६ ॥

अविद्याव्यवधानं अविद्यारूपं व्यवधायकम् । द्वैतापत्तेः सत्यात्मभिन्नस्यापत्तेः । अव्यावृत्तम् अननुगतम् अनुगतधर्मशून्यम् अनुगतधर्मशून्यं च । द्वितीये ब्रह्मभिन्ने । सति सत्ये । परमार्थतः फलाभावं पारमार्थिकत्वरूपेण फलस्याभावम् । प्रतीतितः प्रातीतिकत्वेन रूपेण । फलाभावमित्यनुषज्यते । अत्र च फलाभावमित्यस्य फलरूपमलीकमित्यर्थः । तथा च ज्ञायमानं फलमलीकमिति

द्वितीये सति वस्तुनि ॥' इति । अभिन्नत्वे चोपदेशानर्थक्यमित्युक्तम् । अत्र किं परमार्थतः फलाभावमभिप्रैषि, किं वा प्रतीतितोऽपि । तत्राद्यमिष्टापत्त्या परिहरति—

न शास्ता न शास्त्रं न शिष्यो न शिक्षा
न च त्वं न चाहं न चायं प्रपञ्चः ।
स्वरूपावबोधो विकल्पासहिष्णुः
तदेकोवशिष्टः शिवः केवलोऽहम् । ७ ।

शास्ता उपदेशकर्ता गुरुः । शास्त्रमुपदेशकरणम् । शिष्य उपदेशकर्म । शिक्षा उपदेशक्रिया । त्वं श्रोता । अहं वक्ता । अयं सर्वप्रमाणसन्निधापितः प्रपञ्चो देहेन्द्रियादिरर्थः परमार्थतो नास्तीत्यर्थः । द्वितीयं निराकरोति—स्वरूपावबोधो विकल्पासहिष्णुरिति । अयमर्थः—यद्यप्यविद्यानिवृत्तिरात्मानात्मा वेत्यादिविकल्पने किमपि फलं निरूपयितुं न शक्यते, तथापि स्वरूपावबोधो विज्ञानफलमनुभूयते । न चैतत्कथमिति विकल्पनीयम् । सर्वद्वैतोपमर्देन विकल्पासहिष्णुत्वात् । न हि दृष्टेऽनुपपन्नं नाम ।

भावः । एतेन प्रातीतिकफलस्य प्रातीतिकत्वरूपेणाभावस्यापि सिद्धान्तेऽपि स्वीकारात् पश्चात्तद्दूषणानुपपत्तिरित्यपास्तम् । **परमार्थतो नास्तीति** । तथा च शास्त्रादिसर्वप्रपञ्चस्य निषेधात् परमार्थत्वरूपेण ज्ञानफलस्यापि निषेधलाभ इति भावः । द्वितीयं प्रातीतिकत्वविशिष्टं फलमलीकमित्यभिप्रायम् । स्वरूपावबोधः प्रकाशमानपूर्णानन्दरूपः । विज्ञानफलं चरममनोवृत्तिफलत्वेन प्रातीतिकेन विशिष्टम् । तथा च प्रातीतिकमज्ञाननिवृत्तित्वं पूर्णानन्दे प्रकाशमाने जीवन्मुक्तेन कल्पितम् । तद्विशिष्टस्य जन्यतारूपं फलत्वमपि प्रातीतिकम् । तदुक्तं वार्तिके—'निवृत्तिरात्मा मोहस्य ज्ञातत्वेनोपलक्षितः ।' इति भावः । **न चैतत्कथमिति** । वियदादिसर्वद्वैतोपमर्दरूपे कैवल्ये कल्पितस्य निवृत्तित्वस्यासम्भवात्सत्यमेव तद्वाच्यम् । अन्यथा ह्यविद्यैव स्यादिति भावः । विकल्पासहिष्णुत्वात् आत्मनो विकल्पविषयवैशिष्ट्यस्यासहत्वात् । तथाचोक्तं निवृत्तित्वं जीवन्मुक्तिकाल एवास्ति । न तु विदेहकैवल्य इति नोक्तदोष इति भावः । ननु, तत्रापि किं मानम् । तत्राह—**न हीत्यादि** । 'या या प्रमा, सा सा समानविषयकाज्ञानतत्प्रयुक्तवत्कालपू-

तथा च श्रुतिः—न निरोधो न चोत्पत्तिर्न बुद्धो न च साधकः । न मुमुक्षुर्न वै मुक्त इत्येषा परमार्थता ॥ ब्रह्म वा इदमग्र आसीत्तदात्मानमेवावेदहं ब्रह्मास्मीति तस्मात्तत्सर्वमभव'दित्याद्या पूर्वमपि ब्रह्मस्वरूपस्यैव सतो जीवस्य

र्वत्व शून्यक्षणवृत्तिर्भवति । यथा शुक्त्यादिभ्रमेति नियमे दृष्टे प्रत्यक्षादिसिद्धे हि यस्माद्वैशिष्ट्यासहत्वमात्मनो बोधयन्ती सती नानुपपन्ना । ननु, नानाज्ञानपक्षे दृष्टान्तसम्भवात्तादृशनियमः प्रत्यक्षादिसिद्धः । एकाज्ञानपक्षे तु का गतिः । तत्राह—**तथा च श्रुतिरिति**। तथा विकल्पासहत्वमात्मनो बोधयन्ती सती ज्ञानात् ब्रह्मभावं दर्शयति द्वैतजातं च वारयतीत्यग्रेऽन्वयः । निरोधः नाशः, उत्पत्तिः जन्म, प्रपञ्चस्येति शेषः । बुद्धस्तत्त्वदर्शी । साधकः श्रवणादिमान् । मुक्तः अज्ञाननिवृत्तिमान् । परमार्थतेति भावार्थोऽविवक्षितः । निरोधादिशून्यं परमार्थ इत्युक्ते तच्छून्यत्वं विकल्पासहत्वं न लभ्येत । ततस्तथानुक्त्वा इत्येषा परमार्थतेत्युक्तम् । इतिशब्देन तु सर्ववैशिष्ट्यासहं शुद्धं चिद्रूपमुक्तम । **तत् सर्वमभवदिति** । सर्वं दृश्यजातं ब्रह्माभवदित्यर्थः । सर्वदृश्यानां ज्ञातब्रह्मभवनं स्वकालपूर्वकालवृत्तिभिन्नतया ज्ञातं यत् ब्रह्मतादात्म्यम् । शुक्तौ ज्ञातायां सत्यां आरोपितं रजतादिकं नाभवदित्यादौ तादृशरजतादावुक्तभिन्नायाः ज्ञातशुक्तेस्तादात्म्यं बुध्यते । अत एव 'यत्रत्वस्य सर्वमात्मैवाभूत् तत् केन कं पश्येत् तत् केन कं जिघ्रेदि'त्यादौ सर्वदृश्यानामात्मभवनं उक्त्वा अर्थात् प्राप्तं तत्त्वज्ञात्मनि स्वकालपूर्ववृत्तितासम्बन्धेन दृश्यादित्यन्ताभावमाक्षेपार्थकर्किंशब्देन श्रुतिरनुवदति । अस्येतिपदस्य तत्त्वसाक्षात्कारवदैक्यानुषङ्गात् किमित्यस्यापि विभक्तिव्यत्ययेन लिङ्व्यत्ययेन चानुषङ्गात् को ज्ञाता, किं यथा स्यात्, तथा पश्येदित्यर्थलाभेन तत्त्वसाक्षात्कारवदात्मस्वरूपे द्रष्टृदृश्यदर्शनतत्साधनानामुक्तसम्बन्धेनात्यन्ताभावबोधः । एवं तत् केन कं जिघ्रेदित्यादावपि । किं च यत् फलं श्याममासीत्, तदिदानीं रक्त-

---

१. **तत्सर्वमभवदिति** । एवकारानुपक्षेण सर्वं दृश्यजातं ब्रह्मैव । न तु ज्ञातं ब्रह्म दृश्यतत्कालपूर्वकालवृत्तीत्यर्थः । 'सविशेषणे ही'तिन्यायात् । ब्रह्मज्ञाने तादृशपूर्वकालवृत्तित्वाभावलाभः । यथा हि अयं पण्डित एव । न त्वस्य पाण्डित्यं चारु इत्यादौ न त्वित्यादिनैवकारार्थस्यानुवादबलादेवकारस्य तादृशानुवादसमानार्थकत्वं, तथा 'यस्मिन् सर्वाणि भूतान्यात्मैवाभूद्विजानतः । तत्र को मोहः कश्शोक एकत्वमनुपश्यत' इत्यादौ क इत्यादिनैवकारार्थानुवादबलात् ब्रह्मज्ञाने मोहादिपूर्वकालवृत्तित्वाभावः एवकारेण बोध्यत इति निर्णीयते । तथा च हेत्वर्थकशतृप्रत्ययेन पूर्वकालवृत्तिताघटितहेतुत्वोपस्थापनात् पूर्वकालवृत्तितासम्बन्धेन मोहाद्यभावधीसम्भवेन मोहादिकारणद्वैतसत्त्वे मोहादेरुक्ताभावानुपपत्त्या च द्वैतवत्कालपूर्वकालवृत्तित्वाभावस्य ब्रह्मज्ञाने धीसम्भव इति ध्येयम् । इति पाठान्तरम् ॥

ज्ञानाद्वस्तुभावं दर्शयति । सर्वं च द्वैतं वारयति ॥ ७॥

मेवाभवत् । न तु स्वनिष्ठश्यामतया समकालम् । नापि पूर्वकालमि'त्यादौ न-त्विदानीमित्यादेरर्थानुवादात् तगोस्तुल्यार्थकत्वम् । रक्तादि-पदस्य उक्तकालादिभिन्ने लक्षणास्वीकारेण तदन्ययोगव्यवच्छेदार्थकस्यव-कारस्य तादृशसमकालादितादात्म्यव्यवच्छेदबोधकत्वेन च तत्सम्भवः । तथा नन् केनेत्याद्यनुवादतुल्यार्थकत्वात् यत्र त्वस्येत्यादेरुक्तार्थकत्वं स्वीक्रियते । लक्ष-णया आत्मपदोपस्थापितस्यापि तस्य दृश्यकालपूर्ववृत्तिभिन्नस्यात्मनो भिन्नस्यास्य दृश्यकालपूर्ववृत्तितादात्म्यव्यवच्छेदरूपस्य अन्ययोगव्यवच्छेदस्य एवकारेण बो-धसम्भवात् । विशेषणगतैवकारस्यापि शिरोमण्यादिभिरप्यन्ययोगव्यवच्छेदबो-धकत्वस्वीकारात् । तस्य अयोगव्यवच्छेदबोधकत्वस्वीकारेऽपि दृश्यकालपू-र्ववृत्तिभिन्नतादात्म्ययोगव्यवच्छेदबोधकत्वसम्भवात् यत्रेत्यनेनोक्ते तत्त्वसाक्षा-त्कारकाले दृश्येषु तादृशव्यवच्छेद्योस्सत्त्वात् । यदि त्वात्मैव विशेष्योऽत्र स्वीक्रियते । अत एव ' यस्मिन् सर्वाणि भूतान्यात्मैवाभूद्विजानत इत्य-त्राभूदित्येकवचनान्तमित्यालोच्यते , तदा तादृशभिन्ने भूतपदमेव लाक्षणिक-म् । तत्सर्वमभवदित्यत्रानुवादाभावेऽप्युक्तवाक्यसमानार्थत्वाय तादृशार्थकत्वम् । 'मविशेषणेही'त्यायात् ब्रह्मज्ञाने तादृशपूर्ववृत्तित्वलाभः । एवं 'यस्मिन् सर्वाणि भूतान्यात्मैवाभूद्विजानतः । तत्र को मोहः कश्शोक एकत्वमनुपश्यत'इत्यादौ क इ-त्यादिना एवकारार्थवादबलात् ब्रह्मज्ञाने मोहादिपूर्वकालावृत्तित्वं एवकारेण बो-ध्यत इति निर्णीयते । हेत्वर्थकशतृप्रत्ययेन पूर्वकालवृत्तिताघटितहेतुत्वोपस्थापनात् पूर्वकालवृत्तितासम्बन्धेन मोहाद्यभावधीसम्भवेन मोहादिकारणद्वैतसत्त्वे मोहादेरु-क्ताभावानुपपत्त्या द्वैतवत्कालपूर्वकालावृत्तित्वस्य ब्रह्मज्ञाने धीसम्भवः । यथाश्रुते साक्षात्सम्बन्धेन मोहादेरभावस्यात्मनि बोधे जीवमुक्तेः बाधात् । विवक्षितार्थे तु चरमज्ञाने पूर्वज्ञानहेतुकस्य उक्तकालावृत्तित्वस्य धीसम्भव इति ध्येयम् । इत्याद्येत्याद्यपदेन 'ब्रह्मवेद ब्रह्मैव भवती'त्यादिश्रुतिसङ्ग्रहः । **ज्ञानादित्यादि** । ज्ञानात् ब्रह्मभावो नाम ज्ञायमानजविस्वरूपस्य ब्रह्माज्ञानकालपूर्वत्वशून्य-क्षणवृत्तित्वम् । वारयतीत्यत्रापि ज्ञानादित्यनुषज्यते । तथा च ज्ञानस्वरूपं द्वैत-वत्कालपूर्वत्वशून्यक्षणवृत्तितया बोधयतीत्यर्थः । अथवा ननु, प्रातीतिकफलत्वविशि-ष्टोद्देशेन मुमुक्षूणां सर्वत्यागपूर्वकं श्रवणादौ प्रवृत्त्यनुपपत्तिः । प्रवृत्तिकाल ए-वात्ममुखमनादि तस्य फलत्वं प्रातीतिकमिति ज्ञानसम्भवेन सिद्धत्वेन ज्ञाते आ-त्ममुखे इच्छानुदयात् तत्राह—**न हीत्यादि** । दृष्टे अज्ञानतत्प्रयुक्तविरोधिमनो

नन्वात्मनः स्वप्रकाशचैतन्यरूपत्वे सर्वदा भासमानत्वेन जाग्रत्स्वप्नसुषुप्त्यादिव्यवस्था कथम् । न च भ्रान्त्यैव व्यवस्थेति वाच्यम् । तथासति सर्वस्यैव स्वप्नत्वापत्तिरिति चेन्न । लक्षणतस्त्रयाणामपि स्वप्नत्वेऽपि प्रतिभासतोऽविद्याकृतविशेषसम्भवात् सदसद्विलक्षणत्वेन च सविशेषत्वाद्व्यवस्थोपपत्तेः । परमार्थतस्तु न कापि व्यवस्थेत्याह—

न जाग्रन्न मे स्वप्नको वा सुषुप्ति-
र्न विश्वो न वा तैजसः प्राज्ञको वा ।
अविद्यात्मकत्वात्त्रयाणां तुरीय-
स्तदेकोऽवशिष्टश्शिवः केवलोऽहम् ॥ ८ ॥

अत्र लयक्रमेण पौर्वापर्यव्यपदेशः । तथा हि—अस्मिन्मते पदार्थो द्विविधः दृक् दृश्यं च । अन्येषां वादिपरिकल्पितानां पदार्थानामत्रैवान्तर्भावात् । तत्र दृक्पदार्थः आत्मा पारमार्थिक एकः । सर्वदैकरूपोऽप्यौपाधिकभेदेन त्रिविधः । ईश्वरो जीवस्साक्षी चेति । तत्र कारणीभूताज्ञानोपाधिरीश्वरः । अन्तःकरणतत्संस्कारावच्छिन्नाज्ञानोपहितो जीवः । प्रपञ्चितं चैतदधस्तात् । अविद्याप्रतिविम्बेश्वरपक्षे बिम्बचैतन्यं साक्षी । बिम्बेश्वरपक्षे तु बिम्बप्रतिविम्बमुखानुगतमुखस्वरूपवज्जीवेश्वरानुगतं सर्वानुसन्धानम् । तत्र जीवस्य तुरीयं प्रति प्रतिबिम्बत्वं तुरीयस्य जीवं प्रति बिम्बत्वं बोध्य

न्यात् चैतन्यं साक्षीत्युच्यते । वार्तिककारमते त्वीश्वर एव साक्षीति द्वैविध्यमेव जीवेश्वरभेदेन दृश्यः । तत्रेश्वरोऽपि त्रिविधः । स्वोपाधिभूताविद्यागुणत्रयभेदेन विष्णुब्रह्मरुद्रभेदात् । कारणीभूतसत्त्वगुणावच्छिन्नो विष्णुः पालयिता । कारणीभूतरजउपहितो ब्रह्मा स्रष्टा । हिरण्यगर्भस्तु महाभूतकारणत्वाभावात् न ब्रह्मा । तथापि स्थूलभूतस्रष्टृत्वात् क्वचिद्ब्रह्मेत्युपचर्यते । कारणीभूततमउपहितो रुद्रः संहर्ता । एवं चैकस्यैव चतुर्भुजचतुर्मुखपञ्चमुखाद्याः पुमाकाराः श्रीभारतीभवान्याद्याश्च स्त्र्याकाराः । अन्ये च मत्स्य-

---

रूपाभ्यां मुखं द्वेधा भिद्यते । दर्पणाद्युपाध्यन्तर्गतत्वे सत्यौपाधिकपरिच्छेदशून्यत्वे च सति बहिस्थितस्वरूपकत्वं प्रतिबिम्बत्वम् । बिम्बवारणायाद्यम् । घटाकाशादिवारणाय द्वितीयम् । दर्पणाद्यन्तर्गततदवयववारणाय तृतीयम् । उपाध्यनन्तर्गतत्वे सति उपाध्यन्तर्गतरूपाभिन्नबहिस्थितत्वं बिम्बत्वमिति विवेकात् , तथोक्तोपहितमुखद्वयात् शुद्धरूपं मुखं भिद्यते । शुद्धस्योपहितकल्पनाधिष्ठानत्वेन ततो भेदस्यावश्यकत्वात् । तथा च बिम्बत्वप्रतिबिम्बत्वोपहितजीवेश्वराभ्यां शुद्धचिदन्या । विशिष्टकेवलयोर्भेदाभेदस्वीकारेण तस्यास्तदुभयाभेदस्यापि स्वीकारात् तदुभयानुस्यूतापि सेति भावः । जीवस्यापि कार्यभूतमनोगतसत्त्वादिगुणावच्छिन्नत्वेन तत्राति-व्याप्तिवारणायाह—**कारणीभूतेति** । अकार्यभूतेत्यर्थः । **क्वचिदिति** । स वै शरीरी प्रथमः स वै पुरुष उच्यते । आदिकर्ता सभूतानां ब्रह्माग्रे समवर्त्तत । तस्मादेतत् ब्रह्म नामरूपमन्नं च जायत' इत्यादिश्रुतौ 'ब्रह्मतत्वं तपो वेदाः ब्रह्मा विप्रः प्रजापति'रित्यादिकोशे चेत्यर्थः । **एवं चेति** । चतुर्भुजादिशरीरकार्यपरिपालनादेर्विष्ण्वादिकर्तृकत्वे चेत्यर्थः । **एकस्यैवेति** । ननु, चतुर्भुजाकारो विष्णोरवतारः , चतुर्मुखाकारो ब्रह्मणः, पञ्चमुखाकारो रुद्रस्य, लक्ष्म्याकारो विष्णोः, भारत्याकारो ब्रह्मणः, भवान्याकारो रुद्रस्येति विशिष्य वक्तव्यं, किमित्येकस्येत्युक्तम् । उच्यते—चतुर्भुजशरीरस्य पालनमेव कार्यमिति वक्तुमशक्यम् । दैत्यसंहारादिकार्यस्यदर्शनात् । तस्य देवरक्षणफलकत्वेऽपि तमःकार्यत्वेन रुद्रकार्यत्वात् । एवं पञ्चमुखशरीरे त्रिपुरसंहारादितमःकार्यस्य जगत्पालनफलकत्वेन विष्णुकार्यत्वदर्शनात् न रुद्रकार्यत्वदर्शननिर्णयसम्भवः । एवं भवान्यादेः दैत्यादिसंहर्त्रीत्वेऽपि पालनरूपविष्णुकार्यदर्शनात् हरिवंशादौ विष्ण्वादिरूपत्वस्य स्पष्टमुक्तत्वाच्च न रुद्रादिरूपत्वनिर्णयः । अत एव सरस्वत्यादेरपिपालनादिकार्यं पुराणादौ तत्र-तत्रोक्तमिति न ब्रह्मादिरूपत्वनिर्णयः । तस्मात् चतुर्भुजादिशरीरं रुद्रादेरपि । एतदभिप्रायेणैव हरिरूपी महादेवो लिङ्गरूपी जनार्दनः । ईषदप्यन्तरं नास्ति भेदकृन्नरकं व्रजेत् ॥ इत्यादि ब्रह्मवारदीयस्थानि, 'नामानि तव गोविन्द यानि लो-

के महान्तिच । तान्येव ममे'त्यादिसहस्रनामभाष्योद्धृतानि च वचनानि समञ्जसानि । अन्यथा गुणभेदेन भेदसत्त्वात् विष्णुशिवादिपदानां शिवविष्ण्वादिनामत्वासम्भवाच्चासङ्गतेः । उक्ताभिप्रायादरे तु सत्त्वगुणावच्छिन्नचित इव चतुर्भुजशरीरवृत्तिजातिविशेषविशिष्टस्यापि हरिशब्दार्थत्वात् । अन्यथा श्रुतिपुराणादौ तत्तच्छब्देन तन्मात्रव्यवहानुपपत्तेः । महादेवशब्दितस्य तमोऽवच्छिन्नचैतन्यस्य चतुर्भुजशरीराभिमानित्वात् महादेवाभिमानविषयस्य लिङ्गस्य पालनरूपसत्त्वगुणकार्याय जनार्दनशब्दितसत्त्वावच्छिन्नचिद्रूपविष्ण्वभिमानविषयत्वाच्च हरीत्यादेराङ्गस्यम् । चतुर्भुजशरीरस्येव तदभिमानिनोस्सत्त्वतमोऽवच्छिन्नचिद्रूपहरिहरयोरपि हरनारायणादिशब्दार्थत्वान्नामानीत्यादेरप्याङ्गस्यम् । कारणीभूतसत्त्वाद्यवच्छिन्नचितां विष्ण्वादिरूपतां मैत्रायणीयशाखायां श्रूयते—'अथ यो ह खलु वा वास्य तामसोऽग्शोऽसौ ब्रह्मचारिणो योऽयं रुद्रोऽथ यो ह खलु वा वास्य राजसोऽग्शोऽसौ ब्रह्मचारिणो योयं ब्रह्माऽथ यो ह खलु वा वास्य सात्त्विकोऽग्शोऽसौ ब्रह्मचारिणो यो यं विष्णुस्स वा एष पुरुषः एकस्त्रिधाभूत' इत्यादि । तत्र दीपिका व्याख्या तामसः तमःप्रधानोग्शः तमउपाधिको विशेषः हे ब्रह्मचारिणः एवमग्रेपीति । तथा भवान्यादीनामपीश्वरत्वमाथर्वणैराख्यायते—अहमेव स्वयमिदं वदामि जुष्टं देवेभिरुतमानुषेभिः 'यं कामये तन्तमुग्रं कृणोमि तं ब्रह्माणं तमृषिं तं सुमेधां अहं रुद्राय धनुरातनोमि ब्रह्मद्विषे शरवे हन्त वाउ । अहं जनाय समरं कृणोम्यहं द्यावापृथिवी आविवेश । अहं सुवे पितरमस्य मूर्धन्मम योनिरप्स्वन्तस्समुद्रे ततोऽवतिष्ठे भुवनानि विश्वोतामूं द्यां वर्ष्मणोपस्पृशामि । अहमेव वात इव प्रवाम्यारभमाणा भुवनानि विश्वा । परो दिवा पर एना पृथिव्यै तावती महिना सम्बभूवे'ति भवान्याः—(१अहीमित्यादि अमरणस्य ऋषेः दुहिता वा कन्यैव भवान्या अवतारा वैदिकेषु प्रसिद्धेः । सा जगत्कारणतया आत्मानमुक्तवती—अहमेवेदं वदामि किं मानुषैश्च देवैश्च सेवितं यत् ब्रह्म यं पुरुषं अनकम्पितं कामये इच्छामि, तमुग्रं सर्वोत्कृष्टं करोमि ब्रह्माणं स्रष्टारं ऋषिं अतीन्द्रियार्थदर्शिनं सुमेधां सुप्रज्ञं रुद्राय रुद्रस्य आतनोमि ज्यायुक्तं करोमि ब्रह्मद्विषो ब्राह्मणद्वेष्टारं शरवे शरं हिंसकं हन्त वै हन्तुं उः

---

१. ईश्वरी सर्वभूतानां तामिहोपह्वये श्रियमित्यादि लक्ष्म्याः तस्यास्सप्तधा आप विश्वन्ति तेन जीवन्ति प्रदिशश्चतस्रः ततः क्षरत्यक्षरन्तद्विश्वमुपजीवति । प्रणो देवी सरस्वती वाजेभिर्वाजनीवती । धीनामवित्र्यवत्वित्यादि सरस्वत्याः । अनुक्रमणिकाव्याख्याने तस्या इति वाचस्समुद्रा आप इत्युक्तम् । एवं भारतपुराणवचनान्यनन्तान्युक्तार्थानि सन्ति । विस्तरभयान्न लिख्यन्ते ॥ इति पाठान्तरत् ॥

पादपूरणार्थः । समरं सङ्ग्रामं कृणोमि किमर्थं जनाय मदीयस्तवादियुक्तजनाय तदीयजयार्थं करोमि । यथा कुरुपाण्डवयुद्धे कृष्णं प्रति तेनार्जुनेन स्तुता तदीयजयार्थं सङ्ग्रामं कृतवती । द्यावापृथिवी दृश्यमात्रं आविवेश अन्तर्यामिरूपेण प्रविष्टा । पितरं द्युलोकं सुवे प्रसुवे जनयामि । द्यौः पिते'तिश्रुतेः । अस्य भूलोकस्य मूर्धन् मूर्धनि । समुद्रे ब्रह्मणि अप्सु भूतेषु अन्तर्यामिकारणरूपा मम योनिः यस्यामीक्षणरूपं करोमि । ममयोनिर्महद्ब्रह्म तस्मिन् गर्भं दधाम्यहमिति गीतोक्तेः । ततः हेतोः विश्वानि भुवनानि अनुतिष्ठे अनुप्रविश्य विविधं तिष्ठामि । उत अपि च वर्ष्मणा मायाशरीरेण वात इव अन्यप्रेरिता सती प्रवामि वर्ते । विश्वानि भुवनानि जनयन्ती दिवा द्युलोकस्य एताः पृथिव्याः अस्याः भूमेः परः परस्तात् अहं सम्बभूवेति । एवं श्रुत्यन्तरमपि 'ब्रह्म ह देवेभ्यो विजिग्ये तस्य ह ब्रह्मणो विजये देवा अमहीयन्त त ऐक्षन्त अस्माकमेवायं विजयोऽस्माकमेवायं महिमेति तद्धैषां विजज्ञौ तेभ्यो ह प्रादुर्बभूव तन्न व्यजानत किमिदं यक्षमितीत्यादि अथेन्द्रमब्रुवन्मघवन्नेतद्विजानीहि किमेतद्यक्षमिति तथेति तदभ्यद्रवत् तस्मात्तिरोदधे स तस्मिन्नेवाकाशे स्त्रियमाजगाम बहुशोभमानामुमां हैमवतीं तां होवाच किमेतद्यक्षमिति ब्रह्मेति होवाच ब्रह्मणो वा एतद्विजये महीयध्वमिति ततो हैव विदाञ्चकार' इति । तत्रायमर्थः—देवासुरयुद्धे देवेभ्यः देवानां रक्षणाय देवशरीरेषु प्रविश्यादेवान्विजिग्ये ब्रह्माजयत् । ततो देवाः तेन जयेन अमहीयन्त तं महिमानं प्राप्तवन्तः । अस्माकं अस्मत्कर्तृक एव जयः तत्प्रयुक्तमहिमा चेति ऐक्षन्त मिथ्याभिमानं कृतवन्तः । तदीक्षणं ब्रह्म विजज्ञौ ज्ञातवत् । तेभ्यः तेषां मिथ्याभिमाननाशायाद्भुतरूपेण ब्रह्म प्रादुर्बभूव । तद्रूपं देवास्सर्वे न व्यजानन्त किमिदं यक्षं पूज्यं वस्तु किमिति । तं देवा अज्ञात्वा इदम्मघवन्विजानीहि किमेतद्यक्षमिति । ततः तथेति स्वीकृत्य इन्द्रः तदभ्यद्रवत् तदन्तिके गतः । तस्य स्वस्मिन् मनः प्रणिधाय तद्यक्षमन्तर्धानं गतवत् । ततस्सर्वदेवानां परमाप्तेन जगन्मातृरूपेण निजरूपान्तरेण अन्तर्धानस्य तस्मिन् आकाशे अवकाशे यत्र ब्रह्म प्रादुर्भूतं तां स्त्रियमुमानामिकां हिमवतो दुहितरमिन्द्र आजगाम । किमेतद्यक्षमिति पृष्टवान् । सा देवानां हितैषिणी तमुवाच ब्रह्मेति ब्रह्मणो जगदीश्वरस्यैव एतत् । तत्कृत एव असुरविजयः । न तु युष्मत्कर्तृकः । तत्रैव यूयम्महीयध्वम् । ब्रह्मणः युष्मासु पक्षपातः नत्वसुरेष्विति । स्वीयं महिमानं स्वीकुरुत जयाभिमानं तु न कुरुतेति । अत्र उमादेव्या ईश्वरत्वं स्पष्टम् । अन्यथा देवानामनीश्वराणां सर्वेषां यक्षाज्ञानस्य पूर्वमुक्तत्वात् ब्रह्मवि-

द्याधिष्ठातृत्वेन ईश्वरसहवासशीलसत्त्वेऽपि अनीश्वरत्वात् यक्षतत्त्वोपदेशकर्तृत्वास म्भवात् । 'ईश्वरीं सर्वभूतानां तामिहोपह्वये श्रियम्' इत्यादिलक्ष्म्याः । 'तस्या स्समुद्रा अधिविक्षरन्ति । तेन जीवन्ति प्रदिशश्चतस्रः । ततः क्षरत्यक्षरं तद्विश्व मुपजीवति । प्रणो देवी सरस्वती वाजेभिर्वाजिनीवती । धीनामविट्यवतु' । इत्यादि सरस्वत्याः । तस्याः वाचः सकाशात् समुद्राः मेघाः नद्यश्च सम्यक् द्रवति जलमस्मादिति व्युत्पत्तेः अधि अधिकं प्रभूतं उदकं विक्षरन्ति वाग्देवतारूपेशप्रेरिता मेघनद्यादयः जलक्षरणादि कुर्वन्तीत्यर्थः । 'एतस्य वा अक्षरस्य प्रशासने गार्गि प्राच्योऽन्या नद्यस्स्यन्दन्ते । श्वेतेभ्यः पर्वतेभ्यः, प्रतीच्योऽन्या इति श्रुत्यन्तरात् । ततः पश्चात् तदक्षरप्रेरितमेघादिसम्बन्धि जलं क्षरते । सस्यादिकार्यं करोति । विश्वं प्राणियत् तदुपजीवति । सरस्वती देवी वाजिनी अन्नादिस्वामिनी वाजेभिः अन्नैः नः अस्मान् अवति रक्षति प्रावर्तते । एवं धीनां मनोवृत्तीनां अवित्री असद्विषयेभ्यो वारयन्ती सद्विषय एव प्रावतु प्रेरयतु । तन्प्रेरकत्वेनान्तर्यामितया ईश्वरत्वम् । एवं भारतवचनानि उक्तार्थान्यनन्तानि सन्ति । विस्तरभयात् न लिख्यन्ते । ननु, नवकोट्यस्तु चामुण्डाः भेदभिन्ना व्यवस्थिताः । या रौद्री तामसी शक्तिः चामुण्डा सा प्रकीर्तिता । अष्टादश तथा कोट्यः वैष्णव्या भेद उच्यते । या सा तु राजसी शक्तिः पावनी सैव वैष्णवी । या ब्रह्मशक्तिस्सत्त्वस्था सानन्ता वै प्रकीर्तिता ॥' इत्यादिवाराहपुराणवचनैर्भवान्यादीनां शक्तिरूपता उक्ता । अत्र मूले तु चतुर्भुजाद्याः पुमाकाराश्रीभारतीभवान्याद्याः स्त्र्याकारा इति क्रमस्वारस्यात् विष्णुब्रह्मरुद्रभेदादित्यादिक्रमस्वारस्याच्च विष्णुब्रह्मशिवरूपत्वं श्रीभारतीभवानीनाभुक्तम् । तदिदं मिथोविरुद्धमिति चेन्न । सेयम्माया चैतन्यदीप्रा ब्रह्मविष्णुशिवरूपिणीत्यादिश्रुतेः 'साभासाज्ञानवाची यदि भवति पुनर्ब्रह्मशब्द' इत्यादिसंक्षेपशारीरकोक्तेः प्रकृत्याः प्रथमो भाग उमादेवी यशस्विनी । व्यक्तस्सर्वमयोविष्णुः स्त्रीसंज्ञालोकभावन' इति हरिवंशाद्युक्तेः चिदाभासयुक्ताज्ञानस्यैव वार्तिकमते ईश्वरत्वस्वीकाराच्च विष्णुब्रह्मशिवानामपि साभाससत्त्वरजस्तमोरूपत्वेन शक्तिरूपत्वाविरोधात् सत्त्वादिगुणत्रयगताभासातिरिक्तचितोऽपि वार्तिकमते ईश्वरत्वस्वीकाराच्च कारणभूतसत्त्वगुणावच्छिन्नचैतन्यं विष्णुरित्यादिमूलस्यापि सङ्गतेः । ननु, तथापि राजसीशक्तिः वैष्णवी कथम् । सात्त्विक्या एव शक्तेः वैष्णवीत्वौचित्यादिति चेन्न । 'परित्राणाय साधूनां विनाशाय च दुष्कृताम् । धर्मसंस्थापनार्थाय सम्भवामि युगे युगे ॥' इत्यनेन विष्णोरतिशयितप्रवृत्तिमत्त्वेन तच्छक्तेरेव प्रवृत्त्यतिशयप्रयो-

नत्वेन राजसीत्वौचित्यात् । ब्रह्मणस्तु महाभूतमात्रस्रष्टृत्वेन न तथात्वम् । अत एव कमण्डलुजलक्षेपहतवीर्यानित्यादिकमुक्तम् । न तु युद्धादिप्रवृत्तिरिति ध्येयम् । भक्तेनापि न कात्स्न्र्येन ज्ञेया भक्तिर्जगद्गुरोः । किं तु लेशेन तज्ज्ञप्तिः परिपाकजुषापि च। उक्तं हि यमेन स्वभटान् प्रति—'स्वयंभूर्नारदश्शम्भुः कुमारः कपिलो मनुः । प्रह्लादो जनको भीष्मो बलिर्वैयासकिर्वयम् । द्वादशैते विजानन्ति धर्मान् भागवतान् भटाः ॥' इति । तथापि तद्गुणाः केचित् श्रुता वाचालयन्ति माम् । अयोग्यत्वेऽपि सत्त्वस्य शुद्ध्यै तान् कथयाम्यहम् । तत्र भक्तिर्भजनं कायेन मनसा वाचा वा निष्पाद्यो भजनीयस्य तुष्टो हेतुर्व्यापारः भजमानपुरुषनिष्ठः । तत्र विभागो भागवतादावुक्तः—'श्रवणं कीर्तनं विष्णोः स्मरणं पादसेवनम् । अर्चनं वन्दनं दास्यं सख्यमात्मनिवेदनम् । इति पुंसार्पिता विष्णौ भक्तिश्चेन्नवलक्षणा । क्रियते भगवत्यद्धा तन्मन्येऽधीतमुत्तमम् ॥' भगवति सर्वात्मके परमप्रेमास्पदे अर्पिता पूर्वमपि विद्यमाना भक्तिः यदि शास्त्रेणाधीतेन नवलक्षणा क्रियेत, तदा तदधीतमुत्तमं मन्ये । तच्छब्दस्य उत्तरवाक्यस्थत्वात् न यच्छब्दापेक्षा । अयं भावः—विष्णोस्सर्वजीवात्मभूतत्वादात्मनि सर्वेषां जीवानां सदा भूयासमिति प्रेमसत्त्वात् स्वाभाविकतया अनुरागविशेषनियता भक्तिः विष्णावस्त्येव सार्वदिकी । सा तु शास्त्रेणाधीतेन नवविधा क्रियते श्रवणादिस्वरूपज्ञानस्य श्रोतव्यकीर्त्तनीयादिगुणग्रामज्ञानस्य श्रवणादीतिकर्तव्यताज्ञानस्य शास्त्राधीनत्वात् । किं च पूर्वं स्वस्य वा पुत्रभार्यादेर्वा श्रवणादि कृतं तद्विष्णोरेव कृतम् । शास्त्रे अधीते तु अद्धा-साक्षादेव विष्णौ क्रियते । सर्वं विष्णुरिति ज्ञानात् विष्णोरेव श्रवणादि सदा करोमीति ज्ञायते । सर्वं विष्णुरिति ज्ञानाभावेऽपि पुत्रादेः श्रवणादिकं नादरेण करोति । किं तु विष्णोरेव निखिलमङ्गलगुणवत्त्वेन ज्ञानात् साक्षात् श्रवणादि क्रियत इति उत्तममिति । श्रवणादेरुक्तज्ञानजननद्वारा श्रवणाद्यनुष्ठानमधीतशास्त्रस्य फलम् । तत्प्राप्तौ सत्यामधीतमुत्तमं मन्ये । तदप्राप्तौ गुणमात्ररूपमपि तज्ज्ञोत्तमम् । मुक्तावपर्यवसानादित्यर्थः । अथ श्रवणादेः किं स्वरूपम् । उच्यते—विष्णोस्सगुणस्य वा निर्गुणस्य वा शब्देन ज्ञानं तादृशविष्णुप्रतिपादकशब्दस्य श्रोत्रेण ग्रहणं च श्रवणम् । तच्च सर्वं सगुणस्य प्रीतिकरम् । साधारणोऽपि हि जनः तादृशे स्वयंश्रवणे प्रीणाति । उक्तं हि गीतायां— 'प्रियो हि ज्ञानिनोऽत्यर्थमहं स च मम प्रियः ।' इति । तादृशज्ञानरूपस्य श्रवणस्य कीर्तनहेतुत्वात्तदाह—कीर्तनमिति । सगुणस्य वा निर्गुणस्य वा बोधकस्य शब्दस्योच्चारणम् । तत्राद्यस्य तत्प्रीतिकरत्वं स्पष्टम् । द्वितीयमपि तथा । प्रणवाद्युच्चारणस्यातिप्रीतिकरत्वेन भाष्यादावुक्तत्वात्

Vide ब्रह्मानुचिन्तनम् (18)

'अशक्नुवन् भावयितुं वाक्यमेव समभ्यसेदि'त्याचार्योक्तेश्च । तादृशविष्णोश्चानुभूतत्वात् स्मरणं जायते। अतस्तदुत्तरं स्मरणमुक्तम् । तच्च तादृशविष्णोः शब्दानुकरणे । तज्ज्ञानं च श्रोत्रेण तद्ज्ञानस्य श्रावणत्वात् तस्य प्रीतिकरत्वं स्पष्टम् । पादसेवनं परिचर्या विष्णुप्रतिमापादसम्बन्धिगृहलेपनादिरूपा । 'अविद्यो वा सविद्यो वा ब्राह्मणो मामकी तनू'रिति भगवदुक्तेः। ब्राह्मणरूपस्य भगवद्देहस्य भगवदुक्तस्य वा पादसंवाहनादिरूपा च । अर्चनं श्रवणादिभिन्नो विष्णुप्रीतिहेतुव्यापारः । वन्दनं पूजार्हमूर्तिनमस्कारः प्रतिमादौ । दास्यं दासभावः सेवा विष्णुप्रीतिफलकं सर्वकर्मानुष्ठानम् । 'यत्करोषि यदश्नासी'त्यादिना लौकिकसकलक्रियासमर्पणस्य भगवति कर्तव्यत्वेनोक्तत्वात् । क्रियाया भगवत्प्रीतिफलकतापर्यवसानमेव हि भगवति समर्पणं विष्णुप्रीतिमुद्दिश्य तदनुष्ठानमिति यावत् । तच्च त्रिविधम् । पापक्षयमुद्दिश्य भगवत्प्रीतिमुद्दिश्य किमप्यनुद्दिश्य वा । तदुक्तं भागवतादौ— 'कर्मनिर्हारमुद्दिश्य परस्मै वा तदर्पणम् । यजेद्यष्टव्यमिति वा पृथग्भावस्स सात्विकः । इति कर्मनिर्हारः पापनाशः । परस्मै विष्णवे । तदर्पणं यागादिकर्मार्पणम् । विष्णुप्रीतिमुद्दिश्य तदनुष्ठानमिति यावत् । यष्टव्यमिति यजेत् । भगवदाज्ञारूपेण वेदेन कर्तव्यतया बोधितमिति मत्त्वेव यजेत् । न तु किञ्चिदुद्दिश्येत्यर्थः । एवं त्रिविधभावयुक्तः स सात्त्विकः । उक्तक्रमेणापकृष्टमध्यमोत्तमसात्त्विका इत्यर्थः । ननु, पापक्षयरूपस्वगतफलकामेन क्रियमाणस्य कर्मणः दास्यरूपत्वे स्वर्गादिकामेन क्रियमाणमपि तथा स्यादिति चेत्, न । पापस्य ईश्वरं प्रत्यपराधजन्यत्वेन तत्क्षयकामेन क्रियमाणस्यापि दास्यत्वौचित्यात् । अपराधिनो हि प्रभुं प्रति दास्यमाचरन्तोऽपराधान्मुच्यन्त इति लोके दृष्टम् । ननु प्रभोः कोपहेतुव्यापारः अपराध इति लोके व्यवहारः । पापजनकस्यापराधत्वे तथात्वं स्यादिति चेत्, स्यादेव, 'फलमत उपपत्ते'रित्यधिकरणे महर्षिणा बादरायणेन विहितनिषिद्धयोरीश्वरप्रसादकोपजनकत्वोक्तेः,तथापि पापनाशफलकक्रियायाः विष्णुप्रीतिफलत्वमपीति वाच्यम् । विहितक्रियासामान्यस्येश्वरप्रसादजनकत्वात् ईश्वरप्रसादस्यैव पुण्यरूपस्य बादरायणसम्मतत्वात् । अथैवं स्वर्गादिफलकक्रियापि दास्यं स्यादिति चेन्न । कर्तृसुखजनकेश्वरप्रीतिफलकक्रियाया एव दास्यभक्तित्वात् । अत एव 'यस्त आशिष आशास्ते न स भृत्यस्स वै वणिक्' । इत्युक्तं भागवते । स्वर्गादिसुखानि आशास्ते इच्छति । भृत्यः दासः । ते तव । एवं च कर्तृनिष्ठसुखफलकक्रियायाः राजसतामसभक्तित्वेन भागवतादावुक्तायाः अर्चनमध्ये निवेशो बोध्यः । अत एव 'स्वकर्मणा तमभ्यर्च्ये'ति गीता । न चैवं पापनाशाद्यु-

देशेन कृतश्रवणादिकमपि दास्यं स्यादिति वाच्यम् । दास्यलक्षणे श्रवणाद्यन्यत्वस्यापि निवेशात् । मातापित्रादीनां विष्णुबुद्ध्या दासवत् शुश्रूषणमपि दास्यमिति बोध्यम् । सख्यं प्रेमविशेषादिरूपम् । यथा सख्यौ, तथा विष्णौ । यथा च उपादेयं भक्ष्यादिकं प्राप्तं सख्ये निवेद्यते प्रेमविशेषपूर्वकं तथा विष्णवे । यथा सख्युः दूषणादिकं परेण क्रियमाणं सोढुं न शक्यते, तथा विष्णोस्तच्च सोढव्यम् । यथा तदीयकर्म स्वकीयकर्मवत् क्रियते, तथा विष्णुकर्म कार्यम् । अयम्मादिष्टं साधयिष्यत्येवेति विश्वासेन सख्युरनुवृत्तिः क्रीयते, तथा विष्णोरित्यादि । आत्मनिवेदनं स्वस्य निवेदनत् । यथा विक्रीतस्य गवादेः योगक्षेमचिन्तयामनभिनिवेशः, तथा स्वकीयायां योगक्षेमचिन्तायाम् । 'अनन्याश्चिन्तयन्तो मां ये जनाः पर्युपासते । तोषां नित्याभियुक्तानां योगक्षेमं वहाम्यहं ॥ इति भगवदुक्तं प्रतिसन्धाय सदा विष्णुरेव चिन्त्य इत्यर्थः । विष्णुस्वरूपे सत्यज्ञानानन्दात्मके अभङ्गसाक्षिरूपे स्वाभेदज्ञानमपि आत्मनिवेदनं बोध्यम् । एतस्याः भक्तेः उक्तविश्वासादिरूपसख्याधीनत्वेन तदुत्तरमुक्तिः । दास्यस्यापि 'विष्णुः सर्वोत्कृष्टः अहं तदपेक्षयापकृष्ट' इतिज्ञानाधीनत्वात् तादृशज्ञानपूर्वककराशिरस्संयोगरूपवन्दनसापेक्षत्वात् वन्दनोत्तमुक्तिः । पञ्चोपचारादिसाधनके अर्चने चिरं अभिनिविशमानः भक्तः आलोचयति किमस्य सर्वलोकनाथस्य परमसात्विकगणैरर्च्यमानस्य मादृशेन वराकेणार्चनमिति । ततश्च अर्चनाभिनिवेशात् वन्दनादिष्वेव कायिकादिष्वभिनिविशते । अतोऽर्चनोत्तरं वन्दनमुक्तम् । गृहलेपनादिरूपपादसेवने कृते पाद्यादिसमर्पणरूपमर्चनमभिलषतीति पादसेवनोत्तरमर्चनमुक्तम् । पादसेवनमर्चनादिकं गुणग्रामस्मरणाधीनम् । अतः स्मरणोत्तरं पादसेवनादिकमुक्तम् । स्मरणस्यापि श्रवणकीर्तनाधीनत्वात् कीर्तनस्यापि श्रवणाधीनत्वात् तयोरुत्तरयोः उक्तिः । उक्तश्रवणादिलक्षणानां क्वचिदेकत्र मेलनेऽपि न दोषः । एकस्यानेकविधभक्तित्वसम्भवात् । अत्रेदं विवेचनीयं । श्रवणादीनां सगुणनिर्गुणविषयतया सङ्कीर्णानां साधनभक्तित्वमेव । सख्यस्य तु साधनसाध्योभयविधभक्तित्वम् । प्रेममात्रस्य साधनत्वेऽपि परमकाष्ठापन्नप्रेम्णः सगुणविषयश्रवणादिसाध्यत्वात् । तदुक्तं विष्णुपुराणे प्रह्लादविष्णुसंवादे— 'यापीतिरविवेकानां विषयेष्वनपायिनी । त्वामनुस्मरतस्सा मे हृदयान्मापसर्पतु ॥' अनपायिनी अव्यभिचारिणी । त्वामनुस्मरतः त्वदीयश्रवणादि कुर्वतः । सा तादृशी । तादृशस्य समुणविषयकप्रेम्णः । निर्गुणश्रवणादिसहितस्य चरमात्मनिवेदनरूपा ब्रह्मात्मैक्यसाक्षात्काररूप-

ज्ञानलक्षणा भक्तिः फलम् । ' यस्य देवे परा भक्तिः यथा देवे तथा गुरौ । तस्यैते कथिता ह्यर्थाः प्रकाशन्ते महात्मनः ॥' इति श्रुतेः । 'मयि चानन्ययोगेन भक्तिरव्यभिचारिणी'ति गीतोक्तौ तादृशप्रेमरूपस्य चरमभक्तिज्ञानसाधनत्वोक्तेः । चकारात् पूर्वोक्तामानित्वमदाम्भित्वमित्यादिसाधनसमूहस्य समुच्चयः । भागवतेऽपि उक्तं— 'मद्गुणश्रुतिमात्रेण मयि सर्वगुहाशये । मनोगतिरविच्छिन्ना यथा गङ्गाम्भसोऽम्बुधौ ॥ लक्षणं भक्तियोगस्य निर्गुणस्य ह्युदाहृतम् । अहेतुक्यव्यवहिता या भक्तिः पुरुषोत्तमे ॥ श्रुतिमात्रेणोपस्थितिमात्रेण कारणेन तत्कार्यस्योक्तप्रेम्णः ग्रहणम् । तस्यैव निर्गुणभक्तिचरमसाधनत्वात् । सर्वगुहाशये सर्वदृश्याधिष्ठानभूते । अविच्छिन्ना क्वचिदपि विषयेऽनवच्छिन्ना सर्वं विष्णुरेवेत्याकारेति यावत् । मनोगतिः मनोवृत्तिः । यथा गङ्गा पूर्वपश्चिमादिसमुद्रभागेषु धाराचतुष्टयेन गच्छन्ती समुद्रभागेषु सर्वेषु सम्बध्यते, तथा मनोवृत्तिरपि सकलदृश्यावच्छिन्नेषु मद्भागेषु सम्बध्यते । ब्रह्माण्डस्यान्तर्बहिश्च सर्वं विष्णुरेवेति सर्वानुस्यूततया सर्वदृश्यानां अधिष्ठानतया ज्ञायत इति यावत् । स्वरूपमुक्त्वा लक्षणमाह— लक्षणमित्यादि । अहेतुकी फलानुसन्धानशून्या । न हि ज्ञानस्य फलमस्ति । तथा अस्य सकलविरोधितया मोक्षं प्रति व्यञ्जकत्वमात्रस्वीकारात् अव्यवहिता अहमेव विष्णुरिति स्वाभेदेन क्रियमाणा । अत एव बृहन्नारदीयादावुक्तं— 'अहमेव परो विष्णुः मत्तस्सर्वमिदं जगत् । इति यस्सन्ततं पश्येत्तं विद्यादुत्तमोत्तमम् ॥' इति । स च ब्रह्मसाक्षात्कारहेतुपरमप्रेमा त्रिधा । तस्यैवाहं ममैवासौ स एवाहमिति त्रिधा । भगवच्छरणत्वं स्यात्साधनाभ्यासपाकतः ॥' इति । स एवाहमिति फलावस्थापि साधनस्य समकक्षतया उक्तप्रेम्ण एव साध्यरूपापत्त्या । गीतादौ 'सर्वधर्मान् परित्यज्य मामेकं शरणं व्रजे'ति सर्वेषु धर्मेषु शरणताबुद्धिं त्यक्त्वा मय्येव तां कुरु तादृशबुद्धिहेतुं उक्तप्रेमाणं कुर्विति यावत् । वस्तुतस्तु प्रेमरूपसख्यभक्तेः फलमात्मानिवेदनम् । अत्र त्रिविधत्वेन उक्ते आद्यं तस्यैवाहमित्याद्याकारत्वात् स्वीयपालनादित्यागेन विष्णुचिन्तारूपम् । द्वितीयं तु प्रेमातिशयेनेतरजीवादिद्वैततिरोधानात् सच्चिदानन्दविष्णुप्रेमरूपमिति विवेकः । तस्य परमप्रेम्णः साधनरूपा श्रवणादिभक्तिः तत्साध्यात्मनिवेदनपर्यन्तापि उत्तमसात्विकोत्तमराजसोत्तमतामसमध्यमसात्विकादित्रयाधामसात्विकादित्रयभेदेन एका त्रिभेदा । तत्र सात्विकत्रयं कर्मनिर्हारेत्यादिना उक्तम् । 'विषयानभिसन्धाय ज्ञानमैश्वर्यमेव वा । अर्चादावर्चयेद्यो मां प्रथग्भावस्स राजसः ।'इति राजसत्रयम् ।'अभिसन्धाय चेद्धिंसां दम्भं मात्सर्यमेव वा । स्मरन्विभिन्नदृग्भावं मयि कुर्यात्स तामसः ॥' इति । इति

कूर्मादयोऽनन्तावतारा लीलयैवाविर्भवन्ति भक्तानुग्रहार्थमित्यवधेयम् । चिन्मयस्याद्वितीयस्य निष्कलस्याशरीरिणः । उपासकानां कार्यार्थं ब्रह्मणो रूपकल्पना ॥ जीवोऽपि त्रिविधः । स्वोपाध्यवान्तरभेदेन विश्वतैजसप्राज्ञभेदात् । तत्र अविद्यान्तःकरणस्थूलशरीरावच्छिन्नो जाग्रदवस्थाभिमानी विश्वः । स एव स्थूलशरीराभिमानरहित उपाधिद्वयोपहितः स्वप्नाभिमानी तैजसः । शरीरान्तःकरणोपाधिद्वयरहितोऽन्तःकरणसंस्कारावच्छिन्नाविद्यामात्रोपहितः सुषुप्त्यभिमानी प्राज्ञः । एतेषां च स्वतन्त्रोपाधिभेदाभावेन स्वतन्त्रभेदाभावेऽप्यवान्तरोपाधिभेदादेकत्वेऽप्यवान्तरभेदो व्यवह्रियते । साक्षी तु सर्वानुसन्धाता सर्वानुगतस्तुरीयाख्य एकविध एव । तत्रोपाधिभेदेनापि नकचिद्भेदः । तदुपाधेरेकरूपत्वात् । अविद्यातद्व्याप्यतत्कार्यात्मकः प्रपञ्चो दृश्यपदार्थः । तस्यापारमार्थिकत्वेऽपि व्यावहारिकसत्त्वाभ्युपगमात् न स्वाप्निकपदार्थवन्निरूपणं व्यर्थम् । उपासनादावुपयोगादिति । सोऽपि त्रिवि-

---

भक्तिविवेचनम् ॥) **तत्राविद्येत्यादि** । 'जागरितस्थानो वैश्वानरस्स्वप्नस्थानस्तैजसः, सुषुप्तस्थानः प्राज्ञ' इत्यादिमाण्डूक्यादिश्रुतिभिर्जागराद्याभिमानिनां विश्वादिसंज्ञा उक्ताः । अभिमानित्वं च उपाधित्रयद्वयैकावच्छिन्नानां क्रमेण योग्यत्वादित्याशयः । **स्थूलशरीराभिमानेति** । व्यावहारिकस्थूलशरीराभिमानेत्यर्थः । **स्वतन्त्रोपाधीति** । निरपेक्षत्रयोपाधीत्यर्थः । **स्वतन्त्रभेदेति** । अत्यन्तभेदेत्यर्थः । **अवान्तरोपाधीति** । संस्कारावच्छिन्नत्वादिरूपोपाधिविशेषणेत्यर्थः । एकत्वेऽपि तादात्म्येऽपि । यथा घटपटयोरमिलितत्वेन निरपेक्षयोस्स्वोपहिताकाशभेदकत्वमत्यन्तभेदप्रयोजकत्वरूपम् । यथा वा बिम्बत्वप्रतिबिम्बत्वयोस्तादृशयोस्तथात्वं, तथा संस्कारावच्छिन्नाविद्यादीनां प्राज्ञादिषु विश्वादितो नात्यन्तभेदकत्वम् । विश्वाद्युपाधिमध्येऽविद्यादीनां निवेशात् य एव सुषुप्ताववियोपाधिकः स्थितः, स एव जागरे इदानीमुपाधित्रयोपहित इति प्रत्ययाच्च । न हि मलिनतद्वस्त्रवतश्चैत्रस्य निर्मलतद्वस्त्रविशिष्टचैत्रादत्यन्तभेदो व्यवह्रियते । प्रत्युत य एव मलिनतद्वस्त्रः स्थितः, स एवेदानीं निर्मलतद्वस्त्र इति अभेद एव प्रतीयते । वस्तुतस्तु दृष्टान्ते मालिन्योपलक्षिततद्वस्त्रोपहितस्यैव निर्मलवस्त्रोपहिततादात्म्यं प्रतीयते । न तु मालिन्योपहिततद्वस्त्रोपहितस्येति दार्ष्टान्तिकेऽपि संस्कारोपहिताविद्यादिमद्भेदस्य विश्वादिष्वस्वीकारे तात्पर्यमिति बोध्यम् । **भेदेनापीति** । बिम्बत्वोपहितस्य साक्षित्वपक्ष इति शेषः । **तद्व्याप्येति** । अविद्याचितोस्सम्बन्धादित्यर्थः । **साभासेत्यादि** । साभासा अविद्या-

धः । अव्याकृतमूर्तामूर्तभेदात् । तत्र साभासाविद्या मूर्तामूर्तप्रपञ्चबीजशक्तिरूपा । तदजन्यत्वेऽपि तन्निवृत्तौ निवर्तमानत्वेन तद्व्याप्यैः चैतन्यतत्सम्बन्धजीवेश्वरविभागचिदाभासैः सहानादित्वादव्याकृतमित्युच्यते । अयं चाव्याकृतपदार्थ ईश्वरोपाधिः । सा च स्वयं जडाप्यजडेन चिदाभासेनोज्वलिता पूर्वपूर्वसंस्कारजीवकर्मप्रयुक्ता सती शब्दस्पर्शरूपरसगन्धात्मकान्याकाशवायुतेजोजलपृथिव्याख्यानि पञ्च महाभूतानि जनयति । तत्र पूर्वपूर्वभूतभावापन्नाया अविद्याया उत्तरोत्तरं प्रति कारणत्वात् पूर्वपूर्वभूतगु-

---

तद्व्याप्यैश्चैतन्यसम्बन्धादिभिः सहिता अव्याकृतमित्युच्यते इति योजना । **बीजशक्तिरूपेति** । प्रयोजकशक्तितादात्म्यापन्नेत्यर्थः । शक्तिश्च त्रिधा । अदृष्टं पूर्वसंस्काररूपा सूक्ष्मावस्था अज्ञाननिष्ठावरणविक्षेपशक्ती च। एवं चादृष्टादीनां अव्याकृतमध्ये निवेशाभावेऽपि न क्षतिः । अत एव वक्ष्यति पूर्वपूर्वजीवकर्मप्रयुक्तेति । ननु, चैतन्याविद्यासम्बन्धादेरविद्याकार्यत्वाभावात् कथं तद्व्याप्यता । तत्राह—**तदजन्यत्वेऽपीति** । **तन्निवृत्तौ निवर्तमानत्वेनेति** । यद्यपि तत्राविद्याकार्यं, तथापि यदा यदा चैतन्यतत्सम्बन्धादि. तदा तदाविद्येति कालिकव्याप्तिरस्त्येव । अविद्योच्छेदक्षण एवाविद्याचित्सम्बन्धादेरप्युच्छेदात् । शुक्त्याद्यवच्छिन्नचिदविद्यासम्बन्धादौ तथादर्शनात् । **चैतन्यतत्सम्बन्धेति** । चिदविद्यासम्बन्धेत्यर्थः । **जीवेशविभागेति** ।जीवेशभेदेत्यर्थः । जीवेशयोस्तु दृश्यन्तर्भावः । नाव्याकृते दृश्ये । **चिदाभासेति** । चित्तादात्म्यापन्नाभासेत्यर्थः । साभासेत्यनेनैवाभासस्य लब्धत्वेऽपि तस्य तद्गतचित्तादात्म्यस्य चाविद्याव्याप्यतालाभाय चिदाभासेत्युक्तम् । तथा च अनादिपञ्चकमेव शक्तिद्वयसंस्काराद्दष्टसहितमव्याकृतमित्युच्यते । व्याक्रियमाणाकाशादिकार्यान्यत्वादिति भावः । 'तद्धेदन्तर्ह्यव्याकृतमासीत् तन्नामरूपाभ्यां व्याक्रियत' इत्यादिश्रुतिभिस्तु अव्याकृतपदार्थैकदेशस्यैवाज्ञानस्य उपादानत्वादिकमुच्यते । शक्तिद्वयोपहिताज्ञानस्य परिणामित्वात्तद्गतचिदाभासस्य वार्तिकमते उपादानत्वात्कर्तृत्वाच्च अज्ञानस्येव तुल्यन्यायेन अज्ञानसम्बन्धादेः कालविधया निमित्तत्वात् अदृष्टादेर्निमित्तत्वादित्याशयेनाह—**सा चेति** । चिदाभासेनोज्वलिता चिदाभासरूपेणेश्वरेणाधिष्ठिता । प्रयुक्ता सहकृता । **गन्धात्मकानीति** । गुणगुणिनोस्तादात्म्यस्वीकारात् । युक्तमेतत् । अत एव श्रुतौ गुणानां पृथक्सृष्टिर्नोक्ता । **भूतभावापन्नाया इति** । भूतविशिष्टाया इत्यर्थः । तथा च पूर्वपूर्वभूतानामप्युत्तरोत्तरभूतेषूपादानत्वम् । अत एवाकाशादीनां वाय्वाद्यपेक्षया महत्त्वं

णानामुत्तरोत्तरभूतेष्वनुप्रवेशः । एवमविद्यात एवान्धकारोऽपि भावरूप एवावरणात्मा चाक्षुषज्ञानविरोधी आलोकनाश्यश्च झटिति महाविद्युदादिवदाविर्भवति तिरोभवति चेति सिद्धान्तः । संसारहेतुदेहोपादानत्वाभावाच्च न श्रुतिषु सृष्टिप्रक्रियायामाम्नात इत्यविरोधः । दिक्कालौ त्वप्रामाणिकत्वान्नोक्तौ । आकाशस्यैव दिग्व्यवहारजनकत्वसम्भवात् 'दिशः श्रोत्र'मिति श्रुतेश्च । कालस्त्वविद्यैव । तस्या एव सर्वाधारत्वादिति । तानि च सू-

---

पुराणाद्युक्तं युज्यते । न ह्याकाशादीनां कात्स्न्र्येन वाय्वादिरूपेण परिणामः । तथासति उत्तरोत्पत्तिकाले पूर्वपूर्वोच्छेदप्रसङ्गः । किं त्वेकदेशेन । तथा च सुतरां पूर्वपूर्वस्य महत्त्वम् । नन्वेवं प्रमा स्वनाश्यत्वादिविशिष्टवस्तुपूर्विका । प्रकाशत्वादालोकवदित्यनुमानादालोकस्य स्वनाश्यतमःपूर्वकत्वं स्वीकृत्य विवरणादिग्रन्थोक्तेः कथं सङ्गतिः । तमस आलोकनाश्यभावरूपत्वे श्रुतिषु तत्सृष्ट्युक्त्यापत्तेः आलोकरूपतेजोऽभावरूपत्वात्तत्राह—**एवमित्यादि** । आवरणात्मकत्वं प्रकटयति—**चाक्षुषज्ञानविरोधीति** । चाक्षुषधीप्रतिबन्धक इत्यर्थः । नन्वन्वयव्यतिरेकाभ्यामालोकस्य चाक्षुषहेतुत्वात् तमसस्तत्प्रतिबन्धकत्वे मानाभावस्तत्राह—**आलोकनाश्य** इति । आलोकस्य संयोगसम्बन्धेन चाक्षुषहेतुत्वे आलोके तदभावेन चाक्षुषं नोत्पद्येत । तस्माद्विषयतासम्बन्धेन चाक्षुषं प्रति अवच्छेदकतासम्बन्धेन तमः प्रतिबन्धकम् । आलोकासम्बन्धद्रव्यावच्छिन्नचैतन्ये तमउत्पत्त्या तत्र न चाक्षुषोत्पत्तिः । आलोकावच्छिन्नचैतन्ये तमोऽनुत्पत्त्या तत्र चाक्षुषोत्पत्तिः । आलोकस्य तमोनाशकत्वेन चाक्षुषोपयोगितया तदन्वयव्यतिरेकावुपक्षीणाविति भावः । ननु, तर्हि तमसः सृष्टिः कथं न श्रूयते । तत्राह—**संसारेति** । देहमध्ये तमस्सत्त्वे मानाभावेन तमसो न देहोपादानत्वम् । आकाशं त्ववकाशदानाय देहान्तरस्थेऽपीति भावः । **दिक्कालाविति** । कल्पितपदार्थान्याविति शेषः । श्रुतिषु सृष्टिप्रक्रियायामित्यनुषज्यते । **आकाशस्यैवेति** । पराभिमतादिश इव आकाशस्य सर्वगतत्वात् दिक्कृतविशेषणतासम्बन्धेन सर्वाधारत्वसम्भवात् उदयाचलसन्निकृष्टमूर्तविशेषोपहितत्वादिरूपेण प्राचीत्वादिसम्भवादिति भावः । ननु, आकाशः अविद्यादिकं वा दिगित्यत्र विनिगमकाभावात् अतिरिक्ता दिगास्ताम् । तत्राह—**दिश इति** । दिग्जन्य इत्यर्थः । तथा च श्रुतिरेव आकाशस्य दिक्त्वे मानम् । नभसत्वेन प्रमितस्य श्रोत्रस्य दिग्जन्यताबोधकत्वादिति भावः । **अविद्येति** । ननु, नेदं युक्तम् । प्रतिबिम्बत्वोपहितं जीवं प्रत्यविद्याया आधारत्वेऽपि ईशं प्रति तत्सत्त्वे मानाभावः । शुद्धं प्रति तु सुतराम् । तस्यैव सर्वाधारत्वात् । तत्राह—**तस्या एवेति** । सर्वाधारत्वात् कालिकसम्बन्धेन

क्ष्माण्यपञ्चीकृतानि पञ्च महाभूतान्यमूर्ताख्यानि कारणैक्यात्सत्वरजस्तमो-गुणात्मकानि सत्वांशप्राधान्येन ज्ञानक्रियाशक्त्यात्मकमेकं स्वच्छद्रव्यं चित्र-रूपमिव मिलित्वा जनयन्ति । तस्य च ज्ञानशक्तिप्रधानांशोऽन्तःकरणम् । तच्च बुद्धिर्मन इति द्विधोच्यते । क्रियाशक्तिप्रधानांशः प्राणः । स च पञ्च-धा प्राणोऽपानो व्यान उदानस्समान इति । एवमेकैकभूतेभ्यो ज्ञानक्रिया-शक्तिभेदात् प्रत्येकमिन्द्रियद्वयं जायते । आकाशाच्छ्रोत्रवाचौ, वायोस्त्व-क्पाणी, तेजसश्चक्षुष्पादौ, अद्भ्यो रसनपायू, पृथिव्याः घ्राणोपस्थौ । अत्र 'तेजोमयी वागि'ति श्रुतेस्तैजसी वाक् । पादस्तु नाभस इति केचित् । श-ब्दव्यञ्जकेन्द्रियत्वेन श्रोत्रवद्वाचो नाभसत्वम् । पादचिकित्सया च चक्षुषः

स्वेतरसर्वाधारत्वात् । ईशादिकमपि तत्सम्बन्धेन तद्वृत्ति । शुद्धचितस्तु तत्तद्वृत्ति-त्वाभावेऽपि न क्षतिः । 'ज्ञः कालकालो गुणिसर्वविद्या' इत्यादिश्रुतिषु सर्वदृश्या-धारकालाधारत्वस्य तस्यावगतत्वात् 'चक्षुषश्चक्षुरि'त्यादिश्रुतिषु दृश्यभासकच-क्षुरादिभासकत्ववत् । वस्तुतस्तु महाकाले मानाभावः । इदानीमिदमित्यादिबुद्धेर्ज-न्यमात्ररूपखण्डकालमात्रविषयकत्वमेव । अयं साभासाविद्यारूपः । अविद्यागता-भासाविविक्तचित एव ईश्वरत्वस्योक्तत्वात् साभासाविद्यायां ईश्वरोपाधित्वमिति भावः । स्वच्छत्वसम्पादनायाह—**सत्त्वांशप्राधान्येनेति** । ज्ञानक्रियाशक्त्यात्मकं ज्ञानक्रिययोर्जननानुकूले ये शक्ती, तद्विशिष्टम् । धर्मधर्मिणोस्तादात्म्यात् तदात्म-कत्वोक्तिः । प्रधानः उपहितः । **बुद्धिर्मन इति** । **द्विधेति** । बुद्धेरप्यहमित्याका-रानिश्चयतदन्यनिश्चयरूपवृत्तिभेदेनाहङ्कारोऽनहङ्कारश्चेति द्वैविध्यम् । मनोऽपि द्विविधं संशयवृत्त्या चित्तम् । सङ्कल्पादिवृत्तिभिरचित्तम् । 'कामस्सङ्कल्पो वि-चिकित्सेत्यादि' एतत्सर्वं मन एवेत्यादिश्रुतेः । **प्राण इत्यादि** । 'हृदि प्राणो गुदेऽपानस्समानो नाभिसंस्थितः । उदानः कण्ठदेशस्थो व्यानस्सर्वशरीरगः ।' इति हृदयाद्यवच्छिन्नक्रियाजनकत्वमेव प्राणत्वादिकमिति भावः । **शक्तिभेदादि-ति**। द्वयं द्वयमिति योजना । तथा चैकैकभूतेभ्यो ज्ञानशक्तिमदेकैकं क्रियाशक्तिमदेकैकं चेत्यर्थः । **शब्दव्यञ्जकेत्यादि** । वागिन्द्रियस्य शब्दोत्पादनद्वारा शब्दव्यञ्जकत्वम् । **पादचिकित्सयेत्यादि** । तथा च संस्कृतस्य पादस्य चक्षुस्स्वास्थ्योत्पादनद्वारा रूप-व्यञ्जकत्वात्तैजसत्वमिति भावः । एवं त्वचस्स्पर्शव्यञ्जकत्वेन पाणेः क्रियाशक्त्यादि-क्येन वायवीयत्वम् । स्पर्शो हि वायावेव प्रथममभिव्यक्तत्वाद्वायोरेव गुणः । वायूपादानकत्वात् भूतान्तरेऽनुगच्छति । एवं वायोरेव क्रियाशक्तिः । चलस्व-

स्वास्थ्यदर्शनाच्चक्षुर्वत्पादस्यापि तैजसत्वमिति तु युक्तमुत्पश्यामः । तेजोमयत्वश्रुतिस्तु मनसः पञ्चभूतकार्यस्यापि अन्नमयत्वश्रुतिरिव तदुपकार्यतया व्याख्येया । मनसश्च पञ्चभूतगुणग्राहकत्वेन तत्त्वनिश्चयात्पञ्चभूतात्मकत्वमित्यन्यदेतत् । एतेषामधिष्ठातारो देवा अपि ज्ञानक्रियाशक्तिप्रधानाः दिगग्नी, वातेन्द्रौ, आदित्यविष्णू, वरुणमित्रौ, अश्विप्रजापती । तत्र ज्ञानशक्तिसमष्टिरन्तःकरणम् । क्रियाशक्तिसमष्टिः प्राणः । शब्दस्पर्शरूपरसगन्धग्राहकाणि श्रोत्रत्वक्चक्षूरसनघ्राणाख्यानि पञ्च ज्ञानेन्द्रियाणि । त्वक्चक्षुषी स्वग्राह्यगुणाश्रयं द्रव्यमपि गृह्णीतः । श्रोत्रमपि चक्षुर्वत् गत्वा शब्दग्राहकम् ।

~~दूरे शब्दं इति प्रत्यक्षात् ।~~

भावत्वात् । तत्सम्बन्धादन्यत्रापि । अत एव शब्दस्याकाशमात्रगुणत्वात्तद्व्यञ्जकयोरश्रोत्रवाचोर्नाभसत्वम् । रसनेन्द्रियस्य रसव्यञ्जकत्वेन जलीयत्वम् । पायोस्तु जलवन्मलशोधकत्वेन तत् । घ्राणस्य गन्धव्यञ्जकत्वेन पार्थिवत्वम् । उपस्थस्य तु दुर्गन्धातिशयव्यञ्जकत्वात् तत् । श्रुतिपुराणवाक्यादीनि सर्वत्र साधकानि सन्त्येव । **तदुपकार्यतयेति** । तैजससुवर्णादिभक्षणोपकार्यतयेत्यर्थः । ननु, मनसः पाञ्चभौतिकत्वे किं मानम् । तत्राह—**मनसश्चेति** । तद्गुणत्वनिश्चयात् पञ्चभूतगुणवत्त्वनिश्चयात् । **अन्यदिति** । यथा चक्षुस्तेजोमात्रोपादानकम् । रूपादिषु मध्ये रूपस्यैव व्यञ्जकत्वात् प्रभादिवदित्याद्यनुमानैः चक्षुरादीनां तेजोमात्रोपादानकत्वादिकं सिध्यति, तथा मनः पञ्चभूतोपादानकम् । पञ्चभूतगुणानां ग्राहकत्वादित्यनुमानेन मनसः पाञ्चभौतिकत्वं सिध्यति । तार्किकादिमते तु तस्याणुत्वात् पञ्चभूतानारभ्यत्वेन न तथानुमानमिति भावः । एतेषां ज्ञानक्रियेन्द्रियाणाम् । ज्ञानक्रियाशक्तिप्रधानाः ज्ञानक्रिययोर्जननानुकूलशक्तिमन्तः । ज्ञानशक्तिसमष्टिः ज्ञानेन्द्रियाणां सहकारी । क्रियाशक्तिसमष्टिः क्रियेन्द्रियाणां सहकारी । ननु, देवानामधिष्ठातृत्वे किं मानमिति चेत्, उच्यते । अचेतनस्य रथादेः चेतनाधिष्ठानेनैव क्रियादर्शनात् जीवस्यापरोक्षज्ञानरूपाधिष्ठानविषयत्वस्येन्द्रियादिष्वसम्भवात् इन्द्रियापरोक्षज्ञानवन्तो देवा एव अधिष्ठातारः । न जीवः । अथ कर्मेन्द्रियेषु किं मानमिति चेदुच्यते । 'श्रोत्रं च श्रोतव्यं च वाक्च वक्तव्यं चे'ति श्रुतौ श्रोत्रादीनामिव वागादीनामपि सविषयकत्वेनोक्तिरेव । **शब्देत्यादि** । शब्दादीनामिव तद्वृत्तिजातीनामपि ग्राहकाणि बोधकानि । **गृह्णीत इति** । द्रव्याविषययोः चाक्षुषस्पार्शनयोरनुपलम्भादिति शेषः । ननु, श्रोत्रस्य केन सन्निकर्षेण शब्दग्राहकत्वम् । स्वाश्रयाकाशसमवेतत्वेनेति चेत्, तर्हि श्रोत्रस्य श्रावणप्रत्यक्षहेतुत्वे मानाभावः । शब्दे विद्यमाने

वचनादानगतिविसर्गानन्दजनकानि वाक्पाणिपादपायूपस्थाख्यानि पञ्च कर्मेन्द्रियाणि । एतच्च सर्वं मिलित्वा सप्तदशकं लिङ्गं ज्ञानशक्तिप्राधान्येन हिरण्यगर्भ इति क्रियाशक्तिप्राधान्येन सूत्रमिति चोच्यते । अयममूर्तपदार्थः कार्यत्वाद्व्यष्टौ समष्टौ च जीवोपाधिरेव । तानि च तथाभूतानि भूतानि भोगायतनं शरीरं भोग्यं च विषयमन्तरेण भोगं जनयितुमशक्नुवन्ति जीवकर्मप्रयुक्तत्वात्स्थौल्याय पञ्चीकृतानि भवन्ति । तत्र च प्रत्येकं पञ्च भूता

श्रोत्रसन्निकर्षस्य सदा सत्त्वेन तद्व्यतिरेकेण कार्यव्यतिरेकानुपलम्भात् । अथ स्पर्शादिषु श्रावणादिप्रत्यक्षवारणाय विषयतया श्रावणं प्रति शब्दत्वादिना हेतुत्वस्य वाच्यतया तद्बलात्सर्वेषु शब्देषु सर्वेषां पुरुषाणां प्रत्यक्षं कुतो न स्यादिति चेन्न। शब्दनिष्ठविषयतासम्बन्धेन तत्पुरुषीयश्रावणं प्रति तत्पुरुषीयकर्णगोलकस्यावच्छेदकतासम्बन्धेन हेतुत्वात् तच्छ्रोत्रस्येन्द्रियत्वे मानाभावः । तत्राह—**श्रोत्रमपीति** । गत्वा शब्दावच्छेदकदेशेन संयुज्य । ग्राहकं शब्दस्य प्रत्यक्षजनकम् । 'दूरे शब्द' इति प्रत्ययात् । 'अयं श्रुतः शब्दः दूरस्थः । विलक्षणध्वनिविशिष्टत्वा'दित्यनुमितेः । तथा च स्वसंयुक्तावच्छिन्नत्वसम्बन्धेन श्रोत्रं शब्दस्य ग्राहकमिति तादृशसम्बन्धाभावकाले तत्पुरुषीयश्रोत्रस्य तत्पुरुषीयशब्दप्रत्यक्षानुत्पत्त्या श्रोत्रस्य शब्दग्राहकत्वमावश्यकम् । शब्दे नाकाशसमवेतत्वं, किं तु ककारादिसमवेतत्वमिति स्वीकारे तु स्वसंयुक्तसमवेतत्वमेव सम्बन्धः । समवेतत्वं तादात्म्यम् । एवं च तत्पुरुषीयकर्णस्यावच्छेदकतासम्बन्धेन न हेतुत्वम् । तत्पुरुषीयकर्णावच्छेदेनानुत्पद्यमानस्यापि दूरस्थस्य शब्दस्य तत्पुरुषीयश्रोत्रेण ग्रहणात् । तार्किकादिमते तु गगनरूपत्वेन श्रोत्रस्य देशान्तरे गत्यसम्भवादुक्तरीत्या शब्दाग्राहकत्वमिति भावः । सप्तदशकं 'पञ्चप्राणमनोबुद्धिदशेन्द्रियसमन्वित'मिति सप्तदशसङ्ख्याकं लिङ्गं यावत्संसारकालमनपायितयात्मोपाधित्वेनात्माभिव्यञ्जकम् । **ज्ञानशक्तीति** । ज्ञानशक्तिसमष्टीत्यर्थः । **हिरण्यगर्भ इति** । हिरण्यमिव प्रकाशजनको ज्ञानशक्तिरूपः गर्भो यस्येति व्युत्पत्तिः । **क्रियाशक्तीति** । क्रियाशक्तिसमष्टीत्यर्थः । सूत्रं सर्वशरीरावच्छिन्न(हस्तादिक्रिया)जनकत्वेन सूत्रवदनुस्यूतम् । **कार्यत्वादिति** । सोपाधिकेश्वरस्य सर्वकार्यजनकत्वात् कार्यं नेशोपाधिरिति भावः । **अशक्नुवन्तीति** । शतृप्रत्ययान्तम् । स्थौल्याय शरीरादिनिष्ठस्थौल्यप्रयोजकं स्थौल्यं लब्धुम् । पञ्चकिरणस्वरूपमाह—**तत्रेत्यादि** । तत्र द्विधाकृतभागयोः । स्वभागं द्विधा-

---

१. 'प्रत्यक्षादि' इति पाठान्तरम् ॥

नि द्विधा विभज्यन्ते । तत्रैकैको भागश्चतुर्धा विभज्यते । तद्भागचतुष्टयं च स्वभागं विहायेतरभूतचतुष्टयार्धभागेषु प्रविशतीति स्वस्यार्धभागेनेतरेषामष्टमभागेन च पञ्चीकरणान्मेलनेऽप्याधिक्यादाकाशादिशब्दप्रयोगः । अत्र च 'त्रिवृतं त्रिवृतमेकैकां करवाणी'ति श्रुतेः 'त्रिवृत्कुर्वत उपदेश.' दिति सूत्राच्च त्रयाणामेव मेलनप्रतीतेश्च त्रिवृत्करणमेव केचिन्मन्यन्ते । ते वियदधिकरणन्यायेनैव निराकृताः । तथा हि तैत्तिरीयके 'तस्माद्वा एतस्मादात्मन आकाशस्सम्भूतः आकाशाद्वायुरित्यादिश्रुतेः छान्दोग्ये च त्रयाणां तेजोबन्नानां सृष्टिश्रवणेऽपि द्वयोरुपसंहारः। तेजःप्राथम्यपदार्थधर्मापेक्षया आकाशवायुपदार्थयोर्बलीयस्त्वात् छान्दोग्ये चैकविज्ञानेन सर्वविज्ञानप्रतिज्ञानादाकाशवाय्वोरचेतनयोर्ब्रह्मकार्यत्वस्यावश्यवाच्यत्वात्। तत्र पञ्चानामेव मेलने

कृतभागयोश्चतुर्धात्वमनापन्नमवशिष्टमेकम् । इतरेषामष्टमभागेन चेति । आकाशादीनामष्टमभागं प्रविष्टः इतरेषामेकैको भागः सोऽष्टमः । आकाशादेर्भागचतुष्टयात्मकोऽर्धभागचतुष्टयं चेत्यष्टभागात्मकमेकैकं भूतं जातमिति भावः । आधिक्यात् आकाशादिभागचतुष्टयस्याकाशादिशब्दवाच्ये प्रविष्टवाय्वादिभागापेक्षयाधिक्यात् । तथा च यत्राकाशस्यार्धं, तत्रैवाकाशत्वजातिः । एवं यत्र वाय्वादेरर्धं, तत्र वायुत्वादिजातिरिति स्वीकारात् तद्वाचकाकाशादिपदस्य प्रयोग इति भावः । त्रिवृतं त्रिभागम् । पूर्ववत् त्रयाणां भूतानां द्विधा द्विधा विभागं कृत्वा स्वीयमर्धमितरार्धीयभागद्वयस्यैकैकेन संयोज्य तेजआदिभूतं तदीयार्धेन इतरीयार्धयोर्भागद्वयेन च त्रिभागं करवाणीत्यर्थः । केचित् वाचस्पतिमिश्रकल्पतरुकारादयः । तदुक्तं कल्पतरौ—'सम्प्रदायाध्वना पञ्चीकरणं यद्यपि स्थितम् । तथापि युक्तिरूढत्वाद्वाचस्पतिमतं शुभम् ॥' मतं त्रिवृत्करणमिति शेषः । इत्यादिश्रुतेरित्यादिपदेन छान्दोग्ययिसप्तमाध्यायस्थस्य ' आत्मन आकाशः आत्मनो वायु ' रित्यादिवाक्यस्य सङ्ग्रहः । छान्दोग्ये 'तत्तेजोऽसृजते'त्यादिषष्ठाध्यायस्थवाक्ये । द्वयोः आकाशवाय्वोः । तेजःप्राथम्येत्यादि । यथा वेदवेदिकरणयोर्मध्ये क्षुते जाते 'वेदं कृत्वा वेदिं करोती'ति श्रुतिबोधितस्यापि क्रमस्य बाधेन ' क्षुत आचामे'दिति शास्त्रबोधितमाचनमनुष्ठीयते । पदार्थधर्मक्रमापेक्षया पदार्थस्य बलवत्त्वात् , तथा प्रथमोक्तत्वेन लब्धस्य तेजसि प्राथम्यस्य न्यायेनाकाशवाय्वोस्सृष्टिबोधकवाक्यरूपोपसंहारः कल्प्यत इति भावः । उपसंहारे हेत्वन्तरमाह—छान्दोग्ये चैकेत्यादि । ब्रह्मकार्यत्वस्येति । अचेतनत्वेन ब्रह्मस्वरूपत्वासम्भवेन ब्रह्मकार्यत्वेनाकाशवाय्वोर्ब्रह्मतादात्म्यं

ऽप्यवयुत्यानुवादेन त्रिवृत्करणोपपत्तिः । त्रिवृतमेवेति मतकल्पनायां वाक्य-भेदप्रसङ्गः । 'त्रिवृत्कुर्वत उपदेशा'दिति सूत्रं त्वनुवादकत्वान्न पञ्चीकरणं न्यायसिद्धं बाधितुमुत्सहते । मेलनप्रतीतिश्च शरीरादौ पञ्चानामविशिष्टे-

---

स्वीकृत्यैव ब्रह्मज्ञानेनाकाशवायुज्ञानमुपपाद्यमिति भावः । नन्वविद्यादेरनादित्वेऽपि ब्रह्मणि तादात्म्येन कल्पितत्वात्तादृशप्रतिज्ञोपपादनं कर्तव्यम् । तथाचाकाशवाय्वोरनादित्वेऽपि कुतो नोच्यते । नचाविद्यादेरावरणत्वाद्युपपादनाय ब्रह्मणि तादात्म्येन कल्पितत्वं युक्तम् । तादात्म्यस्य क्वचित् स्वीकृतत्वेन तदन्यसम्बन्धकल्पने गौरवात् । अनुपपन्नत्वेन चाविद्यादेः कल्पितत्वात् नाद्वैतविरोधित्वम् । वाय्वाकाशयोस्तु ब्रह्मतादात्म्ये न मानमिति वाच्यम् । दृश्यत्वाद्यन्यथानुपपत्त्या तयोरपि तथात्वस्यौचित्यात् । अत्रोच्यते—उक्तरीत्या तयोर्मिथ्यात्वे सिद्धे तैत्तिरीयश्रुत्यबाधाय उत्पत्तिकल्पनं युक्तमेव । ब्रह्मणि कल्पितयोस्तयोर्ब्रह्मज्ञानेनाश्यत्वस्यावश्यकत्वेन तार्किकादिस्वीकृताविनाशित्वादेस्त्याज्यत्वादिति भावः । अवयुत्यानुवादेन पृथक्कृत्यानुवादेन पञ्चीकरणस्य न्यायसिद्धस्यैकदेशोक्तित्वेन । उपपत्तिः कथं नोपपत्तिः । ननु, 'अब्भक्षो वायुभक्ष' इत्यादिवत् सावधारणेयमुक्तिः । तथा च त्रिवृतमेव, न पञ्चीकृतमित्यर्थः । तत्राह—**त्रिवृतमेवेति ।** वाक्यभेदः 'त्रिवृतं करवाणि, पञ्चीकृतं न करवाणी'त्यर्थद्वयभेदेन तद्बोधकवाक्यभेदः स्यादित्यर्थः । न्यायमेवाह—**मेलनप्रतीतिरिति** । मेलनविषयिका धीः पृथिव्यादौ प्रत्यक्षरूपा यथास्ति, तथा वायोरपि शीतस्पर्शयुक्तजलविशिष्टतया उष्णस्पर्शविशिष्टतेजोविशिष्टतया सुरभिपार्थिवादिभागविशिष्टतया च धीरस्ति । तथाकाशस्यापि तेजःपार्थिवादिभागविशिष्टतया चाक्षुषादिरूपा साक्षिरूपा वा धीरस्ति । तथा च वाय्वाकाशयोरितरभूतसंसृष्टत्वस्यावर्जनीयतया पञ्चीकरणमेव भूतानां व्यवहार्यत्वे प्रयोजकम् । नार्धजरतीयं त्रिवृत्करणम् । किं च 'यदग्ने रोहितं रूपमि'त्यादिनाग्न्यादेस्तेजआदिभूतत्रयरूपत्वमुक्त्वा 'यद्वविज्ञातमिवाभूदित्येतासामेव देवतानां समास'इति श्रुत्वा भूतमात्रस्यैव तेजआदिभूतत्रयरूपत्वमुक्तम् । यद्भूतत्रयवत्त्वेन पूर्वोक्तेन नोपलभ्यते वाय्वादिकं, तदेतासां तेज आदिस्वरूपाणां देवतानां समासस्समुदाय एवेति तच्छ्रुतेरर्थः । तथा च यद्योगप्राथम्येन यद्यत् रूपत्रयवत्त्वेनाप्रत्यक्षं, तत् सर्वं तेजआदित्रयसमुदाय एवेत्यर्थलाभात श्रुत्यैवाकाशादेस्तेजआदिभागघटितत्वोक्तेः कथं पञ्चीकरणे विवादः । न चैवकारेण तेजआदित्रयमात्रात्मकं बोध्यत इति वाच्यम् । वाय्वाकाशादेरप्यविज्ञातपदा-

व पञ्चीकृतपञ्चमहाभूतानीति च भाष्यकारवचनम् । तस्मादलमनेनानार
चिन्तनेनेति दिक् । तानि च पञ्चीकृतानि पञ्च महाभूतानि मूर्तारूया
मिलित्वैकं कार्यमिन्द्रियाणामधिष्ठानं भोगायतनमुत्पादयन्ति । तदेव श
रमित्युच्यते । तत्र सत्वप्रधानं देवशरीरम् । रजःप्रधानं मनुष्यशरीरम
तमःप्रधानं तिर्यगादिस्थावरान्तं शरीरम् । तस्य च शरीरस्य पाञ्चभौति
स्यापि चित्ररूपस्येव क्वचित् न्यूनाधिकभावो भूतानां न विरुध्यते ।
विषया अपि पञ्चीकृतैकैकभूतजन्याश्चतुर्दशभुवनाख्या ऊर्ध्वमध्याधोभा
सत्वरजस्तमोंशप्रधानाः । एतत्सर्वं ब्रह्माण्डाख्यं विराडिति मूर्तामिति

र्थत्वेन कात्स्न्र्यबोधकयद्योगप्राथम्येन तत्रापि त्रयमात्रात्मकत्वस्य बोध्यत्वेन
धादेवकारस्यायोगव्यवच्छेदकत्वनिर्णयात् । **वचनमिति** । पञ्चीकरणनामक
न्थस्थमिति शेषः । अधिष्ठानं संयोगसम्बन्धेनाश्रयः । **तदेव शरीरमिति** । '
गिन्द्रियस्य साक्षादाश्रयश्शरीरमि'ति विवरणोक्तलक्षणात् । तिर्यगादि पश्वादि
चित्रेत्यादि । यथा नीलपीतादिनानारूपसमुदायरूपस्य चित्ररूपस्य मध्ये कस्यचि
पस्य रूपान्तरावच्छेदकावयवपरिमाणापेक्षयाधिकपरिमाणावयवावच्छिन्नत्वरूपमा
क्यं, तथा मनुष्यादिशरीरे भूतान्तरापेक्षया पार्थिवभागस्याधिक्यम् । देवादिशरीरे ते
भागाधिक्यम् । वरुणादिलोकस्थशरीरे जलीयादिभागाधिक्यमित्यर्थः । **पृथिव्र**
स्सचराचरधृथिव्यादिहेतुत्वमित्याह—**एकैकभूतेति** । **चतुर्दशभुवनेत्यादि** ।
नोदकाख्यमहाजलराशिमध्ये ऊर्ध्वाधोभावापन्नं संयुक्तं महाकटाहद्वयं तिष्ठति,
न्मध्येऽपि जलराशिः, तदुपरि महानौरिव पञ्चाशत्कोटिविस्तीर्णा महापृथिवी
प्ततिसहस्रयोजनोन्नता, तस्या दशदशयोजनसहस्रपरिमितभागेभ्योऽधस्तात्
कैकं पातालम् । इत्थं सप्त पातालानि स्वर्लोकादपि रम्याणि । तानि
प्त भुवनानि । तस्या उपरि पादगम्यः सर्वो लोकः भूर्लोकः, तदुपरि भुवर्लोक
तदुपरि स्वः महः जनः तपस्सत्यमिति षट् भुवनानि । तान्येतानि चतुर्दशभुव
नि संयुक्तकटाहद्वयमध्यस्थानि । कटाहद्वयस्योर्ध्वमपि घनोदकाख्यं महाजल
स्ति । तदेव त्रिविक्रमाख्यविष्णुचरणसरोजांगुष्ठतलनिर्भेदाधीनछिद्रद्वारा कटा
न्तःप्रविष्टं शिशुमारचक्रमुमेर्वादिपतनद्वारा हिमालयमवन्तीर्णं गङ्गारूपेण
लोकौ पावयतीति भावः । **ऊर्ध्वेत्यादि** । 'ऊर्ध्वं गच्छन्ति सत्त्वस्था मध्ये
ष्ठन्ति राजसाः ।' इत्यादिश्रुत्या ऊर्ध्वलोकानां सात्त्विकादिपुरुषप्राप्यत्वोक्तेः

च्यते । अयमौपनिषदः सृष्टिक्रमः । तद्विपरीतो लयक्रमः । मूर्ते पञ्चीकृत-पञ्चमहाभूततत्कार्यात्मके विराडाख्ये पृथिव्याद्येकैकभूतलयेनामूर्ते अपञ्चीकृत-तपञ्चमहाभूतात्मके हिरण्यगर्भाख्ये स्वकारणे लीयते । स एव दैनन्दिनः प्रलयः । अमूर्ते चाव्याकृते परमेश्वरोपाधौ। अव्याकृतस्य त्वनादित्वेन कारणाभावान्न लयः । स्वकारणे सूक्ष्मरूपेणावस्थानं लय इति तल्लक्षणात् । अयमेव प्राकृतः प्रलयः । ब्रह्मज्ञानादात्यन्तिक उच्छेदस्त्वात्यन्तिकः प्रलयः। स च कारणक्रमेणैव । कारणोच्छेदादेव कार्योच्छेदात् । सर्वं च सृष्टिप्रलया-

---

त्त्वादिप्रवानतेति भावः । तद्विपरीत इति । 'विपर्ययेण तु क्रमोऽत उपपद्यते चे'ति न्यायात् । पृथिव्यादीत्यादि । पृथिव्या जले, तस्य तेजसि, तस्य वायौ-तस्याकाशे तस्यापञ्चीकृतभूतेषु लयेनेत्यर्थः । दैनन्दिनेति । सङ्कर्षणमुखानलेन भूर्भुवस्सुवस्स्वरूपलोकत्रयदाहे सति ततापक्रान्त्यां महर्लोकस्थेषु जनोलोकं गतेषु हिरण्यगर्भस्य सत्यलोकस्थस्य रात्रिर्भवतीति दैनन्दिनप्रलयः । तत्र महर्लोकस्य तापितत्वेन निर्जनत्वेऽप्यनाशात् जनोलोकादौ च तापितत्वस्याभावात् न विराजस्सम्पूर्णस्य लयो दैनन्दिनप्रलये । किं तु चतुर्दशभुवनैकदेशावच्छिन्नस्येति बोध्यम् । उपाधावित्यत्र लीयत इत्यनुषज्यते । तल्लक्षणादिति । तथा च प्रलयबोधकश्रुतिस्मृतीनां स्वपरिणामिकारणे संस्काररूपेण कार्याणामवस्थानरूपस्य प्रलयस्य बोधकत्वादव्याकृतस्य तदसम्भवात् तत्प्रलये मानाभावः । अत एव 'अव्याकृतं परे तत्त्वे लीयते सकलाश्रये । अव्यक्तं परमात्मनी'त्यादिवाक्यानां परिणामशून्यतयावस्थानरूपमात्रलयबोधकत्वम् । मुख्यलयबोधकत्वे 'तद्वेदं तर्ह्यव्याकृतमासीत्' 'नासदासीन्नोसदासीत्तम आसी'दित्यादिश्रुतिभिरव्याकृतरूपेण जगतः प्रलयकाले सत्त्वाभिधानानुपपत्तेः । प्राकृत इति । दैनन्दिनस्तु न प्राकृतः । प्रकृतौ संस्काररूपेणावस्थानस्यैव प्राकृतशब्दार्थत्वात् । दैनन्दिनस्तु न संस्काररूपेण पृथिव्यादेरवस्थानम् । शतवर्षीयानावृष्ट्यादिना पृथिव्यादेः शुष्कनोमयपिण्डाकारत्वादेः पुराणादिपूक्तत्वात् । किं तूक्तपिण्डादिरूपेणैव हिरण्यगर्भेऽवस्थानम् । अत एव दैनन्दिनप्रलयसाधारणलक्षणवाक्ये सूक्ष्मरूपेणेति मूले उक्तं, न तु संस्काररूपेणेति । परमसूक्ष्मरूपं हि संस्कारः । न तु सूक्ष्मरूपमात्रमिति भावः । कारणक्रमेणैवेति । आदौ कारणस्योच्छेदः । पश्चात् कार्यस्येत्यर्थः । वस्तुतस्तु कार्योच्छेदस्य पूर्वभावित्वनिरासे तात्पर्यम् । तथा च कार्यं प्रथमतो नोच्छिद्यते । किं तु युगपदेवाज्ञाननत्प्रयुक्तोच्छेद इत्यर्थः । उच्छेदादेवेति पञ्चमी

दिकं स्वप्नसृष्टिप्रलयवदपारमार्थिकमपि वासनादार्ढ्यात्व्यवहारक्षममिति न मायिकत्वेऽपि तुच्छत्वप्रसङ्गः । यथा चैतत्तथा व्यक्तमाकरे । एवं स्थिते जागरणादिव्यवस्थोच्यते । इन्द्रियवृत्तिकालीनार्थोपलम्भो जागरणम् । तत्र च मूर्तं विराडाख्यं भोग्यं प्रत्यक्षादिप्रमाणषट्केण व्यवह्रियमाणत्वाद्व्यावहारिकं विश्वाख्येन जीवेनोपभुज्यते । स च देहेन्द्रियादिषु प्रवेशात् व्याप नाद्वा विश्व इत्युच्यते।विश प्रवेशने विपूर्व्याप्तावितिच स्मरणात् । अत्र

ज्ञापकहेतौ धूमादग्निमानितिवत् । न च कार्योच्छेदं प्रति कारणोच्छेदस्य हेतुत्वात् कथमेवमिति वाच्यम् । उच्छेदस्य सिद्धान्ते जन्यत्वास्वीकारादेरुक्तत्वात् । 'या या प्रमा सा सा स्वसमानविषयकाज्ञानतत्प्रयुक्तविशिष्टकालपूर्वत्वशून्यकालवृत्ति'रिति नियमेन युगपदुच्छेदस्य युक्तत्वात् अज्ञानसम्बन्धाद्यनादिदृश्योच्छेदस्य अज्ञानोच्छेदसमकालत्वावश्यकत्वेनाज्ञानप्रयुक्तमात्रोच्छेदस्यैवाज्ञानोच्छेदसमकालताया युक्तत्वाच्च ज्ञानस्याज्ञाननाशकत्वेऽपि न क्षतिः । अज्ञानोच्छेदस्य सर्वदृश्योच्छेदज्ञापकत्वेऽपि अज्ञाननाशस्य सर्वदृश्यनशोत्पत्त्यव्याप्यत्वात् । **वासनेति** । सत्यत्ववासनेत्यर्थः । **व्यवहारक्षममिति** । मिथ्यात्वज्ञानात्पूर्वमूर्ध्वं वा तत्त्वसाक्षात्कारात्पूर्वं निष्कम्पप्रवृत्त्यादिक्षमम् । तत्त्वे साक्षात्कृते तु नैव प्रवृत्त्यादिकम् । बलवत्तरकर्मवशात् सकम्पम् । तदुक्तं—'शास्त्रेण नश्येत्परमार्थबुद्धिः कार्यक्षमं नश्यति चापरोक्षा'दिति । **व्यक्तमाकर इति** । उक्तं हि भाष्यादौ—'ननु, भवन्मते जगतोऽसत्त्वेन तुच्छत्वमिति चेत्, क एवमाह जगत्तुच्छमिति । आविद्यकत्वात् सदसद्विलक्षणमित्यस्मद्दर्शनम् । अथ पुनर्विद्योदये तुच्छमुच्यते, काममुच्यताम् । न त्वेतावता तत्पूर्वव्यवहारस्यानुपपत्ति'रिति । **इन्द्रियवृत्तीति** । स्वसमानाधिकरणा या इन्द्रियजन्यवृत्तयः, तत्कालीनोऽर्थोपलम्भ इत्यर्थः । स्वपदमर्थोपलम्भपरम् । यदि च जागरे सर्वदा इन्द्रियवृत्तौ न प्रमाणम् । कदाचिदनुमित्यादेरेव सम्भवात्, तदेन्द्रियपदं प्रमापरं बोध्यम् । प्रमाणषट्केण अज्ञाताबाधितविषयकधीरूपप्रमित्यादिपट्केण । प्रत्यक्षानुमानशब्दानामिवोपमानार्थापत्त्यनुपलब्धीनामपि पृथगेव प्रमाणत्वम् । गोसादृश्यविशिष्टगवयादिप्रत्यक्षोत्तरं स गौरेतद्गवयसदृश इति ज्ञानस्य मानान्तरानवतारकालीनस्योपमानमात्राधीनत्वात् व्यतिरेकव्याप्तिज्ञानजन्यज्ञानस्यानुमितित्वे मानाभावात् अर्थापत्तित्वस्यैवान्वयव्याप्तिज्ञानजन्यज्ञाने स्वीकारेणानुमितित्वलोपापत्तेश्च अर्थापत्तिप्रमाणस्यान्यस्यावश्यकत्वात् प्रतियोग्यनुपलब्धिजन्याया अभावप्रमाया इन्द्रियसन्निकर्षादिजन्यत्वे मानाभावेनानुपलब्धित्वजात्याश्रयतादृशप्रमाकरणत्वस्या-

यद्यपि विश्वेनामूर्तमव्याकृतं चानुमानादिनानुभूयते, तथापि व्यावहारिकं सर्वं विश्वेनैव ज्ञायत इति नियमात् स्थूलशरीरोपाध्यभिमानित्वाच्च न तस्यावस्थान्तरव्यापकत्वम् । शुक्तिरजतादिज्ञानानामप्रामाणिकत्वात्तद्विषयस्याव्यावहारिकत्वेऽपि इन्द्रियव्यापारकालीनत्वाज्जागरणत्वोपपत्तिः । ज्ञानोत्पत्त्यादिप्रक्रिया चाधस्तादुक्तैव । एवं जाग्रद्भोगजनककर्मक्षये स्वाप्नभोग जनककर्मोदये च सति निद्राख्यया तामस्या वृत्त्या स्थूलदेहाभिमाने दूरीकृते सर्वेन्द्रियेषु देवतानुग्रहाभावान्निर्व्यापारतया लीनेषु विश्वोऽपि लीन इत्युच्यते। तदा च स्वप्नावस्था । तत्र चान्तःकरणगतवासनानिमित्त इन्द्रियवृत्त्यभावकालीनोऽर्थोपलम्भः स्वप्नः तत्र मन एव गजतुरगाद्यर्थाकारेण विवर्तते अविद्यावृत्त्या च ज्ञायत इति केचित् । अविद्यैव शुक्तिरजतादिवत् स्वप्नार्थाकारेण परिणमते ज्ञायते चाविद्यावृत्त्येत्यन्ये । कः पक्षः श्रेयान् ।

नुपलब्धावेवोचितत्वात् । व्यावहारिकमिति । अज्ञातविषयकधीविषयत्वेनाज्ञातत्वात् ब्रह्मज्ञानात् पूर्वमबाध्यत्वाच्च प्रातीतिकान्यदृश्यत्वेन व्यावहारिकमिति भावः । अमूर्तं स्वाप्नं वस्तु । अव्याकृतं सौषुप्तम् । व्यावहारिकं व्यावहारिकप्रमाणग्राह्यम् । अवस्थान्तरव्यापकत्वम् अवस्थान्तरभोक्तृतैजसादिवाचिपदवाच्यत्वम् । तथा च जाग्र, दवस्था येनैवानुभूयते, तस्यैव विश्वशब्दवाच्यतेति भावः । स्वप्नो येनैवानुभूयते, स एव तैजस इत्यादेर्वक्तुमशक्यत्वेन वैरूप्यापत्तेराह—स्थूलशरीरोपाध्यभिमानित्वाच्चेति । स्थूलशरीरघटितोपाध्यभिमानिवाचकपदवाच्यत्वाच्चेत्यर्थः । तथा चोपाधित्रयाभिमानी विश्वशब्दस्य, द्वयमात्राभिमानी तैजसशब्दस्य, एकमात्राभिमानी प्राज्ञशब्दस्य वाच्य इति भावः । आप्रामाणिकत्वात् अज्ञाताविषयत्वात् । इन्द्रियव्यापारेति । व्यावहारिकविषयकबहिरिन्द्रियजन्यमनोवृत्तीत्यर्थः । कालीनत्वादिति । ज्ञानानां कालीनत्वाज्जागरणत्वोपपत्तिरिति योजना । तथा च शुक्तिरूप्यादिज्ञानाव्याप्तेः इन्द्रियजन्यवृत्तित्वमात्रं न जागरणलक्षणमिति भावः । कर्मोदये कर्मरूपसहकारिसमवधाने । तामस्येति । तमोगुणविषयिकयेत्यर्थः । दूरीकृत इति । 'अभावप्रत्ययालम्बना वृत्तिर्निद्रे'ति पातञ्जलसूत्रेण व्यावहारिकविषयकवृत्त्युपरमोपहिततमोगुणविषयकवृत्तेर्निद्रात्वोक्त्या देहाभिमानरूपवृत्तेर्निद्रया दूरीकरणम् । व्यावहारिकाकारवृत्त्यभावस्य प्रत्ययः प्रयोजकः उद्रिक्ततमोगुणः तद्विषयिका वृत्तिर्निद्रेति सूत्रार्थः । इन्द्रियेष्विति । जाग्रद्भोगप्रदकर्माभावप्रयुक्तादिति शेषः । इन्द्रियेति । बाह्येन्द्रियजन्येत्यर्थः । विवर्तते परिणमते । सर्वत्र

उत्तरः । अविद्याया एव सर्वत्रार्थाध्यासज्ञानाध्यासोपादानत्वेन कल्पितत्वान्मनोगतवासनानिमित्तत्वेन च क्वचिन्मनःपरिणामत्वव्यपदेशात् । ननु तदा मनसो दृश्याकारपरिणामानभ्युपगमे द्रष्टृत्वसम्भवेनात्मनः स्वयंज्योतिष्ट्वासिद्धिरिति चेन्न । बहिरिन्द्रियजन्यवृत्त्यभावेन तदानीं मनसोऽग्राहकत्वात्, तत्सहकारेणैव तस्य ग्राहकत्वनियमात्, सवृत्तिकान्तःकरणावच्छिन्नस्यैव चैतन्यस्य प्रमातृत्वनियमात्, तदन्तःकरणसत्त्वेऽपि प्रमात्रभावः । किमधिष्ठानं स्वप्नाध्यासस्य । मनोवच्छिन्नं जीवचैतन्यमित्येके । मूलाज्ञानावच्छिन्नं ब्रह्मचैतन्यमित्यपरे । किं श्रेयः । मतभेदेनोभयमपि । तथा हि जाग्रद्बोधेन स्वप्नभ्रमनिवृत्त्यभ्युपगमादधिष्ठानज्ञानादेव च भ्रमनिवृत्तेर्ब्रह्मचैतन्यस्य चाधिष्ठानत्वे संसारदशायां तज्ज्ञानाभावात् ज्ञाने वा सर्वद्वैतनिवृत्तेर्न जाग्रद्बोधात्स्वप्ननिवृत्तिः स्यात् । स हि कर्तेति च जीवकर्तृत्वश्रुतेः आकाशादिप्रपञ्च-

---

प्रातिभासिकाध्यासस्थले सर्वत्र । क्वचित् 'सधीः स्वप्नीभूत्वे'त्यादिश्रुतौ । नन्वित्यादि । मनसः परिणामानभ्युपगमे मनसो द्रष्टृत्वसम्भवेनेति योजना । द्रष्टृत्वं ग्राहकत्वम् । स्वयंज्योतिष्ट्वेति । 'अत्रायं पुरुषस्स्वयंज्योतिर्भवती'त्यादिश्रुत्युक्तस्वयं ज्योतिष्ट्वेयर्थः । अत्र स्वप्ने । स्वयंज्योतिरिति । आदित्यादिमनोवृत्तिपर्यन्तानां ज्योतिषामभावेन स्वयमेवात्मा स्वीयव्यवहारसाधनरूपं ज्योतिरित्यर्थः । बहिरिन्द्रियजन्येति । प्रत्यक्षादिप्रमाणजन्येत्यर्थः । तत्सहेत्यादि । प्रमाणजन्यमनोवृत्तावेव मनसः परिणामित्वमिति नियमादित्यर्थः । तथा चाहमित्याकारकवृत्तिरविद्यापरिणाम एवेति भावः । ननु, तथापि स्वप्ने मनसस्सत्त्वे मनोविशिष्टचिद्रूपप्रमातृसत्त्वापत्तिः । तत्राह — सवृत्तिकेत्यादि । प्रमानुकूलव्यापारवत्त्वं प्रमातृत्वं वृत्त्यसत्त्वे न सम्भवतीत्यर्थः । मूलाज्ञानावच्छिन्नं ब्रह्मचैत्यन्यमिति । मूलाज्ञानावृतं ब्रह्माधिष्ठानमित्यर्थः । यथाश्रुते अज्ञानावच्छिन्नब्रह्मणः सर्वद्वैताधिष्ठानत्वे जाग्रज्ज्ञानात्तन्निवृत्त्युक्त्यसङ्गतेः । निवृत्त्यभ्युपगमात् बाधाभ्युपगमात् । ब्रह्मचैतन्यस्येत्यादि । ब्रह्मचैतन्यस्य चाधिष्ठानत्वे जाग्रद्बोधात् स्वप्ननिवृत्तिर्न स्यादिति योजना । कर्तेति चेति । चकारेण पूर्वोक्तस्य निवृत्तिर्न स्यादित्यस्य हेतुतया समुच्चयः । कर्तृत्वेति । तथा च सिद्धान्ते यस्मिन् कार्ये यः कर्ता स एवोपादानम् । घटादावपि कपालाकारनिर्गतमनोवृत्त्या कुलालादेः कपालाद्यवच्छिन्नचिद्रूपत्वसम्पत्त्या उपादानत्वमस्त्येवेति स्वप्ने ब्रह्मण उपादानत्वे जीवस्य कर्तृत्वं

---

१ विवर्तोपादानस्य कर्तृत्वनियमात् स हि कर्तेत्यत्र जीवस्यैव स्वप्नकर्तृत्वावधारणाच्च स्वप्ने ब्रह्मण उपादानत्वे जीवस्य कर्तृत्वं न स्यादिति भावः । २ इति पाठान्तरम् ।

वत् सर्वसाधारण्यापत्तेश्च न मूलाज्ञानावच्छिन्नं ब्रह्मचैतन्यमधिष्ठानम् । ननु, जीवचैतन्यस्यानावृतत्वेन सर्वदा भासमानत्वात् कथमधिष्ठानत्वम् । सत्यम् । तत्रापि स्वप्नाध्यासानुकूलव्यावहारिकसंघातभानविरोध्यवस्थाज्ञानाभ्युपगमात्। स्वप्नदशायां चाहं मनुष्य इत्यादिप्रातीतिकसंघातान्तरभानाभ्युपगमात् शय्यायां स्वपिमीति शय्यान्तरभानवत्। भानसामग्र्यभावश्च तुल्य एव । नन्वहं मनुष्य इत्यादिव्यावहारिकसंघातज्ञानस्य प्रमाणाजन्यत्वात्कथमज्ञाननिवर्तकता । अवस्थान्तरान्यथानुपपत्त्या तत्कल्पने सुषुप्तावपि स्वप्नबाधकज्ञानमास्थीयेत । तच्चानिष्टम् । जाग्रत्त्वापत्तेरिति चेत्, साध्वयोचः। स्व-

---

न स्यादिति भावः । 'न तत्र रथा न रथयोगा न पन्थानो भवन्ति । अथ रथान्रथयोगान् पथस्सृजते स हि कर्ते'ति श्रुतौ तत्र स्वप्ने। स हि जीवो हि। अत्र जीवस्य स्वप्नानुकूलव्यापारालोचनादिमत्त्वरूपस्य स्वप्नकर्तृत्वस्यासम्भवात् अदृष्टद्वारा कर्तृत्वमेव श्रुत्योक्तम् । तच्चाकाशादाविव स्वप्नेऽपि ब्रह्मोपादानके सम्भवतीति नेदं दूषणं युक्तम्। प्रपञ्चवदिति । स्वप्नस्येति शेषः । **सर्वसाधारण्येति।** सर्वान् जीवान् प्रत्यापरोक्ष्येत्यर्थः। **भानविरोधीति।** मनोऽवच्छिन्नचिद्विषयकं यदज्ञानं, तदेव व्यावहारिकशरीराद्यवच्छिन्नचिद्विषयकमपि स्वीक्रियते । अन्यथा शरीरादेस्साक्षिणा भानं स्यात् । घटाद्यवच्छिन्नचितस्तु स्वप्नकाले नाज्ञानविषयत्वे मानमस्ति । प्रमातृरूपसाक्षिचिदुपरागाभावादेव तदभानसम्भवात् । जीवस्य जगदुपादानत्वपक्षे घटादौ साक्षिसम्बन्धस्य सदा सत्त्वेऽपि जागरणकालीनाज्ञानेनैव तदावरणादिति ध्येयम् । शय्यान्तरभानवदित्यत्र व्यावहारिकान्यशय्याभानाभ्युपगमवत्। उक्तं हि मणिकारादिभिः 'संशयस्वप्नौ न प्रमे । अत एव शय्यायां स्वपिमीत्यादौ सुषुप्तपुरुषसंसृष्टशय्या भातीत्या'दि । **भानसामग्रीति** । व्यावहारिकविषयकप्रत्यक्षकरणेन्द्रियसन्निकर्षादीत्यर्थः । **तुल्य इति** । यथा व्यावहारिके शय्यादौ प्रत्यक्षादिसामग्र्यभावः तथा मनुष्यशरीरादावित्यर्थः । ज्ञानस्य जाग्रद्दशागतप्रथमज्ञानस्य । **अज्ञानेति** । स्वप्नप्रयोजकाज्ञानेत्यर्थः । अवस्थान्तरान्यथानुपपत्त्या पूर्वावस्थाया बाधाभावे अवस्थान्तरोत्पत्त्यन्यथानुपपत्त्या । तत्कल्पने प्रमाणाजन्यज्ञानस्यापि बाधकत्वकल्पने । **सुषुप्तावपीत्यादि** । सुषुप्तावविद्यावृत्तिरूपमहमित्याकारकज्ञानं स्वप्नबाधकमङ्गीक्रियत इत्यर्थः । **जाग्रत्त्वेति** । स्वप्नसुषुप्तिशून्येत्यर्थः । स्वप्नावस्थाज्ञानस्य स्वप्नावस्थाविषयकाज्ञानस्य सुषुप्तौ यद्यत्भासते अनादितदन्यस्वाप्नार्थविषयकाज्ञानस्येति यावत् । अथवा स्वप्नावस्थाज्ञानस्य

प्नावस्थाज्ञानस्यैवान्तःकरणलयसहितस्य सुषुप्तिरूपत्वान्न तत्र तद्बाधः । जागरणे तु मिथ्यैव स्वप्नोऽभादित्यनुभवादहमिति ज्ञानस्य प्रमाणाजन्यत्वेऽपि यथार्थत्वाच्छरीरादिज्ञानस्य च प्रमाणजन्यत्वादवस्थाज्ञानविरोधित्वमनुभवसिद्धम् । विशेषाज्ञानं तु न प्रमाणजन्यवृत्तिमन्तरेण निवर्तते । साक्षिणश्चाविद्यानिवर्तकत्वाभाव अज्ञानसाधकत्वेनैव धर्मिग्राहकमानसिद्ध इति न किञ्चिदवद्यम्।

स्वप्नावस्थाधिष्ठाननियामकाज्ञानस्य । तस्यैव जीवेशादिभेदविषयकत्वस्वीकारात् । एवं च सुषुप्तौ साक्षिमात्रभास्यजीवेशतद्भेदादेरभानमुपपद्यते । तत्र सुषुप्तौ । तद्बाधः स्वप्नावस्थाबाधः । यथार्थत्वात् अज्ञाताबाधितमनोऽवच्छिन्नचिद्विषयकत्वात् । **प्रमाणजन्यत्वादिति** । मनुष्यत्वादिविशिष्टरूपेण साक्षिमात्रेण कदाचित् भास्यत्वेऽपि चक्षुरादिप्रमाणभास्यत्वस्यापि कदाचित्तेन रूपेण शरीरादौ सत्त्वात् मनुष्यं मामहं पश्यामीति प्रतीतेरिति भावः । **अनुभवसिद्धमिति** । तथा च प्रमाणजन्यज्ञानत्वेन नाज्ञानविरोधिता । किं त्वज्ञाताबाधितविषयकनिश्चयत्वेन तत्समनियतजातिविशेषरूपप्रमात्वेन वेति भावः । नन्वविद्यावृत्तिरूपेणाहमित्याकारकज्ञानेन यदि मनोऽवच्छिन्नचिद्विषयकं व्यावहारिकशरीराद्यनेकावच्छिन्नचिद्विषयकत्वेन सामान्याज्ञानशब्दवाच्यमज्ञानं निवर्तते, तदा 'घटं न जानामी'त्याकारेणाज्ञातत्वविशिष्टघटविषयकेणाविद्यावृत्तिरूपज्ञानेनापि घटाद्यवच्छिन्नचिद्विषयकमज्ञानं निवर्त्तेत । तस्याप्यज्ञाताबाधितघटविषयकत्वस्वीकारात् अज्ञानतत्कार्याविषयकमेव ज्ञानमज्ञाननिवर्तकमितिस्वीकारेऽपि आत्ममात्रविषयकसौषुप्ताविद्यावृत्त्या मूलाज्ञानं निवर्तेत । प्रमाणजन्यत्वत्यागे श्रवणादिजन्यत्वस्यापि त्यागौचित्यात् श्रवणादीनां प्रमाणाश्रितत्वात् तत्राह—**विशेषाज्ञानं त्विति** । घटाद्येकैकमात्रविषयकाज्ञानं त्वित्यर्थः । **अन्तरेणेति** । घटं न जानामीत्याकाराविद्यावृत्तौ घटाद्यंशे निश्चयत्वाभावात् प्रमात्वजात्यभावाद्वा नाज्ञाननिवर्त्तकता । अत एव स्वप्नेऽपि कदाचिन्मनो न जानामीत्याकारकाविद्यावृत्त्युदयेऽपि न सामान्याज्ञाननिवृत्तिरिति भावः । ननु, प्रमाणाजन्यज्ञानस्याविद्यानिवर्तकत्वे साक्षिणोऽपि तत् स्यात् अज्ञानसाक्षिणोऽज्ञातविषयांशे न निश्चयत्वमिति चेत्तर्हि तत्र ज्ञापकं वाच्यम् । तत्राह—**साक्षिणश्चेति** । **निवर्तकत्वेऽपि** । निवृत्तिजनकतावच्छेदकनिश्चयत्वेत्यर्थः ।। **अज्ञानसाधकत्वेति** । अज्ञानविषयकत्वेत्यर्थः । ननु तत्साधकमपि पश्चात्तन्निवर्तकं भवतु तत्राह—**धर्मीति** । अविद्यासाधकं साक्षीति येन मानेन सिद्धं, तेनैव तस्य

---

१ 'उक्तसामान्याज्ञानभिन्नाज्ञानमित्यर्थः ।' इति पाठान्तरम् ।

२ ज्ञानसामान्यस्य स्वविषयानिवर्तकतायाः कक्षप्तत्वादितिभावः । इति पाठान्तरम् ।

यावन्ति ज्ञानानि तावन्त्यज्ञानानीति चाभ्युपगमात् शुक्तिज्ञानेनैव व्यावहारिकसंघातज्ञानेनाज्ञाननिवृत्तावपि पुनरपि कदाचिद्रजतभ्रमवन्न स्वप्नाध्यासानुपपत्तिरिति जीवचैतन्यमेवाधिष्ठानमिति पक्षे न कोऽपि दोषः । यदा तु पुनर्ब्रह्मज्ञानादेवाज्ञाननिवृत्त्यभ्युपगमः, तदा रज्ज्वां दण्डभ्रमेण सर्पभ्रमतिरोधानवदधिष्ठानज्ञानाभावेऽपि जाग्रद्भ्रमेण स्वप्नभ्रमतिरोधानोपपत्तेः ब्रह्मचैतन्यमेव स्वप्नाध्यासाधिष्ठानमिति पक्षेऽपि न कश्चिद्दोषः । प्रतिजीवं स्वप्नाध्यासासाधारण्यं तु मनोगतवासनानामसाधारण्यादेव । मनोवच्छिन्नं ब्रह्मचैतन्यमेवाधिष्ठानम् । एतस्मिन्नपि पक्षेऽवस्थाज्ञानस्यावारकत्वाङ्गीकारान्न काप्यनुपपत्तिः । अत एव शास्त्रेषु क्वचित्क्वचित्तथा व्यपदेशः । ननु मनोऽ

तदनिवर्तकत्वं सिध्यति । निवर्तकत्वसत्त्वे साधकत्वक्षण एव तदापत्तिरिति भावः । **यावन्तीत्यादि** । व्यावहारिकसंघातज्ञानेनाज्ञाननिवृत्तावपि पुनरपि स्वाप्नाध्यासस्याज्ञानान्तरेणोत्पत्तेर्नानुपपत्तिः । यावन्ति ज्ञानानि तावन्त्यज्ञानानीत्यस्याभ्युपगमात् । शुक्तिज्ञानेनाज्ञाननिवृत्तावपि पुनरप्यज्ञानान्तरेण रजतभ्रमोत्पत्तिवदित्यर्थः । एकाज्ञानपक्षे शुक्तिरूप्यादेरिव स्वाप्नस्यापि ब्रह्मज्ञानात् पूर्वं न बाधः । किं तु निवृत्तिः । अतो ब्रह्मैवाध्यासमात्रेऽधिष्ठानमित्याशयेनाह—**यदेत्यादि** । **पक्षेऽपीति** । न दोष इत्यनुषज्यते । **प्रतिजीवमित्यादि** । एकेन जीवेनोपलभ्यमानः स्वप्नो नान्येन उपलभ्यत इति यत् स्वप्ने असाधारण्यं ब्रह्मणस्स्वप्नोपादानत्वे, तदनुपपन्नमिति यत् पूर्वमुक्तं, तन्न। ब्रह्मोपादानकस्यापि स्वप्नस्य तत्तज्जीवीयवासनाजन्यत्वेनोक्तासाधारण्यसम्भवादित्यर्थः । पक्षान्तरमाह—**मनोवच्छिन्नं ब्रह्मेत्यादि**। अविद्याप्रतिबिम्बितचिद्रूपजीवान्यत् ब्रह्मचैतन्यं नियन्तृरूपं मनोऽवच्छिन्नमधिष्ठानमित्यर्थः । प्रथमकल्पेऽपि अविद्याप्रतिबिम्बितचैतन्यस्य न तद्रूपतया अधिष्ठानत्वम् । अज्ञोऽहं घटं जानामीत्येवं ज्ञातृतया स्वप्ने भानात् । किं तु मनोऽवच्छिन्नत्वेनेति। ननु, मनोऽवच्छिन्नचित्त्वेन रूपेण जागरणे ब्रह्मणोऽपि भासमानत्वात् कथमधिष्ठानता । तत्राह—**एतस्मिन्नित्यादि** । अधिष्ठानावच्छेदकत्वात् भ्रमप्रयोजकाज्ञानविषयतावच्छेदकत्वात् । भ्रमविरोधिनः भ्रमविरोधिधीविषयशुक्तित्वाद्यविशेषितस्य । तत्र भ्रमे । कल्पित एव न तु बाह्यः । जाग्रद्दशायां जाग्रद्दशागतभ्रमे। शुक्तीदङ्कारविलक्षणस्य रजतसंसृष्टत्वानापञ्चादिदमंशात् विलक्षणस्य रजतेदङ्कारस्य । रजतसंसृष्टेदमंशस्य प्रातीतिकेन रजततादात्म्येन विशिष्टतया प्रातीतिकमेवेदन्त्वविशिष्टं भ्रमे भाति, नातादृशं व्यावहारिकमित्यत्र संक्षेपशारी-

वच्छिन्नचैतन्यस्याधिष्ठानत्वे अहं गज इत्याद्यहङ्कारसामानाधिकरण्येन गज-प्रतीतिः स्यात् इदं रजतमिति शुक्तिसामानाधिकरण्येन रजतप्रतीतिवत्, न त्वयं गज इति । ब्रह्मचैतन्यस्याधिष्ठानत्वपक्षेऽपि गज इत्याकारैव प्रतीतिः स्यान्न त्वयं गज इति । तत्रापीदङ्कारास्पदीभूतबाह्यार्थाभावस्य समानत्वा-दिति चेन्न। आद्ये पक्षे अहङ्कारस्य शुक्तिवदधिष्ठानानवच्छेदकत्वात् शुक्तौ रजतमितिवदहं गज इति न भ्रमाकारप्रसङ्गः । अहमिति ज्ञानस्येयं शुक्तीरिति ज्ञानस्येव भ्रमविरोधित्वात् इदमंशस्य च भ्रमाविरोधिन एव तत्र भा-नाभ्युपगमात् । स्वप्ने तु गज इत्याकारवदयमित्याकारोऽपि कल्पित एव । उभयाकारबाधेऽप्यधिष्ठानभूतचैतन्याबाधान्न शून्यवादप्रसङ्गः । जाग्रदशा-यामपि शुक्तीदङ्कारविलक्षणस्य प्रातीतिकस्यैव रजतेदङ्कारस्य भानाभ्युपग-माच्च ।[1] अध्यस्तमेव हि परिस्फुरति भ्रमेष्विति न्यायात् । शुक्तीदमंशभान-पक्षेऽपि नेदमंशसत्यत्वमध्यासे प्रयोजकम् । किं त्वधिष्ठानसत्यत्वम् । अधि-ष्ठानं च तत्राज्ञातं शुक्तिचैतन्यमिवात्रापि साक्षिचैतन्यं विद्यत एवेत्युपपादि-तम् । तस्मान्न पक्षद्वयेऽपि काप्यनुपपत्तिः । अत्र च स्वामिकपदार्थभोक्ता तैजस इत्युच्यते । पित्ताख्यतेजःप्रधानकत्वात् आदित्यादिज्योतिरन्तरेणा-पि भासकत्वादिति वा। एवं जाग्रत्स्वप्नभोगद्वयेन श्रान्तस्य जीवस्य तदुभ-यकारणकर्मक्षये ज्ञानशक्त्यवच्छिन्नस्य सवासनस्यान्तःकरणस्य कारणात्म-नावस्थाने सति विश्रामस्थानं सुषुप्त्यवस्था। न किञ्चिदवोदेषमिति कारण-मात्रोपलम्भः सुषुप्तिः । तत्र जाग्रत्स्वप्नभोग्यपदार्थज्ञानाभावेऽपि साक्ष्या-

---

रकोक्तिं प्रमाणयति—अध्यस्तमेवेत्यादि । नन्विदं रजतमिति भ्रमे शुक्तीदमंशस्य भानपक्षे भ्रमे विशिष्टस्याप्रातीतिकत्वनियमात् अयं गज इति स्वप्नानुपपत्तिस्तत्राह—शुक्तीति । सत्यत्वं प्रातीतिकान्यत्वम् । प्रयोजकं व्यापकम् । तत्रापि स्वप्नेऽपि । कारणेति । तदानीमुपधायकेत्यर्थः । क्रियाशक्त्यवच्छिन्नमात्रस्य प्राणस्य सुषुप्तौ लयाभावादाह — ज्ञानशक्त्यवच्छिन्नस्येत्यादि । कारणात्मना कारणीभू-ताज्ञानगतसंस्काररूपेण । कारणमात्रोपलम्भः स्थूलसूक्ष्मरूपदेहानुपलम्भवि-शिष्टः कारणोपलम्भविशेष इत्यर्थः । यथाश्रुतेऽविद्यावृत्तिरूपकार्योपलम्भस्य साक्षि-णस्सत्त्वादसङ्गतिः । मूर्छाप्रलयादिवारणाय विशेष्यदलम् । अवस्थाज्ञानाकारं सं-स्कारतापन्नजाग्रत्स्वप्नविषयकमनादिजीवभेदादिविषयकं च यदवस्थारूपमज्ञानं,

---

१. स्वप्नाधिष्ठानविषयकं च इति पाठान्तरम् ।

कारं सुखाकारमवस्थाज्ञानाकारं चाविद्याया वृत्तित्रयमभ्युपेयते।अहङ्काराभावाच्च नैका विशिष्टवृत्तिः सुषुप्त्यभावप्रसङ्गाच्च । अत एव वृत्तिरूपस्योपल-

---

तद्विषयकम् । संस्कारादीनां साक्षिसम्बन्धेन प्रकाशप्रसक्तेस्तल्लाज्ञानमावश्यकम् । त्रयमिति । आकारत्रयोपहितरूपैर्भेदसम्भवादित्यभिप्रायम् । समूहालम्बनैकवृत्त्या निर्वाहे वृत्तित्रयकल्पने गौरवात् । ननु, मूलाज्ञानाकारवृत्त्यापि 'नावेदिष'मिति स्मरणोपपत्तेः अवस्थाज्ञानविषयकवृत्तिः किमित्युक्ता । उच्यते—'न किञ्चिदवेदिष-मित्यनेकपदार्थविषयकाज्ञानस्मृतेर्मूलाज्ञानेनानुपपत्तेः तस्य चिन्मात्रविषयकत्वात्। अत एव 'आत्मानमीशान्यं मनुष्यं वा नावेदिषं,आकाशादिकं नावेदिष'मिति स्मृतेरुपपत्तिः । इदं तु बोध्यम् । मूलाज्ञानाकाराप्यविद्यावृत्तिस्सुषुप्तावश्यं वाच्या । प्रलयान्यकाले सर्वदैव तत्स्वीकारात् । 'एतावत्कालं मूढोऽहमास'मिति नानाविषयाविशेषितरूपेणाप्यज्ञानस्य जागराद्यकाले तत्त्वज्ञानकाले च स्मरणात् । एवं च मनोऽवच्छिन्नचितः स्वप्नाधिष्ठानत्वपक्षेऽप्युक्तस्मरणोपपत्तिरिति । नन्वज्ञानविशिष्टसाक्षिविषयिका सुखाभिन्नसाक्षिविषयिका च वृत्तिः कुतो नोक्ता । तत्राह—**नैकेति**। विशिष्टवृत्तिः अज्ञानादिविशिष्टसाक्षात्कारवृत्तिः । **अहङ्काराभावादिति** । तथा च संसर्गविषयकवृत्तौ अहङ्कारत्वेन हेतुता । सा च हेतुता निमित्ततया कार्यसहभावेनैवेति नाहङ्कारलयोत्पत्तिकालेऽपि विशिष्टविषयकवृत्त्युत्पत्तिः । अहङ्कारत्वं च स्थूलावस्थमनस्त्वम् अहमाकाराविद्यावृत्तित्वं वा । तार्किकादिमते तु निर्विकल्पकस्यापि सुषुप्तावस्वीकारात् जन्यज्ञानमात्रे त्वङ्मनोयोगस्य हेतुत्वम् । नन्ववस्थाज्ञानस्यैवाज्ञानसाक्षिणोस्संसर्गविषयकत्वं स्वीकृत्य तादृशसंसर्गभानमुपपाद्यताम् । किमहङ्कारहेतुतयेति चेन्न । तावतापि संसर्गाकारवृत्तेर्वारयितुमशक्यत्वात् सुषुप्तिपूर्वक्षणे लिङ्गपरामर्शादिसत्त्वे संसर्गानुमित्यादेर्दुर्वारत्वाच्च । अत एवाह—**सुषुप्त्यभावप्रसङ्गादि-**ति । सुषुप्तौ संसर्गाकारवृत्तिस्वीकारे सुषुप्त्यभावप्रसङ्गात्तादृशवृत्तावहङ्कारहेतुताकल्पनात् तादृशहेत्वभावात्तादृशवृत्त्यभाव इति समुदायार्थः । न च निर्विकल्पकाविद्यावृत्तेस्संस्कारतापन्नमनआदाविवाज्ञानसंसर्गादावप्यविद्यावृत्त्युत्पत्तिवारणमिति वाच्यम् । जागरस्वप्नयोरज्ञानादिसंसर्गविषयिकाया 'न जानामी'त्यादिवृत्तेरुत्पत्त्या तत्सामग्र्याश्चाज्ञानादिरूपायास्सुषुप्तावपि तदापत्तेः संस्कारतापन्नमनआदौ तु संसर्गविषयकानुमित्यादिकमहङ्कारहेतुकमेव जाग्रदादिवृत्तेरुत्पत्तिकाले जायते । नाविद्यावृत्तिरिति वैषम्यम् । **वृत्तीत्यादि** । तथा च वृत्तिरूपः कारणोपलम्भो लक्षणे निवेश्य इति भावः । इह सुषुप्तौ । परामर्शात् स्मरणात् । अननुभवे वृत्त्यनुत्पा-

स्मस्याभावान्न प्रलयेऽतिव्याप्तिः । तत्र तत्कल्पनाबीजाभावात् । इह च सुखमहमस्वाप्सं न किञ्चिदवेदिषमिति सुप्तोत्थितस्य परामर्शात् । अननुभवे च परामर्शानुपपत्तेः । अन्तःकरणोपरागकालीनानुभवजन्यत्वाभावाच्च न तत्तोल्लेखाभावेऽपि स्मरणत्वानुपपत्तिः । स्मरणे तत्तोल्लेखनियमाभावाच्च जाग्रद्दशा-

दे । ज्ञानसूक्ष्मावस्थारूपसंस्काराभावादिति शेषः । अन्तःकरणेति । अहङ्कारेत्यर्थः । जन्यत्वाभावात्तत्तोल्लेखाभावः । तस्मिन् सत्यपि न स्मरणत्वानुपपत्तिरित्यर्थः । अहङ्काराभावेन कालदेशविशिष्टरूपेणाज्ञानादेरननुभवात्तेनरूपेण न स्मरणम् । किं तु केवलाज्ञानत्वादिविशिष्टरूपेणेति भावः । (१ननु, सौषुप्तानुभवे यद्यज्ञानांशे देशादिवैशिष्ट्यं न भाति । अहङ्काररूपकारणाभावात्साविषयकत्वाज्ञानत्वयोरपि वैशिष्ट्यं तत्र न भायात् । इष्टापत्तौ च न किञ्चिदवेदिषमिति स्मृतौ तदुल्लेखानुपपत्तिः । उक्तवैशिष्ट्यांशे न स्मृतित्वम् । किं त्वनुभवत्वमित्यस्याद्वैतसिध्युक्तस्य स्वीकारेऽपि अवस्थाज्ञानाकारा वृत्तिरिति मूलासङ्गतिः । स्मृतिकाले स्मर्यमाणस्यावस्थाज्ञानस्याभिन्नत्वेन तत्रोक्तवैशिष्ट्यस्य साक्षिणो भानासम्भवादिति चेन्न । यथाभावस्य प्रतियोग्यनुयोगिविशिष्टत्वाभावत्वरूपाभ्यामेव ज्ञानस्य सविषयकत्वज्ञानत्वाभ्यामेव च प्रत्यक्षे भानं, तथैवाज्ञानस्य सविषयकत्वाज्ञानत्वाभ्यामेव प्रत्यक्षे भानम् । न तु शुद्धाज्ञानस्य । तयोरिव तस्यापि निर्विकल्पकावेद्यत्वात् । किं च तदुभयरूपविशिष्टत्वेनाज्ञानस्मृतिः तादृशीमेव स्वकारणीभूतामविद्यास्मृतिं कल्पयति । एवं चाज्ञानत्वादिसंसर्गान्यसंसर्गविषयकवृत्तावेवाहङ्कारस्य हेतुत्वं कल्प्यम् । ननु, प्रत्यक्षेज्ञानस्य सविषयकत्वसप्रकारकत्वनियमो युक्तः । विषयस्य पूर्वमुपस्थितत्वात् । ज्ञानत्वप्रकारकत्वनियमस्त्वयुक्तः । तस्य पूर्वमनुपस्थितत्वात् । अत एव सविषयकत्वांशे सविकल्पकं, ज्ञानत्वांशे निर्विकल्पकं नृसिंहाकारं ज्ञानस्य प्रत्यक्षं नव्यतार्किकैरुच्यत इति चेन्न । ज्ञानस्योत्पत्त्युत्तरं प्रत्यक्षतामते हि तादृशयुक्तत्वायुक्तत्वविचारः । न तु तस्य साक्षिवेद्यत्वमते वा पूर्वानुपस्थितस्यापि ज्ञानत्वादेरपि भानस्वीकारादिति ध्येयम् । स्मरणेति । यस्य कालादिविशिष्टरूपेणानुभवस्तस्यैव तद्रूपेण स्मृतिरिति भावः । ननु, सुषुप्तौ तादृशवृत्त्यभावेऽपि जाग्रत्काल एव सुखमस्वाप्समित्यनुभवः कल्प्यताम् । तत्राह—जाग्रदित्यादि । ननु, जागरे सुषुप्तेः प्रत्यक्षं मास्तु । अवस्थाज्ञानं मनोलयश्चेति द्वयं हि सुषुप्तिः । तत्राद्यं जाग्रत्कालीनधिया नष्टत्वात्, द्वि-

१. 'अत एव स्मरणे तत्तोल्लेखानियम इत्याह—स्मरणेति ।' इति पाठान्तरम् ।

यामस्वाप्समित्यनुभवानुपपत्तेः लिङ्गाभावेनाश्रयासिद्ध्या चानुमानस्यासम्भवात् । अहङ्कारस्तूत्थानसमय एवानुभूयते । सुषुप्तौ लीनत्वेन तस्यानननुभूतत्वात् स्मरणानुपपत्तेः । मुखप्रतिबिम्बाश्रये दर्पणे जपाकुसुमलौहित्याध्यासेन रक्तं मुखमिति प्रतीतिवदहङ्काराश्रयतया साक्षिचैतन्यस्य स्मरणाश्रयत्वादहमस्वाप्समिति सामानाधिकरण्यप्रतीतिः, न पुनरहं सुखीतिवदाश्रयतया । स्मृतिसंशयविपर्ययाणां साक्षिचैतन्याश्रयत्वनियमादहङ्कारस्य च प्रमाणजन्यज्ञानाश्रयत्वनियमात् प्रमात्वेनैव तत्कार्यतावच्छेदात् अप्रमात्वावच्छेदेन च

तीयं चायोग्यत्वात् नष्टत्वाच्च न प्रत्यक्षम् । अनुमितिस्तु स्यात्तत्राह—लिङ्गेत्यादि । स्वप्नजागरणयोर्मध्यकालसुषुप्तिमान् । ज्ञानसामान्याभावात् जन्यज्ञानसामान्याभावाद्वेत्यनुमानं न सम्भवति । आद्यो हि न हेतुः । असिद्धत्वात् पक्षे ज्ञातुमशक्यत्वाच्च । अत एव न द्वितीयः । न च तत्कालविशिष्टरूपेण कस्याप्यस्मृतेः तत्काले जन्यज्ञानसामान्याभावोऽनुमेयः । यदा ह्यनुभवो जायते, तत्कालविशिष्टं स्वविषयं संगृह्णाति । ततश्च तद्रूपेण स्मृतेरुत्पत्तिस्स्यात्, तदभावाच्च तादृशज्ञानाभाव इत्यनुमानसम्भव इति वाच्यम् । ज्ञानस्य स्मृतिजनकत्वानियमात् । तस्माल्लिङ्गासम्भवः, आश्रयासिद्धिश्च । तत्कालस्यानुपस्थितत्वात् । ननु, स्मृतिरपि न सम्भवति । 'अहमस्वाप्समि'ति स्मर्यमाणाहङ्कारस्य पूर्वमननुभवात् । तत्राह—अहङ्कार इत्यादि । अनुभूयते साक्षिणा विषयीक्रियते । ननु, तथाप्यज्ञानादिस्मृत्याश्रयतयाहङ्कारस्य साक्षिभास्यत्वानुपपत्तिः । अज्ञानाद्यनुभवानाश्रयत्वात् । तत्राह—मुखेत्यादि । रक्तं मुखमिति प्रतीतिवत् रक्तं मुखमिति प्रतीतावेकत्र दर्पणे रक्तरूपमुखयोर्भानवत् । यत्र मुखं दर्पणस्थं पूर्वमदृष्ट्वा रक्तरूपस्य दर्पणे आरोपः, तत्र मुखेन रक्तत्वारोपसम्भवः । अभिव्यक्तीभूतमुखस्य पूर्वं ज्ञानाभावात्तादृशस्थलं दृष्टान्त इति भावः । आश्रयतयेति । अहङ्कारस्य स्मरणाश्रयतयेत्यर्थः । प्रतीतिरित्यनुषज्यते । साक्षिचैतन्याश्रयत्वात् अविद्योपहितचिदाश्रयत्वात् । ननु, प्रमायामिव स्मृत्यादावप्यहङ्कार आश्रयस्स्यात् । तत्राह—अहङ्कारस्येत्यादि । ज्ञानाश्रयत्वात् ज्ञानमात्राश्रयत्वात् । तत्र हेतुः । प्रमात्वेनेत्यादि । तत्कार्यतेति । अहङ्काररूपपरिणामिकार्यतेत्यर्थः । अप्रमात्वेति । स्मृतिसंशयविपर्ययसाधारणाप्रमात्वेत्यर्थः । कारणत्वात् परिणामित्वात् । प्रमां प्रत्यप्यविद्यायाः परिणामित्वम् । कार्यमात्रं प्रति तत्स्वीकारात् । अप्रमायां त्वविद्याया एव, नाहङ्कारस्येति ज्ञापनार्थमेवकार

अविद्यायां एव कारणत्वात् । अत एवानाप्तवाक्यादिजन्यपरोक्षविभ्रमोऽप्यविद्यावृत्तिरेवेत्यभ्युपगमो वेदान्तविदाम् । तत्रान्तःकरणवृत्तिजनकसामग्रीसम्भवेऽपि प्रमात्वाभावावरोधेनान्तःकरणस्यासामर्थ्यात् । नामादिषु ब्रह्माध्यासस्तु इच्छाधीनतया भ्रमप्रमाविलक्षणा मनोवृत्तिरेव कामादिवत् । तदुक्तं—'अत एव चोदनाजन्यत्वान्मानसी क्रियैव सा । न ज्ञान'मिति । एतेन तर्कस्यापि मनोवृत्तित्वं व्याख्यातम् । व्याप्यारोपेण व्यापकप्रसञ्जनात्मकस्य तर्कस्येच्छाधीनतया भ्रमप्रमाविलक्षणत्वादिति । अत एव मननं निदिध्यासनसहिते श्रवणाख्ये वेदान्तवाक्यविचारे श्रोतव्यो मन्तव्यो नि- पश

उक्तः । स्मृतेरज्ञातविषयकत्वात् संशयविपर्ययथोर्बाधितार्थकत्वादप्रमात्वम् । तत्रान्तःकरणेति । शब्दज्ञानमर्थोपस्थितिरित्यादिसामग्र्या यथा मनोवृत्तिरशाब्दप्रमारूपा जायते, तथा शाब्दभ्रमरूपापि सम्भवति । परं तु भ्रमं प्रत्यविद्याया एव परिणामित्वात् न मनसः परिणामित्वमिति भावः । ननु, नामादौ ब्रह्मैक्योपासना न प्रमा । बाधितविषयकत्वात् । नापि भ्रमः । नामादौ ब्रह्मभेदस्य ज्ञातत्वेऽपि तदुत्पत्तेः । तथा च तत्राविद्याया इव मनसोऽपि परिणामित्वसम्भव इत्यत आह — नामादीति । ब्रह्माध्यासः ब्रह्मतादात्म्याकारवृत्तिः । कामादिवत् इच्छाद्वेषादिवत् । चोदनाजन्यत्वात् 'नाम ब्रह्मेत्युपासीते'त्यादिविधिवाक्यार्थस्य इष्टसाधनत्वस्य ज्ञानाधीनेच्छाजन्यप्रयत्नसाध्यत्वात् । न ज्ञानमिति । ज्ञानस्योक्तप्रयत्नं विनापि दुर्गन्धादिविषयकस्योत्पत्तेः प्रमाणव्यापाराभावे उक्तप्रयत्नसत्त्वेऽप्यनुत्पादान्नोक्तप्रयत्नजन्यता । अत एव 'पत्न्याज्यमवेक्षेत' इत्यादौ ज्ञानानुकूलव्यापारे विधिरिति भावः । व्याप्येत्यादि । 'वह्निव्याप्यधूमवान् ह्रद' इत्याद्यारोपजन्यस्य ह्रदो वह्निमान् स्यादि'त्याकारकपरिणामस्य इच्छाधीनत्वेन भ्रमत्वप्रमात्वे इत्यर्थः । निदिध्यासनसहितेति । निदिध्यासनरूपफलोपकार्यङ्गसहितेत्यर्थः । साक्षात्कारमुद्दिश्य मननादिसहितं श्रवणं विधीयते । तत्र श्रवणं नाम तत्त्वमस्यादिवाक्यं यदि ब्रह्मात्मैक्यपरं न स्यात्,तदोपक्रमोपसंहारादिकमद्वैतब्रह्मबोधकं न स्यादित्यादि तर्करूपम् । तस्य च प्रमाणभूतवाक्यतात्पर्यविषयकत्वेन प्राधान्यम् । ब्रह्मात्मैक्यसिद्ध्यनुकूलतर्कादयोऽपि श्रवणेऽन्तर्भवन्ति । मननं तु वाक्यजन्यज्ञानस्य परोक्षनिश्चयभावसम्पादकस्तर्कः । निदिध्यासनमपरोक्षनिश्चयत्वसम्पादकस्तर्कः तत्त्वमस्यादिवाक्यजं ज्ञानं यदि परोक्षं स्यात्, तर्हि आत्मविषयकं न स्यादित्यादिरूपः । तयोस्तत्सम्पादनरूपफलोपकारित्वेन श्रवणाङ्गत्वम् ।

दिध्यासितव्य इत्यादिविधिरप्युपपद्यते । तस्य चतुर्विधान्वयव्यतिरेकादि-तर्करूपत्वात् । दृग्दृश्यान्वयव्यतिरेकः, साक्षिसाक्ष्यान्वयव्यतिरेकः, आगमापायितदवध्यन्वयव्यतिरेकः, दुःखिपरमप्रेमास्पदान्वयव्यतिरेक इति समन्वयाध्यायाविरोधाध्यायसाधनाध्यायफलाध्यायाः । अनुवृत्तव्यावृत्तान्वयव्यतिरेकः पञ्चमः । एतच्च सर्वेषां वेदान्तानुकूलतर्काणां चतुर्लक्षणी-

---

तदसम्पादने हि श्रवणफलीभूतं वाक्यजज्ञानं नापरोक्षभ्रमहेत्वज्ञानस्य निवर्तकम् । अथवा ब्रह्मात्मैक्यसिद्ध्यनुकूलस्तर्को मननम् । निदिध्यासनं तु श्रवणमननयोरैकाग्र्यं पौनःपुन्यरूपम् । तयोश्चैक्यविषयकासम्भावनाविपरीतभावनाबुद्धिनिरासद्वारा साक्षात्काररूपफलाप्रामाण्यधीनिरासकत्वेन उपकारित्वात् श्रवणाङ्गत्वम् । आद्यकल्पो विवरणे, द्वितीयकल्पस्संक्षेपशारीरकादावुक्तः । दृग्दृश्यान्वयव्यतिरेक इत्यादि । दृशि दृश्यानां तादात्म्यमन्वयः । तस्य च निरूपणासम्भवात् दृशि दृश्यानि कल्पितानीति दृशि दृश्यानामन्वयेनैव व्यतिरेकस्सिध्यतीत्यर्थः । स्वप्रकाशदृशस्तादात्म्येन सिद्धं जडं यदि सत्यं स्यात्, तदा जडत्वादिना स्वप्रकाशादत्यन्तविलक्षणं न स्यादिति तर्को बोध्यः । एवमग्रेऽपि निर्विकारसाक्षितादात्म्येन सिद्धं जडं यदि सत्यं स्यात्, तदा विकारवत् न स्यात् । एवमागमापायशून्यात्मतादात्म्येन सिद्धं दृश्यं यदि सत्यं स्यात, तदा आगमापायित्वरूपकादाचित्कत्ववन्न स्यात् । परमप्रेमास्पदात्मतादात्म्येन प्रतीयमानं यदि सत्यं स्यात्, तदा दुःखसाधनं न स्यात् । सद्वस्तुतादात्म्येन प्रतीयमानं पटादिकं यदि सत्यं स्यात् तदा मिथ्याभूतं न स्यादिति बोध्यम् । एवं साक्षिणो निर्विकारत्वात् साक्ष्याणां च विकारित्वात् साक्षिणि साक्ष्यस्यान्वयेन व्यतिरेकः सिध्यतीत्यर्थः । एवमागमापायितया उत्पत्तिविनाशवत्त्वरूपया कादाचित्कत्वेन मिथ्यात्वात् सर्वकादाचित्कानामधिष्ठानमात्मा । स हि तेषामवधिः । आगमापायशून्यत्वात् । यथा वृष्टिमतां देशानां वृष्टिशून्या गङ्गावधिरुच्यते । तथा च तत्र तादात्म्येनानुपपन्नेनव्यतिरेकः । एवं दुःखित्वेनोपलभ्यमानस्याहङ्कारादेः परमप्रेमास्पदात्मभिन्नत्वात् तयोस्तादात्म्यरूपान्वयेनानुपपद्यमानेनात्मन्यहङ्कारादि कल्पितम् । एवं सर्वेषु दृश्येषु मिथो व्यावृत्तेषु भिन्नेषु सद्रूपेणानुवृत्त आत्मा । तस्मात्तत्र तेषामन्वयेन तादात्म्यरूपेण व्यतिरेकस्सिध्यति । यत् येषु व्यावृत्तेषु तादात्म्येनान्वितं, तत्र तानि कल्पितानि । यथा रज्जौ मालासर्पादि । यथा वा जातौ व्यक्तय इति भावः । अनुकूलेति । अनुग्राहकेत्यर्थः । तर्काणामिति । कारणानन्यत्वादितर्काणामित्यर्थः । चतु-

मीमांसाप्रतिपादितानामुपलक्षणमित्यभियुक्ताः । विस्तरस्तु वेदान्तकल्पलतिकायामनुसन्धेयः । तदेवं सुषुप्त्यवस्थायामस्त्यानन्दभोगस्तद्भोक्ता च सुषुप्त्यभिमानी प्राज्ञ इत्युच्यते । प्रकर्षेणाज्ञत्वात्तदानीं विशेषावच्छेदाभावेन प्रकृष्टज्ञत्वाद्वा । तदा चान्तःकरणस्य लयेऽपि तत्संस्कारेणावच्छेदान्न जीवाभावप्रसङ्गः, न वा सार्वज्ञ्यापत्तिः । ईशाभेदप्रतिपादनं च शरीरेन्द्रि-

---

लक्षणीति । चतुरध्यायीत्यर्थः । प्रतिपादितानामिति । 'तदनन्यत्वमारम्भणशब्दादिभ्य इत्यादिसूत्रेषु प्रपञ्चमिथ्यात्वजीवब्रह्मैक्यबोधकवेदान्तानुग्राहकतर्काः प्रतिपादिताः । तथाहि तदनन्यत्वं तस्य ब्रह्मणः अनन्यत्वं ब्रह्मान्यशून्यत्वम् । वाचारम्भणवृत्तेः आदिपदोदितश्रुतियुक्तिभ्यः । वाचेत्यादिश्रुतेरयमर्थः । आरम्भणं आरभ्यमाणं कार्यमात्रं वाचा वाङ्मात्रं मिथ्येति यावत् । अकार्यमप्यविद्यादिकं नाममात्रम् । उभयत्र हेतुगर्भविशेषणं विकार इति । यतो नाशोत्पत्त्यादिविकृतिमत्, अतो मिथ्येत्यर्थः । कार्यनष्टयोर्हि कदाचिदसत्त्वं वाच्यम् । सर्वदा सत्त्वासम्भवात् । तथा च तदनधिकरणकालस्य तद्वृत्तसत्त्वावच्छेदकत्वासम्भवात् असत्त्वं दुर्वारमिति । अधिष्ठानरूपकारणानन्यत्वं दृश्यमात्रस्य मिथ्यात्वमिति यावत् । तथा च दृश्यमात्रं यदि सत्यं स्यात्, तदा किञ्चित्कालावच्छिन्नेनासत्त्वेन निरूपणानर्हं न स्यादित्यादितर्को बोध्यः । कल्पलतिकेति । श्रवणादिस्वरूपनिरूपणमुक्तरीत्या तत्र कृतम् । आनन्दभोगः सुखाकारवृत्तिः । भोक्ता आश्रयः । अभिमानी आश्रयः । प्रकर्षेणेति । मूलाज्ञानं सर्वदास्ति । अवस्थाज्ञानमपि सुषुप्ताविति प्रकर्षः । विशेषावच्छेदाभावेन वृत्तित्रयविषयान्यविषयविशेषविषयकत्वाभावेन । सौषुप्तसाक्षिण इति शेषः । विशेषविषयकत्वस्य दुःखप्रयोजकत्वेन तदभावो ज्ञानस्य प्रकर्षः । प्रज्ञ एव प्राज्ञः । प्रज्ञादिभ्यश्चेत्यनेन स्वार्थेऽणिति भावः । अवच्छेदादिति । मनोऽवच्छिन्नचैतन्यमेव जीव इति पक्षे इति शेषः । आवद्योपहितचैतन्यस्य जीवत्वपक्षे नोक्तप्रसङ्गः । मनोलयेऽप्यावद्यकैव जीवत्वात्सार्वज्ञ्यादिसम्पादनात् । मनोऽवच्छिन्नस्य जीवत्वे तु मन उच्छेदेन जीवत्वाभावस्स्यात्, ईशाभेदसम्पत्त्या सार्वज्ञ्यापत्तिश्च स्यात् । जीवस्याभावेन तं प्रत्यविद्यावृणोतीत्यस्य वक्तुमशक्यत्वादिति भावः । ईशाभेदेति । प्रजा अहरहर्ब्रह्म गच्छन्त्योऽपि न विन्दन्तीत्यादिश्रुतेरित्यादिः । गच्छन्त्यः ऐक्येन समानीताः । ननु, तदा वृत्तिरूपेण परिणतमनसः संस्कारसत्त्वे तज्जन्यस्मृतिरूपकार्याणां साक्ष्याश्रितत्वात् तादृशसंस्काराणामुक्तस्मृतिहेत्वविद्या-

याध्यभिमानरहितत्वेनोपचारात् तत्संस्कारस्य च निमित्तकारणत्वेन साक्ष्याश्रितकार्योपादानकोटावप्रवेशात्र तद्भेदेऽपि साक्षिभेदः । जागरणे त्वन्तःकरणस्य प्रमात्राश्रितकार्योपादानकोटौ प्रवेशात्तद्भेदेन प्रमातृभेद एव । साक्षिण एव चाधिकोपाधिविशिष्टस्य प्रमातृत्वान्न प्रतिसन्धानानुपपत्तिरिति । 'मातृमानप्रभेदेऽपि प्रतिदेहं न भिद्यते । साक्षित्वाद्याद्यर्थवद्यस्मात्स आत्मेत्युच्यते ततः ॥ व्यभिचारो मिथो यद्वत्प्रमात्रादेः स्वसाक्षिकः । सर्वमात्राद्यभावार्थसाक्षित्वान्न तथात्मनः ॥' इति वार्तिककारपादैर्व्यवहारदशायामपि साक्षिभेदनिराकरणात् सुषुप्तौ तद्भेदकल्पनं केषाञ्चिन्मोह एवेत्यवधेयम् ।

नामिव साक्षिकोटौ निवेशेन तद्भेदेन साक्षिभेदः स्यात् । वार्तिकमते हि साक्षिमात्राश्रितं स्मरणादिकम् । न साक्ष्यनन्तर्गतवस्त्वाश्रितम् । तस्य संस्काराश्रितत्वे तु संस्कारोऽपि साक्ष्यन्तर्गतो वाच्यस्स्यात् । तथा च वक्ष्यमाणवार्तिकविरोधः । तत्राह—**संस्कारस्येति** । **निमित्तेति** । स्मृतेर्निमित्तेत्यर्थः । **कार्येति** । स्मृत्यादिकार्येत्यर्थः । स्मृत्यादेरविद्यामात्रपरिणामत्वस्योक्तत्वात् न मनसस्तत्र उपादानत्वं नतरां तत्संस्कारस्येति भावः । अत्रेदं बोध्यम्—मूले साक्षिमात्राश्रितत्वरूपं साक्ष्याश्रितत्वं स्मरणादेरुक्तं, तदविद्यागतचिदाभासः साक्षीति वार्तिकमतमवलम्ब्यैव । अत एव मनोगतचिदाभासस्य जीवत्वेन तन्मतेऽविद्यायाः जीवानुपाधित्वेन भेदास्वीकारात् साक्षिणः सर्वजीवेष्वैक्यम् । बिम्बप्रतिबिम्बानुगतशुद्धचित् साक्षीतिमते तु स्मृत्यादिकार्यं न साक्षिमात्राश्रयम् । किं त्वविद्याविशिष्टचिदाभासाश्रितमपि । ननु, पूर्वदिनस्थप्रमात्रानुभूतमद्यदिनस्थप्रमात्रा न स्मर्येत । तयोर्भेदात् । तत्राह—**साक्षिण इत्यादि** । **अधिकोपाधीति** । सवृत्तिकमन इत्यर्थः । प्रमातृत्वात् सवृत्तिकमनोऽवच्छिन्नचिद्रूपस्य च प्रमातुस्वरूपत्वात् । **न प्रतिसन्धानेति** । तथा च साक्षिणि प्रमा मृत्योः सामानाधिकरण्यसम्बन्धेन कार्यकारणभावसम्भवः । न चैकमनोगतस्य मनोऽन्तरावच्छिन्नसाक्षिण्यपि स्मृत्यापत्तिरिति वाच्यम् । तन्मनोगतप्रमाजन्यसंस्कारस्य मनोऽन्तरावच्छिन्ने विरहात् तत्तच्छरीरावच्छिन्ने स्मृत्यादौ तत्तच्छरीराणामपि हेतुत्वाच्च । मनस्तत्संस्कारान्यतरावच्छिन्नं चैतन्यं साक्षीति केचित् । तदुक्तन्यायेन वार्तिकोक्तयुक्त्या च विरुद्धमिति ज्ञापयितुमाह—**मातृमानेत्यादि** । स आत्मेत्युच्यते 'एषत आत्मान्तर्याम्यमृत इति श्रुतावितिं शेषः । व्यभिचारः मिथः परस्परभावकालीनत्वम् । **स्वसाक्षिकः** आत्मसाक्षिकः । **सर्वमात्राद्यभावार्थेति** । सर्वे ये मात्रादिरूपाः, तदभावरूपाश्चार्था इत्यर्थः । **व्यवहारेति** । जागरेत्यर्थः । **साक्षिभेदेति** । प्रतिदेहं

ननु, दुःखमहमस्वाप्समिति कस्यचित्कदाचित्परामर्शात् सुषुप्तौ दुःखानुभवोऽप्यस्तु। न। तदानीं दुःखसामग्रीविरहेण तदभावात्। सुखस्यचात्मस्वरूपत्वेन नित्यत्वात् शय्यादेरसमीचीनत्वेन च दुःखमित्युपचारात् दुःखमहमस्वाप्समिति प्रत्ययोपपत्तिः। अथवा अवस्थात्रयस्यापि त्रैविध्याङ्गीकारात् सुषुप्तावपि दुःखमुपपद्यते। तथा हि—प्रमाज्ञानं जाग्रज्जाग्रत्, शुक्ति-

---

साक्षिभेदेत्यर्थः। तद्भेदेति। एकस्मिन्नपि देहे मनोऽवच्छिन्नसाक्षितो मनस्संस्कारावच्छिन्नसाक्षिणो भेदेत्यर्थः। यथा मनोभेदेन साक्षिभेदः, तथा तत्संस्कारभेदेनेति तेषां भावः महामोह एव। न तु न्यायानुसरणम्। ननु, साक्षिण एकत्वे एकस्य प्रमातुः प्रमात्रन्तरीयसुखाद्यनुभवापत्तिरिति चेन्न। अहमन्यमनोगतसुखविशिष्ट इत्यनुभवस्यापादनासम्भवात् एकमनोऽवच्छेदेनापरमनोगतसुखादिवैशिष्ट्यस्य उक्तानुभवविषयस्य अप्रसिद्धेः। ननु, तथापि तत्पुरुषीयसुखादिभासकचितस्तन्मनोऽवच्छिन्नचित्त्वेन रूपेण साक्षितास्तु। सुषुप्तावपि तन्मनोऽभिव्यक्तिरस्त्येव। अवस्थाभेदेऽपि स्वरूपाभेदात्। किं चाविद्यावच्छिन्नचितस्साक्षित्वपक्षे मनोऽवच्छिन्नचितमादाय विनिगमकाभाव इति चेन्न। शुद्धचितोऽन्तर्यामिणो वा चैतन्यस्य साक्षित्वपक्षे मनोभेदेन साक्षिभेदे मानाभावात्। किं च अविद्यावच्छिन्नस्य साक्षित्वपक्षेऽपि मनोऽवच्छिन्नस्य न साक्षितासम्भवः। अविद्यातद्वृत्त्यादीनां मनोऽपेक्षया अधिकदेशव्यापकानां कात्स्न्र्येन मनोऽवच्छिन्नचित्सम्बन्धाभावात्। अत एव मनोवृत्त्यनिर्गमकालेऽविद्यावच्छिन्नचिता घटाद्युपादानभूतया घटादेर्भानवारणाय घटाद्यवच्छेदेनावरणं कल्प्यत इति मूल एव पूर्वमुक्तम्। तदस्वीकारे च वृत्तेरावरणभङ्गार्थत्वपक्षस्य उच्छेदस्स्यात्। उपचारात् जाग्रत्कालीनाच्छय्यादौ दुःखसाधनत्वज्ञानात्। दुःखमित्यादि। दुःखसाधनशय्याधिकरणकं शयनं कृतवानहमित्यर्थः। जागरे त्रैविध्यमाह—प्रमेत्यादि। स्तब्धीभावः अहमाकारवृत्त्यन्यवृत्तिसामान्याभावः। सात्त्विकी सत्त्वगुणपरिणामरूपसुखाकारात्मविषयिका। राजसी रजोगुणविषयिका। रजोगुणस्य दुःखादिपरिणामयोग्यत्वेन दुःखत्वोपचार इति भावः। तामसी तमोगुणविषयिका। तिस्रो वृत्तयः सत्त्वगुणस्यैव परिणामाः ज्ञानत्वात्। अथवा सुखरूपेण परिणतसत्त्वगुणविषयिका सात्त्विकी। दुःखरूपेण परिणतरजोगुणविषयिका राजसी। मोहरूपेण परिणततमोगुणविषयिका तामसी। न च सत्त्वादिगुणपरिणामरूपा वृत्तिस्सात्त्विक्यादिरूपात्मसुखविषयिका। एवं सुखाकारेत्यस्य सर्वत्रानुषङ्गादिति वाच्यम्। दुःखविषयकज्ञानं विना दुःखविषयकस्मृत्यसम्भवात् ज्ञानरूपाया वृत्तेः सत्त्वान्यगुणपरिणाम-

रजतादिविभ्रमो जाग्रत्स्वप्नः, श्रमादिना स्तब्धीभावो जाग्रत्सुषुप्तिः । एवं स्वप्ने मन्त्रादिप्राप्तिः स्वप्नजाग्रत्, स्वप्नेऽपि स्वप्नो मया दृष्ट इति बुद्धिः स्वप्नस्वप्नः, जाग्रद्दशायां कथयितुं न शक्यते, स्वप्नावस्थायां च यत्किञ्चिदनुभूयते, तत्स्वप्नसुषुप्तिः । एवं सुषुप्त्यवस्थायामपि सात्त्विकी या सुखाकारा वृत्तिः, सा सुषुप्तिजाग्रत्, तदनन्तरं 'सुखमहमस्वाप्स'मिति परामर्शः । तत्रैव या राजसी वृत्तिः, सा सुषुप्तिस्वप्नः, तदनन्तरमेव दुःखमहमस्वाप्समिति परामर्शोपपत्तिः । तत्रैव या तामसी वृत्तिः, सा सुषुप्तिसुषुप्तिः । तदनन्तरं 'गाढं मूढोऽहमस्वाप्स'मिति परामर्शः । यथा चैतत्, तथा वासिष्ठवार्तिकामृतादौ स्पष्टम् । एवमध्यात्मं विश्वः, अधिभूतं विराट्, अधिदैवं विष्णुः, अध्यात्मं जाग्रत्, अधिदैवम्, पालनं, अधिभूतं सत्त्वगुणः, एवमध्यात्मं तैजसः, अधिभूतं हिरण्यगर्भः, अधिदैवं ब्रह्मा, अध्यात्मं स्वप्नः,

---

त्वासम्भवात् । 'सत्त्वात्सञ्जायते ज्ञान'मिति स्मृतेः । सुखादिरूपेण परिणामे तु धातुसाम्यादिकमेव निमित्तम् । अथ राजसी वृत्तिर्दुःखम् । तामसी वृत्तिः तमःपरिणामो मोहरूपः । तत्संस्कारश्च तदवच्छिन्नचैतन्यनाश एवेति न तदर्थं तद्गोचरवृत्त्यपेक्षेति चेन्न । दुःखमोहयोः वृत्तिपदेनाव्यवहारात् सविषयके ज्ञानेच्छादावेव वृत्तिपदप्रयोगादिति भावः । **एवमध्यात्ममित्यादि** । एवमभिहितानामेतेषामैक्योपासनया हिरण्यगर्भलोकप्राप्तिः अन्तःकरणशुद्धिद्वारा क्रममुक्तिश्चेति योजना । एतेषां[1] विश्वादिसमूहानां प्रथमं समूहमाह—रजोगुण इत्यन्तेन । अध्यात्मं शरीरमधिकृत्य स्थितः । अधिभूतं स्थूलभूतमधिकृत्य स्थितः । अधिदैवं शरीरस्थूलसमष्टिभिन्नसोपाधिरजोगुणरूपमधिकृत्य स्थितः । **अध्यात्मं जाग्रदिति** । अध्यात्मेन विश्वेनानुभूयमाना जाग्रदवस्थेत्यर्थः । अधिदैवं ब्रह्मकारणिका सृष्टिः । अधिभूतं सर्वभूतान्यधिकृत्य स्थितः । रजोगुणो ब्रह्मोपाधिः । एष प्रथमस्समूहः । एवमध्यात्मं-लिङ्गशरीरमधिकृत्य स्थितः । अधिभूतं सूक्ष्मभूतसमष्टिमधिकृत्य स्थितः । अधिदैवं तदुभयान्यसत्त्वगुणोपाधिकः । अध्यात्मं अज्ञानमधिकृत्य स्थितः । आधिभूतं अव्याकृतं चिदाभासादियुक्तमधिकृत्य स्थितः । अव्याकृतमीश्वरः । अधिदैवमज्ञानाव्याकृ-

---

१ एतेषां विश्वादिसमूहानां प्रथमं समूहमाह—सत्त्वं गुण इत्यन्तेन । अध्यात्मं शरीरमधिकृत्य स्थितः अधिभूतं स्थूलसमष्टिमधिकृत्य स्थितः, अधिदैवं शरीरस्थूलसमष्टिभिन्नं स्वोपाधिं सत्त्वगुणरूपमधिकृत्य स्थितः । अध्यात्मं जाग्रदिति । अध्यात्मेन विश्वेनानुभूयमाना जाग्रदवस्थेत्यर्थः । अधिदैवं पालनं, विष्णुकार्यं पालनम् । अधिभूतं सर्वभूतान्यधिकृत्य स्थितः । सत्त्वं गुणः विष्णूपाधिः । एषः प्रथमस्समूहः । एवमग्रेऽपि बोद्धव्यं ॥

अधिदैवं सृष्टिः, अधिभूतं रजोगुणः, एवमध्यात्मं प्राज्ञः, अधिभूतमव्याकृतं-अधिदैवं रुद्रः, अध्यात्मं सुषुप्तिः, अधिदैवं प्रलयः, अधिभूतं तमोगुणः। एवमध्यात्माधिभूताधिदैवानामेकत्वात् प्रणवावयवत्रयसहितानामुपहितानामैक्योपासनया हिरण्यगर्भलोकप्राप्तिः, अन्तःकरणशुद्धिद्वारा क्रममुक्तिश्च। एतत्सर्वोपाधिनिराकरणेन साक्षिचैतन्यमात्रज्ञानेन तु साक्षादेव मोक्ष इति। तदेवं त्रयाणामप्यवस्थात्रयसहितानां विश्वतैजसप्राज्ञानामविद्यात्मकत्वात् दृश्यत्वेन च मिथ्यात्वादनुपहितः केवलःसाक्षी तुरीयाख्योऽहमस्मीत्यर्थः। एवं व्यवहारतः सर्वव्यवस्थोपपत्तेः परमार्थतः कस्या अपि व्यवस्थाया अभावाच्च काप्यनुपपत्तिः। विस्तरेण चैतत्प्रपञ्चितमस्माभिर्वेदान्तकल्पलतिकायामित्युपरम्यते ॥ ८ ॥

ननु, जाग्रत्स्वप्नसुषुप्त्यवस्थासहितानां त्रयाणामपि तदभिमानिनां मिथ्यात्वात्तत्साक्षिणोऽपि मिथ्यात्वं स्यादविशेषादित्याशङ्क्य विशेषाभि-

---

तान्यतमो गुणोपाधिकः। एवमध्यात्मेत्यादि। प्रणवावयवरूपवाचकसहितानामुक्तसमूहानामेकत्वादेकत्वं विचिन्त्य उपहितस्वरूपाणामुक्तसमूहानामैक्योपासनया सत्यलोकप्राप्तिपूर्वकं कैवल्यमित्यर्थः। प्रथमावयवो वाचकः प्रथमसमूहश्च वाच्यः, तयोरेकत्वं विचिन्त्यम्। एवं द्वितीयौ तृतीयौ चावयवसमूहावेकत्वेन विचिन्त्यौ। ततः प्रथमसमूहस्य कारणेन द्वितीयेनैकत्वं, द्वितीयस्यापि तृतीयेन कारणेनैकत्वं चिन्तयित्वा सत्यलोकं प्राप्य हिरण्यगर्भेण तत्र विद्यमानेन सह मुच्यते। नृसिंहतापिन्यथर्वशिखामाण्डूक्यादिश्रुतिः तद्ग्राह्यं चात्र प्रमाणं बोध्यम्। अत्र प्रथमसमूहे सत्वगुणपालनविष्णूनां द्वितीयसमूहे रजोगुणसृष्टिब्रह्मणां च पाठः प्रामादिकः। विपरीतपाठस्य युक्तत्वात् अथर्वशिखातापनीयादौ तथैवोक्तत्वात् त्रयीं तिस्रोवृत्तीरित्यादिमहिम्नस्तोत्रीयव्याख्याने आचार्यैरेवोक्तत्वात्। अत्र ब्रह्मनिर्देशेन तदुपाधिरजोगुणादिलाभेऽपि तेषामपि स्वातन्त्र्येणाकारादिवाच्यत्वात् पृथगुक्तिः। अत एव गार्हपत्याद्यग्नीनां पृथिव्यन्तरिक्षद्युलोकानां ऋगादिवेदानां च विराडन्तःपातित्वेऽपि अथर्वशिखादौ प्रथमादिसमूहे पृथगुक्तिस्सङ्गच्छते। स्वातन्त्र्येण वाच्यता तु त्रयीमित्यादिपद्यादौ स्पष्टा। पद्यार्थमुपसंहरति—तदेवमिति ॥ ८ ॥

† अधिष्ठानत्वाज्ज्ञातत्वादिति पाठः स्यात्सुश्लिष्टः।

धानेन साक्षिणः सत्यत्वमाह—

अपि व्यापकत्वाद्धि तत्त्वप्रयोगा-
त्त्वतस्सिद्धभावादनन्याश्रयत्वात् ।
जगत्तुच्छमेतत्समस्तं तदन्य-
त्तदेकोऽवशिष्टः शिवः केवलोऽहम् ॥ ९ ॥

'न दृष्टेर्द्रष्टारं पश्ये'रिति साक्षिणं प्रकृत्य 'अतोऽन्यदार्त'मिति श्रुतेः साक्षिणोऽन्यत्साक्ष्यं सर्वं जगत्तुच्छं, न तु साक्षी । बाधाबधित्वात् भ्रमाधिष्ठानतयाऽज्ञातत्वाच्च तद्बाधग्राहकाभावाच्चेत्याद्यनुक्तसमुच्चयार्थोऽपिशब्दः । 'अथ यदल्पं तन्मर्त्य'मिति श्रुतेः परिच्छिन्नत्वतुच्छत्वयोः समव्याप्तत्वात्परिच्छिन्नत्वनिवृत्त्या तुच्छत्वनिवृत्तिरित्याह—व्यापकत्वादिति । सर्वं खल्विदं ब्रह्मेति सर्वात्मत्वोपदेशेन देशकालापरिच्छिन्नत्वादाकाशादीनां च

जगत्तुच्छमिति । जगन्मिथ्येत्यर्थः । आर्तशब्देन विनाशित्वोक्तावर्थान्मिथ्यात्वलाभः । आर्तं बाधेन पीडितमित्यर्थे मिथ्यात्वं शाब्दमेवेति भावः । बाधाबधित्वादिति । यद्विषयकभ्रमा बाधिका, तत्त्वादित्यर्थः । तथा च साक्षिणो मिथ्यात्वे बाधकभ्रमैव दुर्लभेति कुतो मिथ्यात्ववार्तेति भावः । भ्रमेत्यादि । अतत्त्वारोपरूपभ्रमस्य तत्त्वाज्ञानपूर्वकत्वनियमेनाज्ञानविषयत्वरूपादधिष्ठानत्वात् साक्षिणस्तात्त्विकत्वमित्यर्थः । ननु, माध्यमिकस्य शून्यवादिनो मते न तत्त्वभ्रमा बाधिका । सर्वस्यैव विचारासहत्वेन युक्तिबाध्यत्वात् । अत एव भ्रमो न तत्त्वाज्ञानप्रयुक्तः । तथा च पूर्वपूर्वभ्रमवासनामात्रादुत्तरोत्तरभ्रमः । न किञ्चित्स्थिरमुपादानं निमित्तं वास्ति । 'यत् सत्, तत् क्षणिक'मिति नियमाभ्युपगमात् । तथा च साक्षिण एव क्षणिकविज्ञानरूपस्य घटपटादिरूपत्वस्वीकारात् साक्षिणः घटाद्याकारस्येव घटादिरूपाकारेण साक्षिणोऽपि बाधः सम्भवति । तत्राह—तद्बाधग्राहकेत्यादि । घटाद्याकारे साक्षिसामान्याभावज्ञानं बाधकम् । तत्तेनैव गृह्यते अन्येन वा ज्ञानेन । नाद्यः । बाध्यमानेन तेन तद्ग्रहणेऽपि तत्सिद्ध्यसम्भवात् । नान्त्यः । तस्यापि घटवत् बाध्यमानत्वेन घटविषयकत्वासिद्ध्या घटज्ञानाभावविषयकबाधासाधकत्वात् ज्ञानान्तरस्य ज्ञानान्तररूपप्रत्यक्षतायास्त्वयानङ्गीकारात् ज्ञानस्य स्वात्मकप्रत्यक्षविषयत्वस्यैव त्वया स्वीकारादिति भावः । अल्पं परिच्छिन्नम् । मर्त्यं विनाशि, बाधरूपमृत्युग्रस्तं वा । अपरिच्छिन्नत्वात् देशकालनिष्ठाभावाप्रतियोगित्वात् ।

देशकालपरिच्छिन्नत्वेऽप्यापेक्षिकमहत्त्वेन व्यापकत्वोपचारात् । ननु, सर्वव्यापकत्वेन नित्यत्वाद्भावरूपत्वाच्चात्मा न दुःखनिवृत्तिरूपः । नापि सुखरूपः । सुखस्यानित्यत्वेन नित्यात्मस्वरूपत्वानुपपत्तेः । तथा चात्मस्वरूपो मोक्षोऽपुरुषार्थ एवेत्याशङ्क्य नेत्याह--हितत्वप्रयोगादिति । हितत्वं पुरुषार्थत्वम् । 'तदेतत्प्रेयः पुत्रात्प्रेयो वित्तात्प्रेयोऽन्यस्मात्सर्वस्मादन्तरतरं यदयमात्मे'ति 'यो वै भूमा तत्सुखं' एष एव परम आनन्दः' 'विज्ञानमानन्दं ब्रह्मे'त्यादिभिः श्रुतिभिः तस्य परमानन्दरूपत्वोपदेशात्। तस्य च नित्यत्वेऽपि लोके धर्मजन्यतत्तदन्तःकरणवृत्तिव्यङ्ग्यतया तदुत्पत्तिविनाशोपचारः। अज्ञानव्यवहितस्य च तस्याप्राप्तस्येव ज्ञानमात्रादविद्यानिवृत्त्या प्राप्तिरिव भवतीति तदुद्देशेन मुमुक्षुप्रवृत्युपपत्तिः । अध्यस्तस्य प्रपञ्चस्य दुःखरूपस्याधिष्ठानत्वात् स एवाभाव इति दुःखाभावरूपत्वेनापि तस्य पुरुषार्थता । ननु, मोक्षे सुखं संवेद्यते, न वा । नाद्यः । तदानीं देहेन्द्रियाद्यभावेन तद्व्यञ्जकाभावात्, व्यञ्जकाभावेऽपि तत्संवेदनाभ्युपगमे संसारदशायामपि तथा प्रसङ्गात् । न द्वितीयः । अपुरुषार्थतापत्तेः । ज्ञायमानस्यैव तस्य पुरुषार्थत्वात् । अत एव शर्करातद्भोजिनोरिवेति वैष्णवंमन्यानामुद्गार इति चेन्ने-

---

व्यापकत्वोपचारात् 'आकाशवत्सर्वगतो' वायुरसर्वत्रगो महा'नित्यादिश्रुतिस्मृत्यादिव्यवहारात् । सर्वव्यापकत्वेन कालतः सर्वव्यापकत्वेन सर्वदा सत्त्वेनेति यावत् । प्रेयः प्रियतरम् । अन्यस्मात् आत्मभिन्नात् । अन्तरम् आरोपितत्वेन बाह्यात् सर्वस्मात् दृश्यात् सत्यानन्दरूपत्वेन अधिष्ठानत्वात् यतोऽन्तरम् अतस्सर्वस्मात् स्वतादात्म्याध्यासेन प्रियादपि प्रियतममेतदित्यर्थः । यत् यः । भूमा अपरिच्छिन्नः । आनन्दयाति सर्वानानन्दयति । महाकाशस्य घटाकाशादाविव महानन्दस्य परिच्छिन्नानन्दे हेतुत्वमिति भावः । तत्तदन्तःकरणवृत्तीति । चन्दनादियोगजन्यमनोवृत्तीत्यर्थः । लोक इत्यनेनेदं सूचितं—सुखस्य स्वरूपेणाजन्यत्वेऽपि स्वावारकाज्ञानविरोधिविशिष्टरूपेण लोके काम्यत्वात् मुमुक्षोरपि पूर्णानन्दस्वरूपमोक्षस्यावारकमूलाज्ञानविरोधिविशिष्टतथा काम्यतेति । तदिदमुक्तं—तदुद्देशेन मुमुक्षुप्रवृत्तीति । इति इत्थमज्ञानविरोधिज्ञानविशिष्टरूपेण तदुद्दिश्य प्रवृत्तीत्यर्थः । स एव परमानन्दात्मैव । पुरुषार्थता काम्यता । ज्ञायमानस्येति । अनावृतसुखमेव काम्यते । अत एव तवावृतसुखं मया सम्पाद्यमिति केनचित्प्रतारितः पुरुषो वदति मास्तु मे तत्सुखमिति । शर्करेति । यथा शर्करा स्वरूपेण न सुखप्रकाशः । तत्प्रयोजकस्य शर्करासंवेदनस्याभावात् । किं तु तद्भोजिनस्तत्संवेदनवतः । एवं विष्णुभावापन्नस्य

त्याह—स्वतस्सिद्धभावादिति । स्वप्रकाशरूपज्ञानरूपत्वादित्यर्थः । यद्यपि संसारदशायामविद्यावृतस्वरूपत्वादात्मा परमानन्दरूपतया न प्रथते, तथापि तत्त्वविद्ययाविद्यानिवृत्तौ स्वप्रकाशतया स्वयमेव परमानन्दतया प्रकाशत इति न व्यञ्जकापेक्षा । ननु सुखस्य स्वप्रकाशज्ञानरूपत्वेऽपि नात्मरूपता । ज्ञानस्य धात्वर्थरूपतया क्रियात्वेन साश्रयत्वात् जानामीति प्रतीतेर्ज्ञानमहमस्मीत्यप्रतीतेश्च । तथा च कथमद्वैतवाद इत्याशङ्क्य नेत्याह—अनन्याश्रयत्वादिति । 'यत्साक्षादपरोक्षाद्ब्रह्म योऽयमात्मा सर्वान्तरः' 'सत्यं ज्ञानमनन्तं ब्रह्म' 'विज्ञानमानन्दं ब्रह्मे'ति श्रुतेः स्वप्रकाशज्ञानानन्दरूप एवात्मा अन्तःकरणाद्युपाधितादात्म्याध्यासेन च तद्वृत्तौ ज्ञानाध्यासाज्जानामीति तदाश्रयत्वप्रतीतिः । धात्वर्थत्वमुत्पत्तिविनाशवत्त्वं चान्तः

सुखरूपत्वेऽपि न सुखप्रकाशः । तत्संवेदनाभावात् । किं तु तद्भेदेनावस्थितस्य 'अयं विष्णुस्सकलकल्याणगुणो मत्सेव्य' इति संवेदनवतः । तस्मात् विष्णुभावो न मोक्षः । किं तु तत्सन्निधिस्थितस्य तत्संवेदनमिति । तदेतन्मतमाश्रिता माध्वाः वैष्णवंमन्या एव । न तु वैष्णवाः । 'एवमेकमिदं ब्रह्म न भेदि सकलं जगत् । वासुदेवाभिधानस्य स्वरूपं परमात्मनः ॥ तदेतदुपदिष्टं ते संक्षेपेण महामुने । परमार्थं सारभूतं यदद्वैतमशेषतः ॥ तद्भावभावनापन्नस्ततोऽसौ परमात्मना । भवत्यभेदी भेदश्च तस्याज्ञानकृतो भवेत् ॥' इति विष्णुपुराणाद्युक्तेः ब्रह्म वेद ब्रह्मैव भवतीत्यादिश्रुतेश्चेति भावः । प्रथते भाति । प्रकाशते संशयाद्यविषयत्ववान् । स्वयमेवेत्यस्य संशयाद्यविषयत्वेऽन्वयः । तथा च पूर्णानन्दस्य संसारकाले संशयादिविषयत्वमावरणप्रयुक्तम् । आवरणनिवर्तकवृत्तिनाशोत्पत्तिक्षणपर्यन्तक्षणत्रये संशयाद्यविषयत्वं तु तादृशवृत्तिप्रयुक्तम् । तदुत्तरकाले तु वृत्त्यभावेऽप्यावरणाभावादेव तदितिभावः । साश्रयत्वात् स्वसमानसत्ताकाश्रयत्वात् । अद्वैतेति । अद्वैतज्ञानेत्यर्थः । अन्तःकरणेति । आत्मनि मनस्तादात्म्याध्यासेनेत्यर्थः । तद्वृत्तौ तत्परिणामरूपायां वृत्तौ । ज्ञानाध्यासात् स्वधर्मत्वेन कल्पितस्यात्मस्वरूपस्य ज्ञानस्य तादात्म्याध्यासात् । धात्वर्थत्वेत्यादि । धात्वर्थत्वं जानातीत्यादिधातुवाच्यत्वम् । वृत्तेः वृत्त्यवच्छिन्नचितः । सुखादिज्ञानमपि सुखादिरूपवृत्त्यवच्छिन्नचिदेव । वस्तुतस्तु वृत्तेर्वर्तमानरूपसम्बन्धस्य असत्त्वापादकाज्ञानशून्यत्वविशिष्टचित इति यावत् । एतेन यस्य विषयस्य ज्ञानं, तदाकारवृत्त्यवच्छिन्नचित्, तस्य ज्ञानमिति वाच्यम् । तथा च सुखादिस्थले तथा न सम्भवतीत्यपास्तम् । ज्ञप्तीति । चिदित्यर्थः । स·

करणवृत्तेरेवेति ज्ञप्तिरूपमुख्यज्ञानस्य सर्वाधिष्ठानत्वेनान्याश्रयत्वाभावान्न द्वैतापत्तिः । तेन ज्ञानसुखात्मक आत्मा सत्यः, तद्भिन्नं च सर्वं जगदसत्यमिति सिद्धम् ॥ ९ ॥

ननु, सर्वस्य जगतस्तुच्छत्वे तन्निषेधेनात्मतत्त्वप्रतिपत्तिर्न स्यात् । न हि शशविषाणं निषिध्येत । क्वचित्प्रमितं क्वचिन्निषिध्यत इति न्यायात् । तथा च निषेधानुपपत्त्यैव न जगतस्तुच्छत्वमिति नेत्याह—

न चैकं तदन्यद्द्वितीयं कुतस्स्या-
न्न वा केवलत्वं न चाकेवलत्वम् ।
न शून्यं न चाशून्यमद्वैतकत्वा-
त्कथं सर्ववेदान्तसिद्धं ब्रवीमि ॥ १० ॥

एकत्वसङ्ख्यायोगि एकम् । तदपेक्षाबुद्धिजन्यद्वित्वसङ्ख्यायोगि द्वितीयम् । तत एकाभावे द्वितीयं कुतः स्यात् । द्वितीयं च तृतीयादीनामप्युपलक्षणम् । नन्वेकमेवाद्वितीयमिति श्रुत्या एकत्वं प्रतिपाद्यते। नेत्याह—न वा केवलत्वमिति । केवलत्वम् एकत्वम् । तस्याविद्यकत्वात् । यद्यात्मन एकत्वं श्रुत्या न प्रतिपाद्यते, तर्हि प्रत्यक्षादिप्रमाणवशादनेकत्वमेव स्यादिति चेन्नेत्याह—न चाकेवलत्वमिति । अकेवलत्वम् अनेकत्वम् । 'नेह नानास्ति किञ्चन ए-

---

र्वाधिष्ठानत्वेन स्वान्यसर्वाधारत्वेन । अन्याश्रयत्वेति । अन्याश्रितत्वेत्यर्थः । ज्ञानसुखात्मकः ज्ञप्तिसुखस्वरूपात्मकः ॥ ९ ॥

क्वचित् प्रमितमित्यादि । प्रतीयमानं सर्वं सत्यमेव । परं तु एकत्र प्रमितमन्यत्र निषिध्यत इत्यन्यथाख्यातिविशेषवादिनां मतम् । तदपेक्षाबुद्धीति । नानैकत्वसापेक्षबुद्धीत्यर्थः । अयमेकोऽयमेक इत्येकत्वद्वयविषयकज्ञानेतियावत् । आविद्यकत्वात् 'अतोऽन्यदार्तमि'ति श्रुतिबाधितत्वात् । अनेकत्वं द्वित्वसम्बन्धित्वम् । इह ब्रह्मणि नाना तद्भिन्नं किञ्चन नेत्यर्थः । 'विनञ्भ्यां नानाऽौ न सहे'त्यनेन सूत्रेण नसहशब्दार्थे भेदादौ वर्तमानाभ्यां विनञ्शब्दाभ्यां नानाञ्प्रत्ययौ भवत इत्यर्थकेन नञ्शब्दात् स्वार्थकनाञ्प्रत्ययान्तात् नानापदनिष्पत्तेस्तस्य भेदार्थकत्वात् । ऐतदात्म्यं एतदात्मकं, अशून्यं सत्यत्वादियुक्तम् ।

कमेवाद्वितीयं अथात आदेशो नेति नेती'त्यादिश्रुतिभ्यः । तर्हि सर्वप्रतिषेधाच्छून्यमेव स्यादिति नेत्याह—न शून्यमिति । 'असन्नेव स भवति । असद्ब्रह्मेति वेद चेत् । अस्ति ब्रह्मेति चेद्वेद । सन्तमेनं ततो विदु'रिति । सत्यं ज्ञानमनन्तं ब्रह्म । 'सदेव सोम्येदमग्र आसी'दित्युपक्रम्य ऐतदात्म्यमिदं सर्वं तत्सत्यं स आत्मा तत्त्वमसी'त्यादिश्रुतिभिः सत्यत्वप्रतिपादनात् सर्वभ्रमाधिष्ठानत्वात्सर्वबाधावधित्वाच्च । तर्हि सत्यत्वज्ञानत्वादिधर्मवदपि स्यात् । नेत्याह—न चाक्षुष्यमिति । एकमद्वितीयमिति पदद्वयेन सर्वभेदप्रतिषेधेऽप्येवकारेण धर्मधर्मिभावादिभेदप्रतिषेधात् । सर्वत्र हेतुमाह—अद्वैतकत्वादिति । द्विधा इतं द्वीतं, तस्य भावो द्वैतम् । तदुक्तं वार्तिके—'द्विधेतं द्वीतमित्याहुस्तद्भावो द्वैतमुच्यते । इति ।' न विद्यते द्वैतं द्विधाभावो यत्र तदद्वैतमित्यक्षरार्थः । 'सलिल एको द्रष्टाद्वैत'इति श्रुतेः । प्रतियोगिज्ञानस्यैव लाघ-

---

सर्वभेदेति । समानाधिकरणातीयप्रतियोगिकभेदेत्यर्थः । धर्मधर्मिभावादीति । धर्मधर्मिभावादिप्रयोजकौ यौ भेदाभेदौ, तत्प्रतिषेधादित्यर्थः । भेदमात्रे अभेदमात्रे वा स्वीक्रियमाणे सामानाधिकरण्यप्रत्ययानुपपत्तेः । अभेदमात्रे स्वीक्रियमाणे धर्मधर्मिभावानुपपत्तेः भेदाभेदौ स्वीक्रियेते । तत्र भेदस्य धर्मिप्रतियोगिभावादिसापेक्षत्वेन संसृष्टत्वेन च मिथ्यात्वादभेदस्यापि भेदाभावरूपत्वादिरूपेण तादृशत्वादेवकारेण निषेधः । तदुक्तं खण्डने—एकमद्वितीयमित्युक्त्वा यदेवकारमादत्ते श्रुतिस्तदात्यन्तिकाद्वैतं प्रतिपादयितुमिति । द्विधाभावःप्रकारद्वयसत्ता । रज्ज्वधिष्ठानसंसर्गस्य घटादिरूपारोप्यस्य च 'सन् घट' इत्यादिभ्रमसिद्धस्य च सत्ता यत्र शुद्धे ब्रह्मणि न विद्यते, तदद्वैतम् । तस्मादिति हेत्वर्थः । सलिल इति । आचारार्थिकक्विबन्तत्वात् सलिलमिवाचरतीत्यर्थः निर्मल इति यावत् । अत एव न पुंसकत्वापि सलिलपदस्य पुंस्त्वोपपत्तिः । प्रतीयोगीत्यादि । प्रमितमेव निषिध्यत इति यदूषणमुक्तं, तत् समाधत्ते—प्रतियोगीति । ज्ञानस्य ज्ञानत्वेन । लाघवेन प्रमात्वानिवेशलाघवेन । न च विशेषणतावच्छेदकप्रकारकधीविषया प्रतियोगिज्ञानस्य कारणत्वमिति वाच्यम् । तत्राप्रमात्वनिश्चये अभावज्ञानानुदयात् अनावृतेन प्रतियोगिप्रमात्वेन हेतुत्वोक्तेराप्रश्यकत्वमिति वाच्यम् ।

वेनाभावबुद्धौ कारणत्वात् द्वैतस्यानिर्वचनीयत्वाङ्गीकारेण प्रत्यक्षादिवेद्यत्वान्निषेधोपपत्तिरित्यर्थः । तर्ह्येतादृश आत्मांगुलिनिर्देशेन प्रतिपाद्यतामिति । नेत्याह—कथं ब्रवीमीति । किमाक्षेपे । अद्वैतकत्वेन वागविषयत्वात् । 'अवचनेनैव प्रोवाच यतो वाचो निवर्तन्ते । अप्राप्य मनसा सह । न विज्ञातेर्विज्ञातारं विजानीया'दित्यादिश्रुतिभ्यः । वागविषयत्वे वेदान्तानां कथं तत्र प्रामाण्यमिति चेन्न । अविषयेऽप्यात्मनि तदाकारवृत्तिमात्रेण तदविद्यानिवर्तकत्वादित्याह—सर्ववेदान्तसिद्धमिति । तथा च श्रुतिः—'यस्यामतं त-

---

तत्र प्रमात्वनिश्चयेऽसत्यप्यभावज्ञानोदयेनानावृतप्रमात्वेन हेतुत्वास्वीकारात् अनावृतप्रमात्वयप्रातीतिकसंसर्गस्य भ्रमेऽपि सत्त्वेनाप्रमात्वनिश्चयाभावकाले भ्रमादृष्यभावबुद्धिसम्भवेन च भ्रमसाधारणकारणतासम्भवेनास्मदिष्टाविघाताच्च ज्ञानस्यैव कारणत्वात् द्वैतस्य प्रत्यक्षादिवेद्यत्वाच्च निषेधोपपत्तिरिति योजना । ननु प्रत्यक्षादिप्रमाणवेद्यस्य कथं निषेधस्तत्राह—अनिर्वचनीयत्वाङ्गीकारेणेति । मिथ्यात्वस्वीकारेणेत्यर्थः । तथा च प्रत्यक्षादीनां न तात्त्विकं प्रामाण्यम् । येन निषेधविरोधः । किं तु व्यावहारिकमिति भावः । अंगुलिनिर्देशेन प्रमाणफलविषयतया । अद्वैतकत्वेन वागविषयत्वादिति । अद्वैतकत्वात् स्वसमानसत्ताकद्वैतविशिष्टदृश्याभिन्नत्वे वागादिप्रमाणफलाविषयत्वमित्यर्थः । अवचनेन वचनं विनैव । प्रोवाच ज्ञापितवान् । वचनस्य मुख्यवृत्तेर्ब्रह्मण्यसम्भवात् तत्र तत्फलाविषयत्वाच्च लक्षणाद्वारा बोधनप्रकारस्य दुर्बोधत्वाच्च गुरुणा शिष्यपृष्टेन वचनं नोक्तम । तादृशं च गुरोरभिप्रायमजानन् शिष्यः पृष्टवान् । ततो गुरुराह—'ब्रूमःखलु उपशान्तस्वभावो ह्ययमात्मे'ति । तस्यायमर्थः—ब्रूमो वचनमनुक्त्वैव त्वां ज्ञापयामः । अयमात्मा वचनमुख्यवृत्त्यविषयत्वात् प्रमाणफलाविषयत्वाच्चोपशान्तस्वभावः । स्वाभाविकेन द्वैतसम्बन्धेन विशिष्टात् दृश्याद्विलक्षण इति । निवर्तन्ते फलविषयतया बोधनासमर्थाः । अप्राप्य फलविषयत्वद्वारकसम्बन्धेनासम्बध्य । विज्ञातेः मनोवृत्तिरूपज्ञानस्य । विज्ञातारं स्वप्रकाशसाक्षिणम् । अविषये फलाविषये । तदाकारेति । शुद्धात्माकारेत्यर्थः । तथा च तत्र प्रामाण्यं तदाकारप्रमाकरणत्वम् । न तु तद्विषयकफलकरणत्वमिति भावः । तदुक्तं 'ब्रह्मण्यज्ञाननाशार्थं वृत्तिव्याप्यत्वमिष्यते । फ-

स्य मतं मतं यस्य न वेद सः । अविज्ञातं विजानतां विज्ञातमविजानताम् । यन्मनसा न मनुते येनाहुर्मनो मतम् । तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासत'इत्यादिरविषयत्वमात्मनो दर्शयति । तदेवं वेदान्तवाक्यजन्याखण्डाकारवृत्त्या अविद्यानिवृत्तौ तत्कल्पितसकलानर्थनिवृत्तौ परमानन्दरूपस्सन् कृतकृत्यो भवतीति सिद्धम् ॥

न स्तौमि तं व्यासमशेषमर्थं समग्रसूत्रैरपि यो बबन्ध ।
विनापि तैस्सङ्ग्रथिताखिलार्थं तं शङ्करं नौमि सुरेश्वरं च ॥ १ ॥
लघुरपि बहुर्थवहश्चिन्तामणिरिव निबन्धोऽयम् ।
मधुसूदनेन मुनिना विहितो गुणिनां विनोदाय ॥ २ ॥
यदत्र सौष्ठवं किञ्चित्तद्गुरोरेव मे न हि ।
यदत्रासौष्ठवं किञ्चित्तन्ममैव गुरोर्न हि ॥ ३ ॥

लब्ध्याप्यत्वमेवास्य शास्त्रकृद्भिर्निराकृतम् ॥ इति । वेदान्तसिद्धं वेदान्तवाक्यजन्यवृत्तिप्रयुक्ताज्ञानतत्प्रयुक्तोच्छेदवत् । अमतं परोक्षप्रमाणफलाविषयत्वेन ज्ञातम् । मतं उक्तफलविषयत्वेन ज्ञातम् । विजानतां प्रत्यक्षप्रमाणफलविषयत्वेन जानतां पुरुषाणाम् । अविज्ञातं चैतन्याविषयत्वरूपस्वप्रकाशत्वेनाज्ञातम् । अविजानतां उक्तफलविषयत्वेनाजानताम् । विज्ञातं उक्तस्वप्रकाशत्वेन ज्ञातुं शक्यम् । मनुते फलविषयीकरोति । तदेव फलाविषयीभूतम् । उपासते श्रुत्यादिप्रमाणेन तत्तद्गुणवत्तया फलविषयरूपेण जानन्ति । अविषयत्वमिति । चिद्रूपस्यैव मुख्यज्ञानरूपत्वेन तदीयसम्बन्धस्यैव मुख्यविषयतारूपत्वेन तत्सामान्याभावं फलविषयत्वनिराकरणद्वारा दर्शयति । वृत्तेराकाराख्यसम्बन्धस्तु न मुख्यविषयतेति तस्याः ब्रह्मणि स्वीकारेऽपि न विरोध इति भावः । विनापि तैरिति । सूत्रशब्दस्य तन्तौ सङ्ग्रहवाक्ये च प्रयोगात् श्लेषमूलको व्यतिरेकालङ्कारोऽयम् । सूत्रैरपि व्यासस्सर्वार्थान् न बबन्ध न सङ्ग्रहीतवान् । शङ्कराद्याचार्यास्तु सूत्राण्यनाश्रित्यापि सर्वार्थान् सङ्ग्रहीतवन्तः सूत्रानुक्तार्थानामपि वक्तृत्वादित्यर्थः । लघुः

बहुयाचनया मयाऽयमल्पो बलभद्रस्य कृते कृतो निबन्धः ।
यददुष्टमिहास्ति यच्च दुष्टं तदुदारास्सुधियो विवेचयन्तु ॥ ४ ॥

इति श्रीपरमहंसपरिव्राजकाचार्यश्रीविश्वेश्वरसरस्वतीभगवत्पाद-
पूज्यशिष्यश्रीमधुसूदनसरस्वतीविरचितः सिद्धान्तबिन्दु-
नामग्रन्थः समाप्तः ।

ॐ

अतिस्वल्पः । बह्वर्थवहः प्रापकः । निबन्धः ग्रन्थः । अत्र ग्रन्थे । सौष्ठवं गुणवत्त्वम् । बलभद्रस्य आचार्याणां सेवकब्रह्मचारिणः ॥

श्रीनारायणतीर्थानां गुरूणां चरणांबुजम् ।
नमामि वाङ्मनःकायैरनन्यशरणैस्सदा ॥
भजे श्रीपरमानन्दसरस्वत्याः पदांबुजम् ।
यदेवालम्ब्य संसारसागरो गोष्पदीकृतः ॥

इति श्रीब्रह्मानन्दसरस्वतीविरचिता
सिद्धान्तबिन्दुटीका
न्यायरत्नावली
समाप्ता

ॐ

